00044435

NOT TO BE ISSUED
OUT OF THE LIBRARY.

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018

# BIBLIOTHECA INDICA;

A

# COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES,

Nos. 539, 546, 554, 568, 580, and 583.

44435 ac

# THE NIRUKTA.

WITH COMMENTARIES.

EDITED BY

PAṆḌIT SATYAVRATA SĀMAŚRAMĪ.

12 VOL. III.

CALCUTTA:

PRINTED BY J. W. THOMAS, BAPTIST MISSION PRESS.

1886.

00044435

# निरुक्तम्।

## ( निघण्टु-भाष्यम् )

जम्बूमार्गाश्रमवासि-भगवद्दुर्गाचार्य-विरचितया

ऋज्वर्थाख्यटीकया सहितम्।

श्रीलश्री

वङ्गदेशीयासियातिक्समाजाभ्यर्थनया व्ययेन च

काश्यधीतवेदादि-वङ्गसामगेन

श्रीसत्यव्रतसामश्रमिभट्टाचार्य्येण

सम्पादितम्।

तृतीयो भागः।

कलिकातानगर्याम्

वाणिस्खमिशनयन्त्रे मुद्रितम्।

शकाब्दाः १८०८॥

## ॥ अथ पञ्चमाध्यायः ॥

तत्र,

### ॥ प्रथमः पादः ॥

ॐइम्। सप्ति मविन्दच्चरणे नदीनाम्। संस्नातं मेघम्। वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा*। वोढृतमो† ह्वानानां स्तोमो दूतो हुवन्नरो‡ नरा मनुष्या नृत्यन्ति कर्मसु दूतो जवतेर्वा द्रवतेर्वा वारयतेर्वा (दूतो देवानां मसि मर्त्यानां मित्यपि निगमो भवति।§) वावशानो वष्टेर्वा वाश्यतेर्वा। सप्त स्वसॄरुषीर्वावशान इत्यपि निगमो भवति। वार्यं वृणोतेरथापि वरतमम्। तद्वायं वृणीमहे वरिष्ठं गोपयत्यम्। तद्वायं वृणीमहे वर्षिष्ठं गोपायितव्यं गोपायितारो॥। यूयं स्थ युष्मभ्य मिति वान्य इत्यन्ननामाध्यानीयं भवति। आमचेभिः सिच्चता मद्य मन्धः। आसिच्चतामचैर्मदनीय¶ मन्धोऽमचं पाच ममा अस्मिन्नदन्त्यमा

---

* "ऊवं नरा" क, ख, ग।

† "वोळ्हृतमो" क, ख, ग।

‡ "ऊवं नरा" क, ग। "ऊवन्नरो" च।

§ वन्धनोचिक्लान्तर्गत मेतन्न दृश्यते क-ख-ग-पुस्तकेषु (ऋ० सं० ७, ५, ३९, १)।

॥ "गोपितारो" क, ख, ग।

¶ "मद्य" क, ख, ग।

पुनरनिर्मितं भवति पाचं पानात्तमोऽप्यन्ध उच्यते नास्मिन् ध्यानं भवति न दर्शन मन्धन्तम इत्यभिभाषन्तेऽय मपीतरोऽन्ध एतस्मादेव। पश्यदक्षण्वान् न वि चेतदन्ध इत्यपि निगमो भवति ॥ १ ॥

"सखिम्(१)"—इति*। एतदनवगतम्। अर्थाप्रतीतिरप्यनवगम्य इत्युच्यते। लक्षणासम्पन्नश्च संस्कारः खल्वपि अविज्ञात मित्युच्यते। तत्रैवं सति, क्वचित्प्रकृत्यादेः संस्कारस्यानवगमः; क्वचिदर्थाप्रतीतिरेव; क्वचिदुभयस्याप्यनवगमः, यथास्मिन्नेव सखि मिति; न विज्ञायते किं मण्डूकं भवति? प्रकरणादत्र मेघाभिधेयम्; अन्यत्रान्योऽपि कश्चित् स्यात्, प्रकरणविशेषादेव। एवं सर्वत्रैवोपेक्षितव्यम्। प्रकरणसामर्थ्याच्छब्दोऽप्यर्थान्तरं भजते। "सखि मविन्दच्चरणे नदीना मपा०—०जानादहीनाम्" †। विश्वावसोर्देवगन्धर्वस्येय मार्षम्। घर्मोत्सादने विनियुक्ता। तत्रोक्तं परिषिक्ते गन्धर्वनामभिरुपतिष्ठन्त ऋत्विजो यजमानस्येति। तासा मुपस्थानर्चा मियं मध्ये मैत्रायणीयके। 'सखि' "संख्यातम्", अङ्गैः परिवेष्टितं, सर्वतः परिप्लुतं, धौतं वा "मेघम्", 'अविन्दत्' अलभतेन्द्रः। क्व पुनरलभत? 'चरणे नदीनां' यत्र नदना आपश्चरन्ति, गच्छन्ति, तत्रालभत; अन्तरिक्षलोके इत्यर्थः। आह;— खल्वानन्तरं किं मकरोत्?

---

* १भा० ४०१ ४० ४अ० २ख० (१), किञ्च ४० ४४० १५ पं०।

† "सखि मविन्दच्चरणे नदीना मपा इणोदुर्वो अमत्रजानाम्। प्रासां गन्धर्वो अमृतानि वोचदिन्द्रो दक्षं परि जानादहीनाम्॥"—इति ऋ० सं० ८, ७, १७, १।

दति । उच्यते ;— 'अपावृणोत्' अपावृतवान्, उद्घाटितवानित्यर्थः । 'दुरः' द्वारः । आह ;— कस्य ? उच्यते ;— 'अश्मव्रजानाम्' अपामश्मा मेघः, तं मधि या व्रजति, स च यासां व्रजभूतो गोष्ठभूतः, ता अश्मव्रजा आपः ; तासां निर्गमनद्वाराणि अपावृणोत् । या एता एवंलक्षणा आपः, 'आसाम्', अस्य च इन्द्रस्य 'गन्धर्वः' विश्वावसुः 'प्र वोचद्',—'अमृतानि' नामानि, छान्दसस्तुतियुक्तानि ; तानि हि नित्यत्वादमृतानि । आह ;— कस्मात्पुनरस्येन्द्रस्यामृतानि प्रावोचदासाञ्चापाम्? इति । उच्यते, इतः ;— यस्मादसाविन्द्रः 'दक्षं' दातारं मेघम् । अयम् आसाम् 'अहीनाम्' अयनानाम्, अपां द्वारेषु अपावृतेषु, दानाय समर्थो भविष्यति ;—इत्येवं 'परि जानात्' परिज्ञातवान्। परिज्ञाय च 'अपावृणोत् दुरोऽश्मव्रजानाम्'। तस्मादस्येन्द्रस्यामृतानि नामानि प्रावोचदङ्गिश्चानेन प्रकारेणेन्द्रेण सर्वं मेवेदं जगद् ध्रियत इति आसा मपि अनेन हेतुना प्रावोचदिति । एव मेतस्मिन् मन्त्रे 'चरणे नदीनाम् अविन्दत्' अपावृणोच्च दुरोऽश्मव्रजानाम्, दक्षञ्च परिजानात्'—इत्येकवाक्यतार्थसम्बन्धात् "सक्षि"-शब्दो मेघविशेषणम् उपपद्यते ॥

अथ वा अय मस्य मन्त्रस्य पादव्यत्ययेनार्थः स्यात् ;— संज्ञातं मेघ मविन्द दक्षभतेन्द्रः पर्येष्यमाणः, क्वाविन्दद्? चरणे नदीनाम्, अपाम्, अन्तरिक्षलोके। लब्ध्वा च स एव इन्द्रः, तं मेघं, दक्षं दातारम्, अहीनाम् अपां परिजानात्। परिज्ञाय च समर्थोऽय मिति ततस्तस्य द्वाराण्यपावृणोत् । अश्मव्रजाना मपा मधो निर्गमनाय। तत एतानि निर्गतानि, अमृतानि उदकानि, सस्य-सम्पत्कराणि प्रावोचदिव प्राकथय-

दिव ;— अमाविन्द्रो गन्धर्वः, आसां प्रजानां जीवभ्व मेभिरुदकैरस्माद्वृत्ते रिति। "इन्द्रो गन्धर्वः, तस्य मरुतोऽप्सरसः"—इति श्रूयते *। तस्मादिन्द्रस्यापि गन्धर्वत्व मुपपद्यत एव ; स च गोः† वज्रस्य धारयिता इति गन्धर्वः ‡ ॥

"वाहिष्ठः(१)"—इति §। एतदनवगतम्। "वोढृतमः"—इत्यवगमः। "वाहिष्ठो वां०—०भूत्वश्विना" ॥। गाथची। विश्वमनसो वैयश्वस्येय मार्षम्; पितुर्वा व्यश्वस्य। प्रातरनुवाकाश्विनयोः शस्यते। 'नरा' हे नरौ! सर्वेषा मेव वोढृणां स्तोमानाम्, आङ्गात्तृणाच्च। य एव एष 'वाहिष्ठः' अतिशयेन वोढा, आङ्गात्तमः, अय मेव 'दूतः' इव युवां 'ऊवत्' आङ्गयदित्यर्थः। योऽय मेवंलक्षणः 'सोमः' अस्मत्प्रेरितः, स नित्यकाल मेव 'युवाभ्यां' 'भूतु' भवत्वित्यर्थः। हे 'अश्विना' अश्विनौ! इति सम्बोधनम्। 'स्तोमो दूतः'—इत्येताभ्यां समानविभक्त्यन्तत्वाद् "वाहिष्ठ"-शब्दः सोमविशेषण मित्युपपद्यते ॥

निगमप्रसक्त मित्युच्यते ;—"मनुष्याः" अपि हि "नराः" उच्यन्ते ; ते हि "नृत्यन्ति" गात्राणि, पुनः पुनः प्रक्षिपन्ति "कर्म्मसु" उपस्थितेषु तान्यनुतिष्ठमानाः ॥

---

* "गोर्यज्ञस्य धारयितेन्द्रः। * * *। गम्यते अदैयति छिनत्ति देवशत्रूनिति गन्धर्वः इन्द्रः।"—इत्यादि द्रष्टव्यम्। १भा० ७७सू० २१ पं०।

† गौः—१भा० ६, ३२, ७७, २४५, २७८, ४०२। २भा० १७५, २११, ४७१। प० ६च० १पा० २ख०, १२च० १पा० ७ख०।

‡ "गान्धर्वी"-शब्दार्थो द्रष्टव्यः। १भा० १च० ११ख० (६)।

§ १भा० ४०५सू० ४पं०।

॥ "वाहिष्ठो वां रथानां सोमो दूतो ऊवध्न्या। युवाभ्यां भूत्वश्विना ॥"—इति ऋ० सं० १, २, २९, १।

"दूतो(१) जवतेर्वा गत्यर्थस्य"*; स हि गच्छति। "द्रवतेर्वा" गत्यर्थस्यैव। "वारयतेर्वा"; स हि वारयत्यनर्थान्॥

"वावशानः(४)"—इति अनवगतम्†। "वष्टेर्वा" कान्त्यर्थस्य, "वाशतेर्वा" शब्दार्थस्य वावशानः स्यात्। "सुप्रसद्मरूषीर्वावशानः ०—०पूषणस्य"‡। चितस्याग्नेयेय मार्षम्। आग्नेयी। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। 'सप्त' 'स्वसृः' स्वसारो भगिन्य इव पाङ्क्तर्चिषः समानजन्मत्वात्। अथवा सह सर्पणात् स्वसारः; ता हि सह सर्पन्ति 'अरूषीः' अरोचनाः, दीप्ता इत्यर्थः। या एवंलक्षणाः अर्चिषः, ताः, अग्निः 'वावशानः' कामयमानो वावश्यमानो वा, शब्दं कुर्वाणः स 'विद्वान्' आत्मीय मधिकारान् जानानः, 'मध्वः' घृतस्य हविषः पूर्णः, 'उज्जभार' ऊर्द्धं हृतवानेषां लोकानां 'दृशे कं' दर्शनायेत्यर्थः। एवं ता ऊर्द्धं ऊत्वा दर्शन मिव्यञ्जयित्वा जनानाम् 'अन्तः' आदित्यस्य मध्ये यदन्तरित्तं तत्र, 'येमे' तत्रोपनियमितवान् तद्धविः 'पुराजाः' अग्निः; स हि सर्वदेवेभ्यः प्रथम एव जातः§,। 'दृक्षन्' 'वन्निं' रूपं 'पूषणस्य' पूष्णः, आदित्यस्य। कथं नामाग्नावादित्यो दीप्तरूपः स्यात्? अतोऽन्तरादित्यस्य येमे। तद्वा-

---

* १भा० ४०५ष्ट० ८पं।

† १भा० ४०५ष्ट० ९पं।

‡ "सुप्रसद्मरूषीर्वावशानो विद्वान्मध्व उज्जभारा दृशे कम्। अन्तर्यमे अन्तरिक्षे पुराजा दृक्षन् वन्निं मविदत् पूषणस्य॥"—इति ऋ० सं० ७, ५, ३६, ५।

§ तथा चैतरेयकम्,—"अग्निर्वै देवयोनिः"—इति ३, १,३। किञ्च "अद्य मस्मि ३ १२ ३ १ ३ १ २ ३ १ १ ३ १ २ ३ १ १
प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम।"—इति सा० आ०, आर० १, १, ९।

सावेत मर्थम् 'अविदत्' अलभत इत्यर्थः। स एव दीप्तरूप आदित्यः संवृत्त इत्यभिप्रायः॥ एव मत्र "स्वमूर्वावज्ञानः"—इत्यनेन सामानाधिकरण्याच्छब्दसारूप्याच्च "वावज्ञाने"-इत्यस्य कान्त्यर्थत्वं शब्दार्थत्वञ्च उपपद्यते॥

"वार्यम्(५)"—इति * अनवगतम्। वृणोतेर्यद्वरयितव्यं भवति, तद्वार्यमित्युच्यते। अथापि कदाचिद् वार्यशब्देन यद्वरतमं श्रेष्ठतमं किञ्चिद्भवति, तदुच्यते। "तद्वार्यं वृणीमहे०——०यदर्यमा" †। विश्वमनस इय मार्षम्। मैत्रावरुणे सूक्ते। 'तद्वार्यं वृणीमहे' वरयितव्यं वरणार्हं धनं वृणीमहे। हे स्तोतारः! 'वरिष्ठं', 'गोपयत्यं' "गोपायितव्यं", यद्रक्षणार्हं मित्यर्थः। अथ वा गोपयत्यं गोपितारो यस्य धनस्य यूयं भविष्यथ, तद्वृणीमहे। अथ वा युष्मभ्यं यौष्माकीणं यद्भवति, तद्वृणीमहे। किञ्च; नित्यकाल मेव मित्रावरुणार्यमाणः 'यत्' 'पान्ति' रक्षन्तीत्यर्थः, तद्वृणीमहे। एव मत्र च मित्रावरुणार्यमाणो यत् पान्ति इत्यनेन सम्बन्धात् "वार्य"-शब्दो धनविशेषण मित्युपपद्यते॥

"अन्धः(६)"—इति‡। अनेकार्थ मनवगतम्। आध्यानीय मित्यर्थप्रतीतिः। प्रार्थनीय मन्नं भवति सर्वस्यैव। "अध्वर्यवो भरतेन्द्राय ०——०देष वष्टि"§। गृत्समदस्येय मार्षम्। राज्ञिपर्याये श्रस्यते।

---

* १ मा० ४०५ पृ० १५ पं०।

† "तद्वार्यं वृणीमहे वरिष्ठं गोपयत्यम्। मित्रो यत् पान्ति वरुणो यदर्यमा॥"—इति ऋ० सं० ६, ९, २२, २।

‡ १ मा० ४०६ पृ० २ पं०।

§ "अध्वर्यवो भरतेन्द्राय सोम मामत्तेभिः सिञ्चता मध्व अन्धः। कामी हि वीरः सदमस्य प्रीतिं जुहोत इष्णे तदिदेष वष्टि॥"—इति ऋ० सं० २, ६, १३, १।

होतुः शस्त्रे विनियुक्ता। अस्यैव च शस्त्रस्य याज्यैषा। हे 'अध्वर्यवः!' 'भरत' प्रापयतेमं 'सोमम्', एतस्माद्धविर्द्धानादुत्तरवेदिम्, 'इन्द्राय' इन्द्रार्थम्। अथ वा 'भरत' धारयताग्नेरुपरि। ततश्चैनम् 'अमत्रेभिः' अमत्रैः पात्रैः, एभिः सोमचमसैः, वषट्कारे प्राप्ते 'आ सिञ्चत' तस्मिन्नग्नौ। 'मद्यं' मदनीयम्, एतत्सोमाख्यम् 'अन्धः'। कस्मात् पुनरेवं ब्रवीमि? उतः— यस्मात् 'कामो हि वीरः' कामयत वीरः इन्द्रः 'अस्य' सोमस्य 'मदं' सदैव, नित्यकाल मेव 'पीति' पान मित्यर्थः। तस्मात् कारणात् 'जुहोत', तस्मै 'वृष्णे' वर्षित्रे इन्द्राय, एतं सोमम्। किमेत मेव केवलं सोम मेष कामयते? ने त्युच्यते;— 'तदिदेष वष्टि' तत्तत्सोमप्रदान मेष इन्द्रो वष्टि कामयत इत्यर्थः; न केवलं रात्रिपर्यायेष्वित्यर्थः। तस्मादासिञ्चत इमं सोमं मा विलम्बध्व मित्यभिप्रायः। एव मत्र दानसम्बन्धात् "अन्धः"-शब्दो-ऽन्नार्थ उपपद्यते। पठित मपि चान्ननामसु * अनेकार्थत्वात् तु सन्दिह्यते इत्येष निगम उपात्तः॥

निगमप्रसक्त मुच्यते।—"अमत्रं पात्रम्; अमा अस्मिन् अदन्ति" अश्नन्तीत्यर्थः। अमा-शब्देन पुनर्यदनिर्मितपरिमाणं किञ्चिद् भवति, तदुच्यते; न हि तेषां परिमाण मस्ति, यावन्तस्तस्मिन्नदन्ति। "पात्रं पानात्" पीयते हि तेन॥

तमोऽप्यन्ध उच्यते। किं कारणम्? "नास्मिन्" "ध्यानं" दर्शनं ह्रतं "भवति"' चक्षुषो दृष्टि-निरोधाल्लौकिका अपि दर्शननिरोधे सति "अन्धन्तम इत्यभिभाषन्ते"। "स्त्रियः सतीस्ताँ उ मे०—०

---

* १ भा० १०४ ४० (१)।

पिता सन्"*। अस्यवामीये। त्रायतेः पालनार्थस्याच स्त्री-शब्दो निरुच्यते। पालयित्र्यः एवैताः सत्याः कृत्स्नस्य जगतः। एत एव रश्मयो नाड़ीभिः आध्यात्मिकीभिः अनुप्रविश्य प्राणिशरीरेष्वन्नपक्तिं कुर्वन्ति, ततः स्थितिरुपजायते; एत एव वर्षप्रदानेन कृत्स्नं जगत् त्रायन्ते; तस्मात् त्राणात् 'स्त्रियः' एताः। 'नान्'—इति नकारान्तं पदम्। 'उ'—इति पदपूरणे एव। तानेवंलक्षणान्रश्मीन् पालयितॄन् सतः। 'मे' ममेति मन्त्रदृगात्मानं निर्दिशति। ममैतान् पुंस आहुः। एत एव रश्मयो 'बहुप्रजानाः' इत्येवं ब्रह्मविदः आहुः। एत एवान्नपत्त्यादिनोपकारेणोपकुर्वन्ति। जगत्त्रायन्ते एत एव बुद्धेः सर्वार्थप्रकाशित्वेनोपकुर्वन्तीत्यभिप्रायः। आदित्यान्तरपुरुषो हि बुद्ध्यधिदेवता, तदवयवभूताश्च रश्मयः, तेन ह्यन्तर्गता आध्यात्मे पुरुषस्य विज्ञानम् उपहरन्ति। अतस्तेषां बहुप्रजानत्व मुपपद्यते। आह;— कः पुनरेतान् रश्मीनेवङ्गुणयुक्तान् पश्यतीति? 'पश्यदक्षण्वान् न वि चेतदन्धः' यो हि अक्षण्वान् भवति, दर्शनवान्, विज्ञानवान्, वेदार्थविज्ञानवान्, वेदार्थविज्ञानेनोपजनितप्रज्ञः, स एव ताभ्यां गुणाभ्यां युक्तान् पश्यन्नास्ते नित्यकालं नित्ययुक्तत्वात्। इतरस्तु योऽन्धः अध्यानवान्, अश्रुतवेदोपनिषत्कः, स मन्दबुद्धित्वात् 'न विचेतत्' नैतान् याथात्म्यतः पश्यति, न विजानातीत्यर्थः। यः पुनः एवम् एतान् याथात्म्यतः पश्यति, स एव 'कविः' क्रान्तदर्शनो भवति, परिनिष्ठितविद्य-

---

* "स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान् न वि चेतदन्धः। कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात् स पितुष्पितासत्॥"—इति ऋ० सं० १, १, १७, १।

इत्यर्थः। स च परिनिष्ठितविद्यत्वेनैव 'पुत्रः' पुरुणो बहुनोऽसस्तातः। यस्याय मेवङ्गुणयुक्तः, स 'ईम्' आ चिकेत'। 'ईम्'—इति पदपूरणः। 'आ चिकेत' स एवैतानेवम् आभिमुख्येन यथावत् पश्यति; नेतरो मूढः। यश्चैतानेवं पश्यति, स एव 'पितुः' अपि 'पिता' भवतीत्यर्थः; स हि आधिदैविकम् आत्मानम् अभि सम्पन्नो भवति; न हि तस्य पिता नाम कश्चित्; स एव हि सर्वेषां जनानां पिता भवतीत्यभिप्रायः। एव मेतस्मिन् मन्त्रे य एवाक्षरान् भवति। स एव पश्यतीत्यस्य सन्निधौ 'न विजानात्यन्धः'-शब्दप्रयोगात् अदर्शनलक्षणं तमः 'अन्धः'-शब्देनोच्यत इत्युपपद्यते॥ १ ॥

असश्चन्ती भूरिधारे पयस्वती। असच्यमाने इति वाव्युदस्यन्त्याविति वा बहुधारे उदकवत्यौ वनुष्यतिर्ईन्तिकर्मानवगतसंस्कारो भवति। वनुयाम वनुष्यत इत्यपि निगमो भवति। दीर्घप्रयज्यु मति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः। दीर्घप्रततयज्ञ मभि जिघांसति यो वयं तं जयेम पृतनासु दूढ्य दुर्हियं पापधियं पापः पातापेयानां पापत्यमानोऽवाङ्ङेव पततीति वा पापत्यतेर्वा स्यात् तरुष्यतिरप्येवङ्कर्मा। इन्द्रेण युजा तरुषेम वृत्र मित्यपि निगमो भवति। भन्दना भन्दते स्तुतिकर्मणः। पुरुप्रियो भन्दते धामभिः कविरित्यपि निगमो भवति। स भन्दना उद्दियर्त्ति

प्रजावतीरिति च। अन्येन मदाहनो याहि तूयम्। अन्येन मदहनो गच्छ क्षिप्रमाहंसीव भाषमाणेत्यसभ्यभाषणादाहना इव भवत्येतस्मादाहनः स्या*दृषिर्नदो भवति नदते स्तुतिकर्मणः। नदस्य मा रुधतः कामम् आ गन्। नदनस्य मा रुधतः काम आगमत् संरुद्धप्रजननस्य ब्रह्मचारिण इत्यृषिपुत्या विलपितं वेदयन्ते ॥ २ ॥

"असश्चन्ती(७)"—इति अनवगतम्। "असज्यमाने इति वा"—इत्यर्थप्रतीतिः; "अच्युदस्यन्ताविति इति वा"—इति। "असश्चन्ती भूरि ०——० यन्मनुर्हितम्"†। भरद्वाजस्येयं मार्षम्। अभिप्लवस्य षडहस्य पञ्चमेऽहनि तृतीयसवने वैश्वदेवे शस्त्रे द्यावापृथिवीये निविद्धानीये सूक्ते शस्यते। 'असश्चन्ती' असज्यमाने असंश्लिष्यमाणे परस्परतः, एते द्यावापृथिव्यौ। 'भूरिधारे' बहूदकप्रवरणस्वभावे एव; अथवा बहु भूतं धारयित्र्यौ। 'पयस्वती' उदकवत्यौ। 'घृतम्' उदकम्, ते अप्येते 'दुहाते' प्रपूरयेते; इतरेतरसम्भोगेन। 'सुक्षते' शोभनक्षते; अथवा शोभनानां स्वाधिकारप्रयुक्तानां कर्मणां कर्त्र्यौ। 'शुचिव्रते' शुद्धकर्मणी इत्यर्थः। 'राजन्ती' दीप्यमाने स्वैः स्वैः तेजोभिः। 'अस्य' 'भुवनस्य' भूतजातस्य 'रोदसी' रोधसी,

* "०नस्माद्दाहन स्या"—इति ख, ग।

† १ भा० ४०६ सू० ८ पं०।

‡ असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुक्षते शुचिव्रते राजन्ती अस्य भुवनस्य रोदसी अस्मे रेतः सिञ्चतां यन्मनुर्हितम्॥" इति ऋ० सं० ५, १, १४, १।

रोधयित्र्यौ। ये एते एवंलक्षणे द्यावापृथिव्यौ, ते 'अस्मे' अस्मभ्यं 'रेतः' उदकं 'सिञ्चन्तम्' अभिमते काले। किंलक्षणं पुनः सिञ्चन्तम्? 'यत्' 'मनुर्हितम्' मनुष्यहितम्, अचारं, मस्य-सम्पत्कर मित्यभिप्रायः। एव मेतस्मिन् मन्त्रे 'भूरिधारे'-इत्येवमादिभिः समानविभक्त्यन्तत्वात् "असञ्चन्तौ"—इति द्यावापृथिवीविशेषण मुपपद्यते। "असज्यमाने इति" न हि ते सज्येते परस्परतः "अव्युदस्यन्तौ वा" अनुपचियन्त्यौ अविपर्यस्यन्त्यौ वा; न हि ते उपचीयेते विपर्यस्येते वेति॥

"वनुष्यति(८)"—इति* "हन्तिकर्म्मा" हन्त्यर्थे वर्तमानः, "अनवगतसंस्कारो भवति"। "यदिन्द्राग्नी जना इमे०——०मन्युके समे"†। नाभाकस्यार्षम्। महाव्रते महदुक्थे शस्यते। अस्याः पुनरष्टावराः षट् पादाः। छन्दसां पुनरनुक्रमण्यां शौनकेनाग्नि मरुतोषीत्यत आरभ्य जागतानि चीणि सूक्तानि अनुक्रान्तानि, तेषा मपीयं मध्ये हे 'इन्द्राग्नी!' 'यत्' यदा 'इमे' 'जनाः' येऽस्मदीयाः परकीयाश्च उभयेऽपि 'वि ह्वयन्ते' व्यत्ययेनेतरेतरम् आह्वयन्ते विजिगीषुतया। 'तना' सन्ततया 'गिरा' वाचा; अथ वा 'तना' धनेन निमित्तभूतेन जेतव्येन पुरस्कृतेन विह्वयन्ते। तदा युवाम् 'अस्माभिः' अस्मदीयैः 'नृभिः' मनुष्यैः संहितौ भूयास्तन्ते

---

* १भा० ४०६ पृ० १९ पं०।

† "यदिन्द्राग्नी जना इमे विह्वयन्ते तना गिरा। अस्माकेभिर्नृभिर्वयं सासह्याम पृतन्यवो वनुयाम वनुष्यतो नभन्ता मन्युके समे॥"—इति ऋ० सं० ६, ६, २५, १।

'वयं' युवाभ्यां सहिताः 'सासह्याम' पुनःपुनरभिभवेम। कान्? य एते 'पृतन्यवः' पृतना मस्माभिः सह कर्तुम् इच्छन्ति, तानभिभवेम। किञ्च, 'वनुयाम वनुष्यतः' ये च एतेषाम् अस्माभिः सह सम्पन्ना एव सम्प्रहारीभूता वनुष्यन्त्यस्मान् घ्नन्त्येव, एतांश्च वनुष्यतः वनुयामो वयं हन्म इत्यर्थः। कथं पुनर्हन्म? उच्यते यथा,—'नभन्ता मन्यके समे' युवयोरनुग्रहाद्धन्म इत्यभिप्रायः। एव मेतस्मिन् मन्त्रे "सासह्याम पृतन्यतः"—इत्येतस्मिन् सङ्ग्रामाधिकारे वनुष्यतेर्हन्त्यर्थ मुपपद्यते; न हि सङ्ग्रामे हननादन्यत् कर्त्तव्य मस्ति, यत् क्रियते॥

"इन्द्रावरुणा युव मध्वराय ०——० सु दूढ्यः"*। वसिष्ठस्येय मार्षम्। जगती। तार्त्तीयसवनिकीये मैत्रावरुणस्य शस्त्रे विनियुक्ता। हे 'इन्द्रावरुणौ!' 'युवम्' युवा मित्यर्थः। 'अध्वराय नः' यज्ञाय अस्माकं 'विशे' जनाय सर्वस्मै मनुष्यजनाय, अस्मत्सर्वकामाय 'महि' महत्, 'शर्म' सुखं 'यच्छतम्' दत्त मित्यर्थः। 'दीर्घप्रयज्युं' "दीर्घप्रततयज्ञं", नित्ययायजूकम्, अग्निहोत्रिणम् 'अति यो वनुष्यति' "अभि जिघांसति" यो निहन्तु मिच्छति। किं तस्य? इत्युच्यते,—'वयं जयेम' 'पृतनासु' सङ्ग्रामेषु 'दूढ्यः' "दुर्द्धियं" पापधियं, पापया धिया हि दीर्घप्रततयज्ञ मभि जिघांसति। एव मत्रापि प्रकरणाद् "वनुष्यतिः" हन्त्यर्थः। अल्पप्रयोगविषयत्वाद् भाष्यकारेण निगमद्वयं पठितम्॥

---

* "इन्द्रावरुणा युव मध्वराय नो विशे जनाय महि शर्म यच्छतम्। दीर्घप्रयज्यु मति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः॥"—इति ऋ० सं० ५, ६, २, १।

व्याख्यानप्रसक्त मुच्यते;— "पापः पाताऽपेयानाम्" अपेयान्यलेह्यानि यानि, तान्यसौ पिबति, विषयप्रसक्त इत्यर्थः। "पापत्यमानः" पुनः पुनः पात्यमानः, तेनैव पापेन कर्मणा। "अवाङेव" नरक मेव प्रति "पतति" असौ, तस्माद् "वा" पापः॥

"तरुष्यतिः(९), अप्येवङ्कर्मा" हन्तिकर्मेत्यर्थः*। "ऋभुर्ऋभुभिः ०——० तरुषेम वृचम्"†। वसिष्ठस्येय मार्षम्। चिष्टुप्। अविवाक्ये तृतीयसवने, वैश्वदेवे शस्त्रे, आर्भवे सूक्ते, निविद्धानीये शस्यते। ऋभवः उरुभासो वयम्, उरुभाभिः 'ऋभुभिः' देवैः सहिताः 'अभि वः स्याम' अभिभवेम युष्मान् वयम्। हे 'विभ्वः!' 'विभुभिः' प्रभूतबलैः युष्माभिः 'श्रवसा' स्वेन बलेन, एतेषा मभिभवित्रृणां 'श्रवांसि' बलान्यभिभवेम। किञ्च; 'वाजः' 'अस्मान्' 'अवन्तु'। कस्मिन्? 'वाजसातौ' सङ्ग्रामे; 'इन्द्रेण' च 'युजा' संयुक्ताः सन्तो वयं 'तरुषेम' हन्यैनं 'वृचं' शत्रु मित्यर्थः। अभिभवाधिकारात् तरुष्यतिर्हन्त्यर्थ उपपद्यते॥

"भन्दना(१०)‡, भन्दतेः स्तुतिकर्मणः" स्तुत्यर्थे वर्त्तमानस्य। "पिता यज्ञाना०——०धामभिः कविः"§। विश्वामित्रस्येय मार्षम्।

---

* १मा० ४०६ पृ० १४ पं०।

† ऋभुर्ऋभुभिरुभि वः स्याम विभ्वो विभुभिः श्रवसा श्रवांसि। वाजो अस्मां अवतु वाजसातौ विन्द्रेण युजा तरुषेम वृचम्॥"—इति ऋ० सं० ५,४,१५,२।

‡ १मा० ४०६ पृ० १८ पं०।

§ "पिता यज्ञाना मसुरो विपश्चितां विमानं सप्तिर्वयुनं च वाघताम्। आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः॥"—इति ऋ० सं० १, ८, १०, ४।

पृष्ठ्यस्य प्रथमेऽहनि आग्निमारुते शस्त्रे, निविद्धानीये, वैश्वानरीये सूक्ते शस्यते। 'पिता यज्ञानां' पालयिता यज्ञानाम्, 'अग्निः', 'असुरः' प्रज्ञावान् 'विपश्चितां' प्रज्ञावता मपिं मध्ये प्रज्ञावान्, 'विमानं' विनिर्माणं कर्त्तास्य जगतः; अग्निनैव ह्यग्निहोत्रादिकर्मद्वारेण कृत्स्नं जगद्विनिर्मीयते। 'वयुनञ्च' प्रज्ञानमय मेव 'वाघताम्' ऋत्विजाम्, ऋत्विजो ह्यय मेवाग्निः विशिष्टं यज्ञसाधन मित्येवं मन्यन्ते। योऽय मेवंलक्षणोऽग्निः 'आ विवेश' 'रोदसी' द्यावापृथिव्यौ 'भूरिवर्पसा' बहुरूपत्वेन, त मेवङ्गुणयुक्त मग्निं 'पुरुप्रियः' बहुकामप्रियः स्तोता, 'भन्दते' स्तौति, 'धामभिः' नामभिः अनेकैः प्रकारैः, 'कविः' क्रान्तदर्शन इत्यर्थः। पुरुप्रियो हि स्तोता धामभिरग्नेः किमन्यत् स्तुतेः कुर्यात्? तस्मादुपपद्यते स्तुत्यर्थत्व मस्य॥

"स भन्दना उदियर्त्ति० — ०याचनात्"*। भौमोऽत्रिः, तस्येय मार्षम्। जगती। "प्र त आशवः पवमान धीजवः"—इत्यष्टाचत्वारिंशत्के महासूक्ते† एकचत्वारिंशत्तमौ पावमानसौमौ। यदिम मयाङ्गं कर्मोपनमेत्तत्सुयामह मेतं सोमं तत्रेति, य एवं नित्यकाल मास्ते 'सः' एष साम्प्रत मस्मिंत्सोमकर्मणि उपनीतो हे सोम! तव 'भन्दनाः' स्तुतीः 'उदियर्त्ति' उदीरयति। 'प्रजावतीः' प्रजासंयुक्ताः, प्रजालिङ्गा इत्यर्थः। 'विश्वायुः' विश्व मयतीति विश्वायुः, सर्वत्राप्रतिहतप्रज्ञान इत्यर्थः; सर्वतो वा विश्वायुः। 'विश्वाः' सर्वप्रकाराः, नाम-बन्धु-

---

* "स भन्दना उदियर्त्ति प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि। ब्रह्म प्रजावद्रयि मश्वपस्त्यं पीत इन्द्रविन्द्रमस्मभ्यं याचतात्॥"—इति ऋ० सं० ७,३,१०,१।

† ऋ० सं० ९म० ५अ० १सू०(=१२—२१व०) १—४८ ऋ०।

क्रम-रूप-सम्बन्धात् स्तुतीताम्; नाम्ना, बन्धुभिः, कर्मणा, रूपेणेति ह्युक्तम्। 'सुभराः' सुभृताः, सुपुष्टाः; स्थानकरणानुप्रदानवत्यो युग्मङ्गुणैरलङ्कृताः। 'अहर्दिवि' अहनि वा रात्रौ च, रात्रिपर्यायाभिप्रायेण नित्यकाल मेवेत्यभिप्रायः। कं पुनरर्थ मुपेत्य स्तुतीरुदीरयति? 'ब्रह्म प्रजावत्' अन्नं प्रजासंयुक्तम् भोक्तृसहितम्। अपि च 'रयिम्' धनं गो-हिरण्यादि। 'अश्वपस्त्यम्' अश्वैः पतनसमर्थैः शीघ्रैः संयुक्तम्। 'पीतः' त्व मस्माभिरस्मिन् कर्मणि। हे 'इन्दो' सोम! इद मस्मदर्थं 'याचतात्' याचस्वेत्यर्थः। एत मर्थ मभिप्रेत्य स्तुतीरुदीरयति। भन्दना उदियर्त्तीत्युदीरणसम्बन्धात् स्तुतय एताः "भन्दना"-शब्देनोच्यन्ते इत्युपपद्यते। पूर्व माख्यातपदसम्बद्ध मुदाहरणं "पुरुप्रियो भन्दते धामभिः"—इति(१३पृ० २१पं०), इदन्तु नामरूप-सम्बद्धं "स भन्दना उदियर्त्ति प्रजावतीः"—इति (१४पृ० २१पं०) च। उभयथा प्रयोगोऽस्तीत्युभय मुपप्रदर्शितम्, अल्पप्रयोगविषयत्वाच्च॥

"आहनः(११)"—इति *। एतत् पदं सम्बोधन मनवगतम्, अप्रतीयमानार्थत्वात्। "आ हंसि"—इत्यर्थप्रतीतिः। "न तिष्ठन्ति न निमिषन्त्येते०—०रथ्येव चक्रा" †। यमस्य यम्याश्च संवादसूक्तम्; तत्र यमस्येय मार्षम्। स यमीं मैथुनाय प्रार्थयमानां ब्रवीति;—हे यमि! मामंस्था साम्प्रतं रहो वर्त्तत इति, किन्तु 'न तिष्ठन्ति' मुहूर्त्तं

---

* १ भा० ४०७ पृ० २ पं०।

† "न तिष्ठन्ति न निमिषन्त्येते देवानां स्पश इह ये चरन्ति। अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा॥"—इति ऋ० सं० ७, १, ७, २।

मपि, एते जनाः रन्ध्रान्वेषणतत्परा इत्यभिप्रायः। अपि च, 'न निमिषन्ति' अनिमिषाः, आदरवन्त इत्यभिप्रायः। के पुनस्ते? इत्युच्यते;—'एते देवानां' स्वभूताः; य इह एतस्मिन् लोके 'स्वग्नः' स्वाग्नयितारः, कृताकृतानां कर्मणाम्। के पुनस्ते? इति। उच्यते;—अहश्च, रात्रिश्च, उभे च सन्ध्ये, सूर्याचन्द्रमसौ, वायुश्च, अन्तरपुरुषश्च इत्येवमादयः; न ह्येतेषां किञ्चिदविदितं परोक्षमस्ति इत्यभिप्रायः। अतो ब्रवीमि;—'अन्येन' अन्यकुलजेन केन चित् पुरुषेण, 'मत्' मत्तः, त्वम् हे 'आहनः!' मैथुनं 'याहि' 'हूयं' "क्षिप्रम्"। "आ हंसि इव" असभ्य मेतद् "भाषमाणा" त्वम्, नाह मेतदसभ्यं श्रोतु मप्युत्सहे तव; किं पुनः कर्तुम्? तस्मान्मत्तोऽन्येन मैथुनार्थं चर। 'तेन' एव सह 'वि वह' अभ्युद्यच्छस्व आत्मानं मैथुनकर्मणि। 'रथ्येव चक्रा' रथचक्रे इव; यथैक मत्तं रथचक्रे द्वे अभ्युद्यतः, एव मेकमनस्त्व मुपपाद्य तेनैकभूतेन मनसा अत्तेणैवोभे ऽपि शरीरे, त्वञ्च तस्य कामिनः सक्तम्, स च तव, तेनैव सह तवैतस्मिन्नर्थे एकमनस्त्व मस्त्विति, न मया सार्द्धं मेतस्मिन्नर्थेऽभ्युद्यच्छमाना न मां शक्ष्यसे कम्पयितु मित्यभिप्रायः। एव मेतस्मिन् मन्त्रेऽनिष्टत्वान्मैथुनसमाचारस्य "आहनः"—इत्येतद् यमौ-विषयं सम्बोधनम्। आहन्यत "इव" हि स यमं तयाऽनेन दुर्वचनेन। तस्मात् सैव सम्बोध्यते आहनः! इति। "एतस्मात्" एव कारणात् "आहनः स्यात्", यो ऽयम् उपदेशः स्त्रियै, असावपि हि यस्य सन्निधौ सङ्कीर्त्यते, स आहन्यत इव असभ्यत्वात्; तस्य अयज्ञियो वै पुरुषोऽमेध्य आहनः स्याज्जायत इति विज्ञायते॥

"नदः(११)"—इति * एतदनवगतम्। "ऋषिः नदो भवति" —इति शब्दस्य पर्यायेण तत्त्ववचनम्। "नदतेः स्तुतिकर्मणः" इति व्युत्पत्तिः। नदिता वा नदतीवेत्यर्थप्रतीतिः। "नदस्य मा रुधतः ० ——० धयति श्रुसन्तम्" †। अगस्त्यलोपामुद्रा-ब्रह्मचारिसूक्त-संवादे लोपामुद्राया इय मार्षम्। सा अब्रवीदगस्त्यं भर्त्तार मभि-प्रेत्य 'नदस्य' "नदनस्य" नदितुर्वा देवतास्तोतुः अस्यागस्त्यस्य 'रुधतः' संरुद्धवतः इन्द्रियग्रामं 'मा' माम् अयं 'कामः' 'आगन्' आगतवान्, येनाहं साम्प्रतं पीडे। सा पुनरेवं न जाने। किम् 'इतः' एव 'आ जातः' अस्मच्छरीराज्जातः, ममोपरि ह्यभिव्यक्तोऽस्मत्पीड़नाय;— अथ वा 'अमुतः' अगस्त्यशरीरात्? पुरुषगुणानुस्मरणाद्धि स्त्रियाः कामो जायते—अभिव्यज्यते, पुरुषस्य च स्त्र्यनुस्मरणात्। अत एव "स्मरः"—इति काम उच्यते। तस्मादुपपद्यते इतो वास्मच्छरीरात्;— अमुतो वा नद-शरीरात्, कुतः? इति न जाने इति। अथ वा अन्यत एव 'कुतश्चिद्' अय मागतः स्यात्? इत्येतदपि तत्त्वतो न जाने। इत्येवं विलपमाना कामार्त्ता 'लोपामुद्रा' राजर्षिपुत्रिका 'वृषणं' रेतसो वर्षितारम्, अगस्त्यं 'नीरिणाति' निश्चयेनाधिकं वा दोषेण गच्छति; यदि न ममासावुपरि प्रजननं निरोत्स्यात्, ततो नायं कामो मागमिष्यत्, इत्येवं दोषेण गच्छति। "रिणाति"—इति गतिकर्मसु पठितम्‡। अथ वा चेनसा 'नीरिणाति' उपगच्छ-

* १भा० ४०१ ब० ६ पं०।

† "नदस्य मा रुधतः काम आगन्निस आ जातो अमुतः कुतश्चित्। लोपामुद्रा वृषणं नी रिणाति वीरु मधीरा धयति श्रुसन्तम्॥"—इति ऋ० सं० १,४ ११,४।

‡ १ भा० १२७ ब० १४क० (५८)।

नीत्यर्थः; इष्टपुरुषानुचिन्तना हि कामार्त्तायाः स्त्रियाः स्वभाव एव। तस्मादेव मप्युपद्यते। 'धीरं' स्थिरबुद्धिं ब्रह्मचर्ये 'अधीरा' सङ्कुचन्सर्वेन्द्रियग्रामा 'धयति' पिबतीव चेतसा, चक्षुर्भ्यां वा पश्यति। 'श्वसन्तं' चेतसा व्यावर्त्तमानं, तस्माः सकाशात् ब्रह्मचर्ये कृतबुद्धिं तथापि धयत्येव। "श्वसति, नदति"—इत्येवं गतिकर्मसु पठितम्*। एवं लोपामुद्रावाक्ये "नदस्य रुधतो मा मागमत् कामः"—इति प्रकरणादृषिर्नदशब्देनोच्यत इत्युपपद्यते। "संरुद्धप्रजननस्य ब्रह्मचारिणः इत्यृषिपुत्रा विलपितं वेदयन्ते"—इति निदानप्रख्यापनम् ॥ २ ॥

न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः। अश्नोतेरित्येके। अनूपे गोमान् गोभिरक्षाः सोमो दुग्धाभिरक्षाः। लोपाशः सिंहं प्रत्यञ्च मत्साः। क्षियतिनिगमः पूर्वः क्षरतिनिगम उत्तर इत्येकेऽनूपे गोमान् गोभिर्यदा क्षियत्यथ सोमो दुग्धाभ्यः क्षरति सर्वे क्षियतिनिगमा इति शाकपूणिः श्वाच मिति क्षिप्रनामाशु अतनं भवति। स पतञ्चोत्वरं स्था जगद्यच्छाच† मग्निरकृणोज्जातवेदाः‡। स पतचि चेत्वरं स्थावरं जगमच्च यत्तत् क्षिप्र मग्निरकरोज्जातवेदाः।

---

* १ भा० १म० ४० १९ख० (९); तन्नीष्यनी च इष्टव्या।

† "जगद्यदिच्छाच" ख, ग।

‡ "मग्निरकृणोज्जातवेदाः" ख, ग।

ऊतिरवनात्। आ त्वा रथं यथोतय इत्यपि निगमो भवति। ह्वासमाने इत्यपरिष्टाद्व्याख्यास्यामः।* वम्रकः षड्भिरुपसर्पदिन्द्रम्। पानैरिति वा स्याशनैरिति वा (स्यशनैरिति वा†)। ससं न पक्वमविदच्छुचन्तम्। स्वपन मेतन्माध्यमिकं‡ ज्योतिरनित्यदर्शनं तदिवाविद्ज्ज्वाज्वल्यमानम्। द्विता च सत्ता स्वधया च शम्भुः। द्वैधं सत्ता मध्यमे च स्थान उत्तमे च। शम्भुः सुखभूः। मृगं न व्रा मृगयन्ते। मृग मिव व्रात्याः प्रैषाः॥ ३॥

"सोमो अत्ताः(१२)"—इत्येते द्वे पदे। अत्र अत्ता इत्येतत् पदं अनवगतम्, पत्तेण चानेकार्थम्। अस्यैव च सम्बन्धादुपलक्षणार्थं सोमशब्दोऽत्र समाम्नातः। कथं नाम "न यस्य द्यावापृथिवी"—इत्येतदेवोदाहरण मत्र उपलक्षितं स्यात्? अत्र हि अत्ता इत्येष शब्दः, सोमशब्देन सम्बद्धः; यथा भूतशब्देन, मेषशब्दः—"मेषो भूतोऽभियन्नयः"—इत्यत्र§, यथा वा "अग्निर्नयै"—इत्यत्राग्निशब्दः॥। अत्र वाऽऽनोति-पत्ते अत्ता इति अस्य शब्दस्य सुपुष्टतर उदाहरणार्थो भवति। तस्मादय मनन्तर उपलक्ष्यते अल्पप्रयोगविषयत्वादस्य मन्त्रस्य प्रतिपत्त्यर्थं सोमशब्दः समाम्नात एकपदसमाम्नाते प्राप्ते सति॥

---

* क-ख ग-पुस्तकेष्विहैव तृतीयखण्डः समाप्तः।

† यन्नवीचिद्धास्मगत मेतन्न दृश्यते क-ख ग पुस्तकेषु।

‡ "स्वप्न मेतन्माध्यमम्"—इति क, ख, ग।

§ १ भा० ६२० पृ० १२ख० (८)।

॥ १ भा० ६२० पृ० १२ख० (२)।

"न यस्य द्यावा०——०स्थिराणि"*। रेणुर्नाम विश्वामित्रस्य पुत्रः, तस्येयं मार्षम्। ऐन्द्रे सूक्ते सूर्यस्तुन्नामैकाहः, तत्रेयं निष्कैवल्यशस्त्रे निविद्धानीये शस्यते। 'न यस्य द्यावापृथिवी' न यस्य इन्द्रस्य द्यावापृथिव्यौ महिमानं 'अश्नुवाते' व्याप्नुत इत्यर्थः। 'न' 'धन्व' उदकम्; तद्धि धन्वत्यन्तरिक्षलोकात्। 'न अन्तरिक्षम्', 'न' 'अद्रयः' पर्वताः अश्नुवाते महिमानम्। किं तर्हि? सोम एवाचाः महिमान मश्नोतीत्यर्थः। कथं पुनर्गम्यते सोम एवेन्द्रस्य महिमान मश्नोतीति? इतः,—'यद् अस्य मन्युः अधि नीयमानः' यस्मादस्येन्द्रस्य मन्युः क्रोधः सोमेन पीतेन सता मदसामर्थ्यादुपरि शत्रूणां नीयमानः प्राप्यमाणः गृणाति। 'वीळु'। यदपि 'वीलु' दृढं सन्नद्धं शत्रुबलं भवति, तदपि गृणात्येव, हिनस्तीत्यर्थः। 'रुजति' च 'स्थिराणि' अपि दृढानि मेघवृन्दानि भिनत्तीत्यर्थः। एत्र मेतस्मिन् मन्त्रे व्याप्त्यर्थस्य "अश्नोतेः" अचा इत्येष शब्दो निरुच्यते "इत्येव मेके" मन्त्रार्थविदो मन्यन्ते॥

"अनूपे गोमान्०——०तोशते"†। सप्तर्षीणा मार्षम्। बृहती। पावमानी सौमी। 'अनूपे' देशे 'गोमान्' गोभिः सहितो यदा 'अचाः' क्षियति, निवसति; अथ तदा सुयवसत्वात् तस्य देशस्य 'सोमो दुग्धाभिः' पुनः पुनः दुग्धाभ्योऽपि गोभ्यः क्षरत्येव। कथं पुनः क्षरति? इति। उच्यते,— 'समुद्रं न संवरणानि' समुद्र मिव

* "न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अचाः। यदस्य मन्युरधि नीयमानः शृणाति वीळु रुजति स्थिराणि॥" इति ऋ० सं० ८,४,१५,१।

† "अनूपे गोमान् गोभिरचाः सोमो दुग्धाभिरचाः। समुद्रं न संवरणान्यग्मन् मन्दी मदाय तोशते॥"—इति ऋ० सं० ७, ५, १९, ४।

संवरणान्युदकानि; उदकानि हि देशान्तरात् संवृण्वन्ति, तानि यथा सर्वेभ्यो देशेभ्यः संसृत्य समुद्र माभिमुख्येन 'अगमन्' गच्छन्ति, एवं दुग्धाभ्यः सोमः सर्वेभ्यो गात्रेभ्यः संसृत्य उधः प्रति चरति मदायेन्द्रस्य। अथ यदैवं प्रचरति, तेन सोमेनामावास्यायां सान्नाय्येन हृत इन्द्रो 'मन्दी' हर्षशीलः, यजमानस्य शत्रून् 'तोषते' हिनस्तीत्यर्थः। "नितोषयति, निवर्हयति"—इति हन्तिकर्मसु पठितम्*। एव मेतस्मिन् मन्त्रे "क्षियति-निगमः पूर्वः"—"अनूपे गोमान् गोभिरक्षाः"—इत्येषः (२०पृ० २०पं०) "चरति-निगमः उत्तरः"—"सोमो दुग्धाभिरक्षाः"—इत्यत्र (२०पृ० २०पं०)। एवम् "एके" मन्त्रार्थविदो मन्यन्ते। तच्च तथैवोपव्याख्यातम्। "सर्वे" एवैते त्रयोऽपि "क्षियतिनिगमाः" "इति" "शाकपूणिः" आचार्यो मन्यते। न यस्य द्यावापृथिव्यौ निवासः, न धन्व, न अन्तरिक्षं निवासः; किं तर्हि? सोम एव इन्द्रस्य निवासः। तस्य सोमस्य किम्? इति उच्यते,— यदस्य मन्यूरधि शत्रूणां नीयमानः, पृणाति वीलु रुजति स्थिराणि। समान मन्यत् पूर्वेणैवार्थेन। "अनूपे गोमान् गोभिरक्षाः"—इत्यत्र निवासार्थतैव पूर्वस्मिन्नेवार्थे। अथ सोमो दुग्धास्वपि गोषूधः निवसति, न निर्दुग्धाः कर्तुं शक्यन्ते इत्यभिप्रायः। एव मेते सर्वे त्रयोऽपि "क्षियति-निगमाः"—इति "शाकपूणिः" आचार्यो मन्यते॥

"स्वाचम्[१४]"—इति† एतदनवगतम्। "आशु अनतं

---

*१ भा० ६८१ पृ० १९ख० (२९), ३०)। तद्दीपनी च द्रष्टव्या।
†१भा० ४०७ पृ० १९पं।

भवति"—इति शब्दसमाधिः। "क्षिप्र नाम"—इत्यभिधेयवचनम्। "यो होतासीत् ०——० जातवेदाः"*। इयं हविष्याङ्क्रीये सूक्ते। तत् पुनर्मूर्द्धन्वताङ्गिरसेन दृष्टम्; वामदेव्येन वा। पृष्ठ्यस्य पञ्चमेऽहनि आग्निमारुते शस्त्रे निविद्धानीयं तङ्गवति। 'यः' अग्निः 'होतासीत्' आहोता देवानाम्, 'प्रथमः' प्रधानः, मनुष्यहोतुः सकाशात्। 'देवजुष्टः' देवैरासेवितः। 'तं' 'समाञ्जन्' समुक्षितवन्तः। केन? 'आज्येन' 'आवृणानाः' सेवमानाः, भजमाना इत्यर्थः। तस्य किम्? इति। उच्यते;—'सः पतत्रीवरम्' सोऽग्निः पतत्रिः, यदेतदितश्चेतश्च पतति; इत्वरञ्च पत्त्र्यादि, 'स्था' स्थावरञ्च वृक्षादि, 'जगत्' यदेतज्जङ्गमादि। तस्य किम्? इति। उच्यते;— तत् सर्वं प्रलयकाले 'स्वात्रं' क्षिप्रमात्मसाद् 'अकृणोत्' "अकरोत्" 'जातवेदाः' अग्निः। एत्र मेतस्मिन् मन्त्रे "स्वात्र मिति" इत्येतत् "क्षिप्रनाम"। पतत्रि-स्थावर-जङ्गमानां क्षिप्रदहनादग्निः किं मन्यत् कुर्यात्? तस्मादुपपद्यते क्षिप्रनामेति॥

"ऊतिः(१५)"—इति † अनवगतम्। "अवनम्"—इत्यर्थप्रतीतिः। "अवनाद्" रक्षणादित्यर्थः। आ त्वा रथं यथो ०——० सत्पतेः"‡। प्रियमेधस्यार्षम्। हे इन्द्र! 'त्वा' त्वाम् 'आ वर्त्तयामसि' आवर्त्तयामहे। किमर्थम्? 'ऊतये' अस्माकं रक्षणाय, 'सुम्नाय' सुखाय

---

* "यो होतासीत् प्रथमो देवजुष्टो यं समाञ्जन्नाज्येनावृणानाः। स पतत्रीवरं स्था जगद्यच्चाभि सस्रिरे कृणोज्जातवेदाः॥"—इति ऋ० सं० ८, ४, १०, ४।

† १ भा० ४०८ सू० २ पं०।

‡ "आ त्वा रथं यथोतये सुम्नाय वर्त्तयामसि। तुविकूर्मिं सतीषहं त्विन्द्रं शचीपतिं सत्पतेः॥"—इति ऋ० सं० १, ५, १, १।

च। कथं पुनरावर्त्तयामहे? इति उच्यते,—'रथं यथा' शक्तो हि कश्चिद् यथा रथ मावर्त्तयेत्, एव मावर्त्तयामहे वयं त्वां स्तुतिभिः। किंलक्षणं पुनर्भवन्त मावर्त्तयामहे? उच्यते;—'तुविकूर्मिम्' बह्वना मनेकप्रकाराणां कर्मणां कर्त्तारम्। 'ऋतीषहम्' च, आर्त्तानां मभिभवितारम्। हे 'इन्द्र!' 'शविष्ठ' बलिष्ठ! 'सत्पते' सतां पते!। एव मावर्त्तनेनैकवाक्याभिसम्बन्धेन "ऊति"-शब्दो रक्षणार्थ इत्युपपद्यते॥

"हामसमाने(१६)"—इति *। "उपरिष्टाद् व्याख्यास्यामः"; "प्रवर्तनानां सुशनी उपस्थात्"—इत्यत्र †॥

"षड्भिः(१७)"—इति‡ अनवगतम्। "षानैरिति वा स्वशनैरिति वा"—इति शब्दसमाधौ। "एवा महो असुर०—० विश्वा माभाः"§। वम्रो नाम वैखानसः, तस्येय मार्षम्। ऐन्द्री। य एष एतस्मिन् सूक्ते स्तुतिप्रकारोऽधिकृतः 'एवा' एवम् अनेन प्रकारेण वर्त्तमान! हे इन्द्र! 'असुर' असुमन्! प्रज्ञानवन्! बलवन्! वा 'वक्षथाय' स्तुतिवक्त्रे, महते यजमानाय, पूर्वकल्पान्तरीणाय; पूर्वकल्पान्तरीण एव 'वम्रकः', 'षड्भिः' सोमपानैरभ्युदितैः, अथ वा गुणस्वाशनैः स्तुतिगतैः, 'उपमर्पत्' उपसृप्तवान्, अन्यकल्पान्तरीणम् 'इन्द्रम्'। 'सः' तेन तथा 'इयानः' ईयमानः, अनुस्थियमाणः 'करति' कृतवान्। किम्? 'स्वस्तिम्' स्वस्त्ययनम्। 'अस्मै' यज-

* १ भा० ४०८ पृ० ५ पं०।

† प० दै० का० ९, ४, ५।

‡ १ भा० ४०८ पृ० ८ पं०।

§ "एवा महो असुर वक्षथाय वम्रकः षड्भिरूपं सर्पदिन्द्रम्। स इयानः करति स्वस्तिमस्मा इमं सुजं सुष्टुतिं विश्वा माभाः॥"—ऋ० सं० ८, ५, १५, १।

मानाय। यतो ब्रवीमि,—साम्प्रत मह मेतस्मिन् कल्पे वज्रकः, स्वर्गेन्द्रः, ता एवैताः स्तुतयः, याभिरह मुपासर्प्पं साम्प्रतं भवन्तम्; स त्व मेवं विज्ञाय, अस्मै वर्त्तमानाय यजमानाय स्व मधिकारं जानानः, कुरु स्वस्त्ययनम्। किञ्च; 'इष मूर्जम्'। 'इषम्' अन्नं व्रीहियवादि, 'ऊर्जम्' क्षीरादि। 'सुक्षितिं' च, शोभननिवासञ्च। 'विश्वम्' एतत् सर्वम् 'आ भाः' आभिमुख्येनास्मै यजमानाय भावयस्व॥ एव मेतस्मिन्मन्त्रे शब्दसारूप्यात् प्रकरणाच्च "षड्भिः"—इत्येतत् पानाभिधानं स्याज्ञनाभिधानं वेत्युपपद्यते॥

"सषम्[१८]"—इति * अनवगतम्। "स्वपनम्"—इत्यवगमः। "प्र मातुः प्रतरं०—० उपस्थे अन्नः"†। अग्नेर्वैश्वानरस्य, अग्नेर्वा सूचीकस्य, सप्तेर्वा जभ्रस्य इय मार्षम्। आग्नेयी। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। 'प्र मातुः प्रतरम् गुह्यम्' प्रकर्षेण गततरं गह्वरं, मातुः सर्वनिर्मातुः भूमेः, अग्निः 'वीरुधः' दग्धुम् 'उप सर्पत्' 'उर्वीः' ऊर्णुवत्यः, प्रच्छाद्य भूमेर्निर्झरप्रदेशम्, तस्मिन् निर्झरप्रदेशे वर्त्तमानाः, तत्र हि ताः सुविवृद्धाश्च भवन्ति। कथमुनरुपसर्पत्? इति उच्यते,—'प्र मातुः प्रतरं गुह्य मिच्छन् कुमारो न' स्तनपानाय मातुः यथा कुमारः, प्रकर्षेण गुह्यतरं सर्वाङ्गेभ्यः स्तनप्रदेशम्, स्तनपानम् इच्छन् उपसर्पेत्; एवं योऽग्निः वह्नोषधिके भूमेर्निर्झरप्रदेशे कुमार इव स्तनप्रदेश मिवोपसर्पत्। तत्रैव

---

* १ भा० ४०८ पृ० १२ पं०।

† "प्र मातुः प्रतरं गुह्य मिच्छन् कुमारो न वीरुधः सपेदुर्वीः। सुषं न पक्वं मविदच्छधर्मं रिरिक्वांसं रिप उपस्थे अन्नः॥"—इति ऋ० सं० ८, २, १४, ३।

च निर्झरप्रदेशे 'रिरिक्वांसं' पुनपुनरास्वादयमानम्, ओषधीः 'रिपः' अस्या एव भूमेः 'उपस्थे' उपस्थाने; निर्झरे हि भूमेः प्रदेशे आप उपतिष्ठन्त इति निझर एवोपस्थो भूमेः। तस्या एव 'अन्तः' मध्ये इत्यर्थः। तस्मिन्नेवंलक्षणे प्रदेशे, तं मग्निम् 'अविदत्' कश्चित् ऋषिः अन्यो वा। ओषधीरास्वादयन्तं कथं पुनरविदत्? इति उच्यते,— 'सप्तं न पक्वम्' अविदत्, यथैव स्वपनशीलं "माध्यमिकं ज्योतिः" वैद्युताख्यं पक्वं मभिव्यक्तम्; वर्षासु उपर्यवस्थानादयत्नेनैव दृश्यते, एवं निर्झरान् प्रविष्ट मपि सन्तं मग्निं मतिमहत्त्वादर्चिषोऽविददेवापश्यत्*। 'शुचन्तं' दीप्यमान मित्यर्थः। निर्झरेऽन्योऽनुप्रविष्टो न विज्ञायते, अग्निस्तु निर्झरस्थोऽपि स्वया दीप्त्या विज्ञायत एवेत्यभिप्रायः। य एवङ्गुणयुक्तोऽग्निः स इदं नाम करोतु—इत्येव माशीर्योज्या। न ह्यष्टौ मासान् माध्यमिकं ज्योतिर्दृश्यते, ततः "अनित्यदर्शनम्", तस्मादनित्यदर्शनात् "स्वपनम्"—इत्युच्यते; पक्वं नामाभिव्यक्त मित्युच्यते॥ एव मिह शब्दसारूप्यात् अर्थोपपत्तेश्च "सप्तम्"—इत्यनेन शब्देन स्वपन मुच्यत इत्युपपद्यते †॥

"द्विता(१९)"—इति ‡ अनवगतम्। "द्वैधम्"—इत्यवगमः। "यस्त्वद्धोता पूर्वो अग्ने ० — ० देववीतौ" §। कतस्य वैश्वामित्रस्येय मार्षम्। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। हे भग-

* "सप्तं न पक्वम्, पक्व मन्न मिव"—इति सा० भा०।

† सायणव्याख्यया विरोधोऽत्र द्रष्टव्यम्। यास्काभिप्रायोऽप्यत्रास्फुटः।

‡ १ भा० ४०८ पृ० १७ पं०।

§ "यस्त्वद्धोता पूर्वो अग्ने यजीयान् द्विता च सत्ता स्वधया च शश्वत्। तस्यानु धर्म प्र यजा चिकित्वोऽथा नो धा अध्वरं देववीतौ॥"—इति ऋ० सं० ३, १, १०, ५।

वन्! 'अग्ने!' पृथिवीस्थान! * 'त्वत्' त्वत्तः, 'यः' 'पूर्वः' होता मध्यमस्थानो वायुः †; असावपि हि दूतो देवाना मिति श्रूयते,—"आ दूतो अग्नि मभरद् विवस्वतः"—इति ‡। वैद्युतोऽग्निरिति केचिन्मन्यन्ते। 'यजीयान्' यष्टृतरः। 'द्विता च सत्ता' द्वैधं यस्य विद्यमानता;—"मध्यमे च स्थाने" वैद्युतभावेन, "उत्तमे च" स्थाने सूर्यभावेन। 'स्वधया च' अन्नेन, सर्वभूतानां वर्षाद्वारेण। यः 'शम्भुः' "सुखभूः" सुखस्य भावयिता। तस्य किम्? इति उच्यते,—'तस्य अनुधर्म' वायोर्वृत्तिलाभ मन्वात्मनो दीप्तिलक्षणां वृत्ति मतिलाभ माप्नुवन्; "वायुर्वा अग्नेस्तेजः, तस्माद् वायुरग्नि मन्वेति"—इति ह विज्ञायते। हे अग्ने! 'प्रयज' प्रकर्षेण यज, देवान्। हे 'चिकित्वः' चिकित्वन्! ज्ञानवन्नित्यर्थः। 'अथ' एवम्, 'नः' अस्माकं यागं कुर्वन्, तं गृहाण, यं कुरुष्व। 'धाः अध्वरं' धारय यज्ञम्। 'देववीतौ' देवतर्पणायेत्यर्थः॥ एव मत्र शब्दसाहचर्यादर्थोपपत्तेश्च "द्विता"—इत्ययं द्वैध मित्येव मुपपद्यते॥

"ब्राः(१०)"—इति § अनवगतम्। "ब्राह्याः"—इत्यवगमः। "गोभिर्यदी मन्ये०——०धेनुभिः"॥ ‖। काण्वस्य मेधातिथेः, प्रियमेधाङ्गिरसः ऐन्द्रं सूक्तं ददृशतुः। तत्रैषाभिस्तवस्य षडृचस्य

---

* "अग्निः पृथिवीस्थानः"—इति प० दै० का० ७, १, १।

† "वायुर्वैन्दो वान्तरिक्षस्थानः"—इति प० दै० का० ७, १ १।

‡ ऋ० सं० ४, ५. १०,। किंच, 'यद्दूतो अभवद् विवस्वतः (ऋ० सं० १, ४, २२, १)"— इत्याद्या अपि द्रष्टव्याः।

§ १भा० ४० ८५० १पं०।

‖ "गोभिर्यदी मन्ये अश्वमृगं न वा मृगयन्ते। अभित्सरन्ति धेनुभिः॥"—इति इति ऋ० सं० ५, ७, १८, १।

द्वितीयेऽहनि मरुत्वतीये शस्त्रे अनुचरत्वे शस्यते। हे भगवन्निन्द्र! 'यद् ईम्' यद्यपि त्वाम् 'अन्ये' यजमानाः 'गोभिः' वाग्भिः, स्तुति-लक्षणाभिः 'धेनुभिः' च तर्पयित्रीभिराऋतिभिः 'अभि त्वरन्ति' अभिगच्छन्ति, अभिव्याप्नुवन्ति, तथाप्यस्मानेव प्रत्यभ्येहि। किं कारणम्? इतः,— यस्मादेतेऽस्माभिरतिरिक्तया भक्त्याऽन्येभ्यो यजमानेभ्यः सकाशात् 'व्राः' "व्रात्याः", "प्रेषाः" युष्मत्संस्तवसंयुक्ताः प्रतिप्रहिताः 'मृगं न' "मृग मिव" इतरे लुब्धकाः व्रात्याः 'मृगयन्ते' मार्गयन्ते त्वाम्; तस्माद् भक्त्यतिरेकात् विषहेतोरस्मानेव प्रत्यभ्येहि॥ एव मेतस्मिन्मन्त्रे मृगसम्बन्धाद् "व्राः"— इति शब्देन लुब्धका उच्यन्ते इत्युपपत्तिः॥३॥

वराहो मेघो भवति वराहारो वर माहार माहार्षीरिति च ब्राह्मणम्। विध्यद्वराहन्तिरो अद्रि मस्तेत्यपि निगमो भवत्यय मपीतरो वराह एतस्मादेव बृहति* मूलानि वरंवरं मूलं बृहतीति† वा। वराह मिन्द्रेमुष मित्यपि निगमो भवत्यङ्गिरसोऽपि वराहा उच्यन्ते। ब्रह्मणस्पतिर्वृषभिर्वराहैः। अथाप्येते माध्यमका‡ देवगणा वराहव उच्यन्ते। पश्यन् हिरण्यचक्रानयोदंष्ट्रान् विधावतो वराहून्॥४§॥

---

* "बृहति" क, ग।

† "बृहतीति" क, ख, ग।

‡ "माध्यमिका" ङ, च; परं इतिपाठविरहः।

§ ङ-च-पुस्तकयोर्नास्ति सङ्ख्याच्छेदः, खण्डसङ्ग्रह-वाक्यविरहश्चैषः।

"वराहः(२१)"—इति *, अनवगत मनेकार्थञ्च। "मेघः" तावद् वराह उच्यते; स हि "वराहारो भवति" तस्य वर मुदक माहारः। "वर माहार माहार्षीरिति च ब्राह्मणम्"; निर्वचनस्य दृढप्रतीत्यर्थं ब्राह्मण माचार्येण प्रदर्शितम्। यथा मेघो वराहशब्देनोच्यते, तथैष निगमः;— "अस्येदु मातुः सवनेषु०——०अद्रिं भस्ता"। नोधा नाम गोतमपुत्रस्येय मार्षम्। ऐन्द्री। त्रिष्टुप्। अभिजिद्विश्वजिन्महाव्रतादिषु आहीनिकेषु अहःसु अहीनसूक्ते माध्यन्दिने सवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता। 'अस्य इत् उ मातुः' अस्य जगन्निर्मातुः यज्ञस्य 'सवनेषु' प्रातःसवन-माध्यन्दिन-तृतीयसवनेषु, 'महः' महतः यज्ञस्य, 'पितुं' महान्तं सोमभागं 'पपिवान्' पीतवान्। पीत्वा 'चार्वन्ना' चारूणि च शोभनान्यन्नानि, अन्यान्यपि हवींषि भक्षयित्वा, तैर्हविभिः, तेन च सोमेन विवृद्धबलः, सद्यः एव 'पचतम्'; परिपक्व मुदकदान समर्थं मेघं हि 'विष्णुः' इन्द्रः, सर्वभूतानां वेष्टा प्राणभावेन 'सुषायद्' असुष्णादित्यर्थः। 'सहीयान्' अभिभवितृतमः। कथमुनरसुष्णात्? इति उच्यते,—"विध्यद्वराहं तिरो अद्रिं भस्ता"। 'वराहम्' मेघं 'विध्यत्'। कथमुनः विध्यद्वराहम्? इति उच्यते,—'तिरः अद्रिम् अस्ता' दूर एवावस्थितस्य 'अद्रिं' वज्रम् 'अस्ता' क्षेपेत्यर्थः॥ एव मेतस्मिन् सुषायच्छब्दसम्बन्धाद् "वराहः=मेघः"—इत्युपपत्तिः॥

"अय मपीतरो वराह एतस्मादेव" असौ अपि हि वरं मूलाख्य माहार माहरत्येव। "वरं वरं मूलं हरति"—उद्धरतीत्यर्थः॥

---

* १भा० ४०६ पृ० ७पं०।

†"अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना। सुषायद्विष्णुः पचतं सहीयान् विध्यद्वराहं तिरो अद्रिं भस्ता॥"—इति ऋ० सं० १, ४, २८, २।

यथा अय मपीतरो वराह-शब्दः छन्दसि वराह इत्युच्यते, तथैष निगमः;—"विश्वेत्ता विष्णुरा०——०एमुषम्"* । काण्वस्य पुरुसुतेरार्षम्। ऐन्द्री। 'विश्वा इत् ता' विश्वानि एव तानि 'विष्णुः आभरत्'। 'उरुक्रमः' बहुविक्रान्तः, 'लेषितः' सन्दीपितः इन्द्रः वाक्येन। यदि 'त्वा', 'इषितः'—इति पदविभागः†; तथापि तु 'लेषितः'—इत्येकं पदं छान्दसत्वेन निरुक्तम्, परोक्षकृतत्वान्मन्त्रस्य; नान्यथार्थ उपपद्यते। कानि पुनस्तानि बहूनि आहरत्? इति उच्यते;—'शतं महिषान्' बहून् महतो यज्ञान् आहरत्। किंलक्षणान्? इति उच्यते;—'क्षीरपाकम् ओदनम्' प्रायणीयाख्य मादितः कृत्वा ये क्रियन्ते तान्, सोमक्रतूनित्यभिप्रायः। कुतः पुनराहरत्? इति उच्यते;—'वराहम्' असुरम्, वराहरूपेणावस्थितम्। सर्वेषा मसुराणां मध्ये 'एमुषम्' मोहस्थानीयम्॥ "माययाय मिन्द्रो जघान, तस्य मध्यादाहरत्; यदयं वराह मिन्द्र एमुष मेकविंशत्याः पुरां पार इत्युच्यते"—इत्येवं ब्राह्मणं मैत्रायणीयके; तदनुवादिनी चैषा ऋक्‡। तस्मादत्र वराह एवोच्यत इत्युपपद्यते॥

---

* "विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः। शतं महिषान् क्षीरपाक मोदनं वराह मिन्द्र एमुषम्॥"—इति ऋ० सं० १, ५, २०, ४।

† "त्वाऽइषितः।"—इत्येवं पदकाराः पठन्ति।

‡ "अस्या ऋचो निरुक्तैतिहासिकमतभेदेन द्विधा योजना। नैरुक्तपक्षे तावत्;—* * *। ऐतिहासिकपक्षे चरकब्राह्मणे इतिहास आम्नायते।"—इति सा० भा० (ऋ० सं० १, ५, २०, ५)। "आपो वा इद मग्रे सलिल मासीत्, तस्मिन् प्रजापतिर्वायुर्भूत्वाचरत्, स इमा मपश्यत्, तां वराहो भूत्वाहरत्"—इति तै० सं० ७, १, ५। "स वराहो रूपं कृत्वीपन्यमज्जत्"—इत्यादि तै० ब्रा० १, १, २। "उद्धतासि वराहेण कृष्णेन शतबाहुना"—इत्यादि तै० आ० १०, १, ८। "ता मेमुष इति वराह उज्जघान"—इति श० ब्रा० १४, १, २, ११। इत्यादीतिहासिकानाम्।

"अङ्गिरसोऽपि वराहा उच्यन्ते"। "स ईं सत्येभिः ०——० व्यानट्" *। आयासस्याङ्गिरससेय मार्षम्। ब्राह्मणस्यत्यस्य काम्यपशौ षड्र्चे विनियुक्ता मैत्रायणीयके। 'सः' 'ब्रह्मणस्पतिः', 'सत्येभिः' सत्यवादिभिः, 'सखिभिः' समानख्यानैः, 'प्रुचद्भिः' दीप्तिमद्भिः, 'वि धनसैः' विविधधनवद्भिः, 'वृषभिः' वर्षद्भिः वर्षितृभिः, 'वराहैः', 'घर्मस्वेदिभिः' घर्मतापयितृभिः, प्रवर्ग्यकर्मणि; अथ वा यज्ञस्वेदिभिः, यज्ञस्वादयितृभिः, यज्ञमद्भिर्वा। एवङ्गुणविशिष्टैरङ्गिरोभिः सहितो ब्रह्मणस्पतिः 'गोधायसं' गोः वाचः धायितारम्, अपां वा; मेघम्। 'अदर्दः' अदारयदिति। विपरिणामपरोक्षकृतत्वान्मन्त्रस्य। दारयित्वा च 'द्रविणम्' उदकं 'व्यानट्' व्याप्नोतीत्यर्थः। एतस्यामृचि अङ्गिरसां विशेषलिङ्गं नास्ति वराहशब्दवाच्यत्वं, सूक्ते तु एतस्मिन्नङ्गिरसो लिङ्गमस्तीत्यर्थः† ।—

"ऋतं शंसन्त०——० मनन्त"‡। 'ऋतं शंसन्तः' ऋतं सत्यं वा प्रशंसन्तः, अपि च 'ऋजु' अकुटिलम् अतिकाल मेव 'दीधानाः' ध्यायमानाः, सर्वभूतानामुपरि समचेतस इत्यभिप्रायः। 'दिवस्पुत्रासः' द्योतनवतः, 'असुरस्य' प्रज्ञावतः पुत्राः, 'वीराः' विविधाना

---

* "स ईं सत्येभिः सखिभिः प्रुचद्भिर्गोधायसं वि धनसैरदर्दः। ब्रह्मणस्पतिर्द्रविणं वराहे घर्मस्वेदेभिर्द्रविणं व्यानट्॥"—इति ऋ० सं० ८, २, १९, १।

† ऋ० सं० १० ५, ९७ सू० द्रष्टव्यम्।

‡ नचैव सूक्ते इयं द्वितीया, अत इमां दर्शयति; अत्र तु 'अङ्गिरसः'—इति पदस्य समुच्चेय एव दर्शनीयः। ऋक्पाठस्त्वेवः,—"ऋतं शंसन्त ऋजु दीधाना दिवस्पुत्रासो असुरस्य वीराः। विप्रं पदमङ्गिरसो दधाना यज्ञस्य धाम प्रथमं मनन्त॥"—इति (ऋ० सं० ८, ३, १५ सू०, १=१०, ५, ९७ व०, २)।

मर्त्यानां वक्तारः, प्रेरयितारो वा मेधावित्वात्। 'विप्रं पदं' वि प्राप्तं सर्वतः प्राप्तं 'अङ्गिरसो दधानाः'। यत्पदं स्थानं ज्ञानसहितस्य कर्मणः फलपराकाष्ठा, ता अङ्गिरसो दधाना धारयन्तः चेतसा; विदुषप्रज्ञत्वात्। "यज्ञस्य धाम प्रथमं मनन्त" 'यज्ञस्य' यत् 'प्रथमं' मुख्यं परमात्माख्य मनोवृत्तिलक्षणं 'धाम' स्थानं तत्त्वेन 'मनन्त' जानत इत्यर्थः॥ एतदेवैतस्या स्तुचि अङ्गिरोलिङ्गं दृष्ट्वा एष निगमो भाष्यकारेणोदाहृतः;—"अङ्गिरसोऽपि वराहा उच्यन्ते"—इति॥

"अथापि एते माध्यमका देवगणा वराहव उच्यन्ते" ; "मरुतः, रुद्राः"—इत्येवमादयः*। अङ्गिरसो ह्यृषिसमाख्या मपि लभन्ते, तस्मान्माध्यमकत्वेऽपि सति पृथगुद्भूत्योक्ताः। ये तावन्मरुतो वराहशब्देनोच्यन्ते, तथैव निगमः;—एतत्यन्० ——० वराङ्न्†। राङ्गणस्य गोतमस्येय मार्षम्। "आविद्युन्मद्भिर्मरुतः"—इतीयञ्चैतस्मिन्नेव सूक्ते‡। हे 'मरुतः!' 'एतद्' 'त्यद्' बलं यौष्माकीणं 'न योजन मचेति' न योग मागच्छति, विजितारित्वात् भवतां न युज्येत इत्यर्थः। तस्य बलस्य किम्? इति उच्यते;—'सस्वर्ह यन् मरुतो वः'। अन्तर्हितं यत् सर्वेषां मनुष्याणाम्। यस्य च मध्ये युष्मान् 'वराङ्न्' परेषां शत्रूणां उद्दर्हृन्, उद्दर्हणान्, 'हिरण्यचक्रान्' सुवर्णविकृतचक्रान्, 'अयोदंष्ट्रान्' अयोमयान् रथानधिरूढ़ान् 'विधावतः' नानाप्रकारं

---

* १मा० ४८३सू० ५अ० ५ख० (८), (९)।

† "एतत्यन्न योजन मचेति सुसर्ह यन्मरुतो मे तमो वः। पश्यन् हिरण्यचक्रानयोदंष्ट्रान् विधावतो वराङ्न्॥"—इति ऋ० सं० १, ६, १४, ५।

‡ ऋ० सं० १, १४, ४ सू०=१ ६, १४ व०।

धावनः, 'पश्यन्' स्तौति, 'गौतमः'*। तदेतन्न योजनमचेति। अचेतिर्गत्यर्थः; अञ्चतेर्गत्यर्थस्य सारूप्यात्। एवं मन्त्रे प्रकरणे मरुतो वराहव उच्यन्ते इत्युपपत्तिः। मरुतादयो हि सर्व एव माध्यमका देवगणा वराहव उच्यन्ते†। तेषां शाखान्तरेषु स्तुत्या निगमाः। निगमानुपलब्धौ च "माध्यमका देवगणा वराहव उच्यन्ते"—एतद् बह्वृचवचनं मरुत्स्वेव योज्यम्; तेषां सप्तसप्तका गणा ब्राह्मणे हि श्रूयन्ते; —"ते सप्तसप्त मरुतां गणाः"—इति, तस्मादेव मध्युपपद्यते।

एवं बह्वृचवचनं भाष्यकारस्य एकदेवताविषयेऽपि कदाचिद् वराहशब्दो भवत्येव, तदप्युपेक्षितव्यम्। तद्यथा,—"द्विवो वराह मरुषं कपर्दिनम्"—इति‡ रुद्र उक्तः॥ ४॥

स्वसराण्यहानि भवन्ति स्वयं सारीण्यपि वा स्वरादित्यो भवति स एनानि§ सारयति। उस्रा इव स्वसराणीत्यपि निगमो भवति। शर्या अङ्गुलयो भवन्ति (सृजन्ति कर्माणि॥) शर्या इषवः शरमय्यः शरः शृणातेः शर्याभिर्न भरमाणो गभस्त्योरित्यपि निगमो भवत्यर्को देवो भवति यदेन मर्चन्त्यर्को मन्त्रो भवति

---

* "अथावो मध्यस्थाना देवगणाः। तेषां मरुतः प्रथमगामिनो भवन्ति"—इत्यादयो द्रष्टव्याः। प० दै० का० ५, १, १।

† मूलपाठस्तु 'गोतमः'—इति।

‡ ऋ० सं० १, ८, ५, ५।

§ "एतानि" क, ख, ग।

॥ बभ्रुनीचिरुक्तान्तर्गतपाठोऽयं दृश्यते क-ख ग पुस्तकेष्वेव।

यदनेनार्चन्यर्क* मन्नं भवत्यर्चति भूतान्यर्को वृक्षो भवति संवृत्तः † कटुकिम्ना ॥ ५ (४) ॥

"स्वसराणि(२२)"—इति‡, अनवगतम्। "स्वयं सारीणि"—इत्यवगमः। "अहानि"—इत्यभिधेयवचनम्; तानि हि स्वय मेव सरन्ति गच्छन्ति। अपि वा "स्वर् आदित्यः" अत्र उच्यते। "स एनानि सारयति" तेनैतानि स्वसराणीत्युच्यन्ते। "विश्वेदेवासो०——०स्वसराणि"§। मधुच्छन्दस आर्षम्। अग्निष्टोमे प्रउगे शस्त्रे गायत्रे हचे वैश्वदेवे शस्यते। हे 'विश्वेदेवाः!' 'अमुरः' कर्म्म प्रति त्वरमाणाः; ते हि याज्ञिकं कर्म्म प्रत्यागन्तुं त्वरन्ते। अतएव मामन्त्र्यन्ते 'सुतम् आगन्त' अस्माभिः अभिषुत मेतं सोमं प्रति 'आगन्त' आगच्छत। हे 'तूर्णयः' त्वरणशीलाः!। कथं पुनरागच्छत? 'उस्रा इव स्वसराणि'। यथा 'उस्राः' रश्मयः, 'स्वसराणि' अहानि प्रति, शीघ्र मागच्छन्ति, एव मागच्छत॥ एव मस्मिन् रश्मिसम्बन्धात् "स्वसराणि" —इत्यहानीत्युपपद्यते॥

"शर्य्याः(२३)"—इति‖, अनवगतम्। "शरमय्यः"—इत्यवगमः। "इषवः" अभिधेयाः। "शरः, शृणातेः" हिंसार्थस्य (क्या० प०); हिंस्यन्ते

---

* "यदेनेनार्चन्यर्क" क, ख, ग।

† "सवृतः" क, ख, ग। "सवृत्तः" च।

‡ १भा० ४०९४० ९पं०।

§ "विश्वेदेवासो अमुरः सुत मागन्तु तूर्णयः। उस्रा इव स्वसराणि॥"—इति ऋ० सं० १, १, ९, २।

‖ १भा० ४०९ ४० ११पं०।

हि तेन। "अभ्यभि हि०——०गभस्त्योः"*। ऋग्वः चसदस्युश्च "पर्ष्वु षु प्र धन्व वाजसातये"—इति पावमानं सौम्यं सूक्तं ददृशतुः। पिपीलिकमध्यास्तिस्रोऽनुष्टुभः षड्भिर्हृदयैः, तासा मिमं द्वितीया। 'अभि ततर्दिथ' एतं सोमं हे अभिषोतारः! पुनःपुनरभिहतेत्यर्थः। 'अवसा' अवनीयेन मन्त्रेण। कथं पुनरभिततर्दिथ? इति,—'अर्थाभिः न भरमाणः' शरमयीभिः इषुभिः यथा कश्चित् कं तर्दयेत् धनुर्द्वारयमाणः, एव मेतं सोमम् एभिः गवभिः 'गभस्त्योः' बाह्वोरवस्थितैरभिततर्दिथ यूयम्। किञ्च; एव मेतं सोमं अभितर्दयन्तो यूयं वसतीवरीभिरद्भिराप्याय 'उत्सं न कञ्चित्' कूप मिव कञ्चित् 'जनपानं' महतः 'अचितम्' अचीणं कुरुत; महतो देवजनौघस्यपानार्हं प्रभूतं कुरुतेत्यभिप्रायः॥ एव मिहाभितर्दनक्रियासम्बन्धात् "अर्थो"-शब्देन इषव उच्यन्त इत्युपपद्यते॥

"अर्कः(१४)"—इति‡, अनेकार्थम्। "देवः" तावत् सर्व एवार्क इत्युच्यते। आह किं कारणम्? उच्यते;—"यत्" यस्मात् "एनं" देवम् "अर्चन्ति" स्तोतारः। "अर्को मन्त्रो भवति"। किं कारणं? "यत्" यस्मात् "अनेन" मन्त्रेण "अर्चन्ति" तस्मादर्कः। "अर्कं मन्त्रं भवति"। किं कारणम्? तद्धि "अर्चति भूतानि" यो हि पूज्यः, तस्माद् त मपि संस्कारविशेषेण संस्कृतं पूजा क्रियते, पूज्यं

---

* "अभ्यभि हि अवसा ततर्दिथात्मं न कञ्चिज्जनपान् महितम्। अर्थाभिर्न भरमाणो गभस्त्योः॥"—इति ऋ० सं० ७ ५, १२, ५. = ९, ७, ७, ५.

† ऋ० सं० ९, ७, ७ ऋ०।

‡ १भा० ४१९ पृ० १४पं०।

च सर्वस्यैव मन्त्रम्। "अर्को वृचो भवति" य एष प्रमिङ्गः। आह किं कारणम्? इति, उच्यते;—"संवृक्तः" सङ्गतः, संव्याप्तः; "कटुकिन्ना" कटुकभावेन भवति ॥ ५ ॥

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कं मर्किणः। ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ गायन्ति त्वा गायत्रिणः प्रार्चन्ति तेऽर्कं मर्किणो ब्राह्मणास्त्वा* शतक्रत उद्वंशमिव येमिरे वंशमिव येमिरे वनस्पतौ यथा [illegible] रथमिव धुरि स्थितं शविष्ठोनाति भूमिम्। उत प्रया रयाना मद्रिं भिन्दन्त्योजसा। तं मरुतः क्षुरपविना व्ययुरित्यपि† निगमौ भवतः। वक्षो व्याख्यातं धन्वान्तरिक्षं धन्वन्त्यस्मादापः। तिरो धन्वातिरोचत इत्यपि निगमो भवति। सिन मन्नं भवति सिनाति भूतानि। येन स्मा सिनं भरथः सखिभ्य इत्यपि निगमो भवति। इत्थाधीमुथेत्येतेन व्याख्यातं सचा संहेत्यर्थः। वसुभिः सचाभुवा। वसुभिः सहभुवौ। चिदिति निपातोऽनुदात्तः पुरस्तादेव व्याख्यातोऽथापि पशुनामेह भवत्युदात्तश्चिद्दसि मनासि चितास्त्वयि भोगाश्चेतयस इति वा आ इत्याकार उपसर्गः पुरस्तादेव व्याख्यातोऽथाप्यर्थे

---

* "ब्रह्माणस्त्वा" क, ख, ग।

† "क्षुरपविनाधयुरित्यपि"—इति क, ख, ग।

‡ "भवतीत्था-" क, ख।

दृश्यते। अभ्र आँ अपः। अभ्रे आ अपोऽपेऽभ्रेऽधीति* द्युम्नं द्योततेर्यशो वा अन्नं वा†। अस्मे द्युम्न मधि रत्नं च धेहि। अस्मासु द्युम्नं च रत्नं च धेहि ॥ ६ (५)॥

॥ इति पञ्चमाध्यायस्य प्रथमः पादः॥ ५,१.

यथा तावदेवोऽर्कशब्देन उच्यते, तथैष निगमः ;— "गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्क मर्किणः—येमिरे"‡। मधुच्छन्दस आर्षम्। अनुष्टुप्। ऐन्द्री। हे भगवन्निन्द्र! 'गायन्ति त्वा गायत्रिणः' स्तुवन्ति त्वां सामगाः, सामभिः। 'अर्चन्त्यर्क मर्किणः' पूजयन्ति [illegible] देवजनाश्च [illegible] होतारो मन्त्रिणः। एव मनेन प्रकारेण सर्व एते [illegible] याज्ञे कर्मणि हे 'शतक्रतो!'। 'उद्वंश मिव येमिरे' उद्येमिरे वंश मिव त्वां स्तुतिभिः हविर्भिश्च; यज्ञेषु तवैव महिमानं वर्द्धयन्तीत्यर्थः॥ "वंशो वनशयो भवति"; वने शयित इवास्ते। "वननाच्छूयत इति वा" सम्भजनाद् वा वल्लिभिः॥ एव मत्र देवः "अर्क"-शब्देनोच्यते॥

मन्त्रस्यार्कशब्दवाच्ये "अर्चन्त्यर्क मर्किणः"—इत्येष एव निगमः (३५पृ० ४पं०); अर्किणो हि मन्त्रिण एवाभिप्रेताः॥

वृत्तस्तु प्रसिद्ध एव, तेन निगमस्तदभिधायको नैवास्ति॥

---

* "अभ्र आ अपोऽभेऽध इति" क, ख, ग।

† "यशो वान्नं वा" ङ, च।

‡ "गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्क मर्किणः। ब्रह्माणस्त्वा शतक्रतु उद्वंश मिव येमिरे॥"—इति ऋ० सं० १, ९, १९, १।

"पविः(१५)"—इति*, अनवगतम्। "रथनेमिर्भवति"—इत्यभिधेयवचनम्। "यद् विपुनाति भूमिम्"; सा हि विपुनाति भूमिमिति पविः॥ "उत स्म ते०——•भिन्द्न्योजसा"†। श्यावाश्वस्येयं मार्षम्। हे मरुतः! येषां वः तिरोभवितुं माविर्भवितुं च काले शक्तिरस्ति, ते यूयम् 'उत स्म' अपि च कस्मिंश्चन काले 'शुन्ध्यवः' मद्भाव इव 'परुष्ण्यां' नद्यां, माध्यमिकायां वा [illegible] वत्यां यूयमेव 'शुन्ध्यवः' शोधयितारः [illegible] [illegible] 'उत' अपि च; कस्मिंश्चिदनुष्ठाने [illegible] यानां पत्या.' या रथनेमयः; ता एव 'अद्रिम्' रथानां मां; 'ओजसा' बलेन, किं सुत यूयमित्यभिप्रायः॥ एवं मेतस्मिन्नर्थसंयोगात्पविशब्देन रथचक्रनेमिरभिसम्बध्यते। ब्राह्मणमपि चैतस्मिन्नेवार्थे चातुर्मास्येषु सान्तपनं हविरधिकृत्य 'देवा वै वृत्रस्य मर्म नाविदंस्-"तं मरुतः क्षुरपविना व्ययुः" सान्तपनं सन्तपंस्तस्मात् सान्तपनाः'—इति। एतस्मिन्नपि च ब्राह्मणे चक्रनेमिः क्षुरधाराकृतिस्तीक्ष्णपविरित्युच्यते, तस्मादुपपद्यते। अल्पप्रयोगविषयत्वादुदाहरणद्वयम्॥

"वक्षः(१६)"—इति‡, व्याख्यातम्। "उर्वी अदर्शि शुन्ध्यवः"—इत्यत्र§॥

---

* १भा० ४०९ पृ० १८ पं०।

† "उत स्म ते परुष्ण्या सूर्णा वसत शुन्ध्यवः। उत पत्वा रथाना मद्रिं भिन्द्न्योजसा"—इति ऋ० सं० ४, २, ९, ४।

‡ १भा० ४१० पृ० ३पं०।

§ २भा० (४२३ पृ०) ४अ० २पा० ८ख०।

"धन्व(१७)"—इति *, अनवगतम्। "धन्वन्ति"—इत्यवगमः। "अन्तरिक्षम्"—इत्यभिधेयवचनम्। "धन्वन्त्यस्मादापः"—इति नाम-प्राप्तौ हेतुनिर्देशः;—"यः परस्याः०——०इति द्विषः" †। अग्नि-पुचस्य वत्सस्येयं मार्षम्। व्यूढस्य दशरात्रस्य नवमेऽहन्याग्निमारुतस्य शस्त्रस्य जातवेदस्ये सूक्ते निविद्धानीये शस्यते। 'यः' अग्निरादित्या-त्मनावस्थितः, 'परस्याः परावतः' परस्या मपि परावति वर्त्तमानः, 'तिरः' तीर्णतम मेतन्मन्त्रस्थरिक्षं 'धन्व' खेन प्रभावेन दीप्त्या 'अति' अतीत्य, अस्मान् प्रति 'रोचते' एव, प्रकाशत एव। अने-नैव मतिमहतापि तिरोधीयत इत्यभिप्रायः। तस्य किम्? इत्यु-च्यते,—'स नः' सोऽस्माकं 'पर्षत्' 'अति' सर्व्वतः पादयतु नाशयतु 'द्विषः' द्वेष्टॄन् इत्यर्थः॥ एव मस्मिन्नादित्यस्तुतिसम्बन्धात् "धन्व" शब्दोऽन्तरिक्षाभिधान मित्युपपद्यते॥

"सिनम्(१८)"—इति‡, अनवगतम्। "सिनाति"—इति शब्दयुक्तिः। "अन्नं भवति"—इत्यभिधेयवचनम्। "सिनाति भूतानि" वध्रा-तीत्यर्थः; अन्नेन हि सर्व्वाणि भूतानि वध्यन्ते। "इमा उ वां०—०सखिभ्यः§। विश्वामित्रस्येयं मार्षम्। तार्तीयसवनेषु उक्थपर्य्यायेषु

---

* १भा० ४१० ४० ६ पं०।

† "यः परस्याः परावतस्तिरो धन्वाति रोचते। स नः पर्षदति द्विषः॥"—इति ऋ० सं० ८, ८, ४५, १।

‡ १भा० ४१० ४० ८पं०।

§ "इमा उ वां भुमयो मन्यमाना युवावते न तुज्या अभूवन्। क १ त्यदिन्द्रा-वरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः॥"—इति ऋ० सं० ६, ४, ९, १।

सोमाभिशंसने मैत्रावरुणस्य शस्त्रे विनियुक्ता। हे 'इन्द्रावरुणौ!' 'इमा उ वां' युवयोः 'भृमयः' स्तुतयः यायास्तैस्तोत्रभिरुदीरयामहे, तां पुनरेता अस्मै 'युवावते' युष्मद्वते, भवद्भ्यां तद्वते यजमानाय 'न' यथा पूर्वं 'तुज्या' दानायाभिमतानां मर्त्यानाम् 'अभूवन्' बभूवुः। यतो ब्रवीमि;—हे 'इन्द्रावरुणौ!' 'क्व त्यत्' क्व तत्, युवयोः 'यशः' माहाभाग्यं गतम्? 'येन' माहाभाग्येनैताभिः स्तुतिभिः अभिष्टुतौ सन्तौ 'सिनम्' अन्नं 'भरथः' 'सखिभ्यः' समानख्यानेभ्यो यजमानेभ्यः॥ अन्न मेव हि प्रायेण यजमानैः प्रार्थ्यत इति "सिन"-शब्देनात्रान्नमभिधीयत इत्युपपत्तिः। व्यभिचारित्वादभिधानानां "सिनम्"—इत्यादीनि खेखेऽभिधानवर्गे पठितान्यपि* सन्ति नैघण्टुके प्रकरणे समाम्नाता ह्येतस्मिन्नैकपदिके प्रकरणेऽनवगतसंस्काराभिप्रायेण, कानि चिदनेकार्थाभिप्रायेण॥

"इत्था(९९)"—इति†, एष निपातः; "अमुया"—इत्यनेन व्याख्यातोऽष्टमेऽध्याये‡॥

"सचा(९०)—इति§, अप्रतीतार्थो निपातः। "सह"—इत्यर्थप्रतीतिः। "अग्निनेन्द्रेण॰——॰मश्विना"॥‖ श्यावाश्वस्येय मार्षम्। त्रिष्टुप्, ज्योतिष्मती। हे 'अश्विनौ!' एताभिः अग्न्यादिभिः देवताभिः 'सचा भुवौ' सहितौ भूत्वा, 'सजोषसौ च' सहप्रीतौ, इमं

---

* "सिनम्"—इति नि॰ २ अ॰ ७ खण्डेऽष्टमं पदम् (१भा॰ २०२ पृ॰)।

† १भा॰ ४१० पृ॰ १० पं॰।

‡ यास्कीयसप्तमीये इति भावः। २भा॰ ३अ॰ ३पा॰ ४ख॰ (३३०पृ॰, द्रष्टव्यः।

§ १भा॰ ४१० पृ॰ १७ पं॰।

‖ 'अग्निनेन्द्रेण वरुणेन विष्णुनादित्यैरृभुभिः सचा भुवा। सजोषसा उषसा सूर्येण च सोमं पिबत मश्विना॥"—इति ऋ॰ सं॰ ६, ३, १४, १।

'सोमं' 'पिबतम्'। पीत्वा चैतन्नामास्माक मर्थं मभिप्रेतं कुरुत मित्येव माशीर्याज्या ॥ एव मिहाग्न्यादिदेवताभिसम्बन्धात् "सचा"—इत्येष सहयोगे भवतीत्येतदुपपद्यते ॥

"चित्"(२१)—इति*, एष "निपातः"; "अनुदात्तः"। तद्यथा,—"सद्यश्चिद् यः शवसा पञ्च कृष्टीः"—इति †। स "पुरस्तादेव व्याख्यातः" चिदित्येषोऽनेककर्मा"—इत्यत्र ‡। "अथापि" अथ मेव "उदात्तः" आद्युदात्तो भवति, ततः "पशूनाम भवति"। तद्यथा,—"चिदसि मनासि धीरसि—इति राजक्रयणी § गोस्तुतौ। सैवेाच्यते;—"चिदसि मनासि"—इति॥। अतः पुनरेतद् ब्राह्मणे व्याख्यायते, "चिदसीति यदाह विचिकित्सते"—इत्येव मादि आध्वर्यवे ¶ ॥

"आ(२२)—इति**, आकार उपसर्गः; पुरस्तादेव व्याख्यातः"—"आ इत्यवागर्थे"—इति ††। "अथाप्युपमार्थे दृश्यते" निपातत्वेन "जार आ भगम्"—इति ‡‡। "अथापि" कदाचित् "अध्यर्थे दृश्यते",—"अधीत्युपरिभाव ऐश्वर्ये वा"—इति। ययाय मध्यर्धेऽपि भवति, तथा "अभ्र आँ अपः"—इत्येष निगमः। "कदु प्रियया

---

* १भा० ४११ ४ १पं०।

† ऋ० सं० ८, ८, ३९, ३।

‡ १भा० ४८ ४० १ख० १पा० १ख०।

§ राजक्रयणौ = सोमक्रयणौ, यया गवा सोमः क्रीतो भवति; "सोमो वै राजा"—इति श्रुतेः (१, ५, १. ऐ० ब्रा०)।

‖ य० वा० सं० ४, १९ द्रष्टव्या।

¶ ग० ब्रा० २, १, ४, १—१०।

** १भा० ४११ ४० ७प०।

†† १भा० ४१ ४० १ख० १पा० ५ख०।

‡‡ १भा० ३१०४० १ख० १पा० ४ख०।

धात्रे०—०वितनोति मायिनी"*। अधुना पदविभाग मस्य भाष्यकारः करोति, उपसर्गविभागोपप्रदर्शनार्थम्,—"अभ्रे, आँ, अपः"—इति। अधुना "आँ"—इत्यस्यार्थं ब्रवीति,—"अपोऽभ्रेऽधीति" यदुक्तं स्यात्तदेवोक्तं भवति "अभ्र आँ अपः"—इति। प्रतिभानेा राज्ञेयस्येय मार्षम्। वैश्वदेवस्य प्रथमेव। जगतौ। अत्र पुनः प्रायेणापः स्तूयन्ते। "आपो वै विश्वेदेवाः, सर्व्वा एव वा देवताः"—इत्यनेन† ब्राह्मणदर्शनेनापां विश्वेदेवत्व मुपपद्यते। तत् पुनः सूक्तं अभिप्लवस्य षड्हस्य पञ्चमेऽहनि हतीयसवने वैश्वदेवे शस्त्रे शस्यते। "कदु प्रियाय धात्रे मनामहे"। 'कत् उ प्रियाय' सुखाय प्रियाय च 'धात्रे' स्थानाय वैश्वदेवाय, तत्प्राप्त्यर्थम्। तानेव च विश्वान् देवान् यो 'मनामहे', त एव ह्युपास्यमानाः तत् स्थानं प्रापयितुं समर्था इत्यर्थं मनामहे। स्थानविशेषणान्येवोत्तराण्यपि स्वत्वादीनि। 'स्वत्वाय' च धात्रे स्वबलायेत्यर्थः। यत्र स्व मेव बलं भवति, न तत्र परकीयं बल माशास्यते; यथेह लोके। 'स्वयशसे' यत्र स्वमहिमकृत मेव यशो भवति, न सांयौगिकद्रव्यकृतम्। 'महे' महते धात्रे। मत्-प्राप्त्यर्थ मेव 'वयं' मनामहे; मत्वा चोपास्महे इत्यभिप्रायः। 'आमेन्यस्य' मेना माध्यमिका वाक्, सा यत्र; तस्य। 'रजसः' रजो लोकः, अन्तरिक्ष लोक इत्यर्थः; तस्य। 'आँ' उपरि। 'यद् अभ्रे' यो मेघः; तत्र। या आपः अवस्थिताः, ताः 'अपः'। 'वृणाना'

* "कदु प्रियाय धात्रे मनामहे स्वत्वाय स्वयशसे महे वयम्। आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी॥"—इति ऋ० सं० ४, १, १, १।

† "आपो वै सर्वा देवताः"—इति ऐ० ब्रा० १,१,१। "विश्वेदेवाः = सर्वे देवाः"—इति च प० दै० का० १, ४, ५।

सम्भजमाना 'वितनोति' विस्तृणाति वर्षभावेन। 'मायिनी' प्रज्ञावती, माध्यमिका वाक्। ताः 'अपः' 'वयम्' एवमादिगुणयुक्ताः, तासां सेव सर्वगतस्य धात्वः प्राप्त्यर्थं 'मनामहे' याचामहे॥ अभ्रे एव हि अधि आपः वर्त्तन्ते इति आङ्भ्यर्थ इत्युपपद्यते॥

अथ चैव मन्यथास्य मन्त्रस्यार्थः स्यात्;—'कदु प्रियाय' सुखाय प्रियाय चैतस्मै 'धाम्ने' स्थानाय, यत्र वयं वर्त्तामहे। कथं नामैतत् स्थानं सुखं च प्रियं च खत्वच्च खमहत्त्वच्च स्यादित्येव मर्थं विद्वान् देवान् मनामहे। "मदेमहि, मनामहे"—इति याच्ञाकर्म्मसु पठितम्*। कतमाः पुनरपो याचामहे? इति उच्यते;—'आमेन्यस्य रजसः' आभिमुख्येन मननीयस्य रजसोऽन्तरिक्षलोकस्य यदभ्र मुपरि वर्त्तते, तस्मिन्नभ्रे 'अपः' 'वृणाना' सम्भजमाना 'मायिनी' माध्यमिका वाक् 'वितनोति' वृष्टिभावेन, ताः 'मनामहे' याचामहे॥

"द्युम्नम्(२२)"—इति†, अनेकार्थम्। "यशो वा अन्नं वा"—इत्यभिधेयवचनम्। "शृतं ते शिप्रिन्नूतयः ०—०रत्नं च धेहि"‡। वसिष्ठस्यार्षम्। त्रिष्टुबेव। महाव्रते महदुक्थे दक्षिणे पक्षे शस्यते। हे 'शिप्रिन्!' इन्द्र! 'शृतं' 'ते' तव 'ऊतयः' आगमनानि सन्तु। क्व? 'सुदासे' सुदाने कल्याणदाने, एतस्मिन् यजमाने, तथैव मनुग्रहाय, यथा नित्ययाज्येवायं यजमानः स्यादित्यभिप्रायः। आगतस्य च सतः तव 'सहस्रं शंसा' बहूनि स्तोत्राणि सन्तु। 'उत रातिः अस्तु' अपि च

* १भा० १५१४० ३अ० १९ख० (१५), (१९)।

† १भा० ४११४० १९पं०।

‡ शृतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु। जहि वधर्वनुषो मर्त्यस्याधि द्युम्नं रत्नं च धेहि।"—इति ऋ० सं० ५, २, ९, २।

हविर्दत्तिरस्त्वित्येतदेवानुवर्त्तते। एवञ्च त्व मागत उपसृप्तः सन् शृणु, यत् कुरुष्व। हे 'वधः' वधयितः! 'वनुषः मर्त्यस्य', योऽस्मान् हन्तु मिच्छति मर्त्यो मनुष्यः; तस्य। यद् वीर्यम्, तत् 'जहि'। हत्वा च तस्य वीर्यम्, निरुक्त मकृत्वा 'अस्मे' अस्मासु 'द्युम्नम्' "अन्नं यशो वा" 'रत्नं च' 'धेहि' देहीत्यर्थः। 'रत्नं' धनम्। एव मेतस्मिन् शत्रुवधसम्बन्धात् "द्युम्न"-शब्देन "यशो वा अन्नं वा" उच्यत इत्युपपत्तिः; हते हि शत्रौ यशोऽन्नं वा भवतीति॥ "द्युम्नं द्योतते:"—इति, अन्न मेव हि भुञ्जानस्य दीप्तिर्भवतीति। द्युम्नं द्योतयिष्ट च, यशस्तु दीप्तं प्रकाशस्वभावादिति॥ ६॥

इति निरुक्तवृत्तौ दशमाध्यायस्य (पञ्चमाध्यायस्य)
प्रथमः पादः॥ ५, १॥

---

॥ द्वितीयः पादः॥

पविं पुनातेर्मन्त्रः पविं च मुच्यते। येन देवाः पविेणात्मानं पुनते सदेत्यपि निगमो भवति। रश्मयः पविं मुच्यन्ते। गभस्तिपूत इत्यपि* निगमो भवत्यापः पविं मुच्यन्ते। शतपविाः स्वधया मदन्तीर्बहुदकाः। अग्निः पविं मुच्यते वायुः पविं मुच्यते सोमः पविं मुच्यते सूर्यः पविं मुच्यते इन्द्रः पविं मुच्यते। अग्निः

---

* "गभस्तिपूतो ऋभुरद्रिभिः सुत इत्यपि"—इति ङ, च।

पवित्रं स मा पुनातु वायुः सोमः सूर्य इन्द्रः। पवित्रं ते मा पुनन्त्वित्यपि निगमो भवति। तोदस्तुद्यतेः ॥ १ (६) ॥

"पवित्रम्[२४]"—इति*, अनेकार्थम्। "पुनातेः"—इति धातुनिर्देशो निर्वचनाभिप्रायः। "मन्त्रः पवित्र मुच्यते"—इत्यभिधेयवचनम्। "येन देवाः ०———० पुनन्तु नः"†। मन्त्रस्य पवित्रत्वप्रख्यापको नियमः। पवित्रस्य वसिष्ठसहितस्य वा आर्षम्। पावमानी सौमी। 'येन' 'पवित्रेण' मन्त्रेण 'देवाः' ऋत्विग्-यजमानाः 'आत्मानं पुनते' 'सदा' सतत मेव। प्रस्तुते कर्मणि यस्य मन्त्रस्य तत् सामर्थ्यम्, 'तेन' मन्त्रेणैवं वीर्य्यवता 'सहस्रधारेण' बहुप्रस्तरेण प्रविरलेन 'पवमानः' पूयमानः, सोमो मां पुनातु॥ मन्त्रेणैव देवा ऋत्विग्-यजमाना आत्मानं पुनन्ति, तस्मादुपपद्यते तेषां देवत्व मिति; न हि इतरेषां देवानां पाप मस्ति, यत् पूयेत। "न च वै देवान् पापं गच्छति"—इति विज्ञायते। तस्माद्देवशब्देनात्र ऋत्विग्-यजमाना उच्यन्ते। ते हि हविषां दातारः, याचनेन च अर्थिनः तस्मादुपपद्यते तेषां देवत्वम्॥

"रश्मयः पवित्र मुच्यन्ते"; ते हि स्पर्शनेनैव पावयन्ति। "वाचस्पतये पवस्व वृष्णो अंशूंभ्यां गभस्तिपूतः। देवो देवेभ्यः पवस्व

---

* १भा० ४११४० १५पं०।

† "येन देवाः पवित्रेणात्मानं पुनते सदा। तेन सहस्रधारेण पावमानीः पुनन्तु नः॥"—इति सा० सं० उ० आ० ५, १, ८, ५।

येषां भागोऽसि"†—इत्येषा उपांशुग्रहग्रहणे विनियुक्ता। हे सोम! वाचस्पतिरिन्द्रः, त्वां पश्यतीत्येत मर्थं पुरस्कृत्य 'इष्णः' वर्षितुः, अग्नौ प्राखाऋत्या वृष्टिं कर्तुरादित्यस्य ? चार्थे 'पवस्व' पूयस्व; यावेतावन्तर्हितौ सन्तौ सकलयज्ञं व्याप्नुवानौ निषिच्यमानस्यैव ताभ्यां पवस्व। अपि च त्वं प्रागप्यभिषवात् 'गभस्तिपूतः' एव रश्मिपूतः। किञ्च; 'देवः' त्वं दानादिगुणयुक्तः। देवाना मेव दानादिगुणयुक्तानां पवित्र मसि पावयितासि। किं सर्वेषा मेव? नेत्युच्यते,—'येषां भागोऽसि' ये त्वा मभिषवादिक्रियया भजन्ति ऋत्विग्-यजमानाः; ते ह्यत्र देवत्वेनाभिप्रेताः पावनसम्बन्धात्; न हीतरेषां देवानां पाप मस्ति। पूर्ववत् किञ्चित्॥

"पवमान मन्धसो——०धन्वसि"*। एतं मन्त्रं व्याचष्टे। ऋषिगणैरुक्तमाद्यादिभिर्व्यस्तैः समस्तैश्च त्रिभिः "प्र त आशवः"—इत्येतस्याष्टाचत्वारिंशदृचस्य सूक्तस्य † चत्वारिंशता मृचां दशदशर्चो दृष्टाः; तत्रैषा चतुस्त्रिंशत्तमी ‡। हे 'पवमान' पूयमान! सोम! 'अव्ययानि' 'पव्यया' पवित्रमयेन, और्णेन पवित्रेण पूयमानः, त्वम् 'महि' 'अर्णः' उदकम्, उदकत्वेनाभिसम्पन्नः, तत्स्वभाव मुपगतः,

---

* य० वा० सं० ७, १।

† "अग्नौ प्राखाऋतिः सम्यगादित्य मुपतिष्ठते।"—इति म० २अ० ७१ स्तो०।

‡ ऋ० सं० ७, ३, १८, ४.= ९, ५, १, २४ ऋ०।

§ ऋ० सं० ९, ५, १ऋ०।

॥ पवमान मन्धसो धि धावसि सरो न विचो अव्ययानि पव्यया। गभस्तिपूतो नृभिरद्रिभिः सुतो मदो वाजाय धन्वसि॥"—इति।

निर्वृजीषः, स्वच्छो भूत्वा ततो द्रोणकलशं प्रति 'वि धावसि'। कीदृशः पुनः पूर्वं भूत्वा एतां रसावस्था मापद्यसे त्वम्? इति, उच्यते;— पूर्वं तावदरण्येऽवस्थितः, 'गभस्तिपूतः' रश्मिपूतः सन्। ततः आहृत्य क्रीत्वा सोमस्तूप-विक्रय-विधानेन, 'नृभिः' ऋत्विग्यजमानैः 'अद्रिभिः' ग्रावभिः 'सुतः' अभिषुतः। ततो 'मदे' 'वाजाय' अन्नाय 'धन्वसि' क्षत्रं जगद्धारयित्रेऽर्थाय। कथं नाम क्षत्रजगदुपकारित्व मभिनिष्पद्येत, वृष्टिनिमित्तेनेत्येत मर्थं पुरस्कृत्य रसभाव मापन्नो द्रोणकलशं प्रति 'धन्वसि' प्राप्नोषीत्यर्थः? 'सूरो न चित्रः' सूर्य्य इव पूजनीयः॥ एव मस्मि "गभस्तिपूतः"—इत्येतस्मात् पावनसम्बन्धाद्ब्रह्मीनां पवित्रत्व मुपपद्यते॥ कैश्चित् "पवित्रवन्तः परि वाचं मासते"—इति*, एष निगमो विधीयते॥

*"आपः पवित्र मुच्यन्ते"; ता अपि हि पावयन्ति। "शतपविचाः स्वधया०—०जुहोत" †। अब्देवत्या। चिष्टुप्। वसिष्ठस्यार्षम्। 'शतपविचाः' बहुपावयित्र्यः, याः देव्यः, 'स्वधया' अन्नेन सहिता भूत्वा 'मदन्तीः' 'देवीः' दानादिगुणयुक्ताः, 'देवानां' दानादिगुणयुक्ताना मेव 'पाथः' पानं सोमाख्यम्, 'अपि यन्ति' अपि गच्छन्ति। ताः, एवंलक्षणा आपः, 'इन्द्रस्य न मिनन्ति' न हिंसन्ति च तानि कर्म्माणि? येनाभ्रवधानन्तर मविलम्बमाना वर्षभावेन प्रवर्त्तन्तीत्यभिप्रायः। या एताः, एवङ्गुणयुक्ता आपः, ताभ्योऽद्भ्यः 'सिन्धुभ्यः'

---

* ऋ० सं० ७, ९, १९, १।

† "शतपविचाः स्वधया मदन्तीर्देवीर्देवानां मपि यन्ति पाथः। ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज्जुहोत॥"—इति ५, ४, १४, २।

स्यन्दमानाभ्यः 'हव्यं' हविः, 'घृतवत्' घृतमिश्रम् 'जुहोत' हे ऋत्विजः! अर्हन्ति ता हविरित्यभिप्रायः॥ एव मन्त्रापः "पवित्र"-शब्देनोच्यन्ते, अब्दैवतत्वादस्य मन्त्रस्य॥

अन्यादयोऽपि ह्येते पवित्रशब्देनोच्यन्ते; तेऽपि हि सर्व्व एव पावयन्ति। "अग्निः पवित्रं स मा पुनातु, वायुः सोमः सूर्य इन्द्रः पवित्रं ते मा पुनन्तु॥"—"इत्यपि निगमो भवति"। निगदप्रसिद्ध एवैष निगमः (?)॥

"तोदः(२४)"—इति *, अनवगतम्। "तुदः"—इत्यवगमः। "तुद्यतेः" व्यथनार्थस्येति (तु० उ०) धातुनिर्देशः। भूमेर्विलं तोद इत्युच्यते; तद्धि तुन्नं भवति दीर्घत्वात्। कूप इत्येके॥ २ (६)॥

पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा। तोदस्येव शरण आ महस्य॥ बहुदाश्वांस्त्वा मेवाभिह्वयाम्यरिरमिच ऋच्छतेरीश्वरोऽप्यरिरेतस्मादेव यदन्यदेवत्या अग्नावाहुतयो ह्रूयन्त इत्येतद् दृष्ट्वैव मवक्ष्यत्†। तोदस्येव शरण आ महस्य। तुदस्येव शरणेऽधि महतः स्वच्वाः सु अच्वनः। आजुह्वानो घृतपृष्ठः स्वच्वा इत्यपि निगमो भवति। शिपिविष्टो विष्णुरिति विष्णोर्वै नामनी भवतः कुत्सितार्थीयं पूर्वं भवतीत्यौपमन्यवः॥ २ (७)॥

"पुरु त्वा दाश्वान् वोचे०——०महस्य"‡। दीर्घतमस

* १भा० ४१२ पृ० ७पं०।
† "मवच्चत्" क, ख, ग।
‡ ऋ० सं० १, १, १९, १।

आर्षम्। उष्णिक्। प्रातरनुवाकाश्विनयोः शस्यते। 'पुरु त्वा दाश्वान्' बहु दानवान् अहं भूत्वा हे अग्ने! त्वा महं 'वोचे' त्वा माङ्क्ष्यामीत्यर्थः। किं पुनः कारण मन्या देवता उत्सृज्य त्वा माङ्क्ष्यामि? इति, उच्यते;— यस्मात् 'अरिः अग्ने! तव स्वित् आ'—इत्येतद् विवक्षार्थं सुचिरमपि विचार्य्य तवाह मरिरेव स्तोमाना मुच्चारणे। अर्य्यः ईश्वर एव, समर्थोऽहं माङ्क्ष्यामि त्वां स्तोतुं बहु च दातुमित्यभिप्रायः। किं पुनः कारण मन्या देवता उत्सृज्य त्वा मेवाङ्क्ष्यामि? इति, उच्यते—इतः;— यस्मात् 'तोदस्य इव शरणे आ महस्य' तुन्नस्येव विदीर्णस्य कस्य चिच्छत्रस्य कूपस्योपरि। आङ् अध्यर्थः। 'महस्य' महत इत्यर्थः। 'शरणे' विले। "शॄ" हिंसायाम् (क्र्या० प०), तस्य शरणं विलम्, तद्विदारितं भवति; तथाहि शुभ्रे विले कस्मिंश्चिद् बहु आपो गच्छन्ति, न च तस्य शुभ्रस्य महतो ग्रहणशक्तिपरिहाणं भवति, एवं तवानेकास्वानेकदेवताश्वाहुतीरस्माभिः प्रदत्ताः प्रतीच्छतो न सामर्थ्यपरिहाण मस्ति, अतो देवताना मस्माकं त्व मेवातिविशिष्टोपकारे प्रवृत्तः, अतः त्वा मेवाङ्क्ष्यामि॥ एव मत्र शब्दसारूप्यादुपमार्थोपपत्तेश्च "तोद"-शब्दस्य भू-प्रदेशस्याभिधायकत्वमित्युपपद्यते। तथा चोक्तम्, "तोदमध्ये निर्हृत्यार्द्धचतुर्हस्तप्रमाणं निखन्यात्"—इति * सदसो निर्माणे॥

स्त्रिया अपि च असत्-प्रदेशः † तोद इत्युच्यते। तस्मादेतदपि तुन्नस्य भू-प्रदेशस्याभिधायक मित्युपपद्यते॥

---

* "योऽस्या मिति निवपति पूर्वार्द्धं शङ्कुसहितम्"—इति का० ५, २, १८।

† असत्कथन मेवासदित्यस्माकम्; "प्रजापतेर्मुखमेतद् द्वितीयम् (म० ब्रा० १प्र० १ख० १म०)"—इत्यादिश्रुतेः।

"अरिः, अमित्रम्; ऋच्छतेः"—इति निगमप्रसक्तम्। ऋच्छतेः हिंसार्थस्य (भू०प०)। "ईश्वरोऽप्यरिः एतस्मादेव" धातोः। यदन्यदेवत्या अग्नावाज्यतयो ह्रियन्ते, यस्मादन्यदेवताश्च अन्यदेवताश्चापरिसङ्ख्या अग्नावाज्यतयो ह्रियन्ते; न चाग्नेस्तासां ग्रहणशक्तिपरिहाण मस्ति; न च ज्ञायते श्वभ्रे विल इव निषिक्ता आपः क्वापि गच्छन्ति, ता आज्यतय इत्येतत् सामान्यं दृष्ट्वैव मवोचन्मन्त्रदृक्;—"तोदस्येव शरण आ महस्य"—इति; "तुदस्येव शरणेऽधि महतः" —इत्यर्थः॥

"स्वञ्चाः(२६)"—इति*, अनवगतम्। "सु—अञ्चनः"—इत्यवगमः। "सं भानुना०—०मेत्याह"†। अत्रेरार्षम्। ऐन्द्री। त्रिष्टुप्। यस्य यजमानस्य नित्यपापयुक्तत्वात् तेषु तेषु कर्म्मसु ज्वलितः अग्निः 'आ जुह्वानः' आह्रयमानः, अभिह्रयमानो वा, 'घृतपृष्ठः' घृताक्तपृष्ठः, 'स्वञ्चाः' शोभनगमनः, स्वेन प्रकाशेन 'भानुना' सता सूर्य्येण 'संयतते' सङ्गच्छते, संस्पर्द्धते वा; सूर्य्येन अतिदीप्तत्वात्। तस्य यजमानस्य किम्? इति, उच्यते;—'तस्मै' एव 'अमृध्राः' अमृताः, अम्लानाः, 'उषसः' 'युच्छान्' विभान्तीत्यर्थः। यस्यैव मभिह्रयमानोऽग्निः नित्यकाल मेव सूर्य्येण संयतते, तस्यैव पुण्यकृतः सुप्रभाता रात्रयो भवन्ति,—नेतरस्य यज्वनः इत्यभिप्रायः। अपि च य एवम् 'आह' अयज्वापि मूढबुद्धितयो दरिद्रः कश्चित् 'इन्द्राय' इन्द्रार्थं 'सुन-

---

* १भा० ४११पृ० ११पं०।

† "सं भानुना यतते सूर्य्यस्याजुह्वानो घृतपृष्ठः स्वञ्चाः। तस्मा अमृध्रा उषसो व्युच्छान्यं इन्द्राय सुनवामेत्याह॥"—इति ऋ० सं० ४, २, ८, १।

वाम' अभिषुणुमः सोमम् 'इति', तस्यापि कल्याणाभिव्याहारिणः सुप्रभाता एवोषसः,—किं पुनः यः सुनोतीत्यभिप्रायः॥ एवं मस्मिन् "सूर्येण संयतते"—इत्यनेन सम्बन्धात् "खचाः = खञ्चनः" अञ्चतेः (भू० प०) गत्यर्थस्य दर्शनादित्युपपद्यते॥

"शिपिविष्टः, विष्णुः"—"इति", एते "विष्णोः" एव "द्वे नामनी भवतः"। अत्र "शिपिविष्टः(३७)"—इति*, एतद् गुणपदं मनवगतम्; पक्षेण चानेकार्थम्। शिपिविष्टः, शेप इव निर्वेष्टित इत्यर्थप्रतीतिः। अस्य सम्बन्धाच्च "विष्णु(३८)"-शब्दः† समाम्नातः। यथा "अत्राः"—इत्यस्य सम्बन्धात् "सोम"-शब्दः "सोमो अत्रा"—इति‡। न ह्यत्र प्राधान्येन विष्णु-शब्दः समाम्नातः, देवतापदत्वात्§। अनयोर्द्वयोरपि नाम्नोः यत् "पूर्वं", तत् "कुत्सितार्थीयं भवति"—"इति" "औपमन्यवः" आचार्यो मन्यते। यथा च कुत्सितार्थीयं तथोदाहरणार्थमेव निर्ब्रुवन् दर्शयिष्यति॥ ॥ २ (७)॥

कि मित्रे विष्णो परिचक्ष्यं भूत् प्र यद्वव्क्षे शिपिविष्टो अस्मि। मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ॥ किं ते विष्णोऽप्रख्यात मेतद्भवत्यप्रख्यापनीयं यन्नः प्रब्रूषे शेप इव निर्वेष्टितोऽस्मीत्यप्रतिपन्न-

---

* १भा० ४१९ पृ० १२पं०।
† १भा० ४१९ पृ० १२पं०।
‡ १भा० ४०२ पृ० ४अ० १ख (१२)।
§ वक्ष्यति च प० दै० का० १, १, ७, ८।
॥ इत उत्तरस्मिन्नेव खण्डेऽपैव।

रश्मिरपि वा प्रशंसानामैवाभिप्रेतं स्यात् किं ते विष्णो प्रख्यात मेतद्भवति प्रख्यापनीयं यदुत प्रब्रूषे शिपिविष्टो-ऽस्मीति प्रतिपन्नरश्मिः शिपयोऽस्य रश्मय उच्यन्ते तैरा-विष्टो भवति। मा वर्पो अस्मदप गूह एतत्। वर्प इति रूपनाम वृणोतीति सतो यदन्यरूपः समिथे सङ्ग्रामे भ-वसि संयतरश्मिस्तस्योत्तरा भूयसे निर्वचनाय॥ ३ (८)॥

"किं मित् ते", "प्रतर्त्ते अह्न—इति*। वसिष्ठस्यैते आर्षे। विष्णोः शिपिविष्टस्याग्नारभ्भणीये चरुः, तस्यैते याज्यानुवाक्ये; वाजपेये च सप्तदशे शस्त्रे शस्यते; सोमातिरेकशस्त्रे च हतौयसवने च किं रूपः त्वम्? इति पृष्टः शिपिविष्टोऽस्मीत्युक्ते अनन्तरं प्रक्रियते; "किं मित् ते विष्णोः"—इति†। किं मेतदेवैकं विगतरश्मिरूपं 'परिच्छद्यं' परिधाख्यापनीयं भवति, नान्यानि रूपाणि तत्र सन्ति, येनैवं "प्र ववव्रे" पुनःपुनर्ब्रूषे। अस्माक मयतः "शिपिविष्टः अस्मि"—इति, "शेप इव निर्वेष्टितोऽस्मीति"; "अप्रतिपन्नरश्मिः" हि सूर्य्यः, उदय-काले निर्वेष्टितः शेप-स्वरूपो भवति, तस्य तद्रूपगुणयोगित्व मकुत्सितार्थ मित्युपपद्यते। "अपि वा" "प्रशंसानामैवाभिप्रेतं स्यात्" प्रशंसायुक्तगुण मेवैतन्नाम स्यात् "शिपिविष्टः"—इति। आह;— कथम्? इति, उच्यते;—"शिपयः", "अत्र" अस्मिन् प्रशंसापत्ते "रश्मयः उच्यन्ते"। स च सूर्य्यो मुहूर्त्ततः "तैः" शिपिसञ्ज्ञैः वाल-

---

* ऋ० सं० ५, १, २५, १; ५।
† ऋ० सं० ५, १, २५, १।

रश्मिभिः "आविष्टः", तस्मात् "शिपिविष्टः"—इत्युच्यते*। एव मेतद् व्युत्पाद्यमानं प्रशंसानामैव भवति; नाक्षीलोपमासम्बद्ध मित्यभिप्रायः। हे 'विष्णो!' किं मेतदेवैकं रूपं तव 'परिवर्ज्यं' "प्रख्यापनीयम्" अस्ति, यदेतदुदयकाले प्रतिपन्नमात्रेषु रश्मिषु नान्यानि रूपाणि प्रख्यापनीयानि सन्ति। "यदुत" एवं "प्रब्रूषे—शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः" प्रतिपन्नमात्रेषु रश्मिष्विति। विजानीमस्यवैतद्रूपद्वयम्। अतो ब्रुमः;—"मा वर्पो अस्मदपगूह एतत्"। 'मा' एतद् 'वर्पः' रूपम् 'अस्मत्' अस्माक मग्रतः प्रख्यापय। किं तर्हि? 'अप गूह एतत्' संवृतं कुरुष्वैतद् "शिपिविष्ट"-शब्दवाच्य मुपमेय रूपम्; अथ वा बालरश्मिसंयुक्तम्। किं तर्हि? "यदन्यरूपः" येनान्येन रूपेण 'समिथे' "सङ्ग्रामे" 'बभूथ' "भवसि"†। "संयतरश्मिः" सम्बद्धानेकरश्मिजालः, तदेव नो माध्यन्दिनं रूप मनेकरश्मिवित्तं प्रकाशयस्वेत्यभिप्रायः। तद्धनाधृष्टं सङ्ग्रामेषु भवति॥ "तस्य" एवार्थस्य प्रकृतस्य यथा प्रशंसानामैतदिति, "उत्तरा" ऋगस्या एव प्रकृताया ऋचः "भूयसे निर्वचनाय"; अत्र हि स्वशब्देनैवास्य प्रशंसानामत्व मुच्यते॥ ३ (८)॥

**प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान्। तन्त्वा गृणामि तवसं मतव्यान् क्षयन्तमस्य**

---

* ऋ० सं० ५, ६, १४, ७ ऋग्व्याख्यायां सा० भा० एव मेव।

† "पुरा खलु विष्णुः स्वं रूपं परित्यज्य कृत्रिमं रूपान्तरं धारयन् सङ्ग्रामे वसिष्ठस्य साहाय्यं चकार। जानन्नृषिरनया प्रत्याचष्टे।"—इति अस्या एव ऋचो व्याख्यारम्भे सायणः।

रजसः पराके ॥ तत्ते ऽद्य* शिपिविष्ट नामार्यः प्रशंसा-म्यर्योऽहं मस्मीश्वर स्तोमाना मर्यस्त्व मसीति वा तत्त्वा स्तौमि तवस मतव्यांस्तवस इति महतो नामधेय मुदितो भवति निवसन्त मस्य रजसः पराके पराक्रान्त आघृणिरागतघृणिः। आघृणे संसचावहै। आगतघृणे संसेवावहै। पृथुज्रयाः पृथुजवः। पृथुज्रया अमिना-दायुर्दृस्योः प्रामापयदायुर्दृस्योः ॥ ४ (९) ॥

"प्र तत् ते अद्य"—इति †। हे 'शिपिविष्ट!' विष्णो! 'तत्' 'ते' तव 'नाम' 'प्रशंसामि' तत्प्रशंसार्थीय मेव पश्यामि; यदन्ये कुत्सिता-र्थीयं पश्यन्ति। 'वयुनानि' युष्मद्विषयाणि प्रज्ञानानि 'विद्वान्' जानानः। किञ्च; "अर्योऽहं मस्मि" यस्मादीश्वरः स्तुतीना मुदीरणे, युष्मद्गुणाभिज्ञः, तस्मादहं प्रशंसामि। अथ "वा" "अर्य्यस्त्व मसि" अर्य ईश्वरः, मदनुग्रहाय समर्थः, तस्मात् प्रशंसामि। तत्ते नामेति विस्फुटतरं प्रशंसानामत्व मिति। यस्त्वं सर्व्वगुणसम्पन्न ईश्वरः, 'तं' 'त्वा' त्वा महं 'गृणामि' स्तौमि। 'तवसं' महान्तम्। 'अतव्यान्' अमहानहम्; आत्मनिन्द्यया स्तूयते। क वर्त्तमानं निवसन्तम्? 'अस्य रजसः' अन्तरिक्षलोकस्य 'पराके' पराक्रान्ते स्थाने, दूराद् दूरतरे निवसन्तं स्तौमि॥

"आघृणिः(९९)"—इति ‡, अनवगतम्। "आगत-घृणिः"—इत्य-

* "तत्ते अद्य"—इति क, ख, ग।

† ऋ० सं ५, ९, १५, ५।

‡ १भा० ४१२ पृ० २पं०।

षगमः। आगतदीप्तिरागतक्रोधो वाभिधेयः। "एहि वां विमुचो॰ —॰नो भव" *। भरद्वाजस्येयं मार्षम्। गायत्री। पौष्णं सूक्तं। 'एहि' आगच्छ। हे 'विमुचः' विमोचयितः! प्रजानाम् तमोभ्यः, पूषन्! सूर्य्य! 'नपात्' नप्तः! अद्भ्योऽग्निर्जायते, अग्नेरादित्यः,—इत्यनयापेक्षया नपात्त्वं सूर्यस्य। अथ वा मनुष्याणा मेव नप्ता स्यात्; नृभ्य ऋत्विग्भ्यो मनुष्येभ्यो जायतेऽग्निः, अग्नेरपि च सूर्य्यो जायते; यदुक्तं मन्युपस्थाने,— "एष प्रातः प्रसुवति"—इति †। 'आघृणे' आगतदीप्ते! 'सं सचावहै' "संसेवावहै"। 'वाम्' आवां परस्परतः। 'रथीन् ऋतस्य' रंहयिता, गमयिता, प्रोत्सर्पयिता त्वं यज्ञस्य 'नः' 'भव'। त्वदुदयप्रतीक्ष एवाहं यज्ञप्रारम्भं प्रत्याशासे। यत् त्व मुदिहि, त्वय्युदिते प्रोत्सर्पता मयं यज्ञ इत्यभिप्रायः। स एव मय मत्र सूर्य्यसम्बन्धात् "आघृणि"-शब्दो दीप्तिवाचकः। दीप्ति-कर्म्मसु च पठित एवायं "हरः(९), हृणिः(१०)"—इति ‡। क्रोधोऽपि हृणिरित्युच्यते, —"हेऊः(१), हरः(२), हृणिः(३)"—इति §; तदपि प्रकरणवशादुपेक्षितव्यम्॥

"पृथुज्रयाः(४०)"—इति ‖, अनवगतम्। "पृथुजवः"—इत्यवगमः।

---

* 'एहि वां विमुचा नपादाघृणे सं सचावहै। रथीऋतस्य नो भव॥"—इति ऋ॰ सं॰ ४, ८ २१, १।

† 'अग्नि मादित्यः सायं प्रविशति, तस्मादग्निर्दूराद्रूपं दृदृशे। उभे हि तेजसी सम्पद्येते, उद्यन्नादित्य मग्निरनु समारोहति, यस्माद्धूम एवाग्निर्दिवा दृदृशे॥"—इति निरुक्तिरिस्मृतिः (य॰ वा॰ सं॰ ३, ९ टी॰)।

‡ १भा॰ १५८ पृ॰ १ष॰ १० ख॰ (९), (१०) टीप्पन्याम्।

§ १भा॰ १२२५ पृ॰ १ष॰ १२ख॰ (१), (२), (३ टीप्पन्याम्।

‖ १भा॰ ४१२५ पृ॰ ८ पं॰।

"यं नु न किः पृतनासु०—०दायुर्दस्योः"*। विश्वामित्रस्येयं मार्षम्। त्रिष्टुप्। ऐन्द्रे सूक्ते व्यूढस्य दशरात्रस्य द्वितीयेऽहनि मरुत्वतीये शस्त्रे शस्यते। 'यं नु न किः' य मिन्द्रं न कश्चिदपि 'पृतनासु' सङ्ग्रामेषु 'स्वराजम्' अपराधीनराज्यं 'द्विता' द्विविधेनापि बलेन सांयौगिकेन औरसेन च, 'तरति' जयति; सर्व्वथा योजेतुं न शक्यत इत्यर्थः। अथवा; 'द्विता तरति' द्विधैकधा वा, बहुधा वा वर्त्तमानं 'पृतनासु' 'यं नु न किः' यं न कश्चित् हन्तुं शक्नोति 'नृतमं' मनुष्यतमं 'हरिष्ठां' हर्य्योः स्थातारम्। 'दूनतमः' ईश्वरतमश्च यः सर्वेभ्य ईश्वरेभ्यः, 'सत्वभिः यो ह शूषैः' अनेकसत्वसंयुक्तैः हस्त्यश्वरथपदातिलक्षणैः सांयोगिकैः बलैः, शूषैश्च बलविशेषैरेव। अथ वा; सत्वशब्दविशेषण मेव "शूष"-शब्दः स्यात्,—सत्वयुक्तैः शूषैः बलैरिति। 'पृथुज्रयाः' विस्तीर्णजवः 'अमिनात् आयुः'। कस्य? 'दस्योः' मेघस्य, असुरस्य; न मह स्तौमि। स इदं नाम करोत्वित्यभिप्रायः॥ एव मत्र शब्दसारूप्यात् वधाधिकाराच्च "पृथुज्रयाः = पृथुजवः"—इत्युपपद्यते॥४ (९)॥

**अग्निं नरो दीधितिभिरणेर्हस्तच्युती जनयन्त प्रशस्तम्। दूरेदृशं गृहपतिं मथर्युम्॥ दीधितयोऽङ्गुलयो भवन्ति धीयन्ते कर्मस्वरणी प्रत्यृत एने अग्निः समरणाज्जायत इति वा हस्तच्युती हस्तप्रच्युत्या जनयन्त प्रशस्तं दूरे दर्शनं गृहपतिं मथनवन्तम्॥ ५ (१०)॥**

---

* "यं नु न किः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठाम्। दूनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः॥"—इति ऋ० सं० ३, १, १२, १।

"अथर्युम्(२९)"—इति *, अनवगतम्। "अतनवन्तम्"—इत्यवगमः॥ "अग्निं नरो०—०मथर्युम्" †। वसिष्ठस्यार्षम्। विराट्त्रिष्टुप्। महाव्रते आग्नेये सूक्ते प्रथमैवेयम् ‡। व्यूढस्य द्वयराचस्य चतुर्थेऽहनि आग्निमारुते शस्त्रे जातवेदस्ये सूक्ते च प्रथमैव §। 'नरः' मनुष्याः 'दीधितिभिः' अङ्गुलिभिः योक्त्रं परिगृह्य, उत्तराणि च 'हस्तच्युती' हस्त-प्रच्युत्या हस्ताभ्यां प्रच्यावयन्तः 'अरण्योः' सकाशाद्अग्निं 'जनयन्त'। 'प्रशस्तं' प्रशस्य मित्यर्थः। 'दूरेदृशं' दूरे दर्शनम् 'गृहपतिम्', 'अथर्युम् "अतनवन्तम्" गमनवन्त मित्यर्थः॥ एव मत्र अततेः गत्यर्थस्य (भू० प०) सारूप्यादन्यधिकाराच्चापि "अथर्युः" अतनवानित्युपपद्यते। "दीधितयोऽङ्गुलयो भवन्ति"; ता हि "धीयन्ते" "कर्मसु" अनुष्ठीयमानेषु। "अरणी" "प्रत्यृतः" प्रतिगतः। "एने", "अग्निः" वा स्यात् "समरणाज्जायते—इति वा"; अरण्योः हि 'समरणात्' समागमनादग्निर्जायते॥ ५ (१०)॥

**एकया प्रतिधा पिबत्साकं सरांसि त्रिंशतम्। इन्द्रः सोमस्य काणुका॥** एकेन प्रतिधानेनापिबत्साकं सहेत्यर्थः। इन्द्रः सोमस्य काणुका कान्तकानीति वा क्रान्तकानीति (वा क्षतकानीति॥) वेन्द्रः सोमस्य कान्त इति वा कणे घात इति वा कणे हतः कान्तिहत-

* १भा० ४१२ पृ० ६१पं०।
† ऋ० सं० ५. १, २३, १।
‡ "आज्यप्रउगे विश्वजितः"—इति ऐ० आ० ५, १।
§ "अग्निरर इत्याग्निमारुतम्"—इति आ० ८, ८।
॥ वन्नलीचिक्रान्तगैत मेतन्न दृश्यते च-पुस्तके।

स्तचैतद्याज्ञिका वेदयन्ते त्रिंशदुक्थपात्राणि माध्यन्दिने सवन एकदेवतानि तान्येतस्मिन् काल एकेन प्रतिधानेन पिबन्ति तान्यच सरांस्युच्यन्ते त्रिंशदपरपक्षस्याहोरात्रा स्त्रिंशत्पूर्वपक्षस्येति नैरुक्तास्तद्या एताश्चान्द्रमस्य आगामिन्य आपो भवन्ति रश्मयस्ता अपरपक्षे पिबन्ति तथापि निगमो भवति। य मक्षिति * मक्षितयः पिबन्तीति। तं पूर्वपक्ष आप्याययन्ति तथापि निगमो भवति। यथा देवा अंशुं माप्याययन्तीति॥ ६ †॥

"काणुका(४२)"—इति ‡, अनवगतम्, अनेकार्थं च। "कान्तकानीति वा, क्रान्तकानीनि वा, क्षतकानीति वा"—इत्येवमाद्याः शब्दसमाधयः। "एकया प्रति०—०काणुका" §। काण्वस्य कुरुसुतेरिय मार्षम्। गायत्री। ऐन्द्री। 'एकया प्रतिधा' एकेन प्रतिधानेन, सङ्कल्पितहितेनैव चेतसा 'पिबत्' पिबतीन्द्रः 'साकं' सहेत्यर्थः। कानि पुनः पिबति? 'सरांसि'। कियन्ति? 'त्रिंशतम्'। कस्य पूर्णानि पिबति? 'सोमस्य'। किङ्गुणयुक्तानि? 'काणुका' "कान्तकानि", प्रियाणीत्यर्थः। अथ "वा" सोमस्य "क्रान्तकानि", अखिलं सरांसि सोमस्य पूर्णानीत्यर्थः। अथ "वा" "क्षतकानि" संस्कृतानि, ऋत्विग्भिः इन्द्रार्थमेव। अथ "वा" "इन्द्रः" यस्मात् "सोमस्य कान्तः" तस्मादपि-

---

* "य मक्षति"—इति च पाठो दृश्यते क्वचित्। ५९ पृ० १९ पं० द्रष्टव्यम्।

† नाचैकादशखण्डसमाप्तिः ङ-च-पुस्तकयोः।

‡ १भा० ४१३ पृ० १९पं०।

§ ऋ० सं० १, ५, २९, ४।

वत्। अन्यथेन्द्रविशेषण मेव स्यान्न सरोविशेषणम्। आह, कथम्? इति, उच्यते,—"आघातः इति वा" आ कणे घातं पिबतीति यावत्, कणे हन्यत इत्यर्थः; "कणे हतः"="कान्तिहतः"—इत्यर्थ। कामः, प्रार्थना, कणे,—इतिसमानार्थाः*; कामे योऽभिहतः, स "कणे हतः" —इत्युच्यते, हतपानाभिलाष इत्यर्थः। एव मेतत् काणुकेति सरोविशेषण मिन्द्रविशेषणं वा? पानविशेषणं वा? सर्व्वेषा मस्मिन्नन्ते प्रकृतत्वात्। एवं चास्य विकल्प्यमानस्यानेकार्थतापि दर्शितैव भवति॥

यदेतदुक्त मस्मिन्नन्ते "सरांसि चिंशतम्"—इति, अस्याभिधेयविषयप्रख्यापनप्रसक्त मिद मुच्यते;—"तत्रैतद्याज्ञिका वेदयन्ते" तत्रैतस्मिन् चिंशच्छब्दे एतदभिधेय मर्थवस्तु याज्ञिकाः 'वेदयन्ते' कथयन्ति। "चिंशदुक्थपात्राणि माध्यन्दिने सवन एकदेवतानि"—इति; तत्र हि माध्यन्दिने सवने उक्थपर्य्यायाः चयोऽप्यैन्द्रा एव भवन्ति, त्रिष्वपि चैतेषु दशा चमसाः‡, तदभिप्रायेण चिंशत्-सरांसीत्युक्तं मन्त्रदृशा। ते ह्यत्रेन्द्रस्य "सरकाः" अभिप्रेताः §। सौधु-सरका इतरस्य कस्य चित् चत्रियस्य यानि तान्युक्थसम्बद्धानि च सोमपात्राणि "एकेन" प्रतिधानेन "पिबन्ति" पीयन्ते, "तान्यत्र सरांस्युच्यन्ते"—

---

* "कनति"—इत्यस्य कान्तिकर्मस्तु पाठात्। १भा०१९९ पृ० द्रष्टव्यम्।

† "ग्रहोक्थं वा एतत् प्रउगं नव प्रातर्ग्रहा गृह्यन्ते। नवभिर्वैहिष्यमाणे स्तुवते; स्तुते स्तोमे दशमं गृह्णाति।"—इति ऐ० ब्रा० ३ १, १।

‡ चमसाः ग्रहाः इति पर्य्यायवचनम्। 'यद् वित्तं ग्रहैर्व्यगृह्णत, तद् ग्रहाणां ग्रहत्वम्।"—इति ऐ० ब्रा० ३. १, ९।

§ सरकः = मद्यपानपात्रम्। तथा हि—"सरकोऽप्यनुतर्षणम्"—इति अ० को० ९, १०, ४२। सौधु, इक्षादिजन्यो मद्यविशेषः (Vinegar)। तथा हि द्विविधं सौधु माह,—"क्षेयः क्षौतरसः सौधुरपक्वमधुरद्रवैः। सिद्धः पक्वरसः सौधुः सम्भवमधुरद्रवैः।"—इति। "मधुरद्रवैरिक्षुरसादिभिः"—इति भा० वि० सू० ७ अ०।

इत्येष याज्ञिकाना मभिप्रायः। "त्रिंशदपरपक्षस्याहोरात्राः, त्रिंशत्-पूर्वपक्षस्येति नैरुक्ताः"। "तत्" तत्रैवं सति "याः एताः" "चान्द्र-मस्यः" चन्द्रमसि भवाः चान्द्रमस्यः, "आगामिन्यः" प्रतिपद्-द्वितीयाद्यासु तिथिष्वागच्छन्तीति। किं तासाम्? इति, उच्यन्ते; —"रश्मयस्ता अपरपक्षे पिबन्ति"। यथा चैतदेवं "तथापि" तत्रैष "निगमः";— "य मक्षिति मक्षितयः पिबन्ति"—इति। चन्द्रमस मपरपक्षे पीत्वा ते सूर्यरश्मयः "पूर्वपक्षे" प्राप्ते पुनः "आप्याययन्ति" आ-पूरयन्ति। यथा चैतदेवं "तथापि" तत्रैष "निगमः";—"यथा देवा अंशुं माप्याययन्ति"—इति॥

"यथा देवा अंशुं माप्याययन्ति, य मक्षिति मक्षितयः पिबन्ति। तेन च इन्द्रो वरुणो बृहस्पतिराप्याययन्तु भुवनस्य गोपाः॥"—इति। राजयज्ञ-गृहीतस्य वैश्वदेवस्यर्त्विरूप्यते, तत्र प्राक् स्विष्टकृतो ऽनेन याज्याऽनुतिर्ह्रीयते। 'यथा' येन प्रकारेण, 'देवाः' सूर्यरश्मयः 'अंशुं' सोमम् 'आप्याययन्ति' पूर्वपक्षे। एव मनेन प्रकारेण हे यजमान! त्वाम् 'इन्द्रः', 'वरुणः', 'बृहस्पतिः' च एते 'भुवनस्य' भूतजातस्य 'गोपाः' गोप्तारः। 'आप्याययन्तु' आयुषा धनेन च। किञ्च; 'यथा' येन प्रकारेण 'अक्षितिम्' अक्षीणं सोमम्, 'अक्षि-तयः' सूर्यरश्मयः 'पिबन्ति', तथा त्वा मपि हविर्दातारं सन्तं पिबन्तु, उपजीवन्तु एते देवाः इति। येषान्तु "य मक्षितिम्"—इति पाठः, तेषां य मक्षति मक्षितयः पिबन्ति,स च त्वा माप्याययन्त्वि-त्येवं योज्यम्*॥

---

* ब० बा० सं० पञ्चमाध्यायीयसप्तमकण्डिका, तादृक्षा च मद्दीधर-कृता इत्यस्या।

आह ;—"एकया प्रतिधापिबत्"—इत्येतस्मिन्मन्त्रे * "साकं सरांसि त्रिंशतं शिन्द्रः" पिबतीत्युक्तम्। नैरुक्तपक्षेणोक्तम्,—"तद् या एताश्चान्द्रमस आगामिन्य आपो भवन्ति रश्मयः, ता अपरपक्षे पिबन्ति"—इति ; तदेतद्रश्मिषु पाक्षेषु, चन्द्रमसि च पीयमाने, सर्वं मेवेद मसम्बद्धं भवति?—इति, "एकया प्रतिधापिबत्"—इत्येतस्य मन्त्रस्यैन्द्रत्वात्। इतरस्मिन् "अचिति मचितयः पिबन्ति"—इति रश्मिनां पान-सम्बन्धादादित्य उच्यते ; आदित्योऽपि हि इन्द्र-शब्देनोच्यत एव —"असावादित्य इन्द्रः"—इति विज्ञायते। तदवयवभूताश्च रश्मयः, आदित्येन सह समासव्यासस्तुतिभाजः†। सरः-शब्दः खल्वपि उदके एव वर्त्तते; "पयः(३७), सरः(३८), भेषजम्(३९)"—इत्युदकनामसु पठितम्‡। तत्रैवं सति यानि तान्युदकानि सरांसि पञ्चदशाहः-सम्भृतानि साक मवस्थितानि भवन्ति चन्द्रमसि, तानि सूर्यः = इन्द्रो रश्मिभिरपरपक्षे पिबतीति। एव मेतत् सर्वं सुपपद्यते एव नैरुक्तपक्षे॥ ६ ॥

अधिगर्मन्त्रो भवति गव्यधिकृतत्वादपि वा प्रशासन मेवाभिप्रेतं§ स्यात्तच्छब्दवत्त्वादधिगो शमीध्वं सुशमि शमीध्वं शमीध्व मधिगवित्यग्निरप्यधिगुरुच्यते। तुभ्यं स्योतन्त्यधिगो शचीवः। अधृतगमनकर्मवन्निन्द्रो-

---

* पु० ५९ पं० १४ पं०।

† "तासां भक्तिसाहचर्यं व्याख्यास्यामः"—इत्यादि। प० दै०का० ७, १, १—४।

‡ १भा० ९९ पृ० १ष० १२ ख० (३७) टीप्पन्याम्, (३८), (३९)।

§ "प्रशंसनामैवाभिप्रेतं"+ इति क, ख, ग।

ऽप्यधिगुरुच्यते। अधिगव आह मिन्द्राऽइत्यपि निगमो भवति। आङ्गूष* स्तोम आघोषः। एनाङ्गूषेण वय मिन्द्रवन्तः। अनेन स्तोमेन वय मिन्द्रवन्तः॥ ७(११)॥

"अधिगुः(४२)"—इति †, अनवगतम्, अनेकार्थञ्च। "अधिगुर्मन्त्रो भवति"। आह, किं कारणम्? उच्यते;—"गवि अधिकृतत्वात्। सोय मधिगुः सन् अधिगुरित्यर्थः। गवि योऽधिकृतो मन्त्रः स अधिगुः। "अपि वा" गोरनित्यत्वात् "प्रशासन मेव" एतत् "अभिप्रेतं" स्यात्। अधिगुर्नाम कश्चिदस्ति दैव्यः शमिता, तस्यैतत् प्रशासनं स्यात्, सम्प्रेषण मित्यर्थः ‡। किं कारणम्? "तच्छब्दवत्त्वात्"। तथा ह्यस्य मन्त्रस्य अधिगुशब्दवत्त्वं यदेतदुक्त मुपपद्यते। तदनेनैव निगमेन "अधिगो शमीध्वम्"—इति §। हे 'अधिगो!' सर्व्व एव यूयं 'शमीध्वम्' "शमयध्वम्" एनं पशु मिति। "दैव्याः शमितार आरभध्वम्०——०आशासाना मेधपतिभ्यां मेधम्०——०नेदङ्स्तोके तनये रवितारवच्छमितारः०——०अधिगो शमीध्वम्"—इति ॥ प्रेषः। हे

---

* "भवत्याङ्गूष"—इति क, ख।

† १भा० ४१४ पृ० ५ पं०।

‡ "अग्निर्वै देवानां होताऽऽसीत्, स एनं वाचा व्यशाद्; वाचा वा एनं होता विशास्ति"—इति ऐ० ब्रा० २, १, ७।

§ ऐ० ब्रा० २, १, ७।

॥ "दैव्याः शमितार आरभध्व मुत मनुष्याः * * * उपनयत मेधा दुर आशासाना मेधपतिभ्यां मेधम् * * * प्रास्मा अग्निं भरत * * * स्तृणीत बर्हिः * * * अन्वेनं माता मन्यता मनु पितानु भ्राता सगर्भ्योऽनुसखा सयूथ्यः * * * दौचौना मस्य पदो निधत्तात् स्रुचं चतुर्गृहीतादाज्यं वातं प्राण मन्ववस्रजतादन्तरिक्ष मस्तं दिशः श्रोत्रं पृथिवीं शरीरम् * * * एकधास्य त्वच माच्छ्यतात् पुरा नाभ्या अपि-

'दैव्याः!' 'शमितारः!' अपि च हे 'मनुष्याः!' 'आरभध्वम्' 'उपनयत' च एनं पशुम्। एताः 'मेध्याः' * 'दुरः' यज्ञगृहद्वार इत्यर्थः। 'आशासानाः' प्रार्थयमानाः, 'मेधपतिभ्याम्' † आभ्यां मग्नीषोमाभ्यां मेधम् एनं पशुं शमयितुम्। किञ्च; 'प्र अस्मै अग्निं भरत' प्रभरतास्मै पशवे सञ्ज्ञप्यमानाय अग्निं मुखमुकम्, पुरस्ताद्धारयतेत्यर्थः ‡। किञ्च; 'स्तृणीत बर्हिः' अस्मै पशवे सञ्ज्ञप्यमानाय, उपाकरणं मेनं दर्भमपास्यतेत्यर्थः §। किञ्च; 'अन्वेनं माता मन्यताम्' एनं सञ्ज्ञप्यमानं माता अनुमन्यताम्। 'अनु' मन्यतां 'पिता'। 'भ्राता सगर्भ्यः' 'अनु'मन्यतां सहगर्भीयः, सहोदर इत्यर्थः। 'अनुमन्यतां' चैनं 'सखा सयूथ्यः' सहयूथचारी; 'अनु' मन्यता मेन मेभिः सञ्ज्ञपयतेत्यभिप्रायः। किञ्च; 'उदीचीनाम् अस्य पदो निधत्तात्' उदक्पाद मेनं सञ्ज्ञपयतेत्यर्थः। किञ्च; सूर्य्यप्रभव मस्य चक्षुः, ततः 'सूर्य्यम्'

---

श्रसो वपा मुत्खिदतादन्तरेवोष्माणं वारयध्वात् * * * श्रोणं मस्य वक्षः क्रणुतात् प्रश्रसा वाह श्रसा दोषणी कश्यपेवांसाऽच्छिद्रे श्रोणी कवषोरु खेकपर्णाऽष्ठीवन्ता षष्टिं श्रतिरस्य वङ्क्रयस्या वनष्ठ्यौचावयतादु गावं गाव मस्यानूनं क्रणुतात् * * * जवध्यगोहं पार्थिवं खनतात् * * * ॥ ६ ॥ श्रस्या रक्षः संसृजतात् * * * बलिष्ठ मस्य मा रविष्टोरुकं मन्यमाना नेदस्योके तनये रविता रवच्छमितारः * * * श्रध्रिगो श्रमीध्वं सुश्रमि श्रमीध्वं श्रमीध्व मध्रिगो * * * ॥ ७ ॥" —इति ऐ० ब्रा० २, १।

* "पशुर्वै मेधः"—इति ऐ० ब्रा० २, १, ६।

† "यजमानो मेधपतिः, * * * यजमान मेव तत् स्वेन मेधेन समर्द्धयति; यथो खल्वाहुः यस्यै वाव कस्यै च देवतायै पशुरालभ्यते सैव मेधपतिरिति। स यद्येकदेवत्यः पशुः स्यात् 'मेधपतये'—इति ब्रूयाद् यदि द्विदेवत्यो 'मेधपतिभ्याम्'—इति, यदि बहुदेवत्यो 'मेधपतिभ्यः'—इति; एतदेव स्थितम्"—इति ऐ० ब्रा० २, १, ६।

‡ "आग्नेयो वाव सर्वः पशुरग्निं हि सोऽनुप्राच्यवतेति तस्मादस्याग्निं पुरस्ताद्धरन्ति"—इति ऐ० ब्रा० २, १, ६।

§ "ओषध्यात्मा वै पशुः, पशु मेव तत् सर्वात्मानं करोति" इति ऐ० ब्रा० २, १, ६।

एव 'गमयतात्'। 'वातम्' अनु 'प्राणम्' 'अन्ववसृजतात्'। 'असुं' शरीरविधारकं प्राणम् 'अन्तरिक्षम्' अन्ववसृजत। 'दिशः' 'श्रोत्रम्' अन्ववसृजत। किञ्च; 'उपाकरणेन' दर्भेण 'सह' साकम् 'एकधास्य त्वचम्' 'आच्छ्यतात्' आच्छातेत्यर्थः। ततोऽनन्तर मेव 'पुरा' 'नाभ्या अपि शसः' तस्माच्छसः प्रशस्तात् प्रदेशाद् 'वपाम्' 'उत्खिदतात्' उद्धरत। किञ्च; 'अन्तरेव' अभ्यन्तरत एव, 'उष्माणम्' अस्य शस्यमानस्य 'वारयध्वात्'। 'श्येन मस्य' श्येनाकृति श्येनवर्षं वा पाकेन 'वक्षः' उरः 'कुरुत'। 'प्रशसा बाहू', 'श्रोणी'—इति बाह्वोरेवैतदभिधानम् अवयवशः; अत्र बाहु-शब्दः प्रायेणांसयोः वर्त्तते, आ आरत्निसन्धानौ बाहू प्रशस्तौ कुरुत। स्रुचित्याकृती,—इत्येकः। श्रोणिशब्दः अरत्न्या मेव वर्त्तते। तौ च श्रोणीदोषणी द्रवणसमर्थौ प्रशस्तौ कुरुत। श्रोणीकाकृती निर्माणौ कुरुतेत्येके। "श्येन-श्रोणि-कश्यपा-कवषा-स्रेकपर्णेष्वाकृतिविशेषवचनसिद्धसाधनं स्यात्"—इति हि नैयायिकाः पठन्ति। 'कश्यपेवांसा' कश्यपाविव अंसौ कुरुत। किञ्च; 'अच्छिद्रे श्रोणी' अविकले कुरुत। 'कवषोरू' कवषे गतिसमर्थे कुरुत; कवतिर्गत्यर्थः, "च्यवते, कवते, गवते"—इति गतिकर्माणः*। पिण्डिकाख्ये उरू अच्छिद्रे एव कुरुतेत्यर्थः। 'स्रेकपर्णा' करवीरपत्राणीव 'अष्ठीवन्ता' अस्थिसंयुक्तौ कुरुत। 'षड्विंशतिरस्य वङ्क्रयः†, ता अनुष्ठ्योच्चावयताद्' या एता वङ्क्रयः पर्शवः‡, ता अनुष्ठ्या अनुष्ठानक्रियया प्रच्यावनसमर्थयैव प्रच्यावयत। किञ्च;

* १भा० २३६१० २अ० १४ख० (२६), (२७), (२८)।

† "षड्विंशतिरस्य वङ्क्रयः"—इति कौषि० ब्रा० १०, ४।

‡ "पार्श्वस्य मूलभूतान्यस्थीनि वङ्क्रिशब्दवाच्यानि"—इति मही० (यं० भा० २५,४)।

'गात्रम्' 'अस्य' 'अनूनम्' अविकलं 'कृणुतात्' कुरुत। किञ्च; 'ऊवध्यगोहम्' ऊवध्यं यः पार्थिवो गर्त्तः, प्रकृष्टं संवृणोति, तम् *, उत्तरत्वात्वालस्य 'खनतात्'। 'अस्रा रक्षः संसृजतात्' असृग्भाञ्जि रक्षांसि कुरुतेत्यर्थः। किञ्च; 'वनिष्टुम्' दृष्ट्वा 'मा राविष्ट' मा शब्दं करिष्यथाः। 'उरुकं मन्यमानाः' उलूकवन्तं वनिष्टुं मन्यमानाः; उलूको हि भयङ्करत्वात् दृष्ट्वा जनैः विराव्यते,—अय मुलूकोऽय मुलूक इति। तदाशङ्क्या उलूकमारूप्याद्वनिष्ठोर्मा राविष्टेत्युच्यते। हे शमितारः! 'नेदस्लोके तनये रमितारवच्छमितारः' नैतत् कर्म्म कुर्वतां रवितारवत्, पुत्रेषु पौत्रेषु वः स्यात्; अरवणशीलं वः पुत्र-पौत्रं भविष्यतीत्यभिप्रायः। हे 'अग्निगो!' 'शमीध्वम्' एनं पशुं 'सुशमि शमीध्वम्' यथा चाय' सुशमितः स्यात्तथैनं 'शमीध्वं' हे 'अग्निगो!' मा प्रमादं करिष्यथ॥ एव मेतस्मिन् दैव्यस्य शमितुः अग्निगोः† प्रशासन मित्येतदुपपद्यते, तस्य सम्बोध्यत्वादस्मिंश्च प्रैषे‡ यथासम्भवं प्रशासनानि द्रष्टव्यानि;—"प्रास्मा अग्निं भरत"—इत्येवमादीनि §॥

"अग्निरप्यग्निगुरुच्यते" अधृतगमनोऽसावित्यग्निगुः। "तुभ्यं स्रोतन्त्य०——०मेधिर"॥। कुग्निकपुत्रस्यार्षम्। विराट्। पाङ्क्तष्टु-

---

* "ओषधं वाऽजवध्यमियं वा ओषधीनां प्रतिष्ठा"—इति ऐ० ब्रा० २, १, ९।

† "अग्निगुर्वै देवानां शमिता पापो निग्रभिता शमित्यत्वैवेनं तं निग्रभीत्यस्य सम्पद्यते"—इति ऐ० ब्रा० २, १, ७।

‡ प्रैषः=ऋत्विजां प्रेषणं कार्येषु। तथा च्छेतरेयश्रुतिः,—"प्रैष मैच्छन् तत् प्रैषाणां प्रैषत्वम्"—इति २, १, ९। "प्रैषेभिः प्रैषानाप्नोति (श० ब्रा० १९, १९,"—इत्यादयश्च द्रष्टव्याः।

§ ऐ० ब्रा० २, १, ९। पृ० ९१ ष्ट० २१पं० (टीपन्याम्)।

॥ "तुभ्यं स्रोतन्त्यभिगो शचीवः सुतासो अग्ने मेदसो घृतस्य। कविशस्तो बृहता भानुना आगा हव्या जुषध्व मेधिर॥"—इति ऋ० सं० ३, ,२१, ४।

स्तोके* सूक्ते विनियुक्ता। हे 'अश्विगो' अप्रतगमन! 'अचीवः' कर्मवन्! 'तुभ्यं' त्वदर्थं मेते 'स्तोकासः' विन्दवो वपा मतीत्य ओतं चरन्ति। 'मेदसः' च 'घृतस्य' च। यस्य तवैतद्वर्त्तते, स त्वं 'कविशस्तः' प्रचरणेप्रचरणे कविभिरभिष्टुतः, 'बृहता' महता 'भानुना' 'भासा' 'आगाः' आगच्छ। आगत्य चेमानि 'हव्या' हवींषि यानि स्तोकाख्यानि, त्वदर्थ मेव चरन्ति 'जुषस्व' संसेवस्व। हे 'मेधिर' यज्ञवन्! इत्यर्थः। एव मत्र "अश्विगो"—इत्यग्निरुक्तः, तस्मादग्नेरश्विगुत्व मुपपद्यते॥

"इन्द्रोऽप्यश्विगुरुच्यते"। तस्यापि न कश्चिद् गमनधारयितास्ति "अस्मा इदु०——०रातितमा" †। नोधस इय मार्षम्। अहीनसूक्ते शस्यते। 'अस्मै' इन्द्राय 'प्र हर्मि' प्रभरामि 'स्तोमम्', 'प्रयो न' प्रय इव, अन्न मिव; यः स्तोमः हविं करोति, तं प्रभरामि। 'तवसे' महते 'तुराय' त्वरमाणाय 'माहिनाय' महनाय हेत्रे। किञ्च; 'ऋचीषमाय' ऋक्समाय, स्तुतिसमाय; यावती स्तुतीरुदीर्यते तावानेवासौ भवति, माहाभाग्यात्। 'अश्विगवे' अप्रतगमनाय, अप्रतिहतगमनाय, एवंलक्षणाय 'इन्द्राय', 'ओहम्' अहं प्रापयामि 'ब्रह्माणि' हवींषि 'रातितमा' दातव्यतमानि यान्यसावेवार्हति, तानीत्यभिप्रायः॥ एव मस्मिन्नश्विगुशब्दे इन्द्र-विशेषणत्वादिन्द्राभिधान मित्युपपद्यते॥

---

* यस्यै स्तोकानुवचन इदं सूक्तम्। आ० २, ४. द्र०।

† अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय। ऋचीषमायाश्विगव ओहं मिन्द्राय ब्रह्माणि रातितमा॥"—इति ऋ० सं० १, ४, १७, १।

"आङ्गूषः(४४)"—इति *, अनवगतम्। "स्तोमः" अभिधेयः। "आघोषः"—इति शब्दसमाधिः॥ "एनाङ्गूषेण०——०उत द्यौः" †। चिष्टुप्। कुत्सस्य चितस्य वा कूपे पतितस्यार्षम्। वैश्वदेवस्य चरोर्भाव्यवतो याज्यैषा। 'एनेन' अनेन 'वयम्' 'आङ्गूषेण' आघोषणीयेन स्तोमेन 'इन्द्रवन्तः' इन्द्रसंयुक्ताः 'स्याम' वयम्। 'तत्' ततो विश्वे 'सर्वे' एव अनवखण्डिताः सन्तः, सर्व्वान् भावयान् 'अभि' भवेम। तदेतत् 'नः' सर्व मपि 'मित्रः' 'वरुणः' च 'मामहन्त' पुनःपुनर्महयन्तां पूजयन्तु। 'अदितिः' च पूजयतु। 'सिन्धुः' च पूजयतु। 'पृथिवी' च पूजयतु। 'उत द्यौः' पूजयत्वित्येतदेवानुवर्त्तते॥ एव मत्र स्तोमोऽयम् "आङ्गूष"-शब्देनोक्तः, शब्दसारूप्यादर्थोपपत्तेश्च॥ ७(११)॥

आपान्तमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी। सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः॥ आपातितमन्युस्तृप्रप्रहारी (क्षिप्रप्रहारी स्तृप्रप्रहारी ‡) सोमो वेन्द्रो वा धुनिर्द्धूनोतेः शिमीति कर्मनाम शमयतेर्वा शक्नोतेर्वर्ज्जीषी सोमो यत्सोमस्य पूयमानस्यातिरिच्यते तदृजीष मपार्ज्जितं भवति तेन-

* १भा० ४१४ पृ० १२ पं०।

† "एनाङ्गूषेण वय मिन्द्रवन्तोऽभि ष्याम पृतनाः सवीराः। तन्नो मित्रो वरुणो मामहन्ता मदितिः सिन्धुः पृथिवी उत द्यौः॥"—इति ऋ० सं० १, ७, २२, ४।

‡ यत्रनोचिह्नान्तर्गत मेतन्न दृश्यते क-ख-ग-पुस्तकेषु। "तृपलप्रहारी"—इति रोथ्-सम्पादित M-पुस्तकपाठः; "तृप्रप्रहारी"—इति रोथ्-सम्पादित A-पुस्तकपाठश्च। "क्षिप्रहारी क्षिप्रहारी"—इत्येव वृत्ति-सम्मतः पाठः।

र्ज्जीषी सोमोऽथाप्यैन्द्रो निगमो भवति*। ऋजीषी वज्रोति। हर्योरस्य स भागो धानाश्चेति धाना भ्राष्ट्रे हिता भवन्ति फले हिता भवन्तीति वा। बभ्रां ते † हरी धाना उप ऋजीषं‡ जिघ्रता मित्यपि निगमो भवत्यादिनाभ्यासेनोपहितेनोपधा मादत्ते बभस्तिरत्तिकर्मा सोमः सर्वाण्यतसानि वनानि नार्वागिन्द्रं प्रतिमानानि दक्षुवन्ति यैरेनं प्रतिमिमते नैनं तानि दक्षुवन्त्यर्वागेवैन§ मप्राप्य विनश्यन्तीतीन्द्रप्रधानेत्येके नैघण्टुकं सोमकर्मोभयप्रधानेत्यपरं श्मशा शु अश्नुत इति वा श्मास्नुत इति वा। अव श्मश्रा रुधद्वाः। अवारुधच्छ्मश्रा वारिति ॥ ८ (१२) ॥

॥ इति पञ्चमाध्यायस्य द्वितीयः पादः ॥ ५, २०

"आपान्तमन्युः(४५)"—इति ॥, अनवगतम्, पदेन चानेकार्थम्। "आपातितमन्युः"—इत्यवगमः। "आपान्तमन्युः"—इति ¶। वैश्वामित्रस्य रेणोरियं मार्षम्। चिष्टुप्। सूर्यस्तुत्यैकाहे निष्केवल्ये विनियुक्ता। आपादितदीप्तिः, उत्पादितमन्युर्वा शत्रुभिः संग्रामे, 'दृपल्लप्रभर्मा' "दृप्रहारी क्षिप्रहारी, सोमो वेन्द्रो वा"। 'धुनिः' धूनयिता

---

* "भवति"—इत्यग्रेऽव च-पुस्तके।
† "बभ्रां राते" ख।
‡ ऋजीषिं" क, ख। "ऋजीषिन्" ग।
§ "दक्षुवन्त्यर्वाङेवैन" क, ख।
॥ १भा० ४१४ पृ० १७ पं०।
¶ ऋ० सं० ८, ४, १४, ५।

कम्पयिता शत्रूणां पाषाणाम्। 'शिमीवान्' स्वाधिकारविहितेन कर्मणा कर्मवान्। 'शरुमान्' हिंसावान्। 'ऋजीषी' यदि सोमोऽभिप्रेतः, तस्य ऋजीषित्व मुपपद्यते; अथेन्द्रोऽभिप्रेतः, तस्य तयोरश्वयोः ऋजीषभागाः * इत्यनयापेक्षया ऋजीषित्वम्। एव मय मर्द्धर्चः सोमस्येन्द्रस्य वा; यस्मिंस्तु पक्षे सौम्य एषोऽर्द्धर्चः, तस्मिन् पक्षेऽयं तृतीयः पादः सोमेनाभिसम्बन्धयितव्यः;—य एवङ्गुणयुक्तः 'सोमः', स एतानि 'विश्वानि' सर्वाणि 'अतसा' अनुपक्षीणानि 'वनानि' उदकानि, इतराणि वा वनानि वनस्पत्याख्यानि, स्वेन महिम्ना व्याप्नोति; स हि तेषा मधिपतिः। एव मेते त्रयोऽपि पादाः सौम्या भवन्ति। उत्तर ऐन्द्र एव,—"नार्वागिन्द्रं प्रतिमानानि देभुः"—इति। नैनम् इन्द्रं प्रतिमानानि, यैः प्रतिमीयन्ते स्तोत्राणि, न तानि दम्भुवन्ति, नाभिभवितुं शक्नुवन्ति। किन्तर्हि? अर्वागेव तान् पुनात्येव। तस्मादिन्द्राद् भूत्वा "एनम्" इन्द्रम् "अप्राप्य" एव "विनश्यन्ति", नोपमार्थं कुर्वन्ति; स हि तेषां विनाशः। एव मेष पाद ऐन्द्रः। एव मुभयप्रधानत्व मस्या ऋचः॥

अथ वैव मन्यथास्या ऋच उभयप्रधानत्वम्। द्वौ प्रथमौ पादावैन्द्रत्वेन व्याख्यायेते, तृतीयपाद मुत्तरय चतुर्थः पादः आद्याभ्या मभिसम्बन्धयितव्यः। योऽय मेवङ्गुणविशिष्ट इन्द्रः, आपादितमन्युः इतप्रहारी, धुनिः, शिमीवान्, शरुमान्, ऋजीषी च; त मेन मिन्द्र मेवम्प्रभावं न प्रतिमानानि दम्भुवन्ति। किन्तर्हि? अर्वागेवैन मप्राप्य वर्त्तमानानि विनश्यन्ति। एव मेते त्रय ऐन्द्राः पादाः;—द्वा-

* "ऋजीषं नीरसं सोमलतापूर्णम्"—इति महीधरः (य० वा० सं० १९, ७१)। नीरसं ग्रावभिर्निष्पाद्यमितरस मित्यर्थः।

वाद्यौ चतुर्थश्च। अयं तृतीयः सौम्यः,—"सोमो विश्वान्यतसा वनानि" —इति। यः "सोमः, सर्वाण्यतसानि वनानि" महिम्ना व्याप्नोति, यच्च "इन्द्रं न प्रतिमानानि दस्युवन्ति" तौ सोमेन्द्राविदं नाम कुरुता मित्याग्नेयोज्या॥

"एके" पुनः "इन्द्रप्रधाना" एवेयं मृक् "इति" एवं मन्यन्ते;—"नैघण्टुकम्" अस्यां "सोमकर्म"—इति; तेषा मियं योजना,—य इन्द्र आपातितमन्युः; तृप्रहारी, धुनिः, शमीवान्, शरुमान्, ऋजीषी च, स सोम इव अतसानि वनानि इदं सर्वं व्याप्नोति;। न चैनं प्रतिमानानि दस्युवन्ति। किन्तर्हि? एन मिन्द्र मप्राप्यैव विनश्यति। एव मिन्द्रप्रधानैव भवति। एव मस्या ऋचः त्रिधा समासार्थो बोद्धव्यः। तथाहि भाष्यकारेण दर्शितम्। सोमस्य ऋजीषित्वोपपादनार्थं माह भाष्यकारः *,—"यत्सोमस्य पूयमानस्यातिरिच्यते" रसादन्यदसार मतिरिच्यते, "तदृजीषम्"—इत्युच्यते। तद् "अपार्जितम्" अपवर्जितं "भवति", कल्कभूतत्वात्† "तेन" संयोगाद् "ऋजीषी सोमः" उच्यते॥

"अथ" यस्मिन् पक्षे "ऐन्द्रः" अर्द्धर्चो भवति, एतस्मिन् पक्षे इन्द्रस्य ऋजीषित्वाभिधायकः एषः "निगमः भवति"। इन्द्रस्य ऋजीषित्व मनुपपन्नं मन्यमानो निगमं पठति;—"ऋजीषी वज्री वृषभः०—०मदित्सुन्द्रः"‡। अत्रेरिय मार्षम्। त्रिष्टुप्। ऋजीषेण

---

* यास्कः (निघण्टु-भाष्यकारः = निरुक्तकारः)।

† यावभिः पिष्टलादिति भावः। तथा हि,—"द्रव्य मार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत्"—इत्यादि कक्कलक्षणम्। चा० वि० स्था० २ अ०।

‡ "ऋजीषी वज्री वृषभस्तुराषाडृजीषी राजा वृजना सोमपावा युक्ता हरिभ्या मुप यासदर्वाङ् माध्यन्दिने सवने मत्सदिन्द्रः॥"—इति ऋ० सं० ४, २, ११, ४।

तद्वान् 'ऋजीषी', वज्रेण तद्वान् 'वज्री', 'वृषभः' वर्षिता कामानाम्, 'शुष्मी' बलवान्, 'राजा' अधिपतिः, 'वृत्रहा' अवृत्रहा, 'सोमपावा' सोमस्य पातेत्यर्थः। य एवङ्गुणयुक्त इन्द्रः, स 'युक्ता' 'हरिभ्याम्' अश्वाभ्यां रथं तम् अधिरुह्य 'उपयासत्' उपागच्छत्। 'अर्वाङ्' अस्मानाभिमुख्येन, 'माध्यन्दिने सवने' एतस्मिन् प्राप्ते 'उप' उपगम्य च 'मत्सत्' माद्यताम्, अस्मत्प्रदत्तेन सोमेनेत्यर्थः॥

एव मेतस्मिन् मन्त्रे 'ऋजीषी' इन्द्र उक्तः। तत्पुनरेतदृजीषित्व मिन्द्रस्य न विज्ञायते, केन कारणेनेत्यतस्तदुपपादनार्थं माह,—"हर्योरस्य स भागः"—इति। हर्योरेवाश्वयोरस्येन्द्रस्य स भागो यदृजीषम्। "धानाश्च"। प्रसङ्गादत्र धाना उक्ताः *। तदुक्तम्,—"हर्योर्धानाः हरितोः"—इति †। तेन हरिसंयोगेन ऋजीषेण लक्षितलक्षणया वृत्त्या इन्द्रस्य ऋजीषित्वम्॥

आह;—"धानाः" कस्मात्? उच्यते;— ता हि "भ्राष्ट्रे हिताः" भवन्ति‡; अथ "वा" भ्राष्ट्रादवतार्य "फले" फलके "हिताः" निहिताः "भवन्ति"। तत्र हि ता विभार्यन्तेति दाहभयात्। यथा ऋजीषं धानाश्च हर्योरश्वयोरिन्द्रस्य च भागस्तथैष निगमः;— बभ्रां ते हरी धाना उप ऋजीषं जिघ्रताम्'—इति। अत्र 'बभ्राम्'—इत्येतस्मिन्पदे य एषः "बभस्तिः" धातुः, "अत्तिकर्मा" भक्षणार्थः§। सः

---

* "धानाः करम्भः सक्तवः परीवापः पयो दधि। सोमस्य रूपꣳ हविषः सामित्रा वाजिनं मधु"—इति य० वा० सं० १९, २१।

† "हरिवते हर्यश्वाय धानाः"—इति ऋ० सं० २, ३, १८, २।

‡ "धाना भ्रष्टयवे स्त्रियः"—इति अ० को० २, ७, ४७।

§ १ भा० ४२१४ ४० १ पं० द्रष्टव्यम्।

"आदिनाभ्यासेनोपक्षितेनोपधा मादत्ते" आदावभ्यासेनोपक्षितेनोपधा मादत्ते, धकारेण निमित्तभूतेन उपधा मकार मादत्ते, लुप्यति। "घसिभसोर्हलि च (पा० ६,४,१००)"—इत्यकारलोपः, ततो धत्वे कृते, जश्त्वे च कृते, बभ्रा मित्येतद्रूपं भवति॥ "धानाः सोमाना मिन्द्राद्धि च पिब च बभ्रां ते हरी धाना उप ऋजीषं जिघ्रता मा-रथचर्षणे सिञ्चस्व। यत्त्वा पृच्छाद् वृषन् पत्नी कामीमदथा इत्यस्मिन् सुन्वति यजमाने तस्मै किं मराय्याः सुष्ठु सुवीर्यं यज्ञस्यागुर उद्रुचं यद्यदचीकमतां तत्तथाभद्धोतर्यज"। हारियोजनाय्यं प्रैषः। हे इन्द्र!' 'अद्धि' भक्षय 'धानाः'। 'सोमानाम्' एतेषाम् स्वभूतं रसम् 'पिब च' अस्य हारियोजनस्य सोमस्य *। किञ्च; 'बभ्राम्' भक्षयतां 'ते' तव एतावश्वौ 'हरी' एताः 'धानाः'; 'उप ऋजीषं जिघ्रताम्' उपजिघ्रता मृजीषञ्च। 'आ रथचर्षणे सिञ्चस्व' जठरे सोम मेनम् हे 'रथचर्षणे' रथगमन! आसिञ्चस्व। किञ्च; 'यत्त्वा पृच्छात्' यदि त्वां पृच्छेत् गृह मनुप्राप्त मस्मद्यज्ञात् हे 'वृषन्' वर्षितः! 'पत्नी कामीमदथाः' क्व पीतवांस्त्वम्? अतो ब्रूयाः,—त्व मस्य यजमानस्य नाम गृहीत्वा; 'अस्मिन्' 'सुन्वति' सोम मभिषुण्वति 'यजमाने'। ततः सा यदि पुनरपि पृच्छेत् 'तस्मै' परितुष्टः त्वं 'किं मराय्याः' किं दत्तवानसि? ततः तां प्रति ब्रूयाः,—'सुष्ठु' 'सुवीर्यं' शोभनं वीर्यम् अह मस्मै दत्तवान्। 'यज्ञस्य आगुर उद्रुचम्' यदसावनेन

---

* "हारियोजन मेतत्सञ्ज्ञकं धानामित्रितम्"—इति सा० भा० (ऋ० सं० १, ८१ ४)। किञ्च; "हर्योरश्वयोर्योजनं यस्मिन्रथे स तथोक्तः, तस्य स्वामित्वेन सम्बन्धी हरियोजनः। हे 'हरियोजन!' इन्द्र!"—इति च सा० भा० (ऋ० सं० १, ११, १९)।

यज्ञेन आगूर्णवान् प्रार्थितवान् अभूत्, तत् सर्वं मह्यं मदाम्; 'यज्ञस्य' चोत्कृष्टां ऋचं दीप्ति मह्यं मदा मस्मै। किं बहुना, 'यद्यत् 'अचीकमताम्' यद्यत्कामितवानयं यजमानः फलं मस्य कर्मणः, 'तत्' सर्वं मेतत् 'तथा' प्रार्थित मेव 'अभूत्'; न कश्चिदस्य मृषा कामो बभूवेत्यभिप्रायः। हे 'होतः' त्वमपि योऽय मेवङ्गुणविशिष्ट इन्द्रः, तं सहरिभ्यां 'यज*'—इति॥ एव मत्र "हरी उपजिघ्रताम्"—इत्येतस्माद् विशेषलिङ्गात् ऋजीषित्व मश्वयोः; अश्वयोगाच्च ऋजीषित्वं लक्षितलक्षणया इन्द्रस्योपपद्यते॥

"श्मश्रा"(४६)—इति, अनवगतम्†। "श्वाग्निनी", "श्माग्निनी"—इति वावगमः। श्वाग्निनी = शीघ्राग्निनी = शीघ्रव्यापिनी कुल्या, नदी वा। श्माग्निनी पुनर्नाड़ी; सा हि यं शरीरं व्याप्नोति। एव मेतदिह विगृह्यमान मनेकार्थ मपि भवत्येव॥ "कदा वसो स्तोत्रं०—०वृताय्याय"—इति‡। कुत्सपुत्रस्य दुर्मित्रस्यार्षम्। उष्णिक्। ऐन्द्रस्य सूक्तस्य प्रथमवेयम्। हे 'वसो' वसुमन्! इन्द्र! 'कदा' कस्मिन् काले 'स्तोत्रम्' एतन्मयोदीरितम् 'अस्य' यजमानस्य 'हर्यतः' कामयतः, कामान् प्रार्थयतः, त्वाम् 'रधद्' उपरोत्स्यति। 'श्मश्रा' इव 'वाः' कुल्येवोदकं विसर्पमाणम्; नाड़ीव वा, अथवा

---

* "यजेति धय्याऽरूपम्"—इति य० वा० सं० १९, २४। तथैव "यजेतिशब्दो धय्याया रूपम्; निष्क्रेवल्ये स्तोत्रियानुरूपयोरनन्तरं धय्या श्रयते यजेतिशब्दो ज्ञेयः"—इति महीधरः।

† १भा ४१५ पृ० ५पं०।

‡ "कदा वसो स्तोत्रं हर्यत आवं श्मश्रा रधद्वाः। दीर्घं सुतं वृताय्याय॥"—इति ऋ० सं० ८, ५, २९, १।

आध्यात्मिको नाड़ी, शरीराश्रितं रसम्। आह, कतमत् सोमम्? इति, उच्यते;—यदेतत् 'दीर्घं सुतं' सोमं सवाख्यं सुत मभिषुतं प्रवर्त्तते, 'वाताप्याय' उदकार्थम्॥ एव मेतस्मिन् "ग्रभ्रा"—इत्येतत् नाद्यभिधानं कुल्याभिधानं वा शब्दोपपत्तेः, अर्थोपपत्तेश्चेति॥ ८ (१२)॥

इति निरुक्तवृत्तौ दशमाध्यायस्य (पञ्चमाध्यायस्य)

द्वितीयः पादः॥ ५, २॥

---

॥ तृतीयः पादः॥

**उर्वश्यप्सरा उर्वभ्यश्नुत ऊरुभ्या मश्नुत उरुर्वा वशोऽस्या अप्सरा अप्सारिण्यपि वाऽप्स इति रूपनामाप्सातेरप्सानीयं भवत्यादर्शनीयं व्यापनीयं वा स्पष्टं दर्शनायेति शाकपूणिर्यदप्स इत्यभक्षस्याप्सो नामेति व्यापिनस्तद्रा भवति रूपवती तदनयात्त मिति वा तदस्यै दत्त मिति वा तस्या दर्शनान्मिचावरुणयो रेतश्चस्कन्द तदभिवादिन्येषगर्भवति॥ १ (१३)॥**

"उर्वशी"(४७)—इति *, अनवगतम्। "अप्सराः"—इत्यभिधेयवचनम्। "उर्वभ्यश्नुते"—इति व्युत्पत्तिः। उरु, महद् यशोऽभिव्याप्नोति। अथ वा "उरुभ्यां" मैथुने धर्मे पुरुषम् "अश्नुते" व्या-

* १भा० ४१५ पृ० १० पं०।

प्नोतीति उर्वाप्निनी सती उर्वशीत्युच्यते। अथ "वा" "उरुः" महान् "अस्राः" "वशः" कामः, सेय मुरुवप्निनी सती उर्वशीत्युच्यते। एताः शब्दसमाधयः॥

अधुना "अप्सराः"—इत्येतं शब्दं समाख्यानप्रसक्तं निर्ब्रवीति। आह;—"अप्सराः" कस्मात्? उच्यते;—सा हि "अप्सारिणी" भवति, अपः प्रति नित्य मेव सरति; तत्प्रभवत्वात् तदेव तस्याः प्रिय मुदकम्, तस्मादप्सराः। अथ वा अद्भ्यः सृतेत्यप्सराः। "अपि" चैव मन्यथा स्यात्;—"अप्सः—इति" एतत् "रूपनाम"। "अ-प्सातेः" प्रतिषेधपूर्वस्य प्सातेः भक्षणार्थस्य (अदा० प०); तद्धि "अ-प्सानीयम्" अनदनीयं "भवति"; न हि तद्भक्ष्यते, किन्तर्हि? "आदर्शनीयं" तदाभिमुख्येन स्थित्वा द्रष्टव्य मेव भवति चक्षुषा; न पुनर्मुखेन भक्षयितव्य मित्यर्थः। "व्यापनीयं वा" व्यापन मर्हति। "आसृव्यापी (स्वा० प०)", तस्य वा अप्सः; तद्धि नायनेन रश्मिना आत्मनः प्रत्ययाधानार्थं व्यापयितव्यं भवति। "स्पष्टं दर्शनायेति" "शाकपूणिः" आचार्यो मन्यते; न ह्येतदस्पष्टं दर्शनाय, किन्तर्हि? स्पष्ट मेवेत्यर्थः। "यदप्सः—इत्यभक्षस्य" पुरस्ताद्युक्तम्,—"अपि वाप इति रूप नाम, अप्सातेः"; न हि तद्भक्ष्यते, किन्तर्हि? दृश्यते तदिति। तत्र "अभक्षस्य" अप्सः-शब्दवाच्यत्वप्रख्यापक एष निगमः;—"यदेनꣳसुकृतम् यदप्सꣳसुकृतमा वयम्"—इति। "यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये। यदेनꣳसुकृतमा वयं यदप्सꣳसुकृतमा वयं यदेकस्यापि धर्मणि एनस्तोऽवयजन मसि स्वाहा"—इति *। वरुणप्रघा-

* य० वा० सं० १०, १७। तत्र च पाठे भेदः।

सेषु करम्भपात्रहवने पत्नीयजमानयोर्मन्त्रः; 'यद्ग्रामे' 'वयं' किञ्चित् 'एनः' चक्रम, 'यत्' च 'अरण्ये', 'यत् सभायाम्', 'यत्' च 'इन्द्रिये' प्रजनने निमित्तभूते सति, 'यत्' च अन्यत्रापि क्वचिद्ग्रामादिभ्यो 'वयम्, 'एनः' 'चक्रम' कृतवन्तः, 'यत्' च 'अप्सु' 'चक्रम' यदभक्ष्यभक्षणं कृतवन्तः, 'वयं' किञ्चिन्नदेवानेकप्रकार मेकैकस्यापि आवयोरेतसि निमित्तभूतं उत्पन्नं किञ्चित्, 'यदेकस्यापि धर्म्मणि' तदनेकप्रकार मेकस्यावयोः कर्म्मणि निमित्तभूतम्,— यच्च महत् कृतम्, यच्च पृथक् कृतम्, यच्च मानसम्, यच्च शारीरम्, तस्य सर्वस्य एनसोऽस्माकं अपनयनं कृत्वा ततः 'अवयजन मसि' मरुतां हे हविः! करम्भपात्राख्यं प्रघासान् हवामहे। "मरुतः"—इत्येतो विशेषलिङ्गान्मारुतत्व मस्यावसीयते॥ यद् "अप्सुः"—इत्येष शब्दः अभक्ष्यस्याभिधायको दृष्टः, तस्मात्साधूक्तं "अपि वाप्स इति रूपनामाख्यातेः"—इति (७३ पृ० ११पं०)॥

अधुना यदुक्तं "व्यापनीयं वा"—इति (७३पृ०१२पं०), "आप्नृ व्याप्तौ (स्वा०पं०) इत्यस्य वाप्स इति तस्यार्थस्य ख्यापकं निगमं ब्रवीति;—"अप्नो नामेति व्यापिनः"—इति। यथा आप्नोतिः अभिव्याप्त्यर्थः, तस्या इत्येतदुपनाम भवति, तथैष निगमः;—"पृथिव्याः पुरीष मस्यप्नो नाम, तां त्वा विश्वे अभिगृणन्तु देवाः। स्योनपृष्ठा घृतवती सीद प्रजावद्रय्या द्रविणा यजस्वाश्विनाध्वर्यू सादयता मिह त्वा"*—इत्यग्निचयने द्वितीयायां चितावाश्विन्यो नामेष्टकाः, तासा मेकस्या मय मुपधानमन्त्रः। 'पृथिव्याः' 'पुरीष मसि' पूरसित्यसि। हे इष्टके!

* य० वा० सं० १४, ४।

'अप्सो नाम', 'तां' 'त्वाम्' एवङ्गुणयुक्ता सती 'विश्वे' सर्वे 'अभि गृणन्तु' अभिष्टुवन्तु 'देवाः'। किञ्च; सा त्वं सोमपृष्ठादेव उदीरितेन सोमेन स्पृष्टा 'घृतवती' उदक-संश्लेषिता 'इह' अग्निचयने 'आसीद'। किञ्च; 'अश्विना' अश्विनौ देवौ 'अध्वर्यू' 'सादयताम् इह त्वाम्'; तौ हि सञ्जानीतौ यथा त्वं सादयितव्येत्यभिप्रायः। एव मत्रापेर्ध्याप्त्यर्थस्याप्त इत्युपपद्यते, इह लक्षणार्थासम्भवात्॥

एवं तावदप्सरा इत्यस्याभिधानस्याप्त इत्यय मेकदेश उपपादित; अधुना 'रा'—इत्येकदेश मुपपादयिष्यन्नाह;—"तद्रा भवति रूपवती"। रेा मत्वर्थे, तेनाप्सशब्दवाच्यत्वेन रूपेण तद्वती सा भवत्यप्सराः तद्रा भवतीत्येव मुक्तेऽपि सति रेफस्य मत्वर्थता न गृह्यत इति मन्यमानेा भाष्यकारः, स्पष्ट मेव मत्वर्थ माह; यदुक्तम् रूपवतीति रूपसंयुतेत्यर्थः। तस्या एव सर्वयोषिद्भ्यः प्रति विशिष्टं रूप मित्यभिप्रायः। अथ "वा" एव मन्यथा स्यात्,—"तदनया" अप्स-शब्दवाच्यं रूपम् "आत्तं" गृहीत मेव कुतश्चित्। एतस्मिन् पक्षे 'रा'—इत्यय मादानार्थः। अथ 'वा' एव मन्यथा स्यात्,—"तत्" अप्सशब्दवाच्यं रूप मतिरिक्त मिव "अस्मै" "दत्तम्" विधात्रा। तथाहि ते तस्मादतिशयेनानयापि च लक्ष्यते। एतस्मिन् 'रा'—इत्ययं दानार्थः*॥

"तस्याः" एवङ्गुणविशिष्टाया उर्वश्या अप्सरसेा "दर्शनात्" "मित्रावरुणयोः रेतः"† "चस्कन्द" स्कन्नम्। "तत्" तस्यार्थस्य "अभिवादिनी" "एषा ऋग् भवति"—१(१३)॥

---

* १ भा० ६५५ पृ० २ च० २० ख० (४)।

† "मैत्रावरुणं प्रशास्य शंसत्यहर्वै मित्रो रात्रिर्वरुणः"—इति ऐ० ब्रा० ४, १, ४। उदकनामसु (१भा० १०४ पृ०) 'रेतः' द्रष्टव्यः।

उतासि मैचावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि-जातः। द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वेदेवाः पुष्करे त्वाददन्त॥ अप्यसि मैचावरुणो वसिष्ठोर्वश्या ब्रह्म-न्मनसोऽधिजातो द्रप्सं स्कन्नं ब्रह्मणा दैव्येन द्रप्सः संभृतः ष्वानीयो* भवति सर्वे देवाः पुष्करे त्वाधार-यन्त पुष्कर मन्तरिक्षं पोषति भूतान्युदकं पुष्करं पूजा-कारं पूजयितव्य मिद मपीतरत् पुष्कर मेतस्मादेव पुष्करं वपुष्करं वा पुष्यं पुष्यतेर्वयुनं वेतेः कान्तिर्वा प्रज्ञा वा॥ २ (१४)॥

"उतासि मैचावरुणः"—इति †। वसिष्ठस्य सपुत्रस्येय मार्षम्। तस्यैव स्तुतिरिन्द्रस्य वा। 'उत'—इति, अयम् 'अपि'-शब्दार्थे वर्त्त-मानोऽधस्ताया ऋचि ये जन्मनी वसिष्ठस्योक्ते, ते सम्भावयति। सा पुनरिय मृक्;— "विद्युतो ज्योतिः०—०जभार" ‡। 'विद्युतः' विशेषेण, द्योतते देदीप्यते इति विद्युत्= उर्वशी—इति; अस्मात्। 'ज्योतिः' प्रकाशः। तस्मात् 'परि' परितोऽधिकं 'सञ्जिहानम्' उत्कृ-ष्टन्तम्, जायमान मित्यर्थः। 'मित्रावरुणौ'देवौ§ 'यत्' 'अपश्यतां' 'त्वा'

* "सम्भृतष्वानीयो"—इति क, ख, ग, च। "सम्भृतष्वानीर्यं"—इति ङ। परं ख-ग-पुस्तकयोः "सम्भृतः ष्वानीयो"—इत्येव शोधिततया दृश्यते, इत्तिपाठश्चैव मेव।

† ऋ० सं० ५, ३, २४, १।

‡ "विद्युतो ज्योतिः परि सञ्जिहानं मित्रावरुणा यदपश्यतां त्वा। तत्ते जन्मो-तैकं वसिष्ठागस्त्या यत् त्वा विश आजभार॥"—इति ऋ० सं० ५, ३. २३, ५।

§ मित्रः — प० दै० १०, २, ८। वरुणः — प० दै० १०, १, ३।

त्वाम्' 'तत्' 'ते' तव 'जन्म' एकम् हे 'वसिष्ठ'! 'उत' अपि च 'यत्' 'त्वा' "अगस्त्यो विश आजभार" 'अगस्त्यः' ऋषिः 'विशः' मनुष्यान् प्रति, मनुष्यलोकम् 'आजभार' आहृतवान्, 'तत्' 'ते' तव द्वितीयं जन्म॥

'उतासि' अपि चासि 'मैत्रावरुणः' हे 'वसिष्ठ!'। कथं पुनर्मित्रावरुणयोरुत्पन्नोऽसि—किं सङ्कर्षेण? न, इत्युच्यते,—'उर्वश्याः' सकाशात्। हे 'ब्रह्मन्!' 'मनसोऽधिजातः' न सङ्कर्षणेन। किञ्च; निर्बीज एवासि, मनोऽभिधानमात्रादुत्पन्नः? न, इत्युच्यते। किन्तर्हि? 'द्रप्सं' शुक्रम्, उर्वशी-दर्शनात् 'स्कन्नं' मित्रावरुणयोः। 'ब्रह्मणा' 'दैव्येन' देवानां स्वभूतेन, ऋग्यजुःसामाख्येन स्तुवन्तः 'विश्वेदेवाः' मा एतद् भूमौ पतेदिति कुम्भस्योपरि 'पुष्करे' उदके, अन्तरिक्षे वा 'त्वा' त्वाम्, तेन शुक्रेण सहैकता मुपगतम् 'अददन्त' अधारयन्तेत्यर्थः॥ एव मेतस्मिन् "द्रप्सं स्कन्नम्"—इत्यादिना सम्बन्धेन "उर्वशी"-शब्देन "अप्सराः"—इत्युपपद्यते॥

"ऐन्द्रेण किल तेजसा निदधे वसिष्ठः, मित्रपरिगृहीतायामुर्वश्यामुत्पन्नो वरुणतेजसेा जातः"—इति पुराणात् श्रूयते, तदप्युपेक्षितव्यम्* ॥

अनेकविधो मन्त्राणां विषयः; वसिष्ठस्येय मार्षं युष्मदस्मच्च प्रयोगः,—"उतासि"—इति; तदेतद्विरुद्धार्थ मुपलक्ष्यते? नैतद्विरुद्धम्, नित्यत्वान्मन्त्राणां भवति† ॥

* "उर्वशी वा अप्सराः पुरूरवाः पतिः"—इत्यादि "उर्वशी ह्याप्सराः पुरूरवस मैलं चकमे"—इत्यादि च श० ब्रा० ३, ४, १, २१; ११, ५, १, १।

† वसिष्ठेत्यादिगोचनामेति स्वीकारे वा का हानिः?

आह; रेतः कस्माद् "द्रप्सः"—इत्युच्यते? स हि रेतः-सञ्ज्ञको रसः, पुरुषस्याङ्गादङ्गात् "सम्भृतः", स्त्रीयोनेः "प्रानीयो भवति" भक्षणीयो भरणीयश्च। एवं प्रातेः (अदा० प०) भरतेश्च (भू० उ०) यथासम्भवं "द्रप्सः"—इत्येष शब्दो द्रष्टव्यः॥

पुष्करशब्दोऽनेकार्थः, त मिह प्रसक्तं व्याचष्टे;—"पुकर मन्तरिक्षम्"; तद्धि "पुष्णाति भूतानि" अवकाशदानेनोपकुर्वत्। "उदकम्" अपि "पुष्करम्"; तेन हि पूजा क्रियते, पूजाकरत्वात् पुष्करम्। अथ वा "पूजयितव्यम्" पूजनार्हं मात्मन एवेति पुष्करम्। "इदम्" "इतरत्" पद्मम् "एतस्मादेव" कारणात् "पुष्करम्"—इत्युच्यते; तदपि हि पूजाकरं पूजयिव्यम् शोभनत्वात्तस्य। अथ "वा" "पुष्करं" तदिति "वपुष्करम्"; व्यवहृते हि तस्मिन् वपुष्मान् भवति॥

पद्म-प्रसङ्गात् पुष्प-शब्दं निराह;—"पुष्पं पुष्पतेः"—इति। पुष्पतिः विकसनार्थः (दि० प०); तद्धि विकसितं भवति॥

"वयुनम्[४८]" — इति *, अनेकार्थम्, अनवगतम्। "वेतेः"—इति धातुनिर्देशः; वेनम्—इति न्याय्यम्। "कान्तिर्वा" अभिधेया "प्रज्ञा वा"॥ २ (१४)॥

स इत्तमो॑ऽवयु॒नं त॑त॒न्वत् सू॒र्येण॑ व॒युन॑वच्चकार। स तमो॑ऽप्रज्ञानं ततन्वत् स तं सू॒र्येण॑ प्रज्ञानवच्चकार वाज॑-पस्त्यं वा॑जप॒तन॑म्। स॒नेम॒ वा॑जप॒स्त्य॒ मित्यपि॑ नि॒गमो॒ भव॑ति। वाज॑गन्ध्यं ग॒ध्यत्यु॒त्त॒र॒प॒द॒म्। अ॒श्या॒म॒वा॑ज॒गन्ध्य॒

* १भा० ४१५ पृ० १८ पं०।

मित्यपि निगमो भवति। गध्यं गृह्णातेः। कृज्रा वाजं न गध्य युयूषन्नित्यपि निगमो भवति। गध्यतिर्मिश्रीभावकर्मा। आगधिता परिगधितेत्यपि निगमो भवति। कौरयाणः क्रतयानः पाकस्थामा कौरयाण इत्यपि निगमो भवति। तौरयाणस्तूर्णयानः। स तौरयाण उप याहि यज्ञं मरुद्भिरिन्द्रसखिभिः सजोषा इत्यपि निगमो भवत्यह्रयाणोह्रीतयानः। अनड्वुहा क्रणुह्यह्रयाणेत्यपि निगमो भवति। हरयाणो हरमाणयानः। रजतं हरयाण इत्यपि निगमो भवति। य आरितः कर्मणिकर्मणि स्थिरः। प्रत्यृत स्तोमान् व्रन्दी व्रन्दतेर्भृदूभावकर्मणः ॥ ३ (१५) ॥

स इत्तमो॰वयुन॰—॰खधावः" *। भरद्वाजस्यार्षम्। त्रिष्टुप्। ऐन्द्रे सूक्ते व्यूढस्य दशरात्रस्य नवमेऽहनि मरुत्वतीये शस्त्रे शस्येते। यस्य मेवङ्गुणविशिष्टो हे भगवन्निन्द्र! यथागुणं त्वा मवोचाम। 'सः' त्वम् 'इत्' एतत् शार्वरं 'तमः' 'अवयुनम्' अ-प्रज्ञानलक्षणं 'ततन्वत्' स एव तं सर्वं मेवैनं लोकं स्वेन प्रकाशाख्येन सन्तनोति 'सूर्येण वयुनवत्' "प्राणो ह्येन्द्रः, तस्मात्सूर्य उदेति, प्राणाद्ध एष उदेति, प्राणेऽस्तमेति"—इति ह्युक्तम् †। तस्मात्प्राण इन्द्रः, सूर्यस्योदयहेतुः,

* "स इत्तमो॰ ——॰चकार। कदा ने मर्ता अमृतस्य धामे यच्छन्तो न मिनन्ति स्वधावः॥"—इति ऋ॰ सं॰ ४, ९, ११, २।

† "उद्यन्वै खलु वा आदित्यः सर्वाणि भूतानि प्रणयति, तस्मा एनं प्राण इत्याचक्षते।"—इत्यादि ऐ॰ ब्रा॰ ५, ५, ९।

सं तं सूर्यं सुद्रुमयत्। तेन 'सूर्येण' 'वयुनवत् चकार' एतज्जगत् ज्ञानवत् करोति। तस्मात् स एवेन्द्र एव मुच्यते;—सूर्येण त्व मेतज्जगद्वयुनवत्प्रज्ञानत् चकार कृतवानसीत्यर्थः। यस्य मेवम्प्रभावः तस्य 'कदा' कस्मिन् काले 'मर्त्ताः' मरणधर्म्माणो मनुष्याः 'अमृतस्य' अमरणधर्म्मिणः 'धाम' स्थानं 'दूयत्तन्तः' यष्टु मिच्छन्तः 'न मिनन्ति'। न श्रयन्ति हे 'स्वधावः!'। अत्र च न सर्वदैवतं चापरिक्लिष्टं स्थानम्, कृताधिकाग्रस्त्वं यज्ञेष्वित्यभिप्रायः॥ एव मिह "तमः ततन्वत् सूर्येण", "वयुनवत् चकार"—इति अनेन सम्बन्धाद् "वयुन"-शब्देन प्रज्ञान मित्युच्यत इत्युपपत्तिः। कान्त्यर्थत्व मपि क्वचिदुपेक्ष्यम्; दृष्टैव वा पत्तेण योज्यम्॥

"वाजपस्त्यम्[४९]"—इति *, अनवगतम्। "वाजपतनम्"—इत्यवगमः। "तं सखायः पुरोरुचम्०—०वाजपस्त्यम्" †। पावमानौ सौमौ। अम्बरीष ऋजिश्वा च सूक्तं ददृशतुः, तच्चैषा। 'तम्' एनं सोमं हे 'सखायः!' ऋत्विजः! 'पुरोरुचम्' अग्रतो दीप्तम्, 'यूयं वयं च' सम्पृक्ताः सन्तः, हे 'सूरयः!' मेधाविनः! 'अश्याम' व्याप्नुयाम वयम् 'वाजगन्ध्यम्' प्रति विशिष्टान्नसमानगन्धम्; अथ वा वाजगृहीतारम्; अथ वा वाजसम्मिश्रयितारम्। किञ्च; 'सनेम' सम्भजेमहि "वाजपस्त्यम्" वाज मन्नम्, तदस्माक मिति मन्यमानः सन्तो य माभिमुख्येन देवाः पतन्ति गच्छन्ति, स

---

* १भा० ४१९ पृ० १ पं०।

† "तं सखायः पुरोरुचं यूयं वयं च सूरयः। अश्याम वाजमन्ध्यं सनेम वाजपस्त्यम्॥" —इति ऋ० सं० ७, ४, २५, ६।

वाजपत्यः सोमः, तं नित्यकाल मेव वयं भजेमहि॥ एव मत्र शब्दसारूप्यादर्थोपपत्तेश्च "वाजपत्य"-शब्देन सोम उक्तः॥

"वाजगन्ध्यम्(५०)"—इति *, एतदपि पद मेकस्मिन्नेव निगमे† निरुक्तम्, केवलं समाम्नायानुक्रमविपर्यासः,—"वाजपत्यम्, वाजगन्ध्यम्"—इत्येष समाम्नायानुक्रमः‡; निगमे पुनः "अश्याम् वाजगन्ध्यम्, अनेम् वाजपत्यम्"—इति §॥

"गध्यम्(५१)"—इति ॥, अनवगतम्। ग्रहणीय मित्यर्थप्रतीतिः। "यासि कुत्सेन०——०पायाय् भूषात्" ¶। वामदेवस्यार्षम्। ऐन्द्री। त्रिष्टुप्। अहीनसूक्ते चतुर्विंश उक्थ्ये माध्यन्दिने सवने मैत्रावरुणस्येयं शस्त्रे शस्यते। हे भगवन्निन्द्र! 'यासि' 'कुत्सेन' ऋषिणा स्तूयमानः, अथ वा 'कुत्सेन' वज्रेणाभ्युद्यतेन, 'सरथं' समानगमनम्, अभिवहन-रथ मारुह्य, अथ वा 'सरथं' रथसंयुक्तं परानीकम्। 'अवस्युः' रिरक्षिषुः आत्मीयान्, ममर्द्दिषुश्च परकीयान्। 'तोदः' तुन्न इव केनचिद् 'वातस्य' जवेन यासि। तथापि च गच्छन् 'हर्योः' अश्वयोः 'ईशानः' ईश्वरो न धावसि त्वयि अन्यत एव त्वा मूहतुः। स त्वं भज 'ऋज्रा' ऋजुनैव मार्गेण न काश्चिदन्यां गतिं धावमानः; 'वाजं न गध्यम्' वाज मिव ग्रहणार्हं भोक्तु माभिमुख्येन। 'युयूषन्'

---

* १भा० ४१९ पृ० ५पं०।

† पु० ८१ पृ० २१ पं०।

‡ १भा० ४०४ पृ० ४च० २ख० (४९), (५०)।

§ ऋ० सं० ७, ४, २५, ६।

॥ १भा० ४१९ पृ० ९ पं०।

¶ "यासि कुत्सेन सरथं मवस्युस्तोदो वातस्य हर्योरीशानः। ऋज्रा वाजं न गध्यं युयूषन्कविर्यदह्वन् पार्याय भूषात्॥"—इति ऋ० सं० २, ५, १९, १।

पुनःपुनः सम्भ्रियमाण, आत्मानं शत्रुभिः युद्धे। 'कविः' क्रान्तदर्शनः। 'यदह्न' यस्मिन्नहनि 'पार्याय' पारणाय शत्रूणा मुपरि चेतः करोषि; पारयितव्यायेत इति वा, तस्मिन्नेवाहनि तान् सर्वान् 'भूषात्' अतिक्रम्य वर्त्तसे इत्यर्थः। पर्यगच्छात्, पर्यरक्षत्, अत्यक्रामत् —इत्येते भूषतेरर्थाः॥ एव मेतस्मिन् शब्दसारूप्यादर्थोपपत्तेश्च "गध्यम्"—इत्येष शब्दो "गृह्णातेः"—इत्युपपद्यते॥

"गध्यतिः(५२)"—इति *, अप्रतीतार्थः। स पुन रेष-"मिश्रीभावकर्मा"। "आगधिता परिगधिता०——भोज्या शता" †। भावयत्यस्यार्थम्। 'आगधिता' आगृहीता आमिश्रिता च। 'परिगधिता' च परिमिश्रीकृता बाहुभ्यां मया परिष्वक्तेत्यर्थः। 'या' 'कशीकेव' प्रतिकशं कशीकेव; सा हि नकुलजातिः का चिद् कशा मिति श्रूयतेऽश्वमेधे ‡। सा यथा मदकाले प्रतिकशं मतितरां परिष्वजति; स हि तस्याः परिष्वजनस्वभावः। एवं याम् 'आ जङ्घे' परिगृह्णाति बाहुभ्याम्। परिगृह्य च 'ददाति'। 'यादुरीया' आदरवती; अथवा यादसा रेतःसेकेन तद्वती। "यादः"—इत्युदकनामसु पठितम् §। आह; किं ददाति 'मह्यम्'? इति, उच्यते,—'याप्रूनां' मैथुनाख्यानां 'शता' शतानि बहूश इत्यर्थः। या एवम्प्रकारा, सा मम 'भोज्या' पत्नीत्यभिप्रायः॥ एव मत्र मैथुनसम्बन्धात् शब्दसारूप्याच्च "गध्यतिः" मिश्रीभावकर्म्मेत्युपपद्यते॥

---

* १भा० ४१६ पृ० १२पं०।

† "आगधिता परिगधिता या कशीकेव जङ्घे। ददाति मह्यं यादुरीया याप्रूनां भोज्या शता॥"—इति ऋ० सं० १, १, ११, ६।

‡ "कशां दिग्भ्यः"—इति य० वा० सं० २४, २६।

§ १भा० ८६पृ० २६पं० १अ० १२ख० (४८) वा०।

"कौरयाणः(५२)"—इति *, अनवगतम्। "कृतयानः"—इत्यवगमः। "यं मे दुरिन्द्रो०——०धावमानम्" †। मैथ्यातिथेः काण्वस्यार्षम्। यान मनया प्रशस्यते। 'यं' 'मे' मम 'दुः' दत्तवन्तः, 'मरुतः' 'इन्द्रः' च। 'पाकस्थामा' विपक्वप्राणः, 'कौरयाणः' संस्कृतयानः 'विश्वेषां त्मना' सर्वेषा मपि यानानां अन्यप्रतिग्रहीत-शक्तानां मध्ये आत्मना तदेव 'शोभिष्ठं' शोभनतमम्; अनेकरत्नविचित्रत्वात् 'दिवि इव' ज्योतिश्चक्रम् 'उपधावमानं' दृश्यते॥ एव मत्र शब्दसारूप्यादर्थोपपत्तेश्च "कौरयाणः = कृतयानः"—इत्युपपद्यते॥

"तौरयाणः(५३)"—इति‡, अनवगतम्। "तूर्ययानः"—इत्यवगमः। "जातं यत् त्वा परि देवा अभूषन्महे भराय पुरुहूत विश्वे। स तौरयाण उपयाहि यज्ञं मरुद्भिरिन्द्र सखिभिः सजोषाः॥"—इति §। 'जातं' जातमात्रं विश्वेदेवाः 'यत्' 'त्वा' त्वां 'पर्यभूषन्' परिगृहीतवन्तः, 'महे' महते 'भराय' भरणाय, महान्त मसुरैः सह सङ्ग्रामं करिष्यतीत्यनेनाभिप्रायेण। 'सः' त्वं हे 'पुरुहूत!' इन्द्र! 'तौरयाणः' त्वरितयानो भूत्वा 'उपयाहि' उपगच्छैनं 'यज्ञम्', मरुद्भिः' 'सखिभिः' सह 'सजोषाः' सम्प्रीयमाणः। उपागत्य च अस्माक माशिषः समर्द्धयेत्यभिप्रायः॥ एव मत्रागमनसम्बन्धात् "तौरयाणः = तूर्णयानः"—इत्युपपद्यते॥

---

* १भा० ४१६ पृ० १८ पं०।

† "यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः। विश्वेषां त्मना शोभिष्ठ मुपेव दिवि धावमानम्॥"—इति ऋ० सं० ५, ७, २९, १।

‡ १भा० ४१७ पृ० २पं०।

§ ऋ०सं० १, ३, १९, ३वा०।

"अहूयानः(५५)"—इति *, अनवगतम्। "अह्वीतयानः"—इत्यवगमः। "त्वया वयं०——०क्षणुह्यहूयाण" †। वामदेवस्यार्षम्। त्रिष्टुप्। अग्नये रक्षोघ्ने अष्टाकपालः, तत्र खिष्टकृतः पुरोऽनुवाक्येषा, मैत्रायणीयके। हे भगवन्! मे 'त्वया वयं' 'सधन्यः' समानधनिनः यदेतदस्मद्गृहे धन मेतदावयोः तत्सहेत्यभिप्रायः। यत एव मतो ब्रूमः;-'त्वोताः' त्वयैव रक्षिताः सन्तः, 'तव' 'प्रणीती' प्रणीत्या तवैव प्रणयेन 'अश्याम वाजान्' प्राप्नुयामोऽन्नानि। किञ्च; 'उभा शंसा' उभावपि शंसितारौ,—यश्चाग्रतो नः पापानि शंसति, यश्च पृष्ठतः, तावुभावपि 'स्रदय' जहि। हे 'सत्यताते' यज्ञतनितः! किञ्च; 'अनुष्ठुया' अनुष्ठानेन 'क्षणुहि' कुरु कर्म्मणैतत्सम्पादय यदहं ब्रवीमि। हे 'अहूयाण!' अलज्जितयानेत्यर्थः॥ एव मत्र "अहूयाणः"—इत्यनेन अह्वीतयानोऽग्निरुच्यते। उपपद्यते हि देवतायां अलज्जितयानत्वम्॥

"हरयानः(५६)"—इति ‡, अनवगतम्। "हरमाणयानः"—इत्यवगमः। "ऋज्र मुक्षण्यायने०——०सुषामणि"—इति §। विश्वमनसो वैयश्वस्येय मार्षम्। उष्णिक्। यान मनया स्तूयते। 'ऋज्रम्' ऋजुगामिनम् 'रथम्' 'रजतम्' रजतमयं रजतविकृतं

---

* १भा० ४१७ पृ० ६५०।

† "त्वया वयं सधन्य १ स्त्वोतास्त्व प्रणीत्यश्याम वाजान्। उभा शंसा स्रदय सत्यतातेऽनुष्ठुया क्षणुह्यहूयाण॥"—इति ऋ० सं० १, ४, २५, ४।

‡ १भा० ४१७ पृ० १०५०।

§ "ऋज्र मुक्षण्यायने रजतं हरयाणे। रथं युक्ष्व सस्नाम सुषामणि॥" इति ऋ० सं० १, १, २५, २।

वा, 'युक्तम्' अश्वैः। 'असनाम' लब्धवन्तो वयम्। क्व पुनर्लब्धवन्तः? 'उच्चैर्यायने'। उच्चैर्यायन इति कश्चिदाह; तस्मिन् यजमाने, 'हरयाणे' "हरमाणयाने", नित्यकाल मेवाभिप्रस्थितयाने, सुषामणि' शोभनं सामास्य सुषामा; तस्मिन् यजमाने। तादृशः स दत्तो दातेत्यभिप्रायः॥ एव मत्र शब्दसारूप्यादर्थोपपत्तेश्च "हरयानः = हरमाणयानः"—इत्युपपद्यते॥

"आरितः(५७)"—इति *, अनवगतम्। प्रतीत्यस्य स्थाने आङ्; "प्रत्यृतः"—इत्यर्थप्रतीतिः। "यो अश्वानां०——०हवामहे" †। कुत्सस्येय मार्षम्। व्यूढस्य दशरात्रस्य नवमेऽहनि मरुत्वतीये शस्त्रे निविद्धानीये सूक्ते शस्यते। 'यः' इन्द्रः 'अश्वानां' 'गवां' च 'गोपतिः'। किञ्च; 'यः' 'आरितः कर्मणिकर्मणि स्थिरः' आरितः सर्वान् स्तोमान् प्रति योऽवस्थितः। केन? देवतारूपेण सर्वेषु स्तोमेषु चावस्थानात्। यः 'कर्मणि' अग्निहोत्रादौ 'स्थिरः' नित्यः; य मृते न किञ्चन कर्म प्रवर्त्तत इत्यभिप्रायः। 'वीडोश्चित्' संस्तब्धस्यापि दर्पितस्यापि 'यः' इन्द्रः 'अ-सुन्वतः' अभिषव मकुर्वाणस्य 'वधः' वधयिता। त मेवङ्गुण-युक्तं 'मरुत्वन्तं' मरुत्सहितम्, इन्द्रम्, 'सख्याय' सखिभावाय एतस्मिन् कर्मणि 'हवामहे' आह्वयाम इत्यर्थः॥ एव मयम् "आरित"-शब्दोऽर्थोपपत्त्या "प्रत्यृतः"—इत्युपपद्यते॥

---

* १भा० ४१७ पृ० १३पं०।

† "यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः। वीळोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे॥"—इति ऋ० सं० १, ७, १२, ४।

"ब्रन्दी(५८)"-इति *, अनवगतम्। "ब्रन्दतेर्ह्रदुभावार्थस्य"; धातुरेवाय मप्रतीतः॥ ३(१५)॥

नि यद् वृणक्षि श्वसनस्य मूर्द्धनि शुष्णस्य चिद् व्रन्दिनो रोरुवद्वना। निवृणक्षि यच्छुसनस्य मूर्द्धनि शब्दकारिणः शुष्णस्यादित्यस्य (च†) प्रेषयितू रोरूयमाणो वनानीति वा वधेनेति वा। अव्रदन्त वोल्लितेत्यपि‡ निगमो भवति वीलयतिश्च§ व्रीलयतिश्च॥ संस्तम्भकर्म्माणौ पूर्वेण संप्रयुज्येते निष्पपी स्त्रीकामो भवति विनिर्गतसपः सपः सपते¶ स्पृशतिकर्म्मणः। मा नो मघेव निष्पपी परा दाः। स यथा धनानि विनाशयति मा नस्त्वं तथा परादाः। तूर्णाश्** मुदकं भवति तूर्णमश्नुते††। तूर्णाशं न गिरेरधीत्यपि निगमो भवति। क्षुम्प महिच्छचकं‡‡ भवति यत् क्षुभ्यते॥ ४ (१६)॥

---

* १भा० ४१८ पृ० १पं०।

† नास्त्येतत् क-ख-ग-पुस्तकेषु।

‡, §, ॥ अत्र सर्वत्रैव ल-स्थाने ड-पाठो च-पुस्तके।

¶ एष एव पाठो दृश्यताम् प्राधान्येन स्वीकृतः पुरस्तात् (१भा० ४१८पृ०), सायणसम्मतश्चैष एव। इह तु दृष्टौ "विनिर्गतपसास्मश्र स्मश्रते"—इति पाठो लक्ष्यते; एष च क-ख-पुस्तकयोः। "विनिर्गतपसाः स्मश्र स्मश्रते"—इति ग। "विनिर्गतपस्पसः सपते"—इति ङ। "विनिर्गतपसाः। पसः सपते"—इति च।

** "परादास्तूर्णाश्र" क, ख, ङ।

†† "तूर्ण मश्नुतः" क, ख, ग।

‡‡ "महिच्चक्रं" ख।

एष एवं निगमः;—"नियद् वृणक्ति•——•स्वापरि" *। सव्यस्येव मार्षम्; आङ्गिरसस्येयम्। जगती। ऐन्द्री। स पुनरिन्द्र एवाङ्गिरसः पुत्रत्व मापन्नं 'निवृणक्ति' निवर्णयसि। 'यत्' यस्त्वं हे भगवन्निन्द्र! मेघं हत्वा 'श्वसनस्य' "शब्दकारिणः" वायोः 'मूर्द्धनि' उपरि 'शुष्णस्य चित्' "शोषयितुः" अपि भगवतः "आदित्यस्य", 'ब्रन्दिनः' मृदुभावकर्तुः; आदित्येन हि परिपच्यमानं संस्वेदु मपि च दरतिन्दुकादि मृदु भवति, तस्मादसौ ब्रन्दी। तस्यापेव कर्मकारिणो मण्डलं प्रत्यूर्ध्वं 'रोरुवत्' स्तनयितु-शब्दं कुर्वाणः। 'वना' "वनानि" विक्षिपसि। ऊर्द्ध मधश्च "वनानि" उदकानि विक्षिपतो न ते शक्तिप्रतिघातोऽस्तीत्यभिप्रायः। यस्मिंस्तु पक्षे "वधेन"—इति निर्वचनम्, तस्मिन् पक्षे 'वना'—इत्येष शब्दो मेघ-वधेनेति योज्यः। उदकशब्दश्च तस्मिन् पक्षेऽध्याहार्योऽभिवर्जन-सम्बन्धात्। 'प्राचीनेन' प्रागञ्चितेन, अदीनेन, तस्मिन् कर्मण्याभिमुखेन, 'मनसा', 'बर्हणावता' हिंसावता। 'यत्' 'अद्या चित्' अद्यापि त्वं कर्म 'कृणवः' करोत्येव, अ-सुकर मन्यैः; तस्माद्ब्रवीमि;—'कस्त्वा परि'? कोऽन्यस्त्वा उपरि वर्त्तते, त्व मेव सर्वभूतानि परिगृह्य वर्त्तस इत्यर्थः॥ एव मत्र "ब्रन्दि"-शब्देनादित्य उक्तः। तत्पुनरेतदस्यष्टं मृदुभावकरणादादित्यस्य ब्रन्दित्व मिति। अतो ब्रन्दि-शब्दस्य मृदूभावार्थोपपिपादयिषया ब्रौडयतिना संस्वेदार्थवाचिना सह सम्बद्धोऽत्र ब्रन्दतेः प्रयोगः॥

---

* "नि०—०वना। प्राचीनेन मनसा बर्हणावता यद्वा चित् कृणवः कद्धि परि॥"—इति ऋ० सं० १, ४, १७, ५।

ततो निगमात् ब्रन्दतेर्हि मृदूभावार्थता स्पष्टतरेति दर्शयति; —"अब्रदन्त वीड़ितेत्यपि निगमो भवति"। अपि पूर्वोऽप्ययं स्पष्टतर इत्यपि शब्दः "वीडयतिश्च व्रीडयतिश्च" एतौ द्वावपि "संज्ञाकर्माणौ", "पूर्वेण" अनेनैव अनन्तरेण ब्रन्दिना, यस्मात् समानवाक्यता मुपगतौ "प्रयुज्येते"। तस्माद् ब्रन्दि-शब्दस्य मृदू-भावार्थत्व मुपपद्यते। "तद्देवानां०——०व्यचक्षयत्स्वः" *। मत्स-मदस्यार्षम्। जगती। बार्हस्पत्ये सूक्ते। 'तत्कर्त्वं' तत्कर्म 'देवानां', 'देवतमाय' देवतमस्य बृहस्पतेः, यत् 'अश्रथ्नत्' स्रथान्यभवत्, 'दृढा' दृढान्यपि सन्ति मेघबन्धानि। किञ्च; 'अब्रदन्त' मृदून्यभवन्। कानि पुनस्तानि मृदून्यभवन्? इति, उच्यते;—'वीड़िता' यानि वीड़ितानि व्रीडितानि सन्नद्धानि दर्पितानि, असुरकुलानि; अन्यानि वा यानि कानि चित्, तानि मृदून्यभवन्निति। किञ्च; 'उद् गाः आजत्' उदाजद् गाः, उदगमयदपः। 'अभिनद्' 'वलम्' मेघम्, 'ब्रह्मणा' स्तूयमानः। किञ्च; 'अगूहत्' अनाशयत् 'तमः' वैद्युतात्मना। किञ्च; 'व्यचक्षयत् स्वः' व्यदर्शयत् आदित्यम्॥ अव्यवधानकरणेन व्रीड़यतिना सह प्रयोगाद् व्रीड़तेरर्थवैपरीत्येन ब्रन्दतेर्मृदुतार्थत्व मुपपद्यते नभसः॥ एव मत्राब्रदन्त वीलितेति ब्रन्दतेः, व्रीडयते-र्वन्दिना सह प्रयोगोऽन्यत्र कश्चित् द्रष्टव्यः †॥

---

* "तद्देवानां देवतमाय कर्त्वं मश्रथ्नन् दृळाब्रदन्त वीळिता। उद् गा आजदभिनद् ब्रह्मणा वलं मगूहत् तमो व्यचक्षयत् स्वः॥"—इति ऋ० सं० १, ७, १, ३।

† ऋ० सं० १, ४, १७, ४-५ ऋचौ द्रष्टव्यौ।

"निःष्पपी(५९)"—इति *, अनवगतम्। "विनिर्गत-पसाः"—इति † शब्दसमाधिः। "स्त्री-कामः" पुंश्चलोऽभिधेयः ‡; स हि नित्यं निर्गत-शेप एव भवति §। "स्पश स्पशतेः" ॥ "स्पृशतिकर्मणः" स्पृशत्यर्थे वर्त्तमानस्य, — शेपः; तेन हि स्त्री स्पृशते ¶। "प्रति यत् स्या०——० परा दाः"**। कुत्सस्यार्षम्। ऐन्द्री। त्रिष्टुप्। हे भगवन्निन्द्र! 'यत्' यस्मात् 'प्रत्यदर्शि' प्रतिपश्यतीव, 'स्या' सा 'नीथा' स्तुतिः। "नीथाविदो जरितारः"—इत्येतस्मान्निगमात् स्तुतिर्नीथेति प्रतीयते ††। 'दस्रोः' अश्वोः दासयितुरुव 'ओको न' ओक इव, निवास मिव। 'अच्छ' आभिमुख्येन, हृदय मनुप्रविश्य। 'सदनं' स्थानम्, यत्र तया नीथया स्तुत्या स्मर्त्तव्यम्,—यस्त्वाभिमतो गुणः; अनेन यदि नाम मा मेष स्तोता स्तूयात्, साधु स्यादिति, त मर्थं मनुप्रविश्यैव भवतो हृदृतम्; तेनार्थेनात्मान मभिसम्बन्धयित्वा

---

* १भा० ४१८ पृ० ६पं०।

† "विनिर्गतसपः"—इत्यपि पाठो दृश्यते तत्रापि स्मृत एव (१भा० ४१८ पृ०।

‡ पुंश्चली = स्वैरिणी,—इति तु योगात् प्रतीयत एव परं पुंश्चल-शब्दस्य स्वैरवाचकत्व मेतद्वृत्तिग्रन्थादेवेति सम्भाव्यते।

§ "निष्पपी = विनिर्गतसपो विनिर्गतशेपो यथेष्टाचारी दासीपतिः।"—इति सा० भा० (ऋ० सं० १, ७, १८, ५)।

॥ "सपः सपतेः"—इत्यपि पाठो दृश्यते तत्रापि स्मृत एव (१भा० ४१८ पृ०)।

¶ "निष्पपी। षप समवाये। सपति समवैति योऽन्या सङ्गच्छत इति सपः शेपः पचाद्यच्। निर्गतो नित्योद्यतः सपः शेपो यस्य स स्त्रीव्यसनी निष्पपः। वर्णव्यापत्त्या ईकारः"—इति सा० भा० (ऋ० सं० १, ७, १८, ५)।

** "प्रति यत् स्या नीथादर्शि दस्रोरोको नाच्छा सदनं जानती गात्। अध स्मा नो मघवञ्छर्मतादिन्मा नो मुधेव निष्पपी परा दाः॥—इति ऋ० सं० १, ७, १८, ५।

†† ऋ० सं० ६, १, ११, ५।

एतन्मम सदन मित्येवं 'जानती' च तदेव 'अगात्' नित्यकाल मेवा-गच्छति। अतएव मतः स्तुत्युदीरितारो वयं भवतः। 'अध' एतस्मात् कारणात् वयं ब्रूमः;— हे 'मघवन्'! 'चर्कृतात्' पुनःपुनः क्रियमाणात् एतस्मात् कर्मणः, आत्मस्तुत्याश्रयभूतात्मान मस्मान् 'परा दाः' पराङ्मुखान् दधीथाः; उपनामय तत् कर्मसाधनानि। कथं च पुनः कर्मसाधनानि? कथं च पुनर्मा पर्रा दाः? 'मघेव निष्षपी' स यथा धनानि नित्यविनिर्गतशेषो विनाशयति। एवम् 'नः' अस्मान् त्वम् 'मा' अवमादयिष्टाः धनभूतास्त्व वय मतो रक्षस्वेत्यभिप्रायः॥ एव मत्र शब्दसारूप्यादर्थोपपत्तेश्च धननामसम्बन्धात् निष्षपी" निर्गत-पशाः, स्त्रीकाम इत्युपपद्यते॥

"तूर्णाशम्(९०)"—इति *, अनवगतम्। "उदकं भवति"—इत्य-भिधेयवचनम्। "तूर्णाशं" हि क्षिप्रम्, तत् "अश्नुते" व्याप्नोति, तूर्णाशन मिति प्राप्तम्। अपठितं चैतदुदकनामसु; तेनाप्रतीतार्थम्। प्रति श्रुतायं०—०मूतये †। मेधातिथेरार्षम्। गायत्री। ऐन्द्री। रात्रिपर्याये शस्यते। मैत्रावरुणस्य प्रथमे शस्त्रे विनियुक्ता। हे ऋत्विग्यजमानाः! यन्मया प्रतिश्रुत मार्त्विज्य मुपगच्छता अह मिन्द्रं स्तुतिभिराकृथिष्यामीति, तस्मै 'प्रतिश्रुताय' 'वः' युष्माक मुपकरणार्थ मेतस्मिन्कर्मणि 'धृषत्' धृष्टं प्रगल्भम्। 'ऊवे' आकृये। 'सुशिप्रं' सुहनुं सुनसं वेन्द्र महम् 'ऊतये' तर्पणाय; अथ वा

---

* १मा० ४१८ पृ० १४ पं०।

† "प्रति श्रुतायं वो धृषत् तूर्णाशं न गिरेरधि। ऊवे सुशिप्र मूतये॥"—इति ऋ० सं० ६, २, १, ४।

भवता मात्मनश्च रक्षणायेति स्यात्। कथम्पुनराक्रयामि? "तूर्णाशं न गिरेरधि"। यथा 'तूर्णाशम्' 'गिरेः अधि' मेघस्योपरि वर्त्तमान माक्रयन्ति वर्षार्थिनो जनाः। एव माक्रयामीति॥ एव मत्र गिरिसम्बन्धात् "तूर्णाशम्" उदक मित्युपपत्तिः॥

"क्षुम्पम्(९९)"—इति *, अनवगतम्। "अहिच्छत्रकं भवति"—इत्यभिधेयवचनम्। "यत्" यस्मात्तत् स्पृष्टमात्रं "क्षुभ्यते" चलति, तस्मात् क्षुपं क्षोभण मिति न्याय्यम्॥ ४(१६)॥

**कदा मर्त्तं मराधसम्पदा क्षुम्प मिव स्फुरत्। कदा नः शुश्रवद् गिर इन्द्रो अङ्ग। कदा मर्त्तं मनाराधयन्तं पादेन क्षुम्प मिवावस्फुरिष्यति† कदा नः शृणोति‡ च गिर इन्द्रो अङ्गाङ्गेति क्षिप्रनामाख्यित मेवाङ्कितं भवति निक्षुम्पुणः सोमो निचान्तपृणो निचमनेन प्रीणाति॥ ५ (१७)॥**

"कदा मर्त्तं मराधसं०—०इन्द्रो अङ्ग" §। गोतमस्येय मार्षम्। उष्णिक्। ऐन्द्री। तार्क्षीयसवनिकेषु उक्थपर्यायेषु ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता। 'कदा' कस्मिन्काले 'मर्त्तं' मनुष्यम् 'अराधसम्' अनाराधयन्तम्; यः त मिन्द्रं नाराधयति, स्तुत्या हविषा च, तम्।

---

* १भा० ४१९ पृ० १पं०।

† "मिवावस्फुरसि" ख, ग। "मिवावस्फुरिष्यति" ङ, च।

‡ "श्रोष्यति" ङ, च।

§ ऋ० सं० १, ९, ९, ३।

'पदा' पादेन 'स्फुरत्' अवस्फुरिष्यति, अभिहिंसिष्यति स इन्द्रः। "स्फुरति(१५), स्फुलति(१६)"—इति वधकर्मसु पठितम्*। किञ्च। 'कदा नः' कदा अस्माकं परिचरणमानानां स्तुतिभिर्हविर्भिश्च 'शृण्वत्' श्रोष्यति 'गिरः' स 'इन्द्रः', 'अङ्ग' क्षिप्र मित्यर्थः। कदास्माकं परिचरितॄणा मिन्द्रः श्रोष्यति गिरः, श्रुत्वा च समर्द्धयिष्यत्याशिषः। अनाराधयितॄंश्च कदा पादेनाभिहनिष्यति? कदा अनाराधयित्रा-राधयित्रोर्विशेषं ज्ञास्यतीत्यभिप्रायः। स्वरूपेण तावदेषोऽस्य मन्त्रस्यार्थो मया लक्ष्यते; भाष्यं पुनरत्र लोकः "पादेन चुम्प मिवावस्फुरसि" †—इत्येव मधीते; तथा च,—"कदा नः शृणोति गिरः" ‡—इति; तदेतत् "चुम्प मिवावस्फुरसि"—"शृणोति गिरः" —इत्यनयोर्भाष्यवाक्ययोः पुरुषो वैलक्षण्यात् दुर्योज्यो मन्त्रार्थ इति "गिरः अवस्फुरसि"—इति मध्यमपुरुषयोगः प्रत्यक्षकृतलक्षणाभिसम्बन्धी। मन्त्रस्य "कदा नः शृणोति च गिरः"—इत्येतत् परोक्षकृतः। एव मेतद्भाष्यं दुर्योज्यम्; यद्येष भाष्यस्य सम्यक् पाठः? अथ पुनरसम्यक् पाठः? सम्यक्पाठोऽन्वेष्टव्यः। अहन्तु लक्षये,—यद्येष मया मन्त्रो व्याख्यातः, स एव सम्यक् पाठः स्यात्! —"पादेन चुम्प मिवावस्फुरिष्यति"—"श्रोष्यति च गिरः"—इति; तथाहि मन्त्रार्थस्याविरोधो लक्ष्यते §। सूक्तेऽपि वास्मिन् काश्चित्

---

* १भा० १८१ पृ० १अ० १९ ख०।

† "मिवावस्फुरिष्यति"—इत्येव तु पाठो दृश्यते ङ-च-पुस्तकयोः।

‡ "कदा नः श्रोष्यति च गिरः"—इत्येवं पाठो दृश्यते तच ङ-च-पुस्तकयोः।

§ ङ-च पुस्तकयोरेव मेव दृश्यते पाठः। तथा च एतस्य वृत्तिग्रन्थस्यानुरोधत एव तच तादृशः पाठः कल्पितः, ङ-च-पुस्तकौ च वृत्त्यनुसारत एव लिखिताविति।

परोक्षकृता ऋचः, काश्चित् प्रत्यक्षकृताः। अतोऽपि दुरवधार्योऽस्य भाष्यस्याभिप्रायः। अहिच्छत्रकं हि पादेन स्पृष्टमात्रं शीर्यते। तथाचानाराधयितुर्विनाशोऽभीष्ट इति। "चुम्प"-शब्देनाहिच्छत्र मभिधीयते॥

"निचुम्पुणः(६२)"—इति*, अनवगतम्, अनेकार्थश्च। "निचुम्पुणः सोमो भवति"—इत्यभिधेयवचनम्। "निचान्तपृणः"—इति शब्दसमाधिः। स हि निचान्तो भवितः "प्रीणाति"॥ ५ (१७)॥

पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये। अपां जग्मिर्निचुम्पुणः॥ पत्नीवन्तः सुता इमेऽद्भिः सोमाः कामयमाना यन्ति वीतये पानायापां गन्ता निचुम्पुणः समुद्रोऽपि निचुम्पुण उच्यते निचमनेन पूर्यत अवभृथोऽपि निचुम्पुण उच्यते नीचैरस्मिन् क्षणन्ति नीचैर्हधतीति वा। अवभृथ निचुम्पुणेत्यपि निगमो भवति। निचुम्पुण निचुङ्कुणेति च पदिर्गन्तुर्भवति यत्प्रयते॥ ६ (१८)॥

"पत्नीवन्तः सुता इमे०—०निचुम्पुणः। कक्षो नाम आङ्गिरसः, तस्येय मार्षम्। गायत्री। ऐन्द्री। रात्रिपर्यायेषु मध्यमे पर्याये होतुः शस्त्रे विनियुक्ता। 'पत्नीवन्तः' पत्नीभिः अङ्गिः, तद्वन्तः।

* १भा० ४१९ पृ० १पं०।

'सुताः' अभिषुताः। 'इमे' सोमाः। 'उशन्तः' "कामयमानाः" इव 'यन्ति' देवान् प्रति, 'पीतये'* कथं नामास्मान् देवाः पिबेयुरित्येव मर्थं कामयमाना इव यन्ति। किं मेतदेव? नेत्युच्यते। पुनःपुनरेष 'निचुम्पुणः' सोमः "अपां" वीर्येण सहितः, तासु तासु क्रियासु प्रदीयमानः अस्माभिर्देवान् प्रति 'जग्मिः" एव भवति, गन्तैव भविष्यति॥ एव मिह सोमाधिकारात् "निचुम्पुण"-शब्देन सोम उच्यत इत्युपपद्यते॥

"समुद्रोऽपि निचुम्पुणः"—इति "उच्यते"। स हि "निचमनेन" उदकेन "पूर्यते"; उदकं हि निचम्यत इति निचमनम्। मृग्योऽत्र निगमः॥

"अवभृथोऽपि निचुम्पुण उच्यते"। "नीचैरस्मिन् क्वणन्ति" शब्दं कुर्वन्ति। तत्र ह्युक्त मवभृथेष्वोपांश्वेव चरन्तीति निचुम्पुणः। अथ "वा" "नीचैः" अस्मिन् यज्ञपात्राणि "दधतीति" निचुम्पुणः; तानि हि तत्रापु निधीयन्ते। "अवभृथ निचुम्पुण निचेरुरसि"† —इत्यनेनाभिसाद्यापु प्रक्षीयन्ते सोमपात्राणि। हे 'अवभृथ' अवभृथदेव! हे वरुण! नीचक्वणन! 'निचेरुरसि' नीचैश्चरणशीलोऽसि। निचुम्पुणो नीचक्वणनो भूत्वा गृहेगृहे यज्ञगृहेऽवतिष्ठसे। स त्व मेवङ्गुणविशिष्टः "अव दैवैः देवकृतम् एनः यासिषम्" अवयज्ञि नः; दैवैः सहितो देवकृतं देवनिमित्तम् देवापराधम्; त

---

* "वीतये"—इति मूलपाठः।

† "अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः। अव दैवैर्देवकृत मेनो यासिष मव मर्त्तैर्मर्त्यकृतं पुरुराव्णो देवरिषस्पाहि॥"—इति य० वा० सं० ६, ४८।

मेनः। 'अव' यच्चि 'मर्त्यैः' सहितो 'मर्त्यकृतम्' मनुष्यकृतम्, एनः; 'पुरुरावणः' पुरोः महतोऽपि 'देवरिषः' देवरोषणादस्मात् पाहि॥ एव मत्र "निचुम्पुण"-शब्देनावभृथ उच्यते॥

निचुङ्कुणोऽप्यनेनैव व्याख्यातः॥

"पदिः(६६)"—इति*, अनवगतम्। "गन्तुः" एष निर्देशः कृतो "भवति"। "यत् पद्यते" यस्मादधो पद्यते गच्छतीत्यर्थः। अभिधेयः पक्षी; स हि नित्यकाल मेव पतितो भवति॥ ६(१८)॥

सुगुरसत् सुहिरण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति। यस्त्वा यन्तं वसुना प्रातरित्वो मुक्षीजयेव पदि मुत्सिनाति॥ सुगुर्भवति सुहिरण्यः स्वश्वो† महच्चास्मै वय इन्द्रो दधाति यस्त्वा यन्त मन्नेन प्रातरागामिन्नतिथे मुक्षीजयेव पदि मुत्सिनाति। कुमारो मुक्षीजा मोचनाच्च शयनाच्च‡ ततनाच्च पादुः पद्यतेः। आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते। आविष्कुरुते भास मादित्यो गूहते बुसम्बुस मित्युदकनाम ब्रवीतेः शब्दकर्मणो भ्रंशतेर्वा यद्वर्षन् पातयत्युदकं§ रश्मिभिस्तत् प्रत्यादत्ते॥ ७ (१९)॥

॥ इति पञ्चमाध्यास्य तृतीयः पादः॥ ५, ३.

---

* १भा० ४१९ ष्ठ० १५ पं०।

† "सुहिरण्य स्वश्वा" ग, ङ।

‡ "सयनाच्च" ख, च। "मोचनाच्च ततनाच्च सनन्नाच्च" ङ।

§ "यद्वर्षं पातयत्युदकं" क, ख, ग। "यद्वर्षात्पातयत्युदकं" ङ।

सुगुरसत् ०——० सिनाति" * । कक्षीवत आर्षम् । य एव 'सुगुः' भवति, शोभनगुः । स एव 'सुहिरण्यः' भवति । स एव 'स्वश्वः' भवति । 'हृहत्' च महच्च 'अस्मै' 'वयः' 'इन्द्रः' 'दधाति' ददाति । आह, तस्य किम् ? इति । उच्यते ;— "यस्त्रा ऽऽयन्तं वसुना प्रातरित्वः" । प्रातरागामिन्नतिथे ! स हि प्रातःप्रातरन्यानि गृहाणभेति, तेनैव मामन्व्यते — 'प्रातरित्वः !'— इति । 'आयन्तम' अध्वानं 'वसुना' अन्नेन क्षुधाविप्रश्नेन प्राणरक्षणेन । 'मुचीजयेव पाश्यैव, "कुमारः" 'पदिं' पतितारं पक्षिणम् 'उत्सिनाति' उद्गम्य सिनाति, बध्नाति, प्राणांस्त्वपि मन्नियच्छतीत्यर्थः । यथा हि— अतिथिरध्वगो भवति, स पतन् क्षुधितोऽन्नसंयोगेन कस्यचिद् गृहिणो गृहेऽवतिष्ठते, एव मेतत् स्यात् ॥ एव मत्र पक्षी "पदि"-शब्देनोच्यते ; स हि अतिक्रममाणः पाश्यया बध्यत इत्युपपद्यते ॥

"मुचीजा मोचनाच्च" सा हि अवमुच्यते पक्षिणः पादे । "सयनाच्च" सीयते बध्यते हि तया पक्षी । "तननाच्च" † सा हि पक्षिणो बधार्थं तन्यते । एताभ्यः क्रियाभ्यो यथासम्भवं "मुचीजा"—इत्येतदभिधानं भवति ॥

"पादु(६५)ः"—इति ‡, अनवगतम् । "पद्यते:" —इत्यर्थप्रतीतिः । सा ते जीवातु०——० मुच्यते" § । वसुक्रस्येव मार्षम् । ऐन्द्रौ ।

---

* ऋ० सं० १, १, १०, १ ।

† ङ-पुस्तकादिरिक्तेषु सर्वत्रैव मूलपुस्तकेषु "तननाच्च"—इत्येव पाठः ।

‡ १भा० ४१९४० १८पं० ।

§ "सा ते जीवातुरुत तस्या विद्धि मा स्मैतादृगपो मूहः समर्थे ।०——०मुच्यते ॥"—इति ऋ० सं० ७, ७, १९, ४ ।

त्रिष्टुप्। महाव्रते मरुत्वतीये शस्यते। हे यजमान! 'सा' 'ते' तव 'जीवातुः' जीविका, या भगवतः सूर्यस्य तापप्रकाशवृष्ट्युदयास्तमयरसादानादिलक्षणा प्रवृत्तिः, अनेन सौर्येण कर्मणा सर्वभूतानि त्वं जीवसि इत्यभिप्रायः। यत एव मयैतस्मात् कारणात् ब्रवीमि;— 'तस्य' सूर्यस्य 'विद्धि' विजानीहि; यस्यया स्तुतिहविर्दानादिलक्षणः प्रत्युपकारः कर्त्तव्यः। 'मा' त्वम् 'अस्मै' सूर्याय, 'एतादृक्' एतादृशं सुपकारम् 'अपगूहः' मा संवृतं कार्षीः। प्रत्युपकारायास्मै त्वं मभ्युद्यच्छस्वेत्यभिप्रायः। अपि च 'समर्ये' सङ्ग्रामे एतस्मिन्, मृत्युना सह वर्त्तमाने, सर्वभूतानाम्; श्वः अद्य वा मृत्येथाः, को हि तद् वेद?— कस्य कदा मृत्युरिति। स त्वं तत्कृतानि शोभनकार्याणि मन्यमानः, शीघ्रं प्रत्युपकुरुष्वास्मै सूर्यायेत्यभिप्रायः। आह,— का पुनः सूर्यस्य प्रवृत्तिः जीवातुः? इति। "आविः स्वः कृणुते गूहते बुसम्"। 'आविष्कुरुते' प्रकाशीकरोति स्वभासा सर्वं मिदमुपभासितं व्यवहाराय कल्पते, 'स्वः' आदित्यः। 'गूहते' संवृणोति रश्मिभिः 'बुसम्' उदकम्। किञ्च; 'सः' 'पादुः' तत्पदनं तद्गमनमवभासनेन चरणदानादिकर्त्तुः 'अस्य' सूर्यस्य 'निर्णिजः' उपनिर्णिजयतुः तमः-पङ्कदिग्धानि स्वरूपाणि स्वेन प्रकाशोदकेन धौतानीव करोतीति निर्णिक् सूर्यः, तस्य निर्णिजः। 'न मुच्यते' नोपरमतीत्यर्थः। अत एव मय मद्य च तवोपकारे प्रवृत्तः। अतः प्रत्युपकुरुष्वास्मा इत्यभिप्रायः॥ एव मत्र शब्दार्थोपपत्तेः "पादुः=पदनम्"—इत्युपपद्यते॥ "बुस मित्युदकनाम" *। "ब्रवीतेः"

* १भा० ९९४० १च० १२ख० (१०)।

शब्दार्थस्य (अदा० प०); तद्धि शब्दवद्भवति। "भ्रंशतेर्वा" तद्धि भ्रश्यते (दि०प०) मेघात्। "यद् वर्षन् पातयत्युदकम्" आदित्यः, "तद्" "रश्मिभिः प्रत्यादत्ते"—इति समासतो भाष्यकारेणाय मस्यार्द्धर्चस्यार्थ उक्तः॥ ७ (१९)॥

इति निरुक्तवृत्तौ दशमस्याध्यायस्य (पञ्चमाध्यायस्य)
तृतीयः पादः॥ ५, ३॥

---

॥ चतुर्थः पादः॥

## वृकश्चन्द्रमा भवति विवृतज्योतिष्को वा विवृत-ज्योतिष्को वा विक्रान्तज्योतिष्को वा॥ १ (२०)॥

"वृकः(९५)"—इति *, अनवगतम्, अनेकार्थञ्च। "वृकः" तावत् "चन्द्रमा भवति"; स हि "विवृतज्योतिष्कः" प्रकाशितज्योतिष्को भवति, तस्माद्वृकः। अथ "वा" "विवृतज्योतिष्कः"—इति वृकः; तद्धि तस्य विवृतं ज्योतिः, शीतत्वात्; इतराणि उष्णानि ज्योतींषि सूर्यादीनि, तान्यपेक्ष्य †। अथ "वा" विक्रान्तज्योतिष्कः वृकः; तस्य हि विक्रान्तं ज्योतिः, इतरेभ्यो ग्रहनक्षत्रतारकादिभ्यो ज्योतिर्भ्यः सकाशात्। एते शब्दसमाधयः॥ १ (२०)॥

---

* १भा० ४१० पृ० १८ पं०।

† सूर्यस्योष्ण मेव ज्योतिरत्रापतितं शीतं भवति, तत एव विवृत मुक्तम्। "अचा दृ गोरंमन्वत्र"— इत्यस्य व्याख्यानं द्रष्टव्यम् (२भा० ४७५०)।

अरुणो मासकृद् वृकः पथा यन्तं ददर्श हि। उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी * वित्तं मे अस्य रोदसी॥ अरुण आरोचनो मासकृन्मासानां (चार्द्धमासानां †) च कर्त्ता (भवति ‡) चन्द्रमा वृकः पथा यन्तं ददर्श नक्षत्रगणमभिजिहीते निचाय्य येनयेन योक्ष्यमाणो भवति चन्द्रमास्तक्षणुवन्निव पृष्ठरोगी जानीतं मेऽस्य द्यावापृथिव्यावित्यादित्योऽपि वृक उच्यते यदावृङ्क्ते॥ २ §॥

"अरुणो मासकृद्०——०रोदसी"॥। चितस्येव मासस्य कूपे पतितस्य, कुत्सस्य वा आर्षम्। पङ्क्तिः। वैश्वदेवी। 'अरुणः' "आरोचनः" आभिमुख्येन सर्वस्य जगतो रोचयिता स्वया ज्योत्स्नया। 'मासकृत्' "मासानां च अर्द्धमासानां च कर्त्ता"। मासशब्दसम्बन्धादर्द्धमासशब्दोऽध्याहृतः; तानपि ह्यसौ निर्मिमीत इति¶। "चन्द्रमा" 'वृकः'। आह;—किं करोति? इति, उच्यते;—"पथा यन्तं ददर्श हि" नक्षत्रमण्डलस्याधोऽवस्थितः 'पथा' स्वेन मार्गेण 'यन्तं' 'ददर्श' पश्यति "नक्षत्रगणम्";— न मा मन्धकूपे पतितं

---

* "पृष्ट्यामयी" ख।

† नैतद् दृश्यते ङ-ख-पुस्तकयोः।

‡ नैतद् दृश्यते क-ख-ग-पुस्तकेषु।

§ मात्र खण्डसमाप्तिः ङ-च-पुस्तकयोः, खण्डप्रतीकवाक्यविरुद्धा चैषा।

॥ ऋ० सं० १, ७, २२, ३।

¶ सूर्यस्यैव मासकर्तृत्वं न तु चन्द्रस्येति मन्यानो भाष्यकारो मासाना मित्यस्यैव व्याख्यानमर्द्धमासानां मित्याद्येत्याकम्।

पश्यति, यदि नाम पश्येत् कथञ्चिदवश्य मस्मात्स्थायेतापदो मा मित्यभिप्रायः *। किञ्च; "उज्जिहीते निचाय्या तष्टेव पृच्छामयी वित्तम्"। यथा कश्चित् 'तष्टा' तक्षा "पृष्ठरोगी", कश्चिद्वृत्तं "तक्ष्णुवन्" उच्छेदनास्पदे वयं योज्या न वा?—इत्यनेनोत्कटो भूत्वा 'निचाययति' पश्यति, एवं "चन्द्रमाः" अप्युज्जिहीते "येन" नक्षत्रेण "योक्ष्यमाणः",—अमुना मयाद्य योक्तव्य इति। एवं 'निचाय्य' "तष्टा" स्वेन दृष्टात् दर्शनेन। ततस्तदेव "अभिजिहीते", तेनैव सहोदेतीत्यर्थः। एव मस्य येनार्थः, त मय मादरेणोर्द्धकायो हि भूत्वा पश्यति †; मया ‡ त्वस्यार्थो नास्तीति मा न पश्यत्यधोवर्त्तमानम्। एव मतो ब्रवीमि;—अपि तावत् हे 'रोदसी!' 'वित्तं' विजानीतं 'अस्य' चितस्यार्त्तिप्रलापस्य योऽर्थः। विदित्वा उत्तरतं मा मस्मात् कूपात् इत्यभिप्रायः॥ एव मत्र अरुण-शब्दात् मामक्षच्छब्दाच्च "वृकः=चन्द्रमाः"। चन्द्रमःशब्दाच्च नक्षत्रगणोऽध्याहृतः, तथार्थोपपत्त्यविरोधात्॥

येषां तु शाखिनां "मा सक्षत्"—इत्येतत् पदद्वयं भवति §, तेषां सक्षत् मां ददर्श चन्द्रमाः, यदि पुनःपुनः पश्येदवश्यं मोचयेदस्या आपदः; पथा तु यन्तं नक्षत्रगणं पुनःपुनः पश्यति न मा मित्येवमादि योज्यम्॥

"आदित्योऽपि वृक उच्यते"। "यद् आवृङ्क्ते" यस्मादसौ तम आवृङ्क्ते, तस्मादृकः॥ २॥

---

* कूपपतितस्य चितर्षेरिति शेषः।

†,‡ पश्येति चन्द्रः; मया चितेनेति बोध्यम्।

§ तत्पदकारपाठतस्तथैव स्वरश्रुतेरिति भावः।

अजोहवीदश्विना वर्त्तिका वा मास्रो यत्सो ममुञ्चतं वृकस्य। आह्वयदुषा अश्विना * वादित्येनाभिगस्ता ता मश्विनौ प्रमुमुञ्चतुरित्याख्यानं † श्वापि वृक उच्यते विकर्त्तनात्। वृकश्चिदस्य वारण उरामथिः। उरण-मथिः। उरण ऊर्णावान् भवत्यूर्णा पुनर्वृणोतेरूर्णोतेर्वा। वृङ्वाश्निन्यपि वृक्युच्यते। शतं मेषान् वृक्ये चक्षदान मृज्राश्वं तं पितान्धं चकारेत्यपि निगमो भवति। जोषवाक मित्यविज्ञातनामधेयं ‡ जोषयितव्यं भवति ॥ ३ (२१) ॥

"अजोहवीदश्विना०——०विषेण" §। कक्षीवत आर्षम्। आश्विनी। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। 'अजोहवीत्' "आङ्क्षयत्" आह्वतवती "उषाः"। हे 'अश्विनौ!' युवाम्। वर्त्तनशीला 'वर्त्तिका'। कदा पुनराङ्क्षयत्? इति, उच्यते;—'आस्रः' आस्राद्यदैनां 'वां' युवाम् 'अमुञ्चतम्'। 'वृकस्य' आदित्यस्य। उषाः किल "आदित्येनाभिगस्ताश्विनौ" आह्वतवती, "ता मश्विनौ प्रमोचितवन्तावित्याख्यानम्"—एतस्मिन्नर्थे वेदयन्ते निदानविदो बह्वृचाः, तदनुपे-

---

* "अङ्क्षयदुषाश्विना" क, ग।

† "प्रमुमुञ्चतुरित्याख्यानं" ग, ङ।

‡ "जोष इत्यविज्ञातनामधेयं"—इति क-ख-ग-पुस्तकेषु। इत्थाविधैव सेव; परं निघण्टुके "जोषवाकम्"—इत्येव व्याख्यानम् (१भा०४२०४०१८५०), निगमेऽप्येव सेव।

§ "अजोहवीदश्विना०——०वृकस्य। वि जुयुर्षा ययुषः साम्बन्धे र्जूतं विश्वाचो अघतं विषेण॥"—इति ऋ० सं० १, ८, १९, १।

चिन्तयं मन्त्रार्थनिर्णयाय *। एतच्च युवयोर्माहाभाग्यम्। किञ्चान्यत्। "विजयुषा ययथुः सान्वद्रेः"। 'विजयुषा' विजय मिच्छन्तौ युवां 'ययथुः' गच्छथः, 'सानु' समुच्छ्रितम् 'अद्रेः' मेघस्य शिखर मारुह्य। किञ्च; युवा मेव 'जातम्' उपद्रवं दुर्भिक्षाख्यं कृत्स्नस्य जगतः, 'विश्वाचः' विश्वगञ्चनौ; सर्वतो गतौ भूत्वा,—मेघजालेनेदं सर्वं मभिप्रच्छाद्य, ततः 'अहतं' हतवन्तौ स्थः; 'विषेण' उदकेनेत्यर्थः॥ यथाऽस्मिन् वृकशब्देनादित्य उच्यते, तथाऽऽख्यानादुपेक्षितव्यम्†॥

"श्वापि वृक उच्यते", "विकर्त्तनात्" विविध मसौ कृन्तति तस्माद्वृकः। "वृकश्चिदस्य०——०चित्रया धिया"‡। प्रगाथपुचस्य कलेरार्षम्। सतोबृहती। महाव्रते वृचाग्नीतिषु विनियुक्ता। 'वृकश्चित्' वृकोऽपि, 'श्वा' सारमेयोऽस्येन्द्रस्य विद्यत एव। 'वारणः' वारयिता शत्रूणाम्। किं सुतान्यान्युपकरणानि? 'उरामथिः' "उरणमथिः"; उरान् मेषान् यो मथ्नाति स उरामथिः। स पुनरस्येन्द्रस्य 'आभूषति', 'वयुनेषु' प्रज्ञानेषु; यदैवासौ विजानीते आभूषत्वयं शत्रूनिति, तदैवासौ आभूषति। यस्य तवैवं सर्वोपकरणसम्पन्नत्वम्, हे 'इन्द्र!' 'सः' त्वम् 'इमम्' 'नः' अस्माकं 'सोमम्' उपश्रुत्य 'आगहि' आगच्छेमं यज्ञं 'प्र' प्रकर्षेण 'चित्रया' चायनीयया कमनीयया 'धिया' बुद्ध्या॥ सरमा हि देवशुनी श्रूयते§। तत्पुचनृभिश्च देवानां

* 'श्वानौ वृकस्य वर्त्तिका मुभौकें युवं नरा नासत्यामुमुक्तम्।"—इति (ऋ० सं० १, ८, १०, ४), एतद्भाष्यं च सायणीयं द्रष्टव्यम्।

† ऋ० सं० १, ८, १०, ४; १९, १.—एतादृशौ पर्य्यालोच्यावित्यर्थः।

‡ "वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति। सेमं नः स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया॥"—इति ऋ० सं० ९, ४, ४९, ३,।

§ "कि मिच्छन्ती सरमा (ऋ० सं० ८, ९, ५, १)"—इत्यादौ द्रष्टव्यम्।

भवितव्यम्, तस्मात् स्यापि वृक उच्यत इत्युपपद्यते ; इतरेषा मारण्यकाणां परिग्रहाभावात् अस्य मन्त्रस्य पूर्वोऽर्द्धः परोक्षकृतः ;—वृकश्चिदस्येत्यस्मात् षष्ठीयोगात्। उत्तरस्तु प्रत्यक्षकृतः ;—आगहीह्येत्यस्मात् मध्यमपुरुषयोगात्, सम्बोधनाच्च। देवता किल परोक्षा स्तूयमाना प्रत्यक्षीभवति। तदेतत् सर्वेष्वेवंलक्षणेषु मन्त्रेषूपेक्षितव्यम्॥

निगमप्रसक्त मुच्यते ;— "उरणः = ऊर्णावान्" ऊर्णया तद्वान् "भवति"। "ऊर्णा पुनर्वृणोतेः"। इति विग्रहप्रसक्तम्। ता अपि शीतत्राणार्थं विक्रियन्ते। "ऊर्णोतेर्वा" आच्छादनार्थं स्यात्, ताभिराच्छन्न उरणो भवति॥

"वृद्धवाग्न्यपि वृक्युच्यते" यैषा वृद्धं वाश्यते,—शिवा, सापि वृक्युच्यते ; विकर्त्तनादेव। "शतं मेषान्० ——० भिषजावनर्वन्"*। अजोहवीदित्यनया समानार्षेयम्। 'शतं मेषान्' 'वृक्ये' शिवायै, तया वाग्नि ते सति परितुष्टः 'वचत्' व्यादिष्टवान् 'दानम्'। येय मेवं शोभन मभिप्रस्थिताना मस्माक मर्थसिद्धये वाश्यते, तस्यै, शतं मेषाणां दीयता मित्येव माज्ञापितवान्। 'ऋज्राश्वम्' ऋज्राश्वो नाम राजपुत्रः, तम्। 'तं च' पुनरेवं व्यादिष्टवन्त मतिसाहसिकोऽयमिति 'पिता' कुपितः, शापेन 'अन्धं' 'चकार' कृतवानित्यर्थः। 'तस्मै' एव मन्धीभूताय पितुरभिशापेन, 'अची' अक्षिणी, 'नासत्यौ' अश्विनौ देवौ, 'विचक्षे' विगतदर्शनाय 'आधत्तम्'। 'दस्रौ' दर्शनीयौ अश्विनौ। 'भिषजौ' देवभिषजौ। भयसादयितारौ, 'अनर्वन्' चक्षुः

* "शतं मेषान् वृक्ये वचद् दान मृज्राश्वं तं पिताऽन्धं चकार। तस्या अची नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन्॥"—इति ऋ० सं० १, ८, ११, १।

अधनम् अनाश्रित मन्यत्र क्वचित्, स्वप्रधान मित्यर्थः ॥ एव मत्र मेषसम्बन्धाद्, व्याख्याने च तथार्थतोपपत्तिदर्शनात् "वृद्धवाशिनी वृक्युच्यते"—इत्युपपद्यते ॥

"जोषः(१९)"—इति *, अनवगतम्। "अविज्ञातनामधेयम्"—इत्यभिधेयवचनम्। "जोषयितव्यं भवति"—इति शब्दसमाधिः। जोषयितव्यं विज्ञापयितव्यं परस्मै तद्भवत्यस्यहृत्वात् ॥ ३ (२२)॥

य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा। जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन ॥ य इन्द्राग्नी सुतेषु वां सोमेषु स्तौति तस्याग्नीथोऽथ योऽयं जोषवाकं वदति विजज्ञपः प्राजितहोषिणौ न देवौ तस्याग्नीथः क्लृप्तिः क्लृप्ततेर्यज्ञो वा अन्नं वा†। महीव क्लृप्तिः शरणा त इन्द्र। सुमहत्त इन्द्र शरण मन्तरिक्षे‡ क्लृप्तिरिवेतीय मपीतरा क्लृप्तिरेतस्मादेव स्तुच मप्युपमार्थे वा। क्लृप्तिवासाः पिनाकहस्तोऽवततधन्वेत्यपि निगमो भवति§। श्वघ्नी कितवो भवति स्वं हन्ति स्वं पुनराश्रित॥ भवति। कृतं न श्वघ्नो वि चिनोति देवने कृत मिव श्वघ्नी

---

* १भा० ४२० पृ० १८ पं० "जोषवाकम्"—इति।

† "यज्ञो वान्नं वा" ङ, च। इतौ तु "यज्ञोऽन्नं वा"—इत्येव।

‡ "मन्तरिक्षं" क, ख, ग।

§ "क्लृप्तिं वसान ओ चर पिनाकं बिभ्रदा गहीत्यपि निगमो भवति"—इति ङ-च-पुस्तकयोः; परं क्लृप्तिविरुद्धः।

॥ "पुनराश्रृतं" क, ख, ग। "पुनरास्तं" ङ।

विचिनोति देवने कितवः किं तवास्तीति शब्दानुकृतिः कृतवान्वाशीर्नामकः* सम मिति परिग्रहार्थीयं सर्वनामानुदात्तम् ॥ ४ (२२) ॥

"य इन्द्राग्नी सुतेषु वां०——०भसथश्च न" †। भरद्वाजस्येय मार्षम्। बृहती। हे 'इन्द्राग्नी!' 'यः' यजमानः 'सुतेषु' अभिषुतेषु सोमेषु 'वां' युवां 'स्तवत्' "स्तौति" 'तेषु' कर्मसु 'ऋतावृधा' सत्यवर्द्धयितारौ, यज्ञवर्द्धयितारौ वा। "तस्य" युवाम् "अश्रीथः" स युवयोः बह्वमत इत्यभिप्रायः। "अथ" पुनः "योऽयम्" "जोषवाकम्" अविज्ञातं किमपि उपांशु "वदति" "विजञ्जपः" केवल मुदकतीरेऽवस्थितोऽन्यत्र वा जपनशील एव; न कर्मकारीत्यभिप्रायः। तस्य 'जोषवाकं वदतः'। 'पञ्चहोषिणा' हे "प्रार्जितहोषिणौ!" प्रभूतत्यागौ! "यदिन्द्रश्च अग्निश्च भूयिष्ठभाजौ देवतानां तस्माद् ब्राह्मणश्च राजा च भूयिष्ठभाजौ मनुष्याणा मिति ह विज्ञायते"। 'देवा' हे "देवौ!" 'न भसथश्चन' न कदाचिदपि तस्य हवींषि भक्षयथः; तेन युवयोर्नासौ बह्वमत इत्यभिप्रायः। अत्र "जोषवाकं वदतः", "न भसथः"—इत्येतद् दृष्ट्वा यः सुतेषु सोमेषु स्तौति, तस्य न भसथ इत्येतदध्याहृतं भाष्यकारेण॥ एव मत्र विजञ्जपस्य भक्षयितव्याभावाज्जपस्य चोपांशुस्वाभाव्यात् "जोषवाक"-शब्दोऽविज्ञातनामधेय मित्युपपद्यते॥

---

* "कितवान्वाशीर्नामकः"—इत्येव मेव पाठः सर्वत्र ङ-पुस्तकातिरिक्तेषु; ङौ तु ङ-पुस्तकानुसारत एव।

† ऋ० सं० ४, ८, २५, ४।

"क्षत्तिः(१७)"—इति *, अनवगतम्, अनेकार्थञ्च। "क्षत्ततेः"—इति धातुनिर्देशः। "यशोऽन्नं वा"—इत्यर्थवचनम्। कर्त्तन मिति न्याय्यम्; यशो हि द्विषतां मर्म्माणि क्षत्तति, अन्न मप्यसम्यगुपयुक्त मायुरेव क्षत्तति। "त मु॑ त्वा नू॒न०——०नो॑ अश्नवन्" †। नृमेधसः प्रियमेधसस्येय मार्षम्। सतोबृहती। ऐन्द्री। चतुर्विंशादिषु साचिके-ष्वहःसु माध्यन्दिने ब्राह्मणाच्छंसिनः शस्त्रे स्तोचियानुरूपवर्गे विनि-युक्ता। 'तम् उ त्वा' हे 'असुर' प्रज्ञावन्! 'प्रचेतसं' विदुषां प्रज्ञानं 'राधः' धनं स्व मिव पित्र्यं 'भागम्' उत्पन्नप्रणयत्वाद् 'ईमहे' तत्रोदेहि स्थिरशरीराणां नदेतदस्तु नः। किञ्च; 'महीव क्षत्तिः' महदिव यशः, महद् वा अन्नम् 'शरणा' शरणम्, गृहम्। 'ते' तव हे 'इन्द्र!' यद् "अन्तरिक्षलोके", तदहं 'प्राश्नवम्'। किञ्च; 'ते' तव 'सुम्ना' सुम्नानि बलसम्बन्धानि सुखानि, लङ्लोग्यानीत्यर्थः। यद्वा; सुम्नानि, सुखसाधनानि; अप्सुरःप्रभृतीनि प्राश्नुया महम्। तदहं सोमं सुन्वानः तस्याभिषवकर्मणो माहाभाग्येन, येन त्वत्सायुज्य मश्नुयाम्, देहपातोत्तरकाल मिह चामुत्र चैतत् नः फलदय मस्तु त्वत्त इत्यभिप्रायः। यशो हि विस्तीर्णं भवति, तेन हि गृहस्योपमान मुपपद्यते। यदनुपविष्टानाम् असनापिपासे न स्तः, तदहं तव गृहम् प्राश्नुया मित्येव मन्नेनाप्युपपद्यते॥

"इयम् अपि इतरा क्षत्तिः एतस्मादेव"। सूचमयी कन्येति या

---

* १भा० ४११ पृ० १पं०।

† "त मु॑ त्वा नू॒न मसुर॒ प्रचे॑तसं॒ राधो॑ भाग मि॑वेमहे। म॒हीव॒ क्षत्तिः॑ शर॒णा त॑ इन्द्र प्र॒ते सु॒म्ना नो॑ अश्नवन्॥"—इति ऋ० सं० १, १, १२, १।

प्रसिद्धा, साप्येतस्मादेव कृन्तते:; सा हि वस्त्रावयवैः सूचैर्ग्रथिता* भवति। "उपमार्थे वा" चर्मापि कृत्तिरित्युच्यते। तयेतरा सूचमयी उपमीयते, विकर्त्तनसामान्यात्। कृत्ति रिव कृत्तिः कन्था। "कृत्ति-वासाः पिनाकहस्तोऽवततधन्वा"—इति। व्याख्यातोऽयं मष्टमेऽध्याये† निगमः‡॥

"श्वघ्नी(६८)"—इति§, अनवगतम्। "कितवो भवति"—इत्यभि-धेयनचनम्। "स्वं हन्ति"—इति शब्दव्युत्पत्तिः। स्वहा इति न्याय्यम्। विग्रहप्रसक्त मुच्यते;—"स्वं पुनराश्रितं भवति"; तद्धि स्वामिन माभिमुख्येन श्रितं भवति स्वत्वेन। "कृतं न श्वघ्नी वि चिनोति०——०नूतनः"॥। कृष्णस्याङ्गिरसस्येयं मार्षम्। ऐन्द्री। जगती। तार्त्तीयसवनिकेषु उक्थपर्यायेषु ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता। यथाच कृतादीनां दायानां मध्ये कितवः 'कृतं विचिनोति', 'देवने' आस्तारे; अपि नामाच कृतं यस्मात् ततो जयेय मह मित्येवम्। 'मघवा' इन्द्रः 'संवर्गम्' उदकसंवर्जयितारम्, अन्तरिक्षे, बह्वनां मेघानां मध्ये, विचिनोति,—कतमस्येषां मेघाना मुदकदाने समर्थः? इति, तं विज्ञाय यदजहत्। 'सूर्यम्' सुष्ठु ईरयितार मपाम्। 'न' 'तत्', 'ते'

---

* 'कृत्तैर्ग्रथिता"—रोष्ट्र-सम्पादितवृत्तिपुस्तकपाठः।

† यास्कीयषष्ठतौये इतियावत्। १भा० २५९ पृ० ८पं०—२५८ पृ० २पं० द्रष्टव्ये।

‡ ङ-च-पुस्तकयोर्नैष निगमो दृश्यते; तच्च लय मस्ति,—"कृत्तिं वसान (य० वा० सं० १९, ५१)"—इत्यादि।

§ १भा० ४२१ पृ० ७पं०।

॥ "कृतं न श्वघ्नी वि चिनोति देवने सवर्गं यन्मघवा सूर्यं जयत्। न तद्रेभो अनु वीर्यं शकन्न पुराणो मघवन्नोत नूतनः॥"—इति ऋ० सं० ७, ८, १४, ५।

तव 'अन्यः' कश्चिद् 'अनुवीर्यं शकत्' । तद् वीरकर्म तावकम्, अन्यः कश्चिदनुकर्तुं मशक्तः । 'न' अपि 'पुराणः', 'न उत' नापि 'नूतनः' नव इत्यर्थः । न पूर्वे चक्रुः, नापरे करिष्यन्तीत्यभिप्रायः । कृतसम्बन्धाद् देवनसम्बन्धाच्च "श्वघ्नी = कितवः"—इत्युपपद्यते ॥

अस्य मन्त्रस्य पूर्वोऽर्द्धर्चैः परोक्षकृतः, स एव विपरिणमयितव्यः; अत्र चोक्तः समाधिः ॥

निगमप्रसक्त मुच्यते;—"कितवः"—इत्यस्य शब्दस्य "किं तवास्तीति" एषा "शब्दानुकृतिः"; स हि नित्यकाल मेव दिदेविषुः प्रतिदेविद्भिः, कितवैः पृच्छते,—किं तवास्तीति, तस्माच्छब्दानुकरणात्कितव एवासौ बभूव । अथवा "कृतवान्" अयं यथा स्यादित्येव मसौ आशास्ते सुहृद्भिरन्यैः कितवैः; स हि तस्मादेव माशासनात् "आशीः"-निमित्त-"नामकः" कितव एवासौ बभूव ॥

"समम्(६९)"—इति *, एतत् "परिग्रहार्थोयं सर्वनाम" । तत् पुनरेतद् "अनुदात्तम्"; "त्वत्समसिमेत्यनुदात्तानि"—इति ह्युक्तम् † । विप्रतिपन्नस्वरत्वादत्र भाष्यकारेण स्वरोऽवधृतः, पक्षेण चाप्यनेकार्थतायस्य भवतीत्येतत् प्रदर्शितं भाष्यकारेण ॥ ४ (२२) ॥

**मा नः समस्य दूढ्यः १ परिद्वेषसो अंहतिः । ऊर्म्मिर्न नाव मा वधीत् ॥ मा नः सर्वस्य दुर्धियः पापधियः सर्वतो द्वेषसो अंहतिरूर्म्मिरिव नाव मावधीदूर्म्मिरू-**

---

* १भा० ४२१प्र० ११पं० "समस्य"—इति।

† फि० सू० ४पा० ९।

44435

र्णोतेर्नौः प्रणोत्तव्या भवति नमतेर्वा तत्कथ मनुदात्त-प्रकृति नाम स्याद् द्रष्टव्यं तु भवति। उतो समस्मिन्नाशिशीहि नो वसो इति सप्तम्यां शिशीतिर्दानकर्मा। उरुष्या णो* अघायतः समस्मादिति पञ्चम्या मुरुष्यतिरकर्मकः†। अथापि ‡ प्रथमाबहुवचनं। नभन्ता मन्यके समे॥ ५(२३)॥

"मा नः§ समस्य०——०मा वधीत्"। विरूप आङ्गिरस एता माग्नेये सूक्ते ददर्श। गायत्री। आग्नेयी। दशरात्रस्य हतौयेऽहनि प्रातःसवने आद्ये सूक्ते विनियुक्ता। हे भगवन् अग्ने! युष्मत्प्रसादात् 'मा नः' मास्मान्, 'समस्य' सर्वस्यैव, 'दूढ्यः' दुर्धियः पापधियः, 'परिद्वेषसः' सर्वतो द्वेष्टुः, स्वभूतः, 'अंहतिः' वध इत्यर्थः। 'ऊर्मिर्न' ऊर्मिरिव, यथोर्मिर्नाव माभिमुख्येन गत्वा वधयति; मैव मंहतिरस्मान् द्वेष्यप्रहितोऽवधीदिति॥ एव मत्र सर्वस्मादेव द्वेष्टुर्वधानभीष्टत्वात् "समस्य"—इत्येतत् सर्वनामेत्युपपद्यते॥

"ऊर्मिः, उर्णोतेः" आच्छादनार्थस्य; सा ह्याच्छादयति तीर मुदकमध्ये वा यदन्यद् भवति। "नौः प्रणोत्तव्या भवति" पारगमनाय; "नमतेर्वा" स्यात्; सा हि प्रह्वीभूतेव भवति, पारगमनाय॥

---

* "०कुर्मोरुष्यार्णो" ङ।
† "मुरुष्यतो रक्षाकर्मा" ङ, च।
‡ "रक्षाकर्माथापि" ङ।
§ ऋ० ६० १, ५, २५, ४।

आह; यदेतत् सम मिति शब्दरूपम् "अनुदात्तप्रकृति" अनुदात्तस्वभावम्,"तत् कथं नाम स्यात् ?"अनुदात्तप्रकृतयो हि निपाताः, उदात्तप्रकृतीनि नामानि भवन्तीति। उच्यते;-"द्रष्टव्यं तु" एतद्, यस्मादनुदात्तप्रकृतित्वेऽपि सति, तस्मान्नामैवैत् "भवति" ॥

आह; क्व पुनरस्य व्ययो दृष्टः? इति, उच्यते;—"उतो समस्मिन्ना शिंशीहि नो वसो—इति सप्तम्याम्" व्ययो दृष्टः। "विद्मा सखित्व मुत०—०गोमति"*। सौभरेरार्षम्। सतोबृहती। ऐन्द्री। आख्याने विनियुक्ता। 'विद्म' विजानीमो वयं 'सखित्वं' सखिभावम्। 'उत' अपि च। हे 'पूर्' वज्रिन्! इन्द्र! 'भोज्यं' भोग्यम् अंशोपजीव्यत्वं मिच्छाणाम्, यतो वयं 'आ ईमहे' आभिमुख्येन स्थित्वा याचामहे,— 'ते' तव यानि धनानि। किञ्च; 'उतो' अपि च 'समस्मिन्' सर्वस्मिन् 'शिंशीहि नः' देहि अस्माकं हे 'वसो' वसुमन्! इन्द्र!। क्व पुनराशिंशीहि नः? इति,—'वाजे' अन्ने इत्यर्थः। हे 'सुशिप्र' हे सुनस!, अथवा हे सुहनो! 'गोमति' गोभिस्तद्वति अन्ने, अस्मान् प्रतिष्ठापयेत्यर्थः॥ एव मत्र समस्मिन्निति सप्तम्यां व्ययो दृष्टः॥

"उरुष्याणो अघायतः समस्मात्—इति पञ्चम्याम्" व्ययो दृष्टः। "स नो बोधि०—०समस्मात्"†। अत्रबन्धोरार्षम्। आग्नेयी।

---

* "विद्मा सखित्व मुत पूर्भोज्य१ मा ते ना वज्रिन्नीमहे। उतो समस्मिन्ना शिंशीहि ते वसो वाजे सुशिप्र गोमति॥"—इति ऋ० सं० १, २, १, २।

† "तं त्वा०—०सखिभ्यः। स ना बोधि श्रुधी हवं मरुष्याणोऽघायतः समस्मात्॥"—इति य० वा० सं० २, २१।

द्विपदा। अग्न्युपस्थाने विनियुक्ता। यः त्वमेवम्प्रभावः, यथा-प्रभावं त्वां वयं मवोचाम। 'सः' त्वं हे भगवन्नग्ने! 'बोधि' बुध्यस्व 'नः' अस्माक मभिप्रायम्। 'शृधी' शृणु च 'हवम्' आह्वान मिदम्। आहूतश्च 'उरुष्याणः' उपगम्यास्मान्, 'अघायतः' पाप मिच्छतः 'समस्मात्' सर्वस्मात् पाहि। एव मत्र समस्मादिति पञ्चम्यां व्ययो दृष्टः॥

तस्मात् व्ययदर्शनाद्दृष्टानुविधिश्छन्दसि भवतीति कृत्वाऽनुदात्त-प्रकृतित्वेपि सति नामैतङ्भवतीत्युपपद्यते * ॥ ५ (२३)॥

हविषा जारो अपां पिपर्त्ति पपुरिर्नरा। पिता कुटस्य चर्षणिः॥ हविषापां जरयिता पिपर्त्ति पपुरिरिति पृणातिनिगमौ वा प्रीणातिनिगमौ वा पिता कृतस्य कर्मणश्चायितादित्यः शम्ब इति वज्रनाम शमयतेर्वा शातयतेर्वा। उग्रो यः शम्बः पुरुहूत तेनेत्यपि निगमो भवति। केपयः कपूया भवन्ति कपूय मिति पुनाति कर्म्म कुत्सितं दुष्पूयं भवति॥ ६ (२४)† ॥

"कुटस्य(७०)", "चर्षणिः(७१)"—इति ‡, एते अनवगते। "कृतस्य", "चायिता"—इत्येतौ शब्दसमाधी। एक एव निगमः।—"हविषा जारो०—०चर्षणिः"—इति §। प्रस्कण्वस्यार्षम्। आश्विनौ। प्रात-

* अथापीत्यादि मूल मव्याख्यात मेव स्थितम।

† एतदन्त एव चतुर्थः पादः केषुचिद् रोथसदृशपुस्तकेषु (रोथ०मु० २१०४०)।

‡ १भा० ४२१४० १८ पं०।

§ ऋ० सं० १, ३, २२, ४।

रनुवाकाश्विनयोः शस्यते। हे 'नरा' नरौ! अश्विनौ! युवाम्। एषः "आदित्यः", 'पिता' पाता, कृत्स्नस्य जगतः। 'कुटस्य' "कृतस्य कर्मणः" सार्वभौमस्य साध्वसाधुनः। 'चर्षणिः' "चायिता" द्रष्टा, बुद्ध्यधिदेवताभावेनावस्थितः सर्वभूतानाम्। 'अपां जारः' अपां सर्वभूतान्तर्गतानां प्राणभावेनावस्थितो* जरयिता, शोषयिता। 'पपुरिः' च पूरयिता च। प्राप्ते काले 'हविषा' उदकेन 'पिपर्त्ति' पूरयति वा प्रीणयति वा। यौ युवा मेवङ्गुणयुक्तेनादित्येन पूर्येथे, प्रीणेथे वा, तौ युवा मिमां नामास्माक माशिषं समर्द्धयत मित्येव माशीर्योज्या॥ एव मत्र "कुटस्य-चर्षणिः"—इत्येते कृतस्य चायिते-त्येव मुपपद्येते॥ नरावत्र द्यावापृथिव्यावभिप्रेते†, तयोश्चोदकेना-दित्यः पूरयिता। तस्मादादित्यविषयचिता चर्षणिशब्दस्य; तस्य च बुद्ध्यधिदेवताभावेन कृतस्य कर्मणो द्रष्टृत्व मुपपद्यते॥ 'पिपर्त्ति'-'पपुरिः'—इत्येव मेतौ निगमस्थौ शब्दौ "पृणात्यर्थो वा प्रीणय-त्यर्थो वा"॥

"शम्बः(७२)"—इति‡, अनवगतम्। "वज्रनाम"—इत्यभिधेय-वचनम्। "शमयिता वा शातयिता वा"—इति शब्दसमाधौ। "आराच्छत्रु०—०वाजरत्नाम्"§। कृष्णस्याङ्गिरसस्यार्षम्। त्रिष्टुप्।

---

* "उद्यन्न खलु वा आदित्यः सर्वाणि भूतानि प्रणयति, तस्मादेनं प्राण इत्याच-क्षते।"—इति ऐ० ब्रा० ५, ५, ६।

† "तत्रावश्विनौ द्यावापृथिव्यावित्येके"—इति प० दै० का० ६, १, १।

‡ १भा० ४२२ पृ० २पं०।

§ आराच्छत्रु मप बाधस दूर मुग्रो यः शम्बः पुरुहूत तेन। अस्मे धेहि यवमद् गोमदिन्द्र कृधी धियं जरित्रे वाजरत्नाम्॥"—इति ऋ० सं० ७, ८, २६, १।

माध्यन्दिने सवने स्तोमातिशंसने ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता। हे 'पुरुहूत' बहुभिराहूत! 'यः' एषः, 'आरात्' समीपे अस्माकं वर्त्तते शत्रुः, तं दूरम् 'अपबाधस्व' नाशयस्वेत्यर्थः। आराच्छब्दोऽत्र समीपार्थवाची। अन्यत्रापि चोक्तम्,—"आरात् प्राग्वंशादुदयास्तमयौ"—इति। किं पुनरपबाधस्व? 'उग्रो यः शम्बः' उद्भूर्णो यो वज्रः, तेन अपबाधस्व। किञ्च; तं दूर मपबाध्य 'अस्मे' अस्मभ्यं 'धेहि' देहि 'यवमत्' यवैस्तदत्—व्रीहिगोधूमाद्यन्नम्। अपि च 'गोमत्' गोभिस्तदत्—पश्वादिभिः। किञ्च; स त्वं नेतदेवङ्गुणक मस्मभ्य मन्नं ददन् 'क्षधि' कुरुष्व इमां 'धियम्' एतत् कर्म, 'वाजरत्नां' वाजरमणीयां, प्रचुरेणान्नेन यथैतस्मिन् कर्मणि वर्त्तमाना रमेमहि, तथा कुरुष्वेत्यभिप्रायः। धीरिति कर्मनामसु पठितम्,—'धीः, शची"—इति *। एव मत्रापबाधनसम्बन्धात् "शम्बः"—इत्येतद् वज्रनामेत्युपपद्यते। अपठित मेतद्वज्रनामसु †,—इत्यतोऽप्रसिद्धार्थम्; तल्लैवम्प्रकरणादर्थसिद्धिर्भवति॥

"केपयः(७३)"—इति ‡, अनवगतम्। "कपूयाः" ह्येते सन्तः केपय इत्युच्यन्ते। आह;—"कपूयम्"—"इति" किं मुक्तं भवति? उच्यते;—यदेतत् पापकारी प्रायश्चित्तेन "पुनाति कर्म कुत्सितम्", यच्च तद् "दुष्पूयं" दुष्पावं "भवति" पूयमान मपि, एतत् कपूय मित्युच्यते॥ ६(२४)॥

---

* १भा० २ख० २ख० (२१), (२२)।
† १भा० २८९ पृ० २ख० २० ख० (१)—(१८)।
‡ १भा० ४२२ पृ० ४पं०।

पृथक् प्रायन् प्रथमा देवहूतयोऽक्रंखत श्रवस्यानि दंष्टरा। न ये शेकुर्यज्ञियां नावं मारुहं मीमैंव ते न्यविशन्त केपयः॥ पृथक् प्रायन् पृथक् प्रथतेः* प्रथमा देवहूतयो ये देवानाह्वयन्ताकुर्वत श्रवणीयानि† यशांसि दुरनुकरांण्यन्यैर्यैऽशक्नुवन् यज्ञियां नाव मारोल्हु‡ मथ ये नाशक्नुवन् यज्ञियां नाव मारोल्हु§ मीमैंव ते न्यविशन्तेहैव ते न्यविशन्त क्षणे हैव॥ ते न्यविशन्तास्मिन्नेव लोक इति वेर्म इति बाहुनाम समोरितंतरो॥ भवति। एता विश्वा सवना तूतु मा क्षषे स्वयं सूनो सहसो यानि दधिषे। एतानि सर्वाणि स्थानानि तूर्ण मुपाकुरुषे स्वयं बलस्य पुच यानि धत्त्वांसच मंहसस्त्राणं** धनुर्वा कवचं वा कवचं कु अञ्चितं भवति काञ्चितं भवति कायेऽञ्चितं भवतीति वा॥ ७ (२५)॥

"पृथक् प्रायन्०—०केपयः"††। पूर्वयैव समानार्षविनियोगा; इयन्तु जगती। 'पृथक् प्रायन्' 'पृथग्' भूता एव विद्या-

---

* "पृथतेः" क। "(पृथक् प्रथतेः)" च।
† "०क्रयन्ताकुर्वतः श्रवणीयानि" क, ख, ग।
‡,§ 'मारोढ" च।
॥ "क्षणेनैव" क, ख, ग।
¶ "समीरितंतमो" ङ।
** "मंहसचाणं" क, ख, ग।
†† ऋ० सं० ७, ८, २७, १।

कर्मानुरूपेण; देवयानेन पथा, पितृयानेन वा 'प्रापन्'। हे इन्द्र! त्वत्प्रसादाद् देवलोकं गन्धर्वलोकं पुनः स्व उच्यते। 'प्रथमाः देवहूतयः' ये मुख्या देवाना माह्वातारो यत् कर्मसु। किञ्च; 'दुष्टरा' "अन्यैः" असद्भिर्दुस्तराणि। 'अवस्यानि' "अवणीयानि यज्ञांसि" 'अक्रुण्वत' अकुर्वत। किञ्च; 'ये' त्वत्प्रसादरहिताः जनाः, 'यज्ञियां नावम्*', 'आरुहम्' "आरोढुम्", 'न शेकुः' नाशक्नुवन्। अथ पुनर्ये नाशक्नुवन् यज्ञियां नाव मारोढुं किन्तर्हि? विषयप्रधानाः, कपूय मेव दुष्पूय मेव कर्म चक्रिरे; तेनैव कपूयेन कर्मणा प्रेर्यमाणाः 'ते', 'इमैव' 'इहैव" लोके यथा कर्मानुरूपायां योनौ 'न्यविशन्त'। तदुक्तम्;—"अथ य इह कपूयचरणा अभ्याशो-हयत्†, ते कपूयां योनि मापद्येरन्;—श्वयोनिं वा, शूकरयोनिं वा, चण्डालयोनिं वा"—इत्येवमादि‡॥ एव मत्र न ये शेकुः यज्ञियां नाव मारोढु मित्येतेन सम्बन्धात् "केपयः = कपूयाः"—इत्युपपद्यते॥

---

* "यज्ञो वै सुतमा नौः, छन्दाजिनं वै सुतमा नौ र्वाग्वै सुतमा नौ र्वाच मेव तदारुह्य तया स्वर्गं लोक मभिसन्तरन्ति।"—इति ऐ० ब्रा० १, २, २। किञ्च; "तद्यथा समुद्रं प्लवेरन्नेवं वै ते प्लवते ये संवत्सरं द्वादशाहं वासते। तद्यथा सैरावती नावं पारकामाः समारोहेयुरेव मेवैताभिर्दुभः समारोहन्ति।"—इति ऐ० ब्रा० ५, ४, ५।

† "अभ्यास मनुभूय"—इत्येव मेव वृत्तिपुस्तकपाठः परं मूलविरुद्धः।

‡ "य इह रमणीयचरणा अभ्याशोहयत्, ते रमणीयां योनि मापद्येरन्; ब्राह्मणयोनिं वा, क्षत्रियोनिं वा, वैश्ययोनिं वाऽथ य इह कपूयचरणा०——० चण्डालयोनिं वाथैतयोः पथोर्न कतरेणचन, तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति; जायस्व-म्रियस्वेत्येतत्तृतीयं स्थानम्।"—इति कौ० ब्रा० ७, १०।

शब्दसारूप्यप्रसङ्गादुच्यते ;—"ईर्म इति बाङ्गनाम"—इति, स हि "समीरिततरो भवति" एतेभ्योऽङ्गेभ्यः॥

"तूतुम्-आक्रुषे(७४)"—इति*, एते अनवगते। "तूतुम्"—इत्यस्य "तूर्णम्"—इति शब्दसमाधिः। "आक्रुषे"—इत्यस्य "उपाकुरुषे"—इति शब्दसमाधिः। "एता विश्वा०—०वचः" †। इन्द्रस्य वैकुण्ठस्येय मार्षम्। ऐन्द्रे सूक्ते निविद्धानीये महाव्रते महदुक्थे शस्यते। 'एता' एतानि, 'विश्वा' विश्वानि, सर्वाणि स्थानानि। त्व मुपागम्य तेनतेन देवतात्मना कुरुष्व निवर्त्तयेत्यर्थः। आह ; कतमानि पुनः स्थानानि? उच्यते ;—"स्वयं सूनो सहसो यानि दधिषे"। हे 'सूनो सहसः' बलस्य पुत्र! 'यानि' एतानि 'स्वयम्' एव 'दधिषे' धारयसि, तानि त्व मेव कुरुषे। यत एवं कुरुषे, अत एव त्व मेव धारयिता स्रष्टा चास्य जगतः। अत एतस्मात् कारणात् 'वराय' वरयितव्याय, 'ते' तव, 'पात्रम्' एतत् सोमपूर्णं प्रदिशामः। 'धर्मणे' धारयित्रे। 'तना' च धनं च, सर्वं तवैव। 'यज्ञः' च क्रतुः, तवैव। 'मन्त्रः' च कर्मकरणः, तवैव। 'ब्रह्म' चान्नं‡, तवैव। 'उद्यतं' चैतदनेकप्रकार मपि स्तुतिलक्षणं 'वचः' तवैव। एव मत्र शब्दसारूप्यात् "तूतुम्"—इत्येष शब्दः तूर्ण मित्येव मुपपद्यते। करणसम्बन्धाच्च ; यद्धि कर्म, तूर्ण मेव करण मिष्यते कर्तृभिः तस्मादुपपद्यते। "आक्रुषे"—इत्यत्रापि यद्धि क्रियते, तदुपग-

---

* १भा० ४१२ पृ० ९पं०।

† "एता विश्वा०—०दधिषे। वराय ते पात्रं धर्मणे तना यज्ञो मन्त्रो ब्रह्मोद्यतं वचः॥"—इति ऋ० सं० ८, १, ९, ९।

‡ "स योऽन्नं ब्रह्मेत्युपास्ते"—इति छा० ब्रा० ९, ९।

म्याभिमुख्येनैव स्थित्वा क्रियत इति 'उप'-शब्दोऽत्र भाष्यकारेणाध्याहृतः॥

अत्र "सूनो! सहसः"—इत्येतस्मादिशेषलिङ्गादाग्नेयी मेता मृचं कृत्वा केचिद् व्याचक्ष्यते; अग्निर्हि बलेन मथ्यमानो जायत इति। तथा हि प्रकरणविरोधो भवति। सूक्तं ह्येतदैन्द्रम्। ऐन्द्रत्वे त्वस्य "सूनो!"-"सहसः"—इत्यनयोः पदयोरर्थयोजना, अधिदेवताभावेन; प्राण इन्द्रो व्यवस्थितः, तस्येतरो यः प्रजासु व्यादिष्टः, प्राणस्तु पुत्रः;—इत्येव मुपपद्यते पितृ-पुत्रभावः। तदुक्तम्;—"प्राणो वा अहं मस्मि, प्राणस्त्वं, प्राणः सर्वाणि भूतानि"—इति*॥

"अंसत्रम्(७५)"—इति†, अनवगतम्। विकल्पतश्चानेकार्थम्। "अंहसः त्राणम्"—इत्यर्थप्रतीतिः। "धनुर्वा कवचं वा"—इत्यभिधेयवचनम्; ताभ्यां हि पुरुषाः साङ्ग्रामिकाः, अंहसस्त्रायन्ते। आख्यानप्रसक्त मुच्यते;—"कवचं, कु-अञ्चितं भवति" कुटिल मञ्चितम्; स हि तस्य स्वभावः। अथ वा "काञ्चितम्" कुटिलीकृतं "भवति"। अथ वा "कायेऽञ्चितम्" तद्गतं "भवति"॥७(२५)॥

प्रीणीताश्वान् हितं जयाथ स्वस्तिवाहं रथ मित् कृणुध्वम्। द्रोणाहाव मवत मग्रमेचक्र मंसत्रकोशं सिञ्चता नृपाणम्॥ प्रीणीताश्वान्त्सुहितं‡ जयथ जयनं

---

* "प्राणो वा०——०प्राणो ह्येवैतानि सर्वाणि भवति"—इति ऋ० ब्रा० ९,९।
† १भा० ४२१ पृ० १४ पं०।
‡ "प्रीणीताश्वान्सुहितं" क, ङ।

वो हित मस्तु स्वस्तिवाहनं रथं कुरुध्वं द्रोणाहावं द्रोणं द्रुममयं भवत्याहाव आह्वानादावह आवहनादवतोऽवातितो महान् भवत्यश्मचक्र मशनचक्र मसनचक्र मिति वांसचकोश मंसचाणि वः* कोशस्थानीयानि सन्तु कोशः कुष्णातेर्विकुषितो भवत्यय मपीतरः कोश एतस्मादेव सञ्चय आचितमाचो महान् भवति सिञ्चत नृपाणं नरपाणं कूपकर्मणा सङ्ग्राम मुपमिमीते काकुदं तास्वित्याचक्षते जिह्वा कोकुवा सास्मिन् धीयते जिह्वा कोकुवा कोकूयमाना वर्णान्नुदतीति† वा कोकूयतेर्वा (स्याच्छब्दकर्मणो ‡) जिह्वा जोहुवा तालु तरते स्तीर्णतम मङ्गं लततेर्वा स्याद् (लम्बकर्म्मणो §) विपरीताद् यथा तलं लुतेत्यविपर्ययः॥ ८ (२६)॥

"प्रीणीताश्वान्०—०नृपाणम्" ॥। बुधस्य सोमपुत्रस्येय मार्षम्। वैश्वदेवे सूक्ते। 'प्रीणीत' प्रीणयत यवसेादकादिना। एतान् 'अश्वान्' उपस्थितोऽयं सङ्ग्राम इत्यभिप्रायः। प्रीणयित्वैतानश्वानेभिरश्वैरुपजातवीर्यैः 'हितं' "सुहितं" 'जयाथ' "जयथ", "जयनं वो हित

---

* "मंसचाणि व" क ख, ग। "मंसचणि वः" च।
† "एनान्नुदतीति" क, ख, ग।
‡ नैतद् दृश्यते क-ख-ग-पुस्तकेषु।
§ नैतद् दृश्यते ङ-च-पुस्तकयोः।
॥ ऋ० सं० ८, ५, १९, १।

मस्तु" अहितोऽपि जयः कश्चिद् भवत्येव,— यत्र सुहृद्भ्रातृपुत्रादयो हन्यन्ते। 'स्वस्तिवाहम्' अभिपूजितवाहं 'रथं' 'कृणुध्वम्' "कुरुध्वम्"; हे देवाः! एव मेतां सङ्ग्रामिकी मितिकर्त्तव्यतां कृत्वा 'द्रोणं' "द्रुममयम्" एतम् "आहावम्" आह्वानीयं रथं कृत्वा; 'अवतम्' एतं सङ्ग्रामरूपम्। 'अश्मचक्रम्' "अश्मनचक्रं" व्यापनचक्रं; व्यापयन्ति हि तत्र क्षिप्तानि चक्राणि शत्रूणाम्। अथ वा "असनचक्रम्" अस्यन्ते हि तत्र चक्राणि। 'अंसत्रकोशम्' "अंसत्राणि" धनूंषि, कवचानि वा "कोशस्थानीयानि" तत्र "सन्तु"। तैः 'सिञ्चत' उत्सिञ्चतैनं सङ्ग्रामकूपम्। 'नृपाणं' "नरपाणम्", नरा एव तत्रोदकस्थानीयास्त एवोच्यन्ते। एव मत्र "कूपकर्मणा" अस्मिन्नुत्तरेऽर्द्धर्चे किञ्चित् साधर्म्येण "सङ्ग्राम मुपमिमीते" मन्त्रदृक्॥ एव मत्र सङ्ग्रामोपमासम्बन्धादुत्सेचनसम्बन्धाच्च "अंसत्र"-शब्देन धनुः, कवचं वोच्यत इत्युपपद्यते॥

ततः "आहावः, आह्वानात्"—इत्येतद्यावस्थितस्यैव मन्त्रपदस्य निर्वचनम्। आह्वयतेऽस्मिन्नित्याहावः*। इदं त्वन्यत्,—"आवहः, आवहनात्"—इति अस्यैव विपरिणम्यते। उह्यतेऽस्मिन्नुदक मित्याहवः। "अवतः" कूपः; स हि खन्यमानो "महानवातितः" अवाङ्मुखितो "भवति" गत इत्यर्थः। 'अंसत्रकोशम्'—इति कोश-शब्दो विग्रहप्रसक्तः "कोशः कुष्णातेः"—इति। "विकुषितः" स विविधं कुषितो "भवति" चर्म्मकोशः, मुषिरत्वात्। "अय मपीतरो द्रव्यकोशः",

* "अभ्यर्थो इत्याह्वयते चतुर्होतृषु वक्ष्यमाणस्यदाहावस्य रूपम्।"—इति ऐ० ब्रा० ४, ४, ९।

"एतस्मादेव" कुण्णातेः। "सञ्चयः" सञ्चयकोशः। स हि "आचित-मात्रः" मात्राभिः आचितो "भवति", "महत्त्वात्" ॥

"काकुदम्[७६]"—इति *, अनवगतम्। "तालु-इत्याचक्षते"—इत्यभिधेयवचनम्। "जिह्वा, कोकुवा"—इत्युच्यते; "सा" हि कोकुवाख्या जिह्वा, "अस्मिन्" तालुनि वर्णाभिव्यक्त्यर्थं मुहुर्मुहुः "धीयते", तदेतत् कोकुवाधानं सत् काकुद मित्यभिधीयते। "जिह्वा कोकुवा" कथं स्यात्? इति, उच्यते;—शब्दानुकरणनिमित्तं जिह्वायाः कोकुवात्वम्। "कोकूयमाना" तथाविधं हि सा कुर्वाणा, तालुनि "वर्णान् नुदति"; तस्माद्वा कोकुवां नुदत् काकुदं स्यात्। आह;—जिह्वैव तावत् कस्मात् "जिह्वा"—इत्यभिधीयते? इति, उच्यते;—सा हि "जोहवा" सती जिह्वेत्युच्यते। तया प्राणिनोऽन्न मात्मन्येव जुह्वति; तया आह्वयतीति वा जोहवा। अथ "तालु" कस्मात्? उच्यते;—"तरतेः" धातोः; तद्धि "तीर्णतरम्" इतराङ्गेभ्यो विस्तीर्णत्वेन भवति। "ललतेर्वा स्यात्", "वीपरीतात्" आद्यन्तवैपर्येण,—"यथा तलम्"—इति। समानजातीयशब्दोपप्रदर्शनं दृष्टप्रतीत्यर्थम्। अस्यैव ललतेर्लवनार्थस्य "लता"—इत्येतच्छब्दरूपम् "अविपर्ययः" अविपर्ययेण भवति ॥ ८ (२६)॥

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्यं सुषिरा इव ॥ (सुदेवत्वं कल्याणदानो यस्य तव देव सप्त सिन्धवः प्राणायानुक्षरन्ति

* १भा० ४२२ पृ० १९ पं०।

काकुद् सूर्य सुषिरा मिवेत्यपि निगमो भवति॥*)
(सुदेवस्त्वं कल्याणदेवः कमनीयदेवो वा भवसि वरुण
यस्य ते सप्त सिन्धवः सिन्धुः स्रवणाद् यस्य ते सप्त
स्रोतांसि तानि ते काकुद् मनुक्षरन्ति सूर्मिं† कल्या-
णोर्मि‡ स्रोतः सुषिर मनु यथा§ बीरिटं तैटीकिर-
न्तरिक्ष मेव माह॥ पूर्वं वयते¶ रुत्तर मिरतेर्वयांसी-
रन्त्यस्मिन् भांसि वा** तदेतस्या मृच्युदाहरन्त्यपि††
निगमो भवति‡‡)॥ ९ (२७)§§॥

"सुदेवो असि०—०सुषिरा मिव"॥॥। प्रियमेधस आर्षम्। अनुष्टुप्। हे "वरुण!" "सुदेवः" शोभनस्त्व मसि देवः। 'यस्य'

---

* ङ-च-पुस्तकयोर्नास्त्येषः पाठः।
† "सूर्मिं" ङ।
‡ "कल्याणोर्मिः" ग, ङ।
§ "मनु यस्य" ग।
‖ "मेव माह" ङ।
¶ "पूर्वं वेते" ग, ङ।
** "भान्तीति वा" ग।
†† "मृच्युदाहरन्त्यपि" ग, ङ।
‡‡ क-ख-पुस्तकयोर्नास्त्येषः पाठः।

§§ सुदेवस्त्वं कल्याणदान इत्यारभ्य भवतीत्यन्तपाठो दृश्यावनुभूतोऽपि क-ख-ग-पुस्तकेषु दृष्टत्वादिहोपन्यस्तः। सुदेवस्त्वं कल्याणदेव इत्यारभ्य भवतीत्यन्तपाठस्तु क-ख-पुस्तकयोरदृष्टोऽपि दृश्यावनुभूयते, ङ-च-पुस्तकयोश्च दृश्यत एवेतीहोपन्यस्तः। ग-पुस्तके तु क-ख-पुस्तकाराटहीनो ङ-च-पुस्तकाराटहीनश्चोभावेव पाठौ यथेच्छ स्थितौ, स्व मेव पूर्वापरीभूतौ दृश्येते। तथा च ग-पुस्तकानुसारत एवासौ खण्डोऽत्र मुद्रांते सर्वपाठप्रदर्शनायेति।

॥॥ ऋ० सं० १, ५, ७, १।

'ते' तव, एताः 'सप्त सिन्धवः' अन्तरिक्षनद्यो वा बडबलाक्षेत्येवमाद्याः; "अश्वा नामासि, तितुचा नामासि, अभ्रपत्नी नामासि, मेघपत्नी नामासि, वर्षयन्ती नामासि, पुरस्तादरुन्धा नामासि"—इति सिन्धुनद्य उच्यन्ते सप्तेताः। समुद्रा एव वा सप्तसिन्धुशब्देनोच्येरन्। 'काकुदं' तालु, 'अनुचरन्ति', 'सूर्म्यं सुषिरां' नगरोदकनिःसरणभूमिम् 'इव'; सर्वतः समश्नुवतेत्यभिप्रायः॥ एव मत्र सिन्ध्वनुचरणसम्बन्धात् "काकुदं = तालु"—इत्युपपद्यते। दुर्वचनत्वं सर्वस्य मन्त्रस्य कृत्स्नाध्ययने प्रयोजनम्। अन्यासु हि ऋक्षु या एतस्मिन् प्रकरणेऽधीताः, तासु समाम्नातेभ्यः पदेभ्योऽन्यान्यपि अनवगतसंस्काराण्यनेकार्थानि वा सन्तीत्युपप्रदर्शनार्थं कृत्स्नेय मृगधीता स्यात्*॥

"बीरिटम्(७७)"—इति†, अनवगतम्, पचेण चानेकार्थम्। भीरस्मिन् तन्यत इति भी-तननम्, अन्तरिक्षम्; निरालम्बत्वात् सर्व एव बिभेति। तदेवं भी-तननं सद् बीरिट मित्युच्यते। अथ वा भासेऽत्र नक्षत्रादीनां तन्यन्ते, तदेतद्भास्तननं सद् बीरिट मित्युच्यते। गणाभिधानपक्षेऽपि यथासम्भवं योज्यम्‡॥ ९(२७)॥

प्र वा॑तजे सुप्रया॒ बर्हि॑रेषा॒ मा वि॒श्पती॑व॒ बीरि॑ट इयाते। वि॒शा मक्तो॑रुषसः॒ पूर्व॑ह्णो॒तौ वा॒युः पू॒षा स्व॒स्तये॑ नि॒युत्वा॑न्॥ प्रवा॒त्यते सुप्रायणं॑ बर्हि॒रेषा मेयाते सर्वस्य पातारौ वा पालयितारौ वा वीरिट मन्तरिक्षं

* सिन्धु-सूर्मिशब्द-व्याख्यानेऽन्यथाख्याते एव स्थिते।
† १भा० ४२२ पृ० ६पं० "बीरिटे"—इति।
‡ इहापि मैत्रेण मन्यथाख्यात मेव स्थितम्।

भियो वा भासो वा ततिरपि वोपमार्थे स्यात् सर्वपती इव राजानौ बीरिटे गणे मनुष्याणां रात्या विवासे पूर्वस्या मभिहूतौ वायुश्च नियुत्वान् पूषा च स्वस्त्ययनाय नियुत्वान् नियुतोऽस्यास्वा नियुतो नियमनाद्वा नियोजनाद्वाऽच्छाभेरास्तु मिति शाकपूणिः परीं सी मिति व्याख्यात मेन* मेना मस्या अस्येत्येतेन व्याख्यातं स्तृणिरङ्कुशो भवति सरणादङ्कुशोऽञ्चतेराकुचितो भवतीति वा। नेदीय इत्सृण्यः पक्व मेयादित्यपि निगमो भवत्यन्तिकतम मङ्कुशादायात्पक्व मौषध मागच्छत्वित्यागच्छत्विति† ॥ १० (२८) ॥

॥ इति पञ्चमाध्यायस्य चतुर्थः पादः‡ ॥ ५. ४.

"प्र वावृजे सुप्रया०—०नियुत्वान्" §। वसिष्ठस्यार्षम्। त्रिष्टुप्। 'प्रवावृजे' "प्रवृज्यते" प्रस्तीर्यत इत्यर्थः। 'सुप्रयाः' "सुप्रयाणं" सुप्रगमनं, यत् सुख मभिगच्छन्ति देवताः प्रास्तीर्णे तस्मिन्। "आविश्पतीव बीरिट इयाते"। "आ इयाते" 'विश्पती' "सर्वस्य" जगतः "पातारौ वा पालयितारौ वा" धात्वन्यत्व मर्थैकत्वम्। 'इव' पादपूरणः; एवेत्येतस्यार्थे वा। क्व पुनरवस्थितौ एयाते?

* "व्याख्याताः। एन" च।

† "मौषध मागच्छत्विति" च।

‡ रोथ्सस्सम्पादितपुस्तकेषु बङ्गेषु चतुर्विंशखण्डान्त एव चतुर्थः पादः, इह तु पञ्चमः पादः समाप्तः।

§ ऋ० सं० ५, ४, १, २।

इति, उच्यते;-'बीरिटे' अन्तरिक्षे इत्यर्थः। "अपि वा" अथ मित्र-शब्दः "उपमार्थे" एव "स्यात्"; विश्पतीव; "सर्वपती इव राजानौ बीरिटे गणे" अवस्थितौ। आह;—कस्य पुनः एयाते? कौ वा एयाते? कं वा अर्थं पुरस्कृत्य एयाते? इति, उच्यते;—"एषां" 'विशां' "मनुष्याणां" तासु क्रियासु आक्रयमाणौ 'अक्तोः' "रात्र्याः" अपगमे सति, 'उषसः' च आगमनकाले 'पूर्वेद्युः' "पूर्वस्याम्" एव "अभिद्युः" प्रथमे एवाह्नानकाले। 'वायुः' "च" 'नियुत्वान्', 'पूषा' "च" 'स्वस्तये' "स्वस्त्ययनाय" स्वस्त्ययनार्थम्, एयाते यजमानस्य॥ अन्तरिक्षेणैव हि देवता आगच्छन्तीति "बीरिटम् = अन्तरिक्षम्"—इत्युपपद्यते। यस्मिन्नपि पक्षे, गणे बीरिट-शब्देनोच्यते, तस्मिन्नपि पक्षे, विश्पती राजानौ सर्वदा गणमध्यगतावेव आगच्छत इत्युपपद्यत एव॥

आह;—"नियुत्वान्" कस्मात्? इति, उच्यते,—"नियुतोऽस्याश्वाः"। अथ "नियुतः" कस्मात्? उच्यते,—"नियमनात्"। नीचैर्हि नियम्यन्ते। "नियोजनाद्वा" नियोज्यन्ते हि रथे। "नियुतो वायोः*"—इत्येतस्मात् कारणात् विप्रकृष्टोऽपि नियुत्वच्छब्दो वायु-शब्देनैव संयोजितो भाष्यकारेण; न हि पूष्णो नियुद्भिः सम्बन्धोऽस्ति॥

"अच्छ(७८)"—इति†, एष शब्दो "अभेः" अर्थे भवति। "आनुम्"—"इति" योऽर्थ उक्तः स्यात्, स एवार्थः अच्छेत्यनेनोक्तो भवति, एवं "शाकपूणिः" आचार्यो मन्यते॥

---

* १भा० १५२१० १च० १५ख० (१०)।

† १भा० ४१२१० ११पं०।

"परि[७९]", "इम्[८०]", "सीम्[८१]",—"इति *" एते "व्याख्याताः" षष्ठेऽध्याये निपातोपसर्गप्रकरणे †॥

"एनम्[८२]", "एनाम्[८३]"—इति ‡ पदद्वयम्, "अस्याः-अस्येत्येतेन" पदद्वयेन "व्याख्यातम्" नवमेऽध्याये §। निगमाच्चाच्च मृग्याः॥

"स्तृणिः[८४]"—इति ‖, अनवगतम्। "अङ्कुशो भवति"—इत्यभिधेयवचनम्। "सरणात्"—इति व्युत्पत्तिः। सर इति न्याय्यम्। सरति गच्छत्यसौ हस्तिशिरसि। "अङ्कुशोऽञ्चतेः"—इति पर्यायप्रसक्तम्; अञ्चत्यसौ गच्छति हस्तिशिरसि। "आकुचितो भवतीति वा"। स ह्याभिमुख्येन कुटिलीभूता भवति॥

"युनक्त सीरा वियुगा०——०पक्व मेयात्¶"। बुधस्येय मार्षम्। त्रिष्टुप्। वैश्वदेवी। ऋत्विक्स्तुतिर्वा, अग्नौ मध्यमदान्तयोजने सीरानुमन्त्रणे विनियुक्ता। 'युनक्त' योजयत, देवाः योजयितारः, 'सीरा' सीराणि, 'वि' 'तनुध्वम्' वितनुत च 'युगा' एतानि युगानि, 'कृते' कृष्टे 'इह' अस्मिन् 'योनौ' क्षेत्रे 'बीजं'

---

* १भा० ४२३ पृ० १३पं०।

† "परीति सर्वतोभावम्"—इति (२भा० ४१पृ०) १अ० १पा० ५ख०। "अनर्थकाः क्रमीमिदिति"—इति (२भा० ७३पृ०) १अ० ३पा० ५ख०। "सी मिति परिग्रहार्थीयो वा पदपूरणो वा"—इति (२भा० ६१पृ०) १अ० ३पा० २ख०।

‡ १भा० ४२३पृ० १६पं०।

§ "अस्या इति चास्येति चोदात्तं प्रथमादेशेऽनुदात्त मन्वादेशे"—इति (२भा० ४७५पृ०) ४अ० ४पा० ४ख०।

‖ १भा० ४२४ पृ० ३पं०।

¶ "युनक्त सीरा वियुगा तनुध्वं कृते योनौ वपतेह बीजम्। गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्व मेयात्॥"—इति य० वा० सं० १२, ६८।

'वपत'। तथा 'च' वपत, यथा 'गिरा' वाचा यत् प्रार्थयामः, तत् 'अृष्टिः' क्षिप्र मेव 'असद्' भवेत्; 'सभराः' च अतिफलभारवत्य एताः स्थिरोषधयः 'नः' अस्माकम्। किञ्च; 'नेदीय इत्सृण्यः' "सृणि रङ्कुशो भवति" यावति प्रदेशेऽवस्थित माकृष्टुं शक्नोति, ततोऽपि नेदीयः। अत्र 'पक्वम्' औषधं प्रचुरत्वात् ओषधीनाम्, 'एयात्' आगच्छेदस्मान् प्रति; तथा शीघ्रं वज्र च वपतेत्यर्थः। एव मत्र नेदीय इत्यनेन सम्बन्धात् "सृणिरङ्कुशो भवति"—इत्युपपद्यते। अन्ये तु ब्रुवते। तथा वपत, यथा प्राग् दात्राकर्षणान्मुष्टिः पूर्यतेति दात्र मेवास्मिन्पक्षेऽङ्कुश-शब्देनोच्यते। तदाकृष्टस्यस्य अङ्कुशाभावात् दात्राकर्षणात् प्राग् "अन्तिकतमं" सन्निकृष्टतम मौषधं पक्वं आगच्छे दिति युष्माभिरेव मुक्ते सति एतत् वय माशास्महे,—"पक्व मौषध मागच्छत्विति"॥

अध्यायसमाप्त्युपप्रदर्शनार्थाय द्विरभ्यास इति॥ १० (२८)॥

॥ इति निरुक्तवृत्तौ दशमाध्यायस्य * चतुर्थः पादः॥ ५, ४॥

ऋज्वर्थायां निरुक्तवृत्तौ
जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ
दशमोऽध्यायः (पञ्चमोऽध्यायः) समाप्तः॥ ५॥

---

* १भा०. १४९ पृ० "¶" द्रष्टव्यम्।

(१ २ ३ ४ ५ ६ ७
सखिमसश्चन्तीनयस्यवराहेागायन्तित्वापविचंपुरु-
८ ९ १० ११ १२ १३ १४
त्वाकिमित्तेप्रतत्तेऽग्निन्नरण्यायापान्तमन्युरुर्वश्यप्सराउ-
१५ १६ १७ १८ १९ २०
तासिसइन्नियत्कदामर्त्तपत्नीवन्तःसुगुरसद्दृकश्चन्द्रमा-
२१ २२ २३ २४ २५
अरुणोमायइन्द्राग्नीमानःसमस्यहविषाजारःपृथक्प्रा-
२६ २७ २८
यन्प्रीणीतासुदेवःप्रवाहजेऽष्टाविंशतिः ॥*)

॥ इति निरुक्ते पूर्वषट्के पञ्चमोऽध्यायः ॥ ५ ॥

---

* १भा० १४६ पृ० "* * *" द्रष्टव्यम्।

## ॥ अथ षष्ठाध्यायः ॥

तत्र,

### ॥ प्रथमः पादः ॥

ॐ३म्*। त्व मग्ने द्युभिस्त्व माशुशुक्षणिस्त्व मद्भ्यस्त्व मश्मनस्परि। त्वं वनेभ्यस्त्व मोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ त्व मग्ने द्युभिरहोभिस्त्व माशुशुक्षणि राशु इति च शु इति च क्षिप्रनामनी भवतः क्षणि-रुत्तरः क्षणोतेराशु शुचा क्षणोतीति वा सनोतीति वा शुक् शोचतेः पञ्चम्यर्थे वा प्रथमा तथा हि वाक्य-संयोग आ इत्याकार उपसर्गः पुरस्ताच्चिकीर्षितज उत्तर आशु शोचयिषुरिति शुचिः शोचतेर्ज्वलतिकर्म-णोऽय मपोतरः शुचिरेतस्मादेव निष्पिक्त मस्मात् पापक मिति नैरुक्ताः ॥ १ † ॥

"आशुशुक्षणिः(१)"—इति ‡, अनवगतम्। "आशु शुचा सनिता वा" स्यात्, "आशु शुचा क्षणिता वा"। "त्व मग्ने

---

* "ओं" ख। "ॐ" ग। "श्रीः" ङ। च-पुस्तके न किमपि।

† ङ-च-पुस्तकयोर्नास्ति खण्डसमाप्तिः।

‡ १भा० ४१६ पृ० ६ पं०।

द्युभिस्त्व मा शुशुचणिः०——०जायसे शुचिः"*। गत्समदस्येय मार्षम्। प्रातरनुवाकाश्विनयोः शस्यते। जगती, आग्नेयी। हे भगवन्! 'अग्ने!' 'त्वं' 'द्युभिः' अहोभिः निमित्तभूतैः पौर्णमास्याद्यैः एषां मथ्यमानो नृणां जायसे; पौर्णमास्या ममावस्यायां वादधौ-तेत्युक्तम्†। किञ्च; 'त्वम् आशुशुचणिः'। "आशु इति च शु इति च" एते "क्षिप्रनामनी भवतः"। शु-इत्येतदत्र प्रासङ्गिक मन्यत्रोप-कारं करिष्यतीति। तद्यथा,—"शुनो वायुः, शु एत्यन्तरिक्षे"—इत्येव मादौ‡। 'आशुशुचणिः'—इत्येतेषां पञ्चाना मक्षराणा माद्यं तावदक्षरद्वयम् 'आशु'—इत्येतत् क्षिप्रनाम§। अधुना 'शु'—इत्येतत् तृतीय मक्षर मतिक्रम्य उत्तर मक्षरद्वयं निराह,—"चणिः"—इत्येष द्व्यक्षरः शब्दः "चणेतेः" धातोः (तना० उ०) हिंसार्थस्य। "सनेतेः (तना० उ०)" वा सम्भजनार्थस्य। मध्यमं तु 'शु'—इत्ये-तदक्षरं शुचेः (भू० प०) दीप्त्यर्थस्य। अथ कोऽर्थः सर्वैरप्येतैरक्षरै-रभिधीयते? इति उच्यते,—"आशु" "शुचा" दीप्त्या "चणेति" हिनस्ति—"इति" आशुशुचणिः, अग्निः। अथ वा "आशु" "शुचा" "सनेति" सम्भजति—"इति" आशुशुचणिः, अग्निः। चणेतेः सनेतेश्च विकल्पः। "शुक् शोचते:"—इति। पञ्चाना मक्षराणा माशुशुचणि-शब्दे तृतीय मक्षरं 'शु'—इति, तस्यैतन्नि-र्वचनम्। एवं तावदय मेको निर्वचनप्रकारः आशुशुचणि-शब्दस्य।

---

* ऋ० सं० २, ५, १७, १।

† "दर्शे वा पौर्णमासे वाऽग्निसमाधानं कुर्वीत"—इति गो० गृ०सू० १, १, १४।

‡ प० दै० का० ६ष० ४पा० ६ख०।

§ "शु(१५), आशु,१६)"—इति क्षिप्रनामसु (१भा० २५७० दृश्ये।

अथ वैव मन्यथा स्यात् "पञ्चम्यर्थे" इयं "प्रथमा" विभक्तिः। 'आग्नुग्नुच्चणेः'—इति यदुक्तं स्यात्, एतदुक्तं भवति—'आग्नुग्नुच्चणिः'—इति। आह,—किं पुनः कारणं प्रथमैषा सती पञ्चमीत्वेन विपरिणम्यते? इति, उच्यते.—"तथा हि वाक्यसंयोगः" तेन प्रकारेण पञ्चमीत्वेन विपरिणामे पञ्चमीत्वेन विपरिणतस्य शब्दस्यानेन वाक्येन संयोगेऽर्थसङ्गतिर्भवति न यथावस्थितस्य। आह,—कथं कृत्वा?—इति, उच्यते;—'त्व मङ्गस्व मग्नेनस्परि। त्वं वनेभ्यस्त्व मोषधीभ्यः"—इत्येतान्यक्षराणि बह्वनि पदानि पञ्चम्यन्तानि, तस्मादनेनापि पञ्चम्यन्तेनैव भवितव्य मित्युपपद्यते पञ्चमीत्वेन विपरिणाम इति। आग्नुग्नुच्चणिरित्येतस्याक्षरपक्तस्य य एषः पुरस्तात् "आ-इति आकारः", एष तावत् "उपसर्गः"। यः पुनरेष ग्नुग्नुच्चणिरिति "उत्तरः" अनन्तरश्चतुरक्षरः शब्दः, एषः "चिकीर्षितजः" चिकीर्षितादर्थाज्जातः सन्नन्तादित्यभिप्रायः। अथ पुनः समस्तस्य कोऽर्थः? इति, उच्यते;—यः कश्चित् "आग्नुग्नोचयिषुः" आदिदीपयिषुः भवति, स आग्नुग्नुच्चणिः (यजमान इति यावत्*) तस्मादाग्नुग्नुच्चणेः त्वं हे भगवन्नग्ने! 'जायसे'। किं मेतावदेव? नेत्युच्यते,—त्वम् 'अङ्गः' जायसे, वैद्युतात्मना। त्व मेव च 'अग्मनः' 'परि' परितः सर्वतः, इतरेतराभिघाताज्जायसे। त्वं 'वनेभ्यः' दारुभ्यः। त्वम् 'ओषधीभ्यः' अरादिभ्यः। त्वं 'नृणां' मनुष्याणां हे 'नृपते' मनुष्यपते! 'जायसे' अभिव्यज्यसे। 'ग्नुचिः' दीप्त इत्यर्थः॥

"ग्नुचिः ग्नोचतेः" ज्वलत्यर्थस्य। "अथ मपीतरः ग्नुचिः" लौकिकः

---

* क-पुस्तके नैतद् दृश्यते।

"एतस्मादेव"—इति वैयाकरणा मन्यन्ते; नैरुक्ताः पुनः निःपूर्वात् सिञ्चतेरितरः शुचिरित्येवं मन्यन्ते; "निः" निष्कृष्य हि "अस्मात्" "पापकम्" अशुचित्वम्, अन्यस्मिन् "सिक्तं" भवतीत्येवम्। अत्राग्निर्वाच्य आशुशुक्षणिरन्यो वा यः कश्चिदग्निं मथित्वा तेन किञ्चिदादिदीपयिषुर्भवति, स वा आशुशुक्षणिरिति ॥ १ ॥

इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत्। आशा दिशो भवन्त्यासदनादाशा उपदिशो भवन्त्यभ्यशनात् काशिर्मुष्टिः प्रकाशनान्मुष्टिर्मोचनाद्वा मोषणाद्वा मोहनाद्वा। इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते। इमे चिदिन्द्र रोदसी रोधसी द्यावापृथिव्यौ विरोधनाद्रोधः कूलं निरुणद्धि स्रोतः कूलं रुजतेर्विपरीताद्धोष्टोऽविपर्ययेणापारे दूरपारे यत् सङ्गृभ्णासि मघवन्काशिस्ते महान्। अहस्त मिन्द्र सम्पिणक्कुणारुम्। अहस्त मिन्द्र कृत्वा सम्पिण्ड्* परिकणनं मेघम्॥ २ (१) ॥

"आशाभ्यः(२)"—इति †, अनवगत मनेकार्थत्वञ्च। "आसदनात्" —इत्यवगमः। "इन्द्र आशाभ्यस्परि०——०विचर्षणिः" ‡। यत्स-

* "संपिदृढि" क, ग। "संपिंढ्ढि" ख। "संपिंढि" ङ। "संपिण्ढि" च। इमौ तु "सम्पिण्ड्ढि"—इत्येव।

† ९भा० ४२० पृ० १पं।

‡ "इन्द्र०——०करत्। जेता शत्रून् विचर्षणिः॥"—इति ऋ० सं० २, ८, ९, १।

मदस्येय मार्षम्। गायत्री। ऐन्द्री। अभिप्लवस्य द्वितीयेऽहनि प्रउगे शस्यते। 'इन्द्रः' 'आशाभ्यः' दिग्भ्यो हि यद् भय मुत्पद्यते जगताम्, 'सर्वाभ्यः' नानादिङ्निवासिभ्यो भूतेभ्यः 'अभयं' 'करत्' करोत्वित्यर्थः। आह;—किं लक्षणः पुनरसाविन्द्रः?—इति, 'जेता शत्रूनिचर्षणिः' अधिद्रष्टा सार्वभौतिकानां कर्मणाम्॥ "आशा दिशो भवन्ति, आमदनात्"; आभिमुख्येन हि ताः सर्वत्र सन्ना इव भवन्ति। "आशा उपदिशो भवन्ति, अभ्यशनात्"। अभ्यश्नुवते हि ताः परस्परेणैव॥

"काशिः(२)"—इति *, अनवगतम्। 'काशयितव्यः'—इत्यवगमः। "मुष्टिः"—इत्यभिधेयवचनम्। "प्रकाशनात्"—इति निर्वचनम्। "मुष्टिः"—इत्येतत्पर्यायप्रसक्तं निरुच्यते,—"मोचनाद्वा" मुच्यते ह्यसौ, "मोषणाद्वा" तेन हि मुष्यते, "मोहनाद्वा" तत्र हि मुह्यति परः। किं मेतन्मुष्टौ? इति†। "उताभये पुरुहूत०——०काशिरित्ते"‡। विश्वामित्रस्यार्षम्। त्रिष्टुप्। ऐन्द्री। पृष्ठ्याभिप्लवयोः द्वितीयपञ्चमयोरङ्गोः सम्पातसूक्तं नाम, तत्रेयं शस्यते, अच्छावाकेन माध्यन्दिने सवने; सहदानु मलातण उद्वृहरत्तइत्येताश्च तत्रैव§। अपि

---

* १भा० ४२७ पृ० ५ पं०।

† "किं मेतस्मिन् मुष्टाविति" ख।

‡ "उताभये पुरुहूत श्रवोभिरेको दृळ्ह मवदो वृत्रहा सन्। दूमे चिदिन्द्र रोदसी अपारे यत् संक्रन्दना मघवन् काशिरित्ते॥"—इति ऋ० सं० ६, १, १, ५।

§ अनुपदवक्ष्यमाणा इमास्तु ऋचोऽत्रैव माध्यन्दिने सवने अच्छावाकनामर्त्विजा शस्यन्त इत्यर्थः। तत्र, कुणारुमिति चतुर्थस्य पदस्य निगमाय सहदानुमिति (ऋ० सं० ६, १, १, ३), अलातृण इति पञ्चमपदस्य निगमाय अलातृण इति (ऋ० सं० ६, १, १, ५.) सललूकमिति षष्ठपदस्य निगमाय उद्वृहरत्त इति (ऋ० सं० ६, १, १, ४, १०) दर्शयिष्यतीत्यत्रैव यथोत्तरम्;—१२४, १२५, १२७पृ०।

भयवति सङ्ग्रामे, 'अभये' अभये इव। हे 'पुरुहूत!' 'एकः अपि 'सन्' असहायः, 'अवोभिः' अवणीयैः शब्दैरन्नैर्वा, हविर्भिर्वा हूयः सन् 'दृढं' समर्थम् 'अवदः', 'वृत्रहा' शत्रुहेत्यर्थः। किं मेतावदेव माहाभाग्यम्? नेत्युच्यते, इदं चान्यत्—'इमे चित्' इमे अपि 'रोदसी' "द्यावापृथिव्यौ", एव मपि 'अपारे' "दूरपारे" सती 'यत्' "सङ्गृभ्णासि", त्व महो! 'काशिः' 'ते' "महान्"॥ एव मत्र सङ्गृह्णसम्बन्धात् "काशि"-शब्दो मुख्याभिधायक इत्युपपद्यते॥

प्रसक्तानुप्रसक्त मुच्यते,—ये एते "रोदसी", एते "रोधसी"। किं कारणम्? "विरोधनात्" विविधानि हि भूतान्येते रुन्धः। "कूलम्" अपि "रोधः" उच्यते; तदपि हि "स्रोतः" उदक-स्रोतांसि "निरुणद्धि"। "कूलं रुजतेः (तु० प०) धातोः; तत् पुनः "विपरीतात्" वैपरीत्येन। "लोष्टः" पुनरस्यैव धातोः "अविपर्ययेण"॥

"कुणारुम्[४]"—इति*, अनवगतम्। मेघोऽभिधेयः। "क्षणनम्" —इति शब्दसमाधिः। "सुहदानुं पुरुहूत०——०तुवसा जघन्थ"†। 'सुह'—इत्युदकनाम, उदकदातारं मेघम्। हे 'पुरुहूत!' "इन्द्र!' 'क्षियन्तम्' अन्तरिक्षलोके वसन्तं गच्छन्तं वा 'अहस्तम्' अप्रतीकारसमर्थं कृत्वा ततः पुनः 'सम्पिणक्' "सम्पिणड्ढि", सञ्चूर्णय। 'कुणारुं' "परिक्षणनं" शब्दकारिणं मित्यर्थः। एवं तावदेनं कुरु। अथ पुनः योऽय मपरो वृत्रः, वर्त्तिता, मेघः। एन मप्युपरि 'वर्द्धमानं','पिपारुं'

---

* १भा० ४२७ पृ० ८ पं०।

† सुहदानुं पुरुहूत क्षियन्तं महस्क मिन्द्र सम्पिणक् कुणारुम्। अभि वृत्रं वर्द्धमानं पिपारुं मुपादं मिन्द्र तूवसा जघन्थ॥"—इति ऋ० सं० १, १, २, १।

हिंसनशीलम्, 'अपादं' गमनहीनं कृत्वा तत एनं 'तवसा' बलेन 'जघन्थ' जहीत्यर्थः॥ एव मत्र बधाधिकारात् मेघाधिकाराच्च "कुणारुं = क्वणनशीलम्"—इत्युपपद्यते॥ २ (१)॥

अ॒ला॒तृ॒णो व॒ल इ॑न्द्र व्र॒जो गोः पु॒रा ह॒न्तोर्भ॑यमा॒नो व्या॑र। सु॒गान् प॒थो अ॑कृणोन्नि॒रजे॑ गाः प्रावन्वा॒णीः पु॑रुहू॒तं ध॑मन्तीः॥ अलातृणोऽल मातर्दनो मेघो वलो वृणोतेर्व्रजो व्रजत्यन्तरिक्षे गोरेतस्या माध्यमिकाया वाचः पुरा हननाद्भयमानो व्यार। सुगान् पथो अकृणोन्निरजे गाः। सुगमनान् पथो अकरोन्निरजनाय* गवाम्। प्रावन्वाणीः पुरुहूतं धमन्तीः। आपो वा वहनाद्वाचो वा वदनाद् बहुभिराहूत मुदकं भवति धमतिर्गतिकर्म्मा॥ ३ (२)॥

"अलातृणः(५)"—इति †, अनवगतम्। "अल मातर्दनः"—इत्यवगमः। अ॒ला॒तृ॒णो व॒ल ०——० ध॑मन्तीः ‡"। हे 'इन्द्र!' योऽयम् 'अलातृणः' "अल मातर्दनः" पर्याप्तिः आतर्दयितुम्। उदकपूर्णो 'वलः' मेघः; स हि आवृणोत्युदकम्। 'व्रजः' च, स एव अन्तरीचे व्रजतीति; गुणान्तरत्वादजामि। आह;—किं तस्य? इति। एष 'गोः' "एतस्याः माध्यमिकाया वाचः" भावत्काया: शब्द मुपश्रुत्य 'पुरा'

* "निर्गमनाय"—इत्येव वृत्तिसम्मतः, ङ-च-पुस्तकयोश्च।
† १भा० ४१७ पृ० १९ पं०।
‡ ऋ० सं० ६, १, १, ५।

एव 'हन्तोः' "हननाद्" भवतो बधाद् 'भयमानः' बिभ्यत्; अमन्योऽय मस्य बध इति मन्यमानः, 'व्यार' विस्रंथीभवतीत्यर्थः। स त्व मनेनैव प्रकारेण एनं मेघं विदारयन्, 'सुगान्' "सुगमनान्" 'पथः' मार्गान्, 'अकृणोत्' करोषि, कृतवान् वा "निर्गमनाय" एतासां मेघोदरान्तर्गतानां "गवाम्" अपाम्; विदीर्णे हि तस्मिन्मेघे सुखं ताः तस्मान्मेघोदरान्निर्गच्छन्ति। किञ्च; निर्गताः सत्यः ताः 'वाणीः' आपः 'प्रावन्' प्रकर्षेणावन्, रक्षन्ति; 'धमन्तीः' गच्छन्त्यः यथानिम्न मभिसरमाणः, 'पुरुहूतम्' उदकम्। यदेतदुदकस्थानं तडागनद्यादि, तत्प्रति धमन्तीः तदेव रक्षन्ति; तद्धि उपदस्येत्, यदि न पतेरंस्ता आपः। एव मापो 'वाणी'-शब्देनोक्ताः; ताः हि "वदनाद्" वाणीरित्युच्यन्ते। "वाचो वा वदनाद्" वाणीरित्युच्यन्ते। यदा विदीर्णात् मेघान्निर्गत मुदकं पुरुहूतं भवति वर्षभावेन, अथ तदा तेषा मेव प्राणिना महो दृष्ट मिति—एवमाद्या वाणीः वाचो धमन्तीः मुखेभ्यो निर्गच्छमानाः, तदेवोदकं प्रावन् प्रागच्छन्नित्यर्थः॥ एत्र मत्र "पुरा हननाद् भयमानो व्यार"—इत्यनेन सम्बन्धात् "अलातृणः = मेघः"—इत्युपपद्यते॥

"बज्रभिः" प्राणिभिः "आहृतः" आह्रयते— ममेदं ममेद मिति, तस्मात् पुरुहूतम् "उदकं भवति"। "धमतिः" एष "गतिकर्मा" एव *; नात्र स्तुतिकर्मेत्यभिप्रायः। स्तुतिकर्मस्वपि हि धमतिः पठितः। "धमति(१२), नदति(९), सरति"—इति †॥

---

* १भा० (१२७, २४९ पृ०) २ख० १४ ख० ५०)।
† १भा० (२२१, २२२ पृ०) २ख० १४ ख०।

'निरजे गाः'—इत्यत्र * केचिद् 'पशुगव्य एताः'—इति व्याच-क्षते †, तासां हि इन्द्रेण विदारितेषु मेघेषु सुगमनाः पन्थानो निर्गमनाय भवन्ति, सुयवसत्वान्नीरजस्कत्वाच्च। 'प्रावन् वाणीः'—इत्यत आरभ्य समान मेव पूर्वेण॥ ३ (३)॥

उद्वृह रक्षः सहमूल मिन्द्र वृश्चा मध्य प्रत्यग्रं शृणीहि। आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेति मस्य॥ उद्वर रक्षः सहमूल मिन्द्र मूलं मोचनाद्वा मोषणाद्वा मोहनाद्वा वृश्च मध्यं प्रति शृणीह्यग्र मग्र मागतं भवत्या कियतो देशात्सललूकं संलुब्धं ‡ भवति पापक मिति नैरुक्ताः सररूकं वा स्यात्सर्तेरभ्यस्तात्तपुषिस्त-पतेर्हेतिर्हन्तेः। त्यं चिदित्या कत्पयं शयानम्। सुखप-यसम्। सुखं मस्य पयः। विसुह आपो भवन्ति विसुव-णात्। वया इव रुरुहुः सप्त विसुह इत्यपि निगमो भवति। वीरुध ओषधयो भवन्ति विरोहणात्। वीरुधः पारयिष्णु १ इत्यपि निगमो भवति। नक्षद्दाभ-मश्नुवानदाभ मभ्यशनेन दंभ्नोतीति। नक्षद्दाभं ततुरिं

---

* पृ० १३५ टि० २ पं०।

† एतिहासपचनेनेति भावः। तथाहि ऋ० सं० २, २, ५, ५.—इत्येवमादीनां सायणीयं भाष्यं द्रष्टव्यम्।

‡ "संखुब्धं" क। "संलुब्धं" च। "संक्षुब्धं" ख-नाम-वृत्ति-पुस्तकपाठः।

पर्वतेष्ठा मित्यपि निगमो भवत्यस्कृधोयुरक्षध्वायुः क्षध्विति ह्रस्वनाम निक्तं भवति। यो अस्कृधोयुरजरस्वानित्यपि निगमो भवति (निरृभा निरथ्हारिणः*)॥ ४ (३)॥

"सललूकम्(१)"—इति†, अनवगतम्। "संलुभ्रम्"—इति शब्दसमाधिः, "सरळूकम्"—इति "वा"। "उद् ह्रह् रक्षः०——०हेति मंस्व"‡। "उद्धर" एतत् 'रक्षः' 'महमूलम्' हे 'इन्द्र!', 'दृश्वा' अस्य किन्धि 'मध्यम्', 'अग्रं' च अस्य 'प्रति गृणीहि' प्रतिजहीत्यर्थः। किञ्च; 'आ कीवतः' "आ कियतः"§ आ कस्माद् "देशात्" एतदुद्धर; यस्मात् वितर्कयमाणा अपि न शक्नुयुर्वितर्कयितुं—कियतोऽपि प्रदेशादेतदुद्धृत मिति। यथा न किञ्चिदप्यस्यावशिष्यते, तथैतदुद्धरेत्यभिप्रायः। तथा चैतदुद्धृत्य 'सललूकं' "संलुभ्रं" संमूढ मप्रतिपत्तं कुरु। अथ वा "पापकं" पापतर मस्मात्तः कुरु—"इति" एतत् "नैरुक्ताः" नैरुक्तपक्षेण। अथ वा "सरळूकं" सरणशीलं॥ "वा" (अग्रनशीलं¶) प्रच्युतं स्वदेशात् एतत् कुरु। तत एतत् उन्मूलं कृत्वा स्थानप्रच्युतायास्मै रक्षसे 'ब्रह्मद्विषे' ब्राह्मणद्वेष्ट्रे 'तपुषिं' तापयित्नीं 'हेतिं' हन्त्रीम्, आयुधजातिम्, मूलमध्याग्रच्छेदनाय पुनः पुनः 'अस्य'

* नास्त्येतत् क-ख-ग-पुस्तकेषु परं वृत्तिकृता तु व्याख्यात मेव।
† १भा० ४१७ ४० १८ पं०।
‡ ऋ० सं० २, १, ४, १।
§ "आ कियत इति पाठान्तरम्"—इति क।
॥ "सरणशीलं"—इति ख।
¶ नास्त्येतत्पदं क-नाम-वृत्तिपुस्तके।

क्षिपेत्यर्थः॥ एव मत्र सललूक मिति लुभेर्मोहनार्थस्य (तु०प०) शब्दसारूप्यात् संलुभ्य मित्युपपद्यते। "सर्त्तेः" (भ्वा०प०) अप्यत्र सारूप्य मस्तीति "सरूकं वा स्यात्"—इत्युक्तं भाष्यकारेण। रक्षोविशेषणचैतत्; तस्य हि सम्मोहो वा नाशनं वाभीष्ट मिति॥

"कत्पयम्(७)"—इति *, अनवगतम्। 'कपयम्'—इत्यवगमः। कपय मित्यवगमे "सुखपयसम्"—इति पर्यायेणाभिधेयवचनम्। मधुरोदको यो मेघः, सोऽभिधेयः। किं कारणम्? "सुखं" हि सुखोत्पादनम् "अस्य" "पयः", मधुरत्वात्। "त्यं चिदित्था०——० जघान"†। गातुर्नामाचेयः, तस्येय मार्षम्। 'त्यं' तं मेघम् 'इत्था' अमुना प्रकारेण, अथ वा अमुस्मिन्नन्तरिक्षलोके 'कत्पयं' सुखोदकं 'शयानम्' असुर्यं तमस्य ‡ क्षत्वा 'वावृधानं' वर्द्धमानम्। 'मन्दानः' मन्दमानः, 'वृषभः' वर्षिता, 'इन्द्रः', 'सुतस्य' अभिषुतस्य, सोमस्य स्व मंशं पीत्वा। ततः 'उच्चैः' वज्रम् "अवगूर्य"§ 'जघान'। य एवङ्गुणयुक्त इन्द्रः, सोऽस्माक मिदं नाम करोत्वित्येव माशीर्योक्त्या॥ एव मत्रेन्द्रो जघानेति अनेन सम्बन्धात् "कत्पयः = सुखपयः = मेघः"—इत्युपपद्यते, तस्य वधस्याभीष्टत्वात्॥

"विस्रुहः(८)"—इति ॥, अनवगतम्। 'विस्रवः'—इत्यवगमः।

---

* १भा० ४२८ पृ० ६ पं०।

† "त्यं चिदित्था कत्पयं शयान मसुर्यं तमसि वावृधानम्। तं चिन्मन्दानो वृषभः सुतस्योचैरिन्द्रो अवगूर्या जघान॥"—इति ऋ० सं० ४, १, ३२, ६।

‡ "असुर्यं तमसि"—इति मूलपाठः; तस्यैव विभक्तिपरिणामेन व्याख्यान मेतदिति वा। "असुर्यं तमः"—इत्येव क-पाठः।

§ "अवगूर्य"—इति मूलपाठः; तस्यैव व्याख्यान मेतदिति वा।

॥ १भा० ४२८ पृ० ६ पं०।

"आपो भवन्ति"—इत्यभिधेयवचनम्। "विस्रवणात्"—इति हेतु-निर्देशः। "वैश्वानरस्य ०——० सप्त विस्रुहः" *। भरद्वाजस्येय मार्षम्। प्रातरनुवाकाश्विनयोः शस्यते। 'वैश्वानरस्य' भगवतः, अग्नेः, 'अमृतस्य' अमरणधर्मिणः, 'केतुना' कर्मणा, 'चक्षसा' चक्षुषा दर्शनेन 'दिवः' अपि यानि 'सानूनि' समुच्छ्रितानि स्थानानि, तानि 'विमितानि' विनिर्मितानीत्यर्थः। अग्निप्रकाश्यमानविषयो हि लोकः कर्मणि प्रवर्त्तते साधुन्यसाधुनि वा। साधुभ्यः साधुना च, पापेभ्यः पापेन च सार्वलौकिकेन कर्मणा स्वकर्मफलभोगायेदं सर्वं विनिर्मी-यत इत्यनयापेक्षयोक्तम्,—"वैश्वानरस्य चक्षुषा केतुना च दिवोऽपि सानूनि निर्मितानि"—इति; अग्निरेव हि वाच्यधिदेवताभावेना-वस्थितः सर्वं मिदं ख्यापयति, ततः कर्म प्रतायते। तदुक्तम्,—"अग्निर्वाग् भूत्वा मुखं प्राविशत्"—इति †। किञ्च; 'तस्येदु विश्वा' तस्यैव वैश्वानरस्य पृथिवीभावेनावस्थितस्य। अयं चाग्निर्वैश्वानर इत्युक्तम् ‡, 'विश्वा भुवना' विश्वानि भुवनानि, सर्वभूतभावयितृणुद-कानि। "भुवनम्"—इति ह्युदकनामसु पठितम् §। 'मूर्द्धनि' उपरि

---

* "वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना। तस्येदु विश्वा भुवनाधि मूर्द्धनि व्रया इव रुरुहुः सप्त विस्रुहः॥"—इति ऋ० सं० ४ ५, ९, १।

† 'वाग्वै देवानां मनोता, * * * अग्नौ मनोताः सङ्कल्पे"—इत्यादि च ऐ० ब्रा० १, १, १०। "तेजोऽग्नितं त्रिधा विधीयते,—अस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा, योऽणिष्ठः सा वाक्। अन्नमयं हि सोम्य! मन आपोमयः प्राणस्तेजोमयी वागिति"—इति च छा० ब्रा० १०, ५। "मनः कायाग्नि मा हन्ति स प्रेरयति मारुतम्"—इति शिक्षावचनञ्च पर्य्यालोच्यम्।

‡ "अथ मेवाग्निर्वैश्वानर इति शाकपूणिः"—इति प० दै० का० ७, ५, २।

§ १भा० (९९ ४०) १अ० १२ ख० (५०)।

'वया इव' शाखा इव "रुरुक्षः सन्न विस्रुहः"। 'सन्न' सर्पणाः, 'विस्रुहः' विविधस्रवणाः भूत्वा ततः शाखा इव 'रुरुक्षः' अस्यां पृथिव्यां नद्यादिभावेन, ततः शाखा इव स्रोताः पृथिव्या उपरि, यथा-निम्नं विस्रवमाणा आपो लक्ष्यन्ते—इत्येतद् दृष्ट्वैव मयोक्तम्,—"तस्येदु विश्वा ०——० सन्न विस्रुहः"—इति॥ एव मन्त्र शब्दसारूप्या-दर्थोपपत्तेश्च "विस्रुहः = आपः" "भवन्ति"—इत्युपपद्यते। 'भुवन'-शब्देन भूतान्येवोच्यन्त इति केचिद् वर्णयन्ति; चतुर्विधश्च भूतग्रामः, विस्रुहश्च वया इव रुरुक्षः पृथिव्या उपरीति। 'सन्न'-शब्देनापि समुद्रानेव केचिद् वर्णयन्ति; ते हि पृथिव्याः शाखा इव लक्ष्यन्ते, विस्रवन्ति च॥

"वीरुधः(९)"—इति*, अनवगतम्। "विरोहणात्"—इत्यवगमः। "ओषधयो भवन्ति"—इत्यभिधेयवचनम्। "विरोहणात्"—इति हेतुनिर्देशः। "ओषधीः प्रति ०——० वीरुधः पारयिष्णवः"†। भिषज आथर्वणस्येय मार्षम्। ओषधिसूक्ते। अनुष्टुप्। हे 'ओषधीः' ओषधयः! 'प्रतिमोदध्वम्' इमं रुग्णं प्रति, अस्मान् प्रति वा। 'मोदध्वम्' मुदिताः हृष्टाः भवन्तु। कीदृश्यो यूयम्? 'पुष्पवतीः' पुष्पवत्यः, 'प्रस्रवरीः' प्रकर्षेण स्रवन्ति उपभोगायेति प्रस्रवरीः। याश्च पुष्पवत्यो याश्च फलवत्यो याश्चाफला याश्चापुष्पाः, ताः सर्वाः। 'अश्वा इव' वड़वा इव 'सजित्वरीः' सह जैत्र्यः, 'वीरुधः', सर्वरोगान् जित्वा अस्माक मायुषः 'पारयिष्णवः' पारयित्र्यः सन्तु॥ एव मन्त्र

* १भा० ४१८ पृ० ११ पं०।

† 'ओषधीः प्रति मोदध्वं पुष्पवतीः प्रस्रवरीः। अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः॥"—इति ऋ० सं० ८, ५, ८, २।

"पुष्यवतीः प्रसूवरीः"—इत्येतस्मात् विशेषलिङ्गात् "वीरुधः = ओषधयः" "भवन्ति"—इत्युपपद्यते ॥

"नक्तद्दाभम्[१०]"— इति *, अनवगतम्। 'न क्षणद्दाभम्'—इत्यवगमः। "अस्रुवानदाभम्"—इति पर्यायेणाभिधेयवचनम्। अभ्यश्नेन अभिव्यापनेन यो दभ्नोति हिनस्ति, स नक्तद्दाभः। "त मु नः पूर्वे ०——० मतिभिः शविष्ठम्" †। भरद्वाजस्येय मार्षम्। ऐन्द्री। त्रिष्टुप्। सम्पातसूक्ते माध्यन्दिने ब्राह्मणाच्छंसिनः शस्त्रे शस्यते। "त मीमहे"—इति ‡, इयच्च तत्रैव। 'तम्' इन्द्रम् 'नः' अस्माकम्, ये 'पूर्वे' 'पितरः' पितृगणाः, 'सप्त' सप्तसङ्ख्याकाः, ये पुराणेषु पठ्यन्ते। अथ वा 'सप्त' 'सृप्ताः', पूर्वतर मस्माल्लोकादमुं लोकम्, ते च 'नवग्वाः' नवगतयः§, अभिनवा हि तेषां गतिः;—अर्द्धमासेऽर्द्धमासे भवति पितृयज्ञं प्रत्यागन्तुम्। अथ वा नवनीतगतयः ॥ नवनीते हि तेषां मनसो गतिर्भवति, — इद मस्माकं स्यादिति; "स्वयं विलीनं पितृणाम्"—इत्युक्तम्¶। 'विप्रासः'—इति, विप्राः = प्राप्तप्रज्ञाः, पितृलोकेऽवस्थिताः। 'मतिभिः' 'अभिवाजयन्तः' स्तुवन्त आसते। किंलक्षणं पुनरिन्द्रं मतिभिरभिवाजयन्त आसते? इति, उच्यते;— 'नक्तद्दाभम्' योऽभिव्यापनमात्रेणापि दभ्नोति, कि

---

* १भा० ४२८ पृ० १५ पं०।

† "त मु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयन्तः। नक्तद्दाभं ततुरिं पर्वतेष्ठा मन्द्रा धीवाचं मतिभिः शविष्ठम्॥"—इति ऋ० सं० ४, ६, १२, १।

‡ ऋ० सं ४, ६, १२ १। इदाप्यनुपदं दर्शयिष्यति (१४२पृ० १०पं०)।

§, ‖ 'नवगतयो नवनीतगतयो वा"—इति प० दै० का० ११, १, ७।

¶ "नवनीतेनाभ्यञ्जन्ति;—आज्यं वै देवानां सुरभि घृतं मनुष्याणा मायुतं पितॄणां नवनीतं गर्भाणाम्"—इत्यादि ऐ० ब्रा० १, १, २।

मुत वेधेन ? तम्। 'ततुरिम्' यश्च त्वरणशीलः, तम्। 'पर्वतेष्ठाम्' यश्च मेघस्थायी, तम्। 'अद्रोघवाचम्' यस्य चाद्रोग्धव्या वाक् अनतिक्रमणीया, तम्। 'शविष्ठम्' यश्च बलिष्ठः, तम्। य एवङ्गुणविशिष्ट इन्द्रः, तं मतिभिरभिवाजयन्त आसते, सोऽस्माक मिदं नाम करोलित्येव माशीर्योज्या॥ एव मत्र शब्दसारूप्यादर्थोपपत्तेश्च योऽभ्यनेन दभ्नोति, स नक्षद्दाभ इत्युच्यते॥

"अक्तुधोयुः(११)"—इति *, अनवगतम्। "अक्तध्वायुः"—इत्यवगमः। "क्तधु"—इति क्षुरनाम"†; तद्धि "निक्तम्" इव "भवति", क्षुरत्वात्। तस्य अकारेण प्रतिषेधे कृते 'अक्तधु'—इति भवति। "त मीमहे दन्द्रं मस्य०——०हरिवो माद्यध्यै"‡। 'तम्', वय मात्मनः पुत्रम् 'ईमहे' याचामहे। 'हरिवः!' त्वाम्। 'इन्द्रम्' ईश्वरम्। आह;—यः किंलक्षणः पुत्रः? इति, उच्यते;—सः 'अस्य' 'रायः' धनस्य परिपालने भोगे च समर्थः। किंलक्षणस्य पुनर्धनस्य? इति, 'पुरुवीरस्य' बहुवीरैस्सदृतः, 'नृवतः' च दासैस्सदृतः, 'पुरुत्रोः' च बहुनिवासस्य, अनेकप्रकारस्येत्यर्थः। न च परिपालनसमर्थ एव यः केवल मल्पकालः, त मीमहे; किन्तर्हि? 'यः' च 'अक्तुधोयुः' अक्तध्वायुः, दीर्घायुरित्यर्थः। 'अजरः' च, यो दृढशरीर इत्यर्थः। 'खर्वान्' च, यः सुष्ठु शत्रुणा मीरयिता। यः

---

* १भा० ४१८ पृ० १९ पं०।

† १भा० (२९१, २९७ पृ०) २अ० २ख० (१)।

‡ "त मीमहे दन्द्रं मस्य रायः पुरुवीरस्य हवतः पुरुत्रोः। यो अक्तुधोयरजरः खर्वान् त मा भर हरिवो माद्यध्यै॥"—इति ऋ० सं० ४, १, १२, १।

एवङ्गुणविशिष्टः पुत्रः 'तम्' 'आ भर' आहर। 'हरिवो मादयध्यै' अस्माक मात्मनश्च मदनाय तर्पनायेत्यर्थः॥ एव मत्र "अस्कृधोयुः"—इत्यनेन दीर्घायुरुच्यते, तस्याभीष्टत्वात्, शब्दसारूप्याच्च॥

"निगूढभाः(१२)"—इति *, अनवगतम्। "निश्रथ्यहारिणः"—इत्यवगमः; निश्चयया दृढया गत्या हरन्तः॥ ४ (३)॥

आजासः पूषणं रथे निगूढभास्ते जनश्रियम्। देवं वहन्तु बिभ्रतः॥ आवहन्वजाः पूषणं रथे निश्रथ्यहारिणस्ते† जनश्रियं जातश्रियं बृबदुक्थो महदुक्थो वक्तव्य मस्मा उक्थ मिति बृबदुक्थो वा। बृबदुक्थं हवामह इत्यपि निगमो भवति ऋदूदरः सोमो मृदूदरो मृदुरुदरेशिति वा। ऋदूदरेण सख्या सचेयेत्यपि निगमो भवति। ऋदूपे इत्युपरिष्टाद् व्याख्यास्यामः। पुलुकामः पुरुकामः। पुलुकामो हि मर्त्य इत्यपि निगमो भवति। असिन्वती असङ्क्षादन्त्यौ॥ असिन्वती बप्सती भूर्यत्त इत्यपि निगमो भवति। कपनाः‡ कम्पनाः क्रिमयो§ भवन्ति। मोघथा वृक्षं कपनेव

---

* १भा० ४२९ पृ० ८ पं०।

† "निगूढ्यहारिणस्ते" क, ख, ग। "निश्रिथ्यहारिणस्ते"—इति रोथ्स-सम्मादितयोः C. D. पुस्तकयोः पाठः।

‡ "कपना" क, ख, ग।

§ "क्रमयो" क, ख, ग।

वेधस् इत्यपि निगमो भवति। भार्ज्जीकः प्रसिद्धभाः। धूमकेतुः समिधा भार्ज्जीक इत्यपि निगमो भवति। रुजाना नद्यो भवन्ति रुजन्ति कूलानि। सं रुजानाः पिपिष इन्द्रश्चरित्यपि निगमो भवति। जूर्णिर्जवतेर्वा द्रवतेर्वा दूनोतेर्वा*। क्षिप्ता जूर्णिर्न वक्षतीत्यपि निगमो भवति। परि ध्रंस मोमना वां वयो गात्। पर्यगाद्वां ध्रंस महरवनेनान्नम्† ॥ ५ (४) ॥

॥ इति षष्ठाध्यायस्य प्रथमः पादः ॥ ६, १.

"आजासः पूषणं ०——०वहन्तु बिभ्रतः"‡। भरद्वाजस्यार्षम्। 'आ वहन्तु' 'अजासः' अजाः, अश्वाः। 'निष्टृभाः' "निअश्थहारिणः"§। य एवंलक्षणा अश्वाः, ते आवहन्तु 'पूषणं' देवं 'रथे' व्यवस्थितं 'बिभ्रतः' धारयमाणाः। 'जनश्रियम्' "जातश्रियम्" उद्भूतश्रियमित्यर्थः॥ एव मत्र समानविभक्त्यन्तत्वात् 'अजासः'—इत्यनेत "निष्टृभाः"—इत्येतदश्वविशेषणम्। सति चाश्वविशेषणत्वे "निअश्थहारिणः"॥ शीघ्रहारिणः, तस्याभीष्टत्वादागमनस्य॥

"हृबदुक्थः(१२)"—इति¶, अनवगम्। "महदुक्थः"—इति, "वक्तव्यम् अस्मै उक्थम्—इति वा" शब्दसमाधौ। "हृबदुक्थं हवा-

---

* "जूनोतेर्वा" क, ख, म।

† "महरवनायान्नम्"—इति च-पुस्तकमाचे, इत्यौ प्राधान्यतया च स्वीकृतः।

‡ ऋ० सं० ४, ८, २१, ६।

§॥ "निष्टृथ्यहारिणः"—इति क ऋ० पाठः।

¶ १भा० ३२९ ष्ठ० १४ पं०।

महे ०——० मवसे*"। कण्वपस्यार्षम्†। प्रथमे पर्याये मैत्रावरुणस्य शस्त्रे दृचाशीतिषु च महाव्रते शस्यते। "उक्थम्"—इति शस्त्रं मुच्यते‡, तद् यस्य बृहत् महत्, स बृबदुक्थः; अथवा तद् यस्य वक्तव्यम्, स बृबदुक्थः। तं 'बृबदुक्थम्' इन्द्रम्, 'हवामहे' वयं माह्वयामहे, एतस्मिन् कर्मणि। 'सुप्रकरस्नम्' सुप्रबाहुम्, दीर्घबाहुम् 'ऊतये' अवनाय, रक्षणाय आत्मनः। 'साधु कृण्वन्तम्' साधुकारिणम्, नित्यकाल मेवास्य जगतः साधु करिष्यामीत्यभिप्रायम्। 'अवसे' तस्यैव तर्पणाय, त मागतं सन्त मेतस्मिन् कर्मणि तर्पयिष्याम इत्येतेनाभिप्रायेणाह्वयामहे॥ एव मत्र 'हवामहे'—इत्यनेन सम्बन्धात् "बृबदुक्थः = महदुक्थः, वक्तव्योक्थो वा"—इत्युपपद्यते। य एव हि महदुक्थो भवति, वक्तव्योक्थो वा स एव सुतरा माह्वयत इति॥

"बृदूदरः(१४)"—इति§, अनवगतम्। "बृदूदरः"—इत्यवगमः। "सोमः" अभिधेयः। बृदूदरेण सख्या ०——० प्रतिरन्नायुः"॥। प्रगाथस्येय मार्षम्। त्रिष्टुप्। सौमी। सोमेन्द्रस्य श्यामाकस्य चरोः याज्यैषा, सोमचायिनः प्रायश्चित्तेष्टौ। 'बृदूदरेण' बृदूदरेण सोमेन;

---

* "बृबदुक्थं हवामहे सुप्रकरस्नमूतये। साधु कृण्वन्तमवसे॥"—इति ऋ० सं० ६, ३, १, ५।

† मेधातिथेरार्षं मिति वक्तव्ये कण्वपस्यार्षं मिति भ्रमादुक्त मिव. अनुक्रमणीविरोधात् सायणविरोधाच्च। तथाह्यनुक्रमणिका—"प्रक्रान्तानि त्रिंशन्मेधातिथिः"—इति, "काण्वो मेधातिथिर्ऋषिः"—इति च सायणः (ऋ० सं० ६, ३, १, १.)

‡ "उक्थं वक्तव्यप्रशंसम्"—इति पं० दे० का० ११, ३, १०। पुरस्ताच्च (१भा० ११३ पृ०द्रष्टव्यम्।

§ १भा० ४३० पृ० १पं।

॥ "बृदूदरेण सख्या सचेय यो मा न रिष्येदर्यश्च पीतः। अयं यः सोमो न्यधायि नस्मा इन्द्रं प्रतिरन्नायुः॥"—इति ऋ० सं० ६, ४, १२, ५।

मृदु हि सोमस्योदरम्, सुषिरत्वात्। अथ वा मृदुरस्य मुदरे स्यात् —इत्येव माशास्यते, पाठभिर्वमनाशङ्कया। तस्मात् मृदूदरः सोमः, स पुनरेष मृदूदरः सन्मृदूदर इत्युच्यते, तेन मृदूदरेण। 'सख्या' समानख्यानेनैव केन चित् पुरुषेण, मित्रेण 'सचेय' संसचेयम्, संसेवेयम्। पुनरागामिषु 'यः' सोमः 'मा' मां 'न रिष्येत्' न हिंस्यात्, 'पीतः' सन्। यथाह मेतेन सोमेनाहिंसितः, तथा सचेयम्। हे 'हर्यश्व!' इन्द्र! सोमस्वामिन्! एतदस्तु नः। किञ्च 'अयं यः सोमः', 'न्यधायि अस्मे' निहितोऽस्माखासीत्। येनेमा मापद मापादिताः स्मो वमनद्वारेण। 'तस्मै' तदर्थम्। तेनास्माक मायुषो यदवखण्डनं कृतम्, तत्प्रतिपूरणाय। 'इन्द्रम्' 'प्रतिरम्' प्रतीर्णं मनवखण्डितं सर्वम् 'आयुः' 'एमि' याचामीत्यर्थः। सोमवमनवैगुण्यात् आयुष्क्षेद माशङ्कमान इन्द्रं दीर्घं मायुर्ययाच यजमानाय॥ एव मस्मिन् "मृदूदरः = सोमः" प्रकरणात्, शब्दसारूप्याच्च॥

"मृदूपे(१५)"—"इति*, उपरिष्टाद् व्याख्यास्यामः"—"मृदूपे चिदृदूधा"—इत्यत्र †॥

"पुलुकामः(१६)"—इति ‡, अनवगतम्। "पुरुकामः"—इत्यवगमः। "इमं नु सोम मन्तितो ०——० कामो हि मर्त्यः" §।

---

* १भा० ४३० पृ० ५पं०।

† अत्रैवाध्याये ६ पा० ४ख०।

‡ १भा० ४३० पृ० ११ पं०।

§ "इमं नु सोम मन्तितो हृत्सु पीतं सुपर्ण ब्रुवे। यत् सौ मागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः॥"—इति ऋ० सं० ९, ४, २२, ५।

अगस्त्य-लोपामुद्रासंवादे अन्तेवासी ब्रह्मचारी इमां सौमीं हृहतीं अपश्यत्। 'इदम्', अहम् 'सोमम्' 'अन्तितः' अन्तिके अवस्थितम् 'उप'गम्य चेतसा 'ब्रुवे'। न च बहिरन्तिकेऽवस्थित मुपब्रुवे, किन्तर्हि? 'पीतं' सन्तं 'हृत्सु' एव, स्व एव हृदयेऽवस्थित मुपब्रुवे।—"यत् सोमं आगश्चकृमा"। 'यत्' 'सोम्' सर्वतः सर्वप्रकारम् 'आगः चकृम' पापं कृतवन्तो वयम्। 'तद्' अयं सोमः 'सुमृडतु' सुष्ठु सुखविधि-परिणामं करोतु। किं कारणम्? इतः,—यस्मात् 'पुलुकामो हि' बहुकामो हि 'मर्त्यः'। स बहुकामत्वात् मनुष्यस्वाभाव्यात् अवश्यं आगः करोति, तदयं पीतः सोमः शमयत्वित्यभिप्रायः॥ एव मत्र 'पुलुकाम'-शब्देन पुरुकामो बहुकाम उच्यते, 'मर्त्य'-शब्दसामानाधिकरण्यात् सारूप्याच्च॥

"असिन्वती(१७)"—इति *, अनवगतम्। "असङ्क्षादन्त्यौ"—इत्यर्थप्रतीतिः। "अपश्यं मत्स्य ०——० भूयसः"†। वैश्वानरस्याग्नेः सौचीकस्य वा वाजम्भरस्य वा सप्तेरिय मार्षम्। त्रिष्टुप्। आग्नेयी। 'अपश्यम्' अहम्। भगवतः अग्नेः 'महतः', 'महित्वम्' माहाभाग्यम्। 'अमर्त्यस्य' अमरणधर्मिणः। 'मर्त्यासु' मरणधर्मिणीषु, 'विक्षु' मनुष्य-प्रजासु इत्यर्थः। आह;—किमुनस्तन्माहाभाग्यम्? इति, उच्यते,—'नाना' भावेनैते 'हनू' हननसमर्थे ज्वाले अवस्थिते 'विभृते' विविध मिव धृते सत्यौ 'सम्भरेते' एकत्र हरेते हवींषि दारूणि वा। समृत्य च 'असिन्वती' "असङ्क्षादन्त्यौ" असङ्क्षादन्त्याविव; अथ वा असञ्जूर्ण-

* १मा० ४२० ५० १२ पं०।

† "अपश्यं मत्स्य महतो महित्व ममर्त्यस्य मर्त्यासु विक्षु। नाना हनू विभृतो सं भरेते असिन्वती बर्धती भूर्यत्तः॥"—इति ऋ० सं० ८, ३, १४, १।

यन्त्याविव। अनेन प्रकारेण शीघ्रं 'वष्टती' भक्षयन्त्यौ। 'भूरि' अपि दारुजातं हविर्जातं वा;—यत् 'अत्तः' भक्षयतः; न च आम्यतः। एतदस्य माहाभाग्य मह मपश्य मस्मिन् मनुष्यलोके इति। हनुरूपसम्बन्धात्* बङ्कीष्वपि ज्वालासु द्विवचन मेव स्थितम्॥ एव मत्र हनुसम्बन्धात् "असिन्वती = असङ्ख्यादन्त्यौ"—इत्युपपद्यते॥

"कपनाः(१८)"—इति †, अनवगतम्। "कम्पनाः"—इति शब्दसमाधिः। "क्रिमयः भवन्ति"—इत्यभिधेयवचनम्। "अभ्राजि शर्द्धो०——०नेषथा सुगम्" ‡। श्यावाश्वस्याचेयस्येय मार्षम्। मारुती। जगती। दाशराज्ञिके त्रिवृत्स्तोमे प्रथमेऽहन्याग्निमारुते विनियुक्ता। "प्रशर्द्धायेत्याग्निमारुतः"—इति सूचणात्§। 'अभ्राजि' भ्राजते। 'वः' 'मरुतः!', तत् 'शर्द्धः' तद्बलम्। 'यत्' येन बलेन 'अर्णसं' मेघं वृद्धम्, उदकपूर्णम्, अनु प्रविश्य 'मोषथ' मुष्णीथ यूयम्; निरुदकं कुरुतेत्यभिप्रायः। कथम्पुनर्मोषथ? इति।—"वृत्तं कपनेव वेधसः"। 'कपनाः' "कम्पनाः" "क्रिमयः"॥ इव, 'वेधसः' वेद्धारः; यथा वृत्त मनु प्रविश्य क्रिमयोऽन्तर्गतं दारुचूर्णं रसं वा मुष्णन्ति, एवं यूय मुदकं मुष्णीथ। अथ वा हे 'वेधसः' मेधाविनः! इति मरुद्विषय मेतत् सम्बोधनं स्यात्। यस्माद् यूय मेवमादिना प्रभावेन युक्ताः,

---

* "हनुरूपकसम्बन्धात्"—इति ख०।

† १भा० ४२० पृ० १५ पं०।

‡ "अधाजि शर्द्धो मरुतो यदर्णसं मोषथा वृक्षं कपनेव वेधसः। अधा सा नो अरमतिं सजोषसश्चारुं यन्तं मनुं नेषथा सुगम्॥"—इति ऋ० सं० ४, ३, १५, १।

§ "प्रशर्द्धायेति पञ्चदशर्चं दशमं सूक्तम्० ——०मारुत्या यजेत (आ० २. ११.) इति"—इति ऋ० सं० ५, ४, दशमसूक्तारम्भे सा० भा० द्रष्टव्यम्।

॥ "क्रमयः"—इति ख-पु०।

अथैतस्माद् कारणात् अस्माक मेव 'अरमतिम्' अलमतिम्, पर्याप्त-मतिम्, परिसमाप्तविद्यं यजमानं स्वकृतेनैव कर्मणा विद्यया वा यत्तम् इतो लोकादमुं लोकं 'सुगं' शोभनगमनं स्थानम्, यूय मपि 'अनु नेषथ' हे 'सजोषसः' सहप्रीताः! गमनानुग्रहेऽस्य वर्त्तध्व मित्यभिप्रायः। कथञ्च पुनर्नेषथ? 'चक्षुरिव' यथा गच्छतः पुरुषस्य चक्षुर्गमनानुग्रहे वर्त्तते, एव मनुनेषथैनं सुग मिति॥ एव मत्र वृत्तसम्बन्धात् "क्रिमयः = कम्पनाः"; ते हि वृत्तं सुषन्ति, मोष-यन्ति च कम्पयन्ति च यं खादन्ति, स्वय मेव वा कम्पन्ते चलन-स्वाभाव्यात्॥

"भाक्तजीकः(१९)"—इति *, अनवगतम्। "ऋजुभाः"—इत्य-वगमः। "प्रसिद्धुभाः"—इति पर्यायशब्देन निर्वचनम्॥ "देवो देवान् परिभू०——०वाचा यजीयान्" †। आङ्गस्य हविर्द्धानस्यार्षम्। त्रिष्टुप्। 'देवः' त्वं दानादिगुणयुक्तः। हे भगवन्! अग्ने! 'देवान्' 'परिभूः' सर्वतो भवसि। 'ऋतेन' यज्ञेन सहितः। तदुक्तम्,—अग्ने नेमिरराꣳ इव देवांस्त्वं परिभूरसि"—इति ‡। यस्य मेवम्प्रभावः, तं त्वां ब्रवीमि;—'वह' प्रापय 'नो हव्यं' देवान् प्रति। 'प्रथमः' यस्मात् त्वं मनुष्यहेतार मपेक्ष्य, तस्मादेतत् कुरु। 'चिकित्वान्' स्व मधिकार मेतं जानान इत्यभिप्रायः। 'धूमकेतुः' धूमप्रज्ञानः,

---

* १भा० ४२१ पृ० २ पं०।

† "देवो देवान् परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान्। धूमकेतुः समिधा भाक्तजीको मन्द्रो होता नित्यो वाचा यजीयान्॥"—इति ऋ० सं० ७, ९, ११, २।

‡ ऋ० सं० ४, १, ५, ६।

धूमध्वजो वा। 'समिधा' समिन्धनेन 'भाऋजीकः' प्रसिद्धभाः। 'मन्द्रः' मदनः, तर्पयिता देवानाम्। 'होता' आह्वाता 'नित्यः'; इतरं मनुष्यहोतार मपेक्ष्याग्निरेव नित्यो होता*। 'वाचा' वागधिदेवताभावेनावस्थितः†। 'यजीयान्' यष्टृतरः,—मनुष्यहोतार मपेक्ष्य। एव मत्र "भाऋजीकः = प्रसिद्धभाः"—इत्युपपद्यते॥

"रुजानाः(१०)"—इति ‡, एतदेकं पदम्, अनवगतम्। 'रुजत्यः'—इत्यवगमः। "नद्यो भवन्ति"—इत्यभिधेयवचनम्। "रुजन्ति कूलानि" —इति हेतुनिर्देशः॥ "अयोद्धेव दुर्मदः०——०इन्द्रशत्रुः" §। हिरण्यस्तूपस्यार्षम्। अग्निष्टोमे निष्केवल्ये शस्यते। 'अयोद्धा इव' यथा कश्चित् अयोद्धा, 'दुर्मदः' दुर्मत्तः—वाङ्मात्रसारः। आह,—स यथा किं करोति? इति, उच्यते;—'आ हि जुह्वे' आह्वयतीत्यर्थः। क माह्वयति? 'महावीरम्' महाविक्रान्तम्, 'तुविबाधम्' बहूनां शत्रूणां बाधितारम्, 'ऋजीषम्' ऋजीषिण मित्यर्थः। तदुक्तम्,—"ऋजीषी वज्री"—इति॥। त मेवम्प्रभाव मिन्द्र माह्वय मेघो 'नातारीत्' इतरवद्दुर्मदः न तर्तुं शक्नोति। 'अस्य' इन्द्रस्य 'समृतिं' समागमं 'वधानां' प्रहाराणाम्, अतरमाणः या एताः नद्यः, 'संरुजानाः' ऊर्मिभिः कूलानि वहन्त्यो रुजन्ति, ताः प्रति विशीर्यमानः

---

* "अग्निर्वै देवानां होता, तस्यैतदेोदपदनं यदुत्तरवेदी नाभिः"—इति ऐ० ब्रा० १, ५, १।

† "वाग् वा अनुष्टुप्"—इत्येवमादि च द्रष्टव्यम् ऐ० ब्रा० १, ५, १।

‡ १भा० ४२१ पृ० ६ पं०।

§ 'अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाध मृजीषम्। नातारीदस्य समृतिं वधानाꣳ सं रुजानाः पिपिष इन्द्रशत्रुः॥"—इति ऋ० सं० १, २, २७, १।

॥ पृ० १९ पृ० २२ पं०।

'पिपिषे' 'इन्द्रशत्रुः' इन्द्रस्य शातयितव्य इत्यर्थः। एव मत्र शब्दार्थोपपत्तेः "नद्यः = रुजानाः"—इत्युपपद्यते॥

"जूर्णिः(११)"—इति *, अनवगतम्। जवनाद् वा, द्रवणाद् वा, दवनाद् वा—इति शब्दसमाधयः। शक्तिः अभिधेया। "जवतेर्वा" गत्यर्थस्य जूर्णिः, "द्रवतेर्वा" गत्यर्थस्यैव जूर्णिः, "दुनोतेर्वा" हिंसार्थस्यैव जूर्णिः॥ "प्रप्रा वो अस्मे०——०जूर्णिर्न वंक्षति" †। पुरुच्छेपस्यार्षम्। अतिशक्वर्यतिच्छन्दाः। पृष्ठ्यस्य षष्ठेऽहनि निष्केवल्ये शस्यते। 'प्र'ब्रवीमि हे स्तोतारः! प्रब्रूत अस्मै। 'स्वयशोभिः' आत्मीयैः यशोभिः संयुक्ताः स्तुतीः। किं कारणम्? यस्मादेष 'इन्द्रः' स्तुतः 'उती' अविता, रक्षिता 'परिवर्गे' सङ्ग्रामे; यत्र हि प्राणाः परिवृज्यन्ते वियुज्यन्ते, तत्र अय मस्माकं रक्षिता भवति‡। 'दुर्मतीनाम्' पापमतीना मस्मच्छत्रूणां हन्ता भविष्यति। त मेत मेवङ्गुणविशिष्ट मिन्द्रम् 'दरीमन्' दारयितृतमं दुर्मतीनां पुनःपुनः स्तुतः। आह—कथं पुनरसावस्माकं रक्षिता भविष्यति? इति, उच्यते;—'स्वयं' 'सा'§ 'रिषण्यै' रेषणाय भविष्यति; किञ्चिदप्यकृत्वास्माक मिन्द्रप्रभावात् स्वय मेव विनङ्क्ष्यतीत्यभिप्रायः; का पुनरसौ? इति,—"या न उपेषे अत्रैः"। 'या' अस्मान् 'उपेषे' उप आगच्छति 'अत्रैः'

---

* १भा० ४२१ पृ० ८ पं०।

† "प्रप्रा वो अस्मे स्वयशोभिरूती परिवृग इन्द्रो दुर्मतीनां, दरीमन् दुर्मतीनाम्। स्वयं सा रिषण्यै या न उपेषे अत्रैः। क्षुते मंसुन्न वंक्षति क्षिप्रा जूर्णिर्न वंक्षति॥"—इति ऋ० सं० १, १, १७, १।

‡ "भविष्यति"—इति क।

§ 'सा शक्तिः शत्रुसेना वा'—इति ख०-पु०-टीप्पनी।

अदनैः रक्षोभिः प्रहिता, सा। "हते मन्त्र वक्षति"*। 'ईम्'—इत्यनर्थकः। 'हता' सती दम्भ्रेण 'न' 'वक्षति'†। अस्मान् प्रति 'क्षिप्ता' अपि च तैः पुनरादरेणापि रक्षोभिः 'जूर्णिः' जवसम्पन्नापि सती शक्तिः, 'न वक्षति'‡; अस्मान् प्रति न प्राप्स्यतीत्यर्थः॥ एव मत्र क्षेपणसम्बन्धात् "जूर्णिः = शक्तिः"—इत्युपपद्यते॥

"ओमना(२१)"—इति §, अनवगतम्। "अवनाय"—इत्यवगमः। "युवोः श्रियं०—०मोमना वां वयो गात्"॥। वसिष्ठ स्रोत मार्षम्। त्रिष्टुप्। आश्विनौ। प्रातरनुवाकाश्विनयोः शस्यते। हे अश्विनौ! 'युवोः श्रियम्'। युवयोः या श्रीः तां 'परि अवृणीत' सर्वतः सम्भजत 'योषा'। आह,—कतमा? इति, उच्यते;—'सूरो दुहिता' सूर्यस्य दुहिता। कदा तां श्रिय मुषःसञ्ज्ञिका इय मवृणीत? 'परितक्म्यायाम्' रात्र्याम्, ऊर्द्ध मर्द्धरात्रात्; सह्यश्विनोः कालः¶। किञ्च "यद् देवयन्त मवथः शचीभिः" यस्माद् 'देवयन्तं' देवान् यष्टु मिच्छन्तम् यजमानम् 'अवथः' 'शचीभिः' स्वैः कर्मभिः। तेन कारणेन 'वां' 'परि अगात्' परिगच्छति। सर्वासु दिक्षु यजमानैर्दीयमानं युवां प्रति 'वयः' "अन्नं" हविर्लक्षणम्, 'घ्रंसं परि' प्रति अहनि प्राप्ते इत्यर्थः। पूर्वाह्णोर्ह्यश्विनोर्यागकाल

---

*, †, ‡ अत्र सर्वत्रैव 'वक्ष्यति'—इति सयकारपाठः ख०-पुस्तके।

§ १भा० ४३१ष्ट० १०पं०।

‖ "युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम्। यद्देवयन्त मवथः शचीभिः परि घ्रंस मोमना वां वयो गात्॥"—इति ऋ० सं० ५, ५, १९,-४।

¶ "तयोः काल ऊर्द्ध मर्द्धरात्रात्"—इति दै० का० १२, १, १।

तदुक्तम्,—"प्रातर्यावाणा प्रथमा यजध्वम्"—इति *। कमर्थं पुरस्कृत्य वयोऽन्नं गच्छति? 'ओमना' "अवनाय" तर्पणायेत्यर्थः। एव मचाश्विनोर्हविःसम्प्रदानसम्बन्धात् 'ओमना'—इत्यस्य शब्दस्य "अवनाय"—इत्येष विपरिणाम उपपद्यते॥

के चिदत्र "अवनेनान्नम्"—इत्येव मधीयते भाष्यम्†। तेषां योजना,—"अवनेन" तर्पणेन भवतो निमित्तभूतेन 'पर्यगात्' "अन्नम्" इति॥

केचित् "अनेनान्नम्"—इत्येव मधीयते भाष्यम्‡। तेषाम्,—"अनेन" मन्त्रेण "अन्नं" परिगच्छतीति योजना स्यादिति॥ ५(४)॥

इति निरुक्तवृत्तौ एकादशाध्यायस्य (षष्ठाध्यायस्य)

प्रथमः पादः॥ ६, १॥

---

॥ द्वितीयः पादः॥

**उपलप्रक्षिण्युपलेषु प्रक्षिणात्युपलप्रक्षेपिणी वा (इन्द्र ऋषीन् पप्रच्छ दुर्भिक्षे केन जीवतीति तेषा मेकः प्रत्युवाच, शकटः§ शाकिनी गावो जाल मस्यन्दनं वन मुदधिः पर्वतो राजा दुर्भिक्षे नव वृत्तय इति सा निगद व्याख्याता)॥ १॥**

---

* ऋ० सं० ४, ४, १८, १।

† क-ख-ग-ङ-पुस्तकेषु दृश्यत एव।

‡ मत्सङ्कलीतपुस्तकेषु रोथ्सङ्कलीतपुस्तकेषु च नैवं क्वचिदपि।

§ "शकटं"—इति पाठः।

॥ वन्मनीचिक्रात्मगैतपाठो न दृश्यते क-ख-ग-पुस्तकेषु।

"उपलप्रक्षिणी(२२)"—इति *, अनवगतम्। "सक्तुकारिका" अभिधेया; सा हि "उपलेषु" यवान् "प्रक्षिणाति" हिनस्ति। एव मस्योपलप्रक्षिणीशब्दस्याप्रतीयमानार्थस्य विग्रहेणार्थप्रतीतिरवगमः। अथ "वा" "उपलेषु" "प्रक्षेपिणी" स्यात्, उपलेषु तण्डुलेषु भर्जनार्थं यवान् प्रक्षिपति; सा हि गौडेषु प्रसिद्धा। उपलान् वा यवेभ्यः प्रक्षिपति विचिनोतीत्यर्थः। सेयम् 'उपलप्रक्षेपिणी' सती 'उपलप्रक्षिणी'—इत्युच्यते॥ १ (५)॥

कारुरहं ततो भिषगुपलप्रक्षिणी नना। नानाधियो वसूयवोऽनु गा इव तस्थिमेन्द्रायेन्दो परि स्रव॥ कारुरहमस्मि कर्त्ता स्तोमानां ततो भिषक् तत इति सन्ताननाम पितुर्वा पुत्रस्य वोपलप्रक्षिणी सक्तुकारिका नना नमतेर्माता वा दुहिता वा नानाधियो नानाकर्म्माणो वसूयवो वसुकामा अन्वास्थिता स्मो गाव इव लोकमिन्द्रायेन्दो परि स्रवेत्यध्येषणा। आसीन ऊर्द्धो मुपसि क्षिणाति। उपस्थे प्रकलविद्वणिग् भवति कलाश्च वेद प्रकलाश्च। दुर्म्मिचासः प्रकलविन्मिमाना इत्यपि निगमो भवत्यभ्यर्द्धयज्वाभ्यर्द्धयन्यजति। सिषक्ति पूषा अभ्यर्द्धयज्वेत्यपि निगमो भवतीक्ष ईशिषे। ईक्षे हि वस्व उभयस्य राजन्नित्यपि

* १भा० ४२१५० १२पं०।

निगमो भवति। क्षीणस्य क्षयणस्य। मुहुः क्षीणस्याश्विना कण्वायेत्यपि निगमो भवति ॥ २ (६) ॥

"कारुरहं ततो०——०मेन्द्रायेन्दो परि स्रव"*। शिग्रुराङ्गिरसः, तस्येय मार्षम्। पङ्क्तिः। ऐन्द्री। स्वदुष्कृताशङ्कया किलापरिस्रवति सोमे पापसङ्कीर्त्तनादात्मशुद्धिर्भविष्यतीति मन्यमान आत्मान मेव निर्दिशन्नाह;—'अहं' तावत् कस्मिंश्चिदनादिकाले परेषां 'कारुः' स्तोमकर्त्ता स्तुतीनां प्रयोक्ता यज्ञकर्मणि होतृत्वेनावस्थितो वहिर्वा यज्ञात् प्रियवक्ता लौकिकाभिर्वाचोयुक्तिभिर्जिविकापरतया। 'ततः' मम पिता पुत्रो वा 'भिषक्' आसीत्, ब्रह्मा †; स हि प्रायश्चित्तरोगे उत्पन्ने यज्ञस्य भेषजं करोति। यदुक्तम्,—"भेषजकृतो ह वा एष यज्ञो यत्रैवंविद् ब्रह्मा भवति" ‡। इतरो लौकिको वा भिषक्। "ततः— इति सन्ताननाम; पितुर्वा पुत्रस्य वा" §। पितुर्हि सकाशात् पुत्रः तन्यते ‖। एव मपादाने कारके 'ततः' पिता; पुत्रः पुनः तन्यते अयं 'ततः', कर्मणि कारके।

---

* ऋ० सं० ७, ५, १५, १।

† ब्रह्मा ऋत्विगविशेषः, स च सर्वेषा ऋत्विजां कार्यद्रष्टा त्रिवेदविद् भवति। तथाच—"यदेतत् त्रय्यै विद्यायै शुक्रं तेन ब्रह्माण मकरोत्"—इत्यादि (ऐ० ब्रा० ५, ५, ७)। "समुद्रोऽसि विश्वव्यचाः"—इत्यादि (ना० ब्रा० १, १, ४.) च द्रष्टव्यम्। य० वा० सं० ५, ३२. अपि द्रष्टव्या।

‡ "यज्ञस्य ह्येष भिषग् यद् ब्रह्मा यज्ञायैव तद् भेषजं कृत्वा हरति"—इत्यादि ऐ० ब्रा० ५, ५, ९।

§ "स पितर मेत्याब्रवीत् त्वां ह वाव मह्यं ततोभाजयिष्यति"—इति ऐ० ब्रा० ५, २, ९। किञ्च "स तथेत्युक्ता पुत्र मामन्त्रयामास ततायं वै मह्यं त्वा ऽददादन्न त्वयाच्च मिमं यज्ञा इति"—इति ऐ० ब्रा० ७, २, २।

‖ "प्रजा वै तन्तुः; प्रजा मेवास्मा एतत् सन्ततोति"—इति ऐ० ब्रा० ३,१,११।

'उपलप्रक्षिणी' सवनीयानां* पेष्ट्री; "दासी पिनष्टि"—इति हुक्कम्। इतरेषां सक्तूनां पेष्ट्री। 'ननां' "माता" ममार्षीत्; सा हि स्तनसम्प्रदानाद्युपकारार्थं मपत्यं प्रति नता भवति। "दुहिता वा" ननां स्यात्; सापि हि परिचर्य्यार्थं पितुः प्रक्रीभवति†। यस्मिन् पक्षे पिता भिषक्, तस्मिन् पक्षे ननां-शब्देन मातोच्यते; यस्मिन् पुनः पक्षे पुत्रो भिषक्, तस्मिन् पक्षे ननां-शब्देन दुहितोच्यते। ते वयमेव मनादिकाले कस्मिंश्चिद् जीविकाप्रधानाः सन्तः 'नानाधियः' "नानाकर्माणः", यथोक्तेन क्रमेण कारुरहमित्येवमादिना 'वसूयवः' "वसुकामाः"; कथं नाम वसु लभेमहि, येन प्राणधारणं स्यादिति। एतेनाभिप्रायेण "अनु गा इव तस्थिम्" अन्वास्थिताः स्मो लोकमिमम्। कथम्पुनरन्वास्थिताः स्मः? इति,—गाव इव; यथानेकैरुपकारप्रकारैर्लोकमन्वास्थिता गावः, एवमन्वास्थिताः स्मो वयमपीमं लोकम्। स त्वम् 'इन्दो!' विज्ञायैतदनेन स्वदुरितानुकीर्त्तनेन क्षयितकल्मषाः स्म इति मन्यमानः, एतस्माद् दशापविद्याद् 'इन्द्राय' इन्द्रार्थम् 'परि स्रव'; अस्माभिरेव मध्येष्यमाणः कथं वा नपरिस्रविष्यसीत्यभिप्रायः॥ एवं च "उपलप्रक्षिणी = सक्तुकारिका", शब्दार्थोपपत्तेरित्युपपद्यते॥

"उपसि(९४)"—इति ‡, अनवगतम्। "उपस्ये"—इत्यवगमः।

---

* 'धाना-सक्तु-करम्भादीनाम्'—इति ख० पु० टीप्पनी। "तथा हि सवनानां रूपम्"—इत्यादि ऐ० ब्रा० २, ३, ५ द्रष्टव्यम्।

† "ननां" १भा० ७४, ९० पृ० द्र०।

‡ १भा० ४२१ पृ० १पं०।

"पत्तो जगार०——०मन्वेति भूमिम्" *॥ वसुकस्य इन्द्रपुत्रस्य आर्षम्। ऐन्द्री। त्रिष्टुप्। महाव्रते मरुत्वतीये शस्त्रे शस्यते। 'पत्तः' पादतः रश्मिभिः इतः लोकात् यदादित्यो 'जगार' गृहीत्युदकम्, तद् इन्द्रो मध्यस्थाने 'आसीनः' 'प्रत्यञ्चम्' आत्मानं प्रत्यञ्चितं प्राप्तम्, तेन भगवतादित्येन 'शीर्ष्णा' उत्सृष्टम् 'अत्ति' स्वीकरोतीत्यर्थः। तदेव मधौ स्वीकृत्य चतुर्षु वार्षिकेषु मासेषु पृथिवीलोकनिवासिनां जनानां 'शिरः प्रतिदधौ' शिरस उपरि दधाति। 'वरूथं' वरतर मुदकम्†। एव मय मिन्द्रो जगदुपकाराय प्रतिसंवत्सरम् एतां द्युलोकाख्यां गाम् आदित्योपसृष्टाम्, 'ऊर्द्धाम्' उपर्यवस्थिताम्, अन्तरिक्षलोके आसीनः 'उपसि' उपस्थे, आत्मन उपस्थाने, अन्तरिक्षलोके 'क्षिणाति' प्रक्षारयति। यच्च प्रक्षारयति, तदिमं लोकं प्रति पुनरुत्सृजति। तत् तेनोत्सृष्टं 'न्यक्' नीचैर्वर्षभावेन आगच्छति। ततः 'उत्तानां भूमिं' यथानिम्नम् 'अन्वेति'॥ एव मत्र "उपसि"—इत्यस्य शब्दसारूप्यात् अर्थोपपत्तेश्च "उपस्थे"—इत्येवार्थप्रतीतिः॥ "अपि वा शिर आदित्यो भवति"—इत्युक्तम्‡, तस्मात् 'शीर्ष्णा'—इत्यत्रोपपद्यते शिरस्त्व मादित्यस्य॥

"प्रकलवित्(२५)"—इति§, अनवगतम्। 'प्रकलावित्'—इत्यवगमः। "वणिग्भवति"—इत्यभिधेयवचनम्। स हि "कलाश्च वेद प्रकलाश्च"।

---

* "पत्तो जगार पत्यञ्च मत्ति शीर्ष्णा शिरः प्रतिदधौ वरूथम्। आसीन ऊर्द्धा-मुपसि क्षिणाति न्यङ्ङुत्ताना मन्वेति भूमिम्॥"—इति ऋ० सं० ७, ७, १७, १।

† १भा० २०६ पृ० (१७), ३११पृ० (१७) द्रष्टव्यम्।

‡ २भा० ४११पृ० ११पं०।

§ १भा० ४३१ पृ० ३पं०।

कलासम्बन्धेनैवेह प्रकला उच्यन्ते, कला एव ह्यपेक्ष्य प्रकला भवन्तीति; यथा,—अधिष्ठान मपेक्ष्य प्रत्यधिष्ठान मिति। "इन्द्रेणैते हत्सवो॰ ——॰ भोजना सुदासे" *। वसिष्ठस्यार्षम्। त्रिष्टुप्। ऐन्द्री। महाव्रते निष्केवल्ये दक्षिणे पक्षे शस्यते। 'इन्द्रेण' 'एते' 'हत्सवः' दारयितव्याः मेघाः, 'वेविषाणाः' पुनः पुनः व्याप्यमानाः, 'आपः न' आप इव 'सृष्टाः' केन चित्, 'अधवन्त' अगच्छन्। 'नीचीः' नीचैरित्यर्थः। उच्चैर्गतय एते सन्तः इन्द्रबलान्नीचैर्गतयः संवृत्ता इत्यभिप्रायः। किञ्च; 'दुर्मिचासः' सुमिचाण्यपि सन्तो ये अतिसन्धानपराः, ते पुनर्दुमिचाः। के पुनस्ते? इति,—'प्रकलविदः' वणिज इत्यर्थः। ते यथा अभिद्रोहबुद्ध्या किञ्चिद् द्रव्य मल्पं ददति, एव मेते मेघाः पूर्वं मल्पोदकदातारो भूत्वा अधुनेन्द्रबलोद्यताः सन्तः 'जङ्घः' 'विश्वानि' सर्वाण्यशेषाणि 'भोजना' भोजनान्युदकानि † 'सुदासे' राजनि, यजमाने वा कल्याणदाने ‡॥ एव मल्पोदकाल्पदानोपमासम्बन्धात् "प्रकलविद् = वणिग्"—इत्युपपद्यते॥ अवयवप्रत्यवयवादिकलाः प्रकला-शब्देनोच्यन्ते, तेषु च वणिगेव निपुणो भवति, गणितकुशलत्वात्; न तथान्य इति॥

"अभ्यर्दयज्वा(१९)"—इति §, अनवगतम्। अभ्यर्दयन् अभिवर्दयन्

* "इन्द्रेणैते हत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः। दुर्मिचासः प्रकलविन्मिमाना जङ्घर्विश्वानि भोजना सुदासे"—इति ऋ० सं० ५, २. २७, ५।

† १भा० २११ पृ०, २२७ पृ० धननामसु (१८); २भा० ३९१ पृ० ११पं० "भोजनानीति वा धनानीति वा"।

‡ "एतेन ह वा ऐन्द्रेण महाभिषेकेण वसिष्ठः सुदासं पैजवन मभिषिषेच तस्मादु सुदाः पैजवनः समग्रं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"—इति ऐ० ब्रा० ८, ४, ७।

§ १भा० ४३१ पृ० ८ पं०।

यो यजति। अभ्यर्द्धयतिरत्र दानार्थः। "मिम्यक्ष येषु ०——० अध्वनि प्रविक्ते"*। ऋजिश्वा नाम भारद्वाजः, तस्येयं मार्षम्। वैश्वदेवे सूक्ते। त्रिष्टुप्। हे मरुतः! 'येषु' युष्मासु 'रोदसी' देवौ, रुद्रस्य पत्नी 'मिम्यक्ष' पुनः पुनरेकतां गच्छति। "दृयक्षति, मियक्षति"—इति गति गतिकर्मसु पठितम्†। यश्च युष्माकं मध्येऽवस्थितः 'सिषक्ति' सेवते, 'पूषा' सूर्यः रश्मिभिः 'अभ्यर्द्धयज्वा' अभिवर्द्धदानः। ते यूयमेवङ्गुणयुक्ता उच्यध्वे। श्रुत्वा 'हवम्' आह्वानम् 'यत् ह याथ' यदा यूयं मायाथ अस्मान् प्रति, तदा 'भूमा' बहूनि बलानि, ध्वजाग्राणि वा 'रेजन्ते' कम्पन्ते। एतस्मिन् 'अध्वनि' अन्तरिक्षे। 'प्रविक्ते' विविक्ते, विस्तीर्णे इत्यर्थः॥ एव मत्र "पूषा = अभ्यर्द्धयज्वा"; स हि स्वरश्मिपोषं पुष्यन्, भूतान्याभिमुख्येन वर्द्धा योजयन्नभिमतानार्थान् भूतेभ्यो ददाति॥

"ईक्षे(१७)"—इति ‡, अनवगतम्। "ईशिषे"—इत्यवगमः। "नृवत्त इन्द्र नृतमाभि ०——० महि स्थूरं बृहन्तम्"§। भरद्वाजस्यार्षम्। त्रिष्टुप्। व्यूढस्य दशरात्रस्याष्टमेऽहनि मरुत्वतीये शस्त्रे शस्यते। 'नृवत् ते' यथा के चिदुत्पन्नप्रणयाः कञ्चिदीश्वरं मनुष्यं स्तुतिभिः सम्भजेरन्, एवं वयं त्वां 'नृतमाभिः' मनुष्यतमयोग्याभिः 'ऊती' अवन्तीभिः तर्पयन्तीभिः स्तुतिभिः 'वंसीमहि' सम्भजेमहि।

---

* "मिम्यक्ष येषु रोदसी न देवी सिषक्ति पूषा अभ्यर्द्धयज्वा। श्रुत्वा हवं मरुतो यद्व याथ भूमा रेजन्ते अध्वनि प्रविक्ते॥"—इति ऋ० सं० ४, ८, ८, ५।

† १भा० २६९, २७० पृ० गतिकर्मसु २०, २१ पं० (३१), (३२) टीप्पनी द्रष्टव्या।

‡ १भा ४२२ पृ० १६ पं०।

§ नृवन्त इन्द्र नृतमाभिरूती वंसीमहि वाममा श्रोमतेभिः। ईक्षे हि वस्व उभयस्य राजन् धा रत्नं महि स्थूरं बृहन्तम्॥"—इति ऋ० सं० ४, ९, ८, ५।

'वामं पार्थिवं' वननीयं धनम्। 'श्रीमतेभिः' श्रवणीयतमैः शब्दैः। केन पुनरर्थेन वंसीमहि? इतः,—यस्मात् 'ईट्टे' ईशिषे, त्वम्, 'वसोः' वसुनः, धनस्य; 'उभयस्य' उभयलक्षणस्य,—दिव्यस्य पार्थिवस्य च वसुनः। त्वम्, हे राजन्! 'धाः रत्नम्' देहि धनम्। कीदृशं पुनर्देहि? 'महि' महत्, वसुभूतम्; 'स्थूरं' बहु बृहन्तञ्च बहुकालं यत् स्यात्, तद् देहि॥ एव मत्र वसुसम्बन्धात् 'ईट्टे'—इत्येष शब्दः "ईशिषे"—इत्येव मुपपद्यते॥

"क्षोणस्य(२८)"—इति*, अनवगतम्। "क्षयणस्य"—इत्यवगमः। "युवं श्वावाय०——० अध्यधत्तम्" †। कक्षीवत आर्षम्। आश्विनौ। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। 'युवं' युवां हे 'अश्विनौ!' 'श्वावाय' राज्ञे 'रुशतीं' ज्वलितरूपां श्रियम् 'अदत्तम्'। युवा मेव च महतः 'क्षोणस्य' "क्षयणस्य" निवासस्य दातारौ 'कण्वाय' ऋषये। किञ्च, 'प्रवाच्यं' प्रकर्षेण वचनीयं श्रोतव्यं तत् 'वाम्' युवाभ्यां 'कृतम्', हे 'वृषणौ!' वर्षितारौ यत् 'नार्षदाय' ऋषये वधिरीभूताय 'श्रवः' श्रोत्रम् 'अध्यधत्तम्' अधिकं दत्तवन्तौ स्थः॥ एव मत्र दानसम्बन्धाधिकाराच्छब्दसारूप्याच्च "क्षोणस्य = गृहस्य"—इति प्रतीयत॥

"क्षोणस्य(२८)"—इति एके मन्यन्ते। तत् पुनरनुपपन्नम्, "क्षयणस्य"—इति हि भाष्यकारो निराह॥ २ (६)॥

---

* १मा० ४३१ पृ० १६ पं०।

† युवं श्वावाय रुशतीं मदन्तं मृक्षः क्षोणस्याश्विना कण्वाय। प्रवाच्यं तद् वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तम्॥"—इति ऋ० सं० १, ८, १४, ३।

अस्मे ते बन्धुः* । वयं मित्यर्थः। अस्मे यातं नासत्या सजोषाः । अस्मानित्यर्थः । अस्मे समानेभिर्वृषभ पौंस्येभिः । अस्माभिरित्यर्थः । अस्मे प्र यन्धि मघवन्नृजीषिन्। अस्मभ्यं मित्यर्थः। अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु। अस्मदित्यर्थः । ऊर्व इव पप्रथे कामो अस्मे। अस्माकं मित्यर्थः । अस्मे धत्त वसवो वसूनि । अस्मास्वित्यर्थः । पाथोऽन्तरिक्षं पथा व्याख्यातम्। श्येनो न दीयन्नन्वेति पाथ इत्यपि निगमो भवत्युदक मपि पाथ उच्यते पानात्। आ चष्ट आसां पाथो नदीना मित्यपि निगमो भवत्यन्न मपि पाथ उच्यते पानादेव। देवानां पाथ उप वक्षि विद्वानित्यपि निगमो भवति। सवीमनि प्रसवे। देवस्य वयं सवितुः सवीमनीत्यपि निगमो भवति। सप्रथाः सर्वतः पृथुः। त्व मग्ने सप्रथा असीत्यपि निगमो भवति। विद्थानि वेदनानि। विद्थानि प्रचोदयन्नित्यपि निगमो भवति ॥ ३ (७) ॥

"अस्मे(२९)"—इति †, एतत् पदं सर्वविभक्त्यन्तम्। तस्मादनेकार्थम्। एक मेव ह्येतच्छब्दरूपं सप्तस्वपि विभक्त्यर्थेषु वर्त्तते, प्रकरणादिवशात् तस्य नियमो भवति। तद्यथा,

---

* "अस्मे ते बन्धुः" ग०।

† १भा० ४२२ पृ० २पं०।

प्रथमायास्तावत्,—"अस्मे ते बन्धुः"*; "वय मित्यर्थः"। "तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना क्रीयसे सहस्रपोषं पुष्यन्ती। अस्मे ते बन्धुः पुषेयम्"—इति †। सोमक्रयणस्य द्रव्यापाकरणमन्त्रेषु अजायाः एषोऽपाकरणमन्त्रः। सोच्यते;—हे अजे! 'तपसः' अग्नेः त्वं 'तनूः' शरीरम् 'असि'; "अग्नेर्ह्येषा अजा"—इतिहैतुकम्‡, "स एता एभ्यः प्ररोचयत्"—इति § च, तस्मादुपपद्यते अग्नेस्तनुत्व मजायाः। 'प्रजापतेः' 'वर्णः' वरणीया त्वम्। 'सहस्रपोषम्' अस्माकम्। 'पुष्यन्ती' एतस्मिन् कर्मणि अङ्गभाव मुपेहि। एव मजा मभिष्टुत्य अधुना सोमं ब्रवीति;—हे सोम! अनेन परमेण श्रेष्ठेन पशुना 'क्रीयसे'। किं कारणम्? 'अस्मे' "वयम्" 'ते' तव 'बन्धुः' बन्धवः, विनियोक्तार इत्यभिप्रायः॥ एव मत्र प्रथमान्तेन 'बन्धु'शब्देन सामानाधिकरण्यात् 'अस्मे'—इत्यस्य "वयम्"—इत्येवं प्रथमया विपरिणाम उपपद्यते॥

द्वितीयायास्तावत्,—"अस्मे यातं नासत्या सुजोषाः"; "अस्मानित्यर्थः"। "आ ग्नेनस्य०——० उषसो व्युष्टौ"॥। कवीवत आर्षम्। त्रिष्टुप्। आश्विनी। प्रातरनुवाकाश्विनयोः शस्यते। 'आ

---

* य० वा० सं० ४, २२।

† "अग्नेस्तनूरसि"—इति च द्रष्टव्यम् (य० वा० सं० १, १५; ४, १)।

‡ "आग्नेयो वाव सर्वः पशुः"—इति ऐ० ब्रा० २, १, १।

§ "अतएव कृष्णग्रीव आग्नेयो ररोट पुरस्तात्"—इति य० वा० सं० २४, १।

॥ "आ ग्नेनस्य जवसा नूतनेनास्मे यातं नासत्या सुजोषाः। हुवे हि वां मध्वा रातहव्यः शश्वत्तमाया उषसो व्युष्टौ॥"—इति ऋ० सं० १, ८, १९, १।

यातम्' 'अस्मे' "अस्मान्" प्रति। हे 'नासत्या' नासत्यौ! 'अश्विना' अश्विनौ! कथञ्च पुनरायातम्? 'श्येनस्य' पक्षिणः 'जवसा' जवेन वेगेन, 'नूतनेन' नवतमेन; परिश्रान्तस्य हि श्येनस्यापि मन्दतरो जवो भवति। 'सजोषाः' मया सह प्रीयमाणौ, परस्परेण वा। 'वां' युवाम्। कस्मात्पुनरेवं ब्रवीमि? इतः,— यस्मात् 'हवे हि वाम्' आह्वयामि युवाम्। न वृथैव आह्वयामि; किन्तर्हि? 'रातहव्यः' दत्तहव्यः; युवा मुद्दिश्य 'उत्कृष्ट मेतद्धविः मया। तौ युवा मेतद् विज्ञाय 'अश्वत्तमायाः' शाश्वतिकतमायाः 'उषसः' 'व्युष्टौ' व्युच्छेदन-काले आह्वयमानावागच्छतम्॥ एव मत्र "आयातम्"—इत्यनेन सम्बन्धात् 'अस्मे'—इत्यस्य "अस्मात्"—इत्येवं द्वितीयया विपरिणाम उपपद्यते॥

द्वतीयायास्त्वावत्,—"अस्मे समानेभिर्वृषभ पौंस्येभिः";"अस्माभिरित्यर्थः"। "भूरि चकर्थ०——०यद्वशाम"*। इन्द्रमरुत्संवादे मरुता मार्षम्। ऐन्द्री। त्रिष्टुप्। महाव्रते च व्यूढस्य दशरात्रस्य सप्तमेऽहनि मरुत्वतीये शस्यते। इन्द्र उच्यते,—स त्वं 'भूरि' बहु 'चकर्थ' कृतवानसि कर्म, तस्मिंस्तस्मिन् सङ्ग्रामे। तत्पुनः 'युज्येभिः' एव 'अस्मे' "अस्माभिः" एव संयुक्तः, 'समानेभिः' समानैः, 'पौंस्येभिः' बलैः। हे 'वृषभ' वर्षितः! नैकाकीत्यभिप्रायः। किञ्च; वय मपि 'भूरीणि' बहूनि कर्माणि 'कृणवाम' तस्मिंस्तस्मिन् सङ्ग्रामे। हे

---

* भूरि चकर्थ युज्येभिरस्मे समानेभिर्वृषभ पौंस्येभिः। भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यदशाम॥"—इति ऋ० सं० २, ३, २५, १।

'ग्रविष्ठ' बलिष्ठ! 'इन्द्र!'। न च केवलं वाङ्मात्रेणैतद् ब्रूमः; किन्तर्हि? 'क्रत्वा' एव कर्मणैव। तत् सम्पादयामः, 'यद् वशामः' यत् कामयामहे इत्यर्थः॥ एव मत्र "युज्येभिः"—इत्यनेन सम्बन्धात् 'अस्मे'—इत्यस्य "अस्माभिः"—इति तृतीयया विपरिणाम उपपद्यते॥

चतुर्थ्यास्तावत्,—"अस्मे प्र यन्धि मघवन्नृजीषिन्"; "अस्मभ्य मित्यर्थः"। "अस्मे प्र यन्धि०——०इन्द्र गिरिन्"*। घोरस्या-ङ्गिरसस्येय मार्षम्। त्रिष्टुप्। ऐन्द्री। जातकर्मणि विनियुक्ता। 'अस्मे' "अस्मभ्यम्" 'प्र यन्धि' देहि। हे 'मघवन्' धनवन्! 'इन्द्र!' 'ऋजीषिन्!' 'रायः' धनस्य, 'विश्ववारस्य' सर्वा आपदो यद् धनं वारयति तस्य, 'भूरेः' बहुनः, यस्य अधिपतिः त्वम्, तस्य अभिल-षितां मात्रां देहि। किञ्च; 'अस्मे' "अस्मभ्यम्" 'शतं शरदः' शतं वर्षाणि 'जीवसे' जीवनाय 'धाः' देहि। 'अस्मे' "अस्मभ्यम्" 'वीरान्' पुत्रान् 'शश्वतः' दीर्घायुषः देहि। हे 'गिरिन्!'॥ एव मत्र "अस्मे प्र यन्धि"—इत्यनेन याच्ञार्थेन सम्बन्धात् 'अस्मे'—इत्यस्य "अस्म-भ्यम्"—इति चतुर्थ्या विपरिणाम उपपद्यते॥

पञ्चम्यास्तावत्,—"अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु"; "अस्म-दित्यर्थः"। "तस्य वयं०——०सनुतर्युयोतु"†। गर्गस्य भारद्वाज-स्यार्षम्। षष्ठे मण्डले ऐन्द्री, त्रिष्टुप्। पुनरपि चेय मेव काक्षीवतः

---

* "अस्मे प्र यन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः। अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र गिरिन्॥"—इति ऋ० सं० ३, २, २०, ५।

† "तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम। स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु॥"—इति ऋ० सं० ४, ७, २२, ६।

सुकीर्त्तिनामा, तेन दशमे मण्डले दृष्टा। षष्ठे चाहनि पृष्ठ्यस्य, विश्वजिति चेयं तृतीये सवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता। 'तस्य' इन्द्रस्य 'यज्ञियस्य' यज्ञार्हस्य 'वयम्' 'सुमतौ' शोभनेऽध्यवसाये 'स्याम'। 'अपि' चास्य 'भद्रे' भन्दनीये स्तुत्ये 'सौमनसे' शोभनसङ्कल्पे मनसि नित्य मेव स्याम। 'सः' 'सुत्रामा' इन्द्रः, 'स्ववान्' धनवान्, 'अस्मे' "अस्मत्तः" 'आराचित्' दूरतर मपनीय 'द्वेषः' द्वेषं पापम्, ततः 'सनुतः' स्वन्तर्हितं कृतं यथा तं न पश्येम तथा; 'युयोतु' नाशयत्वित्यर्थः। एव मत्र 'द्वेषः'—इत्यनेन सम्बन्धात् 'अस्मे'—इत्येतस्य "अस्मत्"—इत्येवं पञ्चम्या विपरिणाम उपपद्यते॥

षष्ठ्यास्तावत्,—"ऊर्व इव पप्रथे कामो अस्मे"; "अस्माक मित्यर्थः"। "आ नो भर ० —— ० वसूनाम्"*। "उदुहरत्तः"†—इत्यस्या एवेय मनन्तरा। 'आ भर' आहर। 'नः' अस्मभ्यम्। हे 'इन्द्र!' 'भगम्' भजनीयं धनराशिम्, 'द्युमन्तं' दीप्तिमन्तम्। आहृत्य चास्मभ्यं देहि। तथा प्रभूतं देहि, यथा भुक्तशेषस्य 'प्ररेके' अतिरेके सति 'नि दधीमहि'। 'ते' तव स्वभूतस्य 'देष्णस्य' दानस्येत्यर्थः। कस्मात् पुनरेवं ब्रवीमि,—प्रभूतं देहीति? इतः,— यस्मात् 'ऊर्व इव' यथा वडवामुखेऽवस्थितः ऊर्वोऽग्निः, अपः पिबन् 'पप्रथे' प्रथते, एव मयम् 'अस्मे' "अस्माकम्" 'कामः' प्रथते विस्तीर्यते। 'तम्' 'आ' आभिमुख्येन 'पृण' पूरय 'वसूनाम्' हे 'वसुपते!'॥ एव मत्र

---

* "आ नो भर भगं मिन्द्र द्युमन्तं नि ते देष्णस्य धीमहि प्ररेके। ऊर्व इव पप्रथे कामो अस्मे न मा पृण वसुपते वसूनाम्॥"—इति ऋ० सं० ३, ९, ४, ४।

† पृ० १३७ ५० ४ प० द्रष्टव्या।

'कामः पप्रथे'—इत्यनेन सम्बन्धात् आत्मविषयत्वात् आशिषः 'अस्मे' —इति "अस्माकम्"—इत्येवं षष्ठ्या विपरिणाम उपपद्यते॥

सप्तम्यास्तावत्,—"अग्ने धत्त वसवो वसूनि" *। अत्र 'धत्त'— इत्यनेन सम्बन्धात् 'अस्मे'—इत्यस्य "अस्मासु"—इत्येवं सप्तम्या विपरिणाम उपपद्यते॥ सप्तदशेऽध्याये "सुगावो देवाः सुपथाः"—इति शेष उच्यत एव †॥

"पाथः(२०)"—इति ‡, अनवगतम्, अनेकार्थञ्च। "अन्तरिक्षम्" तावत् पाथ उच्यते। तत् पुनरेतत् "पथा व्याख्यातम्"; "पन्थाः पततेर्वा"—इत्यत्र §। "यत्रा चक्रुरमृता०——०मित्रावरुणोत हव्यैः"॥ वसिष्ठस्यार्षम्। अस्याः प्रथमोऽर्द्धर्चः सौर्य इति प्रतिजज्ञे शौनको मैत्रावरुणो द्वितीय इति। एवं ह्याह;—"ऋचः सौर्यो हि गीयन्त उद्वेतीत्यर्द्धपञ्चमाः"—इति ¶। 'यत्र' यदा 'अग्ने' सूर्याय 'चक्रुः' कृतवन्तः 'अमृताः' देवाः 'गातुं' गमनमार्गम्, उदयादारभ्य यावदस्तमय इति, यदाचाय मारभ्यः सूर्यः 'श्येनो न' श्येन इव 'दीयन् अन्वेति' दीयमानः गच्छन् 'पाथः' "अन्तरिक्षम्" तेन मार्गेण। अथ तदा आरभ्य 'प्रति विधेम' 'वां' प्रतीत्य चेतसा युवाम्।

---

* य० वा० सं० ८, १८।

† यास्कीयस्यैतस्य भाष्यस्य द्वादशे इति यावत्। प० दै० का० १९, ४, ८।

‡ १भा० ४२३ पृ० ११ प०।

§ २भा० २४९ पृ० ५ पं०।

‖ "यत्रा चक्रुरमृता गातुमग्ने श्येनो न दीयन्नन्वेति पाथः। प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः॥—इति ऋ० सं० ५, ५, ५ ५।

¶ ऋ० सं० ७, ४, ८. ऋक्कारम्भे सायणीयं द्र-व्यम्।

'उदिते' सूर्ये 'विधेम' परिचरेम वयम्। हे 'मित्रावरुणौ!' 'नमोभिः' नमस्कारैः 'उत' अपि च 'हव्यैः'॥ एव मत्र 'श्येनो न दीयन्नेति पाथः'—इत्यनेन सम्बन्धात् "पाथः = अन्तरिक्षम्"—इत्युपपद्यते॥

अपठित मेतदन्तरिक्षनामसु *, इति अप्रतीतार्थम्। अथ वैव मन्यथा स्यात्;—प्रथमस्यार्द्धर्चस्यार्थः सूर्यप्रधानत्वात् उत्तरार्द्धर्चो निराकाङ्क्ष एव। 'यत्र' यस्मिन् नभसः प्रदेशे 'गातुं' कृतवन्तः, 'अमृताः' देवाः सूर्यश्च। तेन एव प्रदेशेन 'श्येनः' इव 'दीयन्नेति' अनुगच्छति 'पाथः' न तां भयदा मीश्वरोऽपि सन्नतिक्रामतीत्यर्थः॥

"उदक मपि पाथ उच्यते"; "पानात्"। "अभि वो देवीं॰ ——॰ उग्रः सहस्रचक्षाः" †। वसिष्ठस्यार्षम्। ब्रूढस्य दशराचस्य चतुर्थेऽहनि तृतीये सवने वैश्वदेवशस्त्रे शस्यते। हे ऋत्विजः! 'अभि' वदामि 'वः',—एनां 'देवीं धियं' यूयम् एतान् विश्वान् देवान् 'प्रति दधिध्वम्' धारयध्वम्। किञ्च; "प्र वो देवत्रा वाचं कृणुध्वम्"। 'प्र' ब्रवीमि च एतत् 'देवत्रा' देवगामिनीम् एतां 'वाचं' स्तुतिलक्षणाम् 'कृणुध्वम्'। किञ्च; "आ चष्ट आसां पाथो नदीनां वरुणः"। वरुणोऽपि देवः आदित्यः, 'आचष्टे' इव, प्रकथ-

---

* १भा॰ २४ पृ॰ १च॰ १ख॰ (१)—(१९)।

† "अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम्॥ आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः॥"—इति ऋ॰ सं॰ ५, १, २५, ९-१०। न लोकेय मृक् चतुष्पदा; अपि त्रिमे द्वे द्विपदे, "प्र शुक्रा पञ्चाधिका वैश्वदेवं ह्यार्षा एकविंशतिर्द्विपदाः"—इत्यनुक्रमणीवचनात्, "षोडशिन्या धूर्ष्वत्रा इति द्विपदा (९, २०)"—इत्याश्वलायनशासनाच्चेति।

यतीव जनानां वर्षम्, उत्सृजन् 'आसां' 'नदीनां' स्वभूतम्, उदकं 'पायः'। किंलक्षणः पुनर्वरुणः? आचष्टे;—'उग्रः' उद्गूर्णः, 'सहस्वत्तमः' बलवदर्शन इत्यर्थः॥ एव मत्र 'पायः'-शब्देन "उदकम्" —इत्युच्यते, नदीसम्बन्धात्॥

"अत्र मपि पाथ उच्यते"; "पानादेव"। "वनस्पते रशनया ०——० द्यावापृथिवी हवं मे" *। आप्री-सूक्ते वाध्यश्वस्य सुमिचस्येय मार्षम्। हे 'वनस्पते!' 'रशनया' 'नियूय' निबध्य 'देवानाम्' एतत् स्वभूतं 'पायः' अन्नं हविर्लक्षणम् 'उप वक्षि' समीपं वहसि 'विद्वान्' जानानः। कस्मात् पुनरेवं ब्रवीमि? उतः;—यस्मात् 'खदाति' खादयति, सः 'देवः' त्वयोढ़ानि एतानि 'हवींषि'। यानि 'क्षणवत्' अकरोत्, एष यजमानः। वनस्पति मेव मुक्त्वा पुनर्द्यावापृथिव्यावाह;— हे 'द्यावापृथिव्यौ!' 'वां' युवा मपि 'अवताम्' अवगच्छताम्, एनं 'हवम्' आह्वानं 'मे' मम॥

"सवीमनि(२१)"—इति †, अनवगतम्। "प्रसवे"—इत्यवगमः। "देवस्य वयं०——० चाग्नि भूर्मनः" ‡। भरद्वाजस्यार्षम्। जगती। गवामयने चतुर्विंशं नाम द्वितीय महः, तत्रेयं तृतीयसवने वैश्वदेवशस्त्रे शस्यते। 'देवस्य' 'सवितुः' सर्वार्थप्रसवितुस्तस्य वयं 'सवीमनि' 'श्रेष्ठे' प्रसवे सर्वार्थाभ्यनुज्ञाने, नित्यकालं 'वयम्' एव 'स्याम'।

---

* "वनस्पते रशनया नियूया देवानां पाथ उप वक्षि विद्वान्। खदाति देवः क्षणवदृतावृधं द्यावापृथिवी हवं मे॥"—इति ऋ० सं० ८, १, ११, ५।

† १भा० ४३३१० १८ पं०।

‡ "देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनश्च दावने। यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः॥"—इति ऋ० सं० ५, १, १५, १।

'वसुनश्च' धनस्य च 'दानें दाने श्रेष्ठे प्रवृत्ते, वय मेव लब्धारः स्याम। हे सवितः! 'यः' त्वं 'विश्वस्य' सर्वस्यास्य 'द्विपदः' मनुष्यादेः, 'यः' 'चतुष्पदः' गवादेः, 'भूमनः' भूम्नः, 'निवेशने' च स्थितौ, 'प्रसवे च' सृष्टौ, प्रभुः 'असि'*। तस्य तव एवङ्गुणविशिष्टस्य प्रसवे च दाने च वय मेव अङ्गभूताः स्यामेति॥ एव मत्र 'सवितुः'—इत्यनेन सम्बन्धात् 'सवीमनि'—इत्यस्य "प्रसवे"—इत्येवं विपरिणाम उपपद्यते॥

"सप्रथाः(१२)"—इति †, अनवगतम्। "सर्वतः पृथुः"—इत्यवगमः। "त्व मग्ने सुप्रथा०——० वि तन्वते"‡। सुतम्भरस्येय मार्षम्। गायत्री। आग्नेयी। प्रातरनुवाकाश्विनयोः शस्यते। हे अग्ने! त्व मेव 'सप्रथाः' "सर्वतः पृथुः" विस्तीर्णः। 'जुष्टः' च आसेवितो यजमानैः। 'होता' आह्वाता देवानां भवसि। 'वरेण्यः' वरणीयः सर्वथापि। किं बहुना 'त्वया' एव हेतुभूतेनैते यजमानाः एतं 'यज्ञं' 'वितन्वते' विविधं तन्वते, विस्तारयन्ति। एव मत्र शब्दसारूप्यादर्थोपपत्तेश्च "सप्रथाः = सर्वतः पृथुः"—इत्युपपद्यते॥

"विदथानि(१३)"—इति §, अनवगतम्। "वेदनानि"—इत्यवगमः। "होता देवो०——० प्रचोदयन्"॥। विश्वामित्रस्यार्षम्।

---

* 'प्रसवे च' सृष्टौ, प्रसुतः' क।

† १भा० ४२४ पृ० २ पं०।

‡ "त्व मग्ने सुप्रथा असि जुष्टो होता वरेण्यः। त्वया यज्ञं वि तन्वते॥"—इति ऋ० स० ४. १, ५, ४।

§ १भा० ४२४ पृ० ५पं०।

॥ "होता देवो अमर्त्यः पुरस्तादेति मायया। विदथानि प्रचोदयन्॥"—इति ऋ० स० ३, १, १९, २

गायत्री। आग्नेयी। प्रातरनुवाकाश्विनयोः शस्यते। अग्नीषोमप्रणयने* विनियुक्ता। 'होता' आक्राता, 'देवः' अग्निः, 'अमर्त्यः' अमरणधर्मा, 'पुरस्तात्' अस्य यज्ञकर्मणः, सोमस्य वा प्रणीयमानस्य 'एति' गच्छति, 'मायया' स्वया प्रज्ञया। एषाम् ऋत्विजाम् 'विदथानि' विज्ञानानि 'प्र' प्रकर्षेण 'चोदयन्' अनुगृह्णन्नित्यर्थः॥ एवं मन्त्र शब्दसारूप्यादर्थोपपत्तेश्च "विदथानि = वेदनानि"—इत्युपपद्यते॥ ३ (७)॥

आयन्त इव सूर्य विश्वेदिन्द्रस्य भक्षत। वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम॥ समाश्रिताः सूर्य मुपतिष्ठन्ते अपि वोपमार्थे स्यात् सूर्य मिवेन्द्र मुपतिष्ठन्त इति सर्वाणीन्द्रस्य धनानि विभज्यमाणाः† स यथा धनानि विभजति जाते च जनिष्यमाणे च तं वयं भाग मनुध्यायामौजसा बलेनौज आजतेर्वाजतेर्वाशीराश्रयणाद्वाश्रपणाद्वाधेय मितराशीराशास्तेः। इन्द्राय गाव आशिर् मित्यपि निगमो भवति। सा मे सत्याशीर्देवेषिति च‡॥ ४§॥

---

* 'अग्नीषोमप्रणयने' क।

† "विभज्यमानाः" क, ख, ग।

‡ "सत्याशीर्देवानिति च"—इति ह०-सम्मतः।

§ नेह खण्डसमाप्तिः ङ-च-पुस्तकयोः।

"आयन्तः(२४)"—इति *, अनवगतम्। "समाश्रिताः"—इत्येव मर्थप्रतीति। "आयन्त इव०——० न दोधिमः" †। बृहती। मृमेधस्य आङ्गिरसस्येय मार्षम्। अनर्शरातिमितीय मनन्तरा चाख्या‡ महाव्रते बृहतीसहस्रे विनियोगः। 'आयन्त इव सूर्यम्' इवोऽनर्थक एतस्मिन् प्रथमेऽर्थे। "समाश्रिताः" समन्तादाश्रिताः 'सूर्यम्' "उपतिष्ठन्ते" रश्मयः। किम्? इति,—"विश्वेदिन्द्रस्य भक्षत"। 'इत्'—इत्यनर्थक एव। 'विश्वा' विश्वानि "सर्वाणि" 'इन्द्रस्य' "धनानि", सूर्यस्य स्वभूतानि, उदकानि, तेन प्रवृत्तानि "विभज्यमाणाः" विभक्तुमिच्छन्तः। अथ "वा" 'इत्'—इत्ययम् "उपमार्थे स्यात्", नानर्थकः। आह;—कथम्? इति, उच्यते;—"सूर्यमिवेन्द्रमुपतिष्ठन्ते" यथा सूर्यमहन्यहनि रश्मय उपतिष्ठन्ते, एवं मध्यस्थानमिन्द्रमुदकेश्वरमुपतिष्ठन्ते। तस्य "इन्द्रस्य" स्वभूतानि "सर्वाणि धनानि" उदकानि तेन प्रवृत्तानि, आत्मनो जनानां वा विभक्तुमिच्छमानाः। (किञ्च?) "वसूनि जाते जनमानु ओजसा"। यद्वेन्द्र आदित्यो वा॥ 'वसूनि' धनानि 'जाते' "च" उत्पन्ने च 'जनमाने' "जन्यमाणे च," स्वेन 'ओजसा' ऐश्वर्य-"बलेन" "विभजति"। तथैव यथाविभक्तः तेन, "तं" 'भागं' भूतानि उपजीवन्ति, तदैश्वर्यानुप्रवृत्त्यैव। यत एव मतो "वयम्" अपि "तम्" एव 'भागं' 'प्रति'

---

* १भा० ४२४ पृ० ७५०।

† ऋ० सं० १, ७, २, १।

‡ ऋ० सं० १, ७, २, ४। "प्रगाथं प्रत्यवदधाति"—इति ऐ० ब्रा० ५, १०।

§ नास्येतत् क-पुस्तके।

॥ "यद्वेन्द्रस्य आदित्यो" क।

'न दीधिमः'। अत्र 'न'—इत्यनर्थकः, अनेर्वा स्थाने। "तं वयं भाग मनुध्यायामः"—इति भाष्यकारो निराह॥ एव मत्र 'आयन्त इव सूर्यम्'—इति सूर्यसम्बन्धात् रश्मयोऽध्याहृताः, रश्मिसम्बन्धाच्च 'आयन्तः'—इत्येष शब्दः, समाङावुपसर्गावध्याहृत्य "समाश्रिताः" —इत्येव मुपमार्थे भवतीत्युपपद्यते॥

"ओजः",—"ओजतेर्वा" वृद्ध्यर्थस्य (चु० अ०प०); "उञ्जतेर्वा" न्यग्भावार्थस्य (तु० प०) * ॥

"आशीः(२५)"—इति †, अनवगत मनेकार्थञ्च। "आशिरम्"—इत्यर्थप्रतीतिः। या यजमानस्य व्रतधुक्, ता माशिरं दुहन्ति। एतस्मिन् पक्षे दध्यभिधेयम्; तेन हि सोम उपश्रीयते, तस्मात्तदाशिरमित्युच्यते। अथ"वा" "आश्रपणात्"; ईषद्धि तच्छृतं भवति दधिभावात्॥

"अथ" पुनः या "इयम्,—इतरा आशीः"? इयम् "आशास्तेः" आङ्पूर्वस्य शास्तेः (अदा०प०) अभिलाषार्थस्य॥

"इन्द्राय॒ गाव॑०——० वि॒दत्"‡। प्रियमेधस आङ्गिरसस्येय मार्षम्। मध्यमे रात्रिपर्याये ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता। 'इन्द्राय' 'वज्रिणे' अर्थाय 'गावः' 'आशिरं' अपणार्थं पयः, यज्ञे पुनः 'दुदुह्रे'। 'मधु' मध्वास्वादम्। 'यत्' 'सीम्' सर्वतः 'उपक्षरे'

---

* १भा० ९९, ११२ पृ० १अ० १२ख० (४२); २१५ पृ० २अ० ९ख० (२)। "ओजत्क बलतेजसोः"—इति कवि०।

† १भा० ४२४ पृ० १०पं०।

‡ "इन्द्रा॒य॒ गावं॒ आ॒शिरं॑ दुदु॒ह्रे व॒ज्रिणे॒ मधु॑। यत् सी॒मु॑पक्ष॒रे वि॒दत्॥"—इति ऋ० सं० ६, ५, ६, १।

उपगूहे ऊधःप्रदेशे, दोग्धा 'अविदत्' तत् स्तनैर्दुदुहे॥ एव मत्र गो-सम्बन्धात् 'आशीः'-शब्देन "आशिरम्" उच्यत इत्युपपद्यते॥

"अथेय मितराशीराशास्ते:"—इति यदुक्तम्, तचेद मुदाहरणम्;—"सा मे सत्याशीर्देवान् * गम्यात्। शृण्वन्तु ते समर्द्धयन्तु। जुष्टात् जुष्टतरा पण्यात् पण्यतरा। अहेडता मनसा नु गच्छ यज्ञो देवान् गच्छतु"॥ प्रस्तरे† प्रहियमाणे यजमानो जपत्येनम्। 'सा' 'मे' मम 'आशीः', 'सत्या' यथाप्रार्थितैव 'देवान्' 'गम्यात्' प्राप्नोतु। 'शृण्वन्तु' 'ते' देवाः। श्रुत्वा च 'समर्द्धयन्तु'; 'जुष्टात्' अपि 'जुष्टतरा' प्रियादपि प्रियतरा, पण्यादपि 'पण्यतरा' स्तुतादपि स्ततरा। किञ्च; 'अहेडता मनसा' अक्रोधवता मनसा प्रहितोऽस्माभिः हे प्रस्तर! त्व मपि 'देवान्' 'गच्छ'। 'यज्ञः' अपि 'देवान्' 'गच्छतु'। त्व मपि चान्यं यज्ञम्। तद्वयं याचामोऽसावपि देवान् गम्यात्॥ एव मत्र आशीरेव 'आशीः'-शब्देनाभिधीयते; आशिषो हि देवान् प्रति गमन मभीष्ट मिति॥ ४॥

यदा ते मर्त्तो अनु भोग मानळादिद्‡ ग्रसिष्ठ ओषधीरजीगः॥ यदा ते मर्त्तो भोग मन्वापदथ ग्रसितृतम ओषधीरगारीर्जिगर्त्तिर्गिरतिकर्म्मा§ वा

---

* "सत्याशीर्देवेषु"—इति यास्कीयपाठः सर्वत्रैव मूलपुस्तकेषु।

† प्रस्तरो दर्भमुष्टिः। अम० को० २, ६, १९१ क्षी०। "यजमानः प्रस्तरः (ऐ० ब्रा० १, १, ३)"—इत्यादि च द्रष्टव्यम्।

‡ "मानलादिद्" क, ख, ग।

§ "जागर्त्तिर्गिरतिकर्मा" क, ङ। "जीगर्त्तिर्गिरतिकर्मा" ग।

गृणातिकर्मा वा गृह्णातिकर्मा वा। मूरा अमूर न वयश्चिकित्वो महित्व मग्ने त्व मङ्ग वित्से॥ मूढा वयं सोऽमूढस्त्व मसि न वयं विद्मो* महत्व† मग्ने त्वं तु वेत्थ शशमानः शंशमानः। यो वां यज्ञैः शंशमानो ह दाशतीत्यपि निगमो भवति। देवो देवाच्या कृपा। देवो देवान् प्रत्यक्तया कृपा कृप् कृपतेर्वा कल्पतेर्वा॥ ॥५ (८)॥

"अजोगः(२६)"—इति ‡, अनवगतम्। "अगारीः"—इत्यवगमः। "अचा ते०—० ओषधीरजोगः"§। दीर्घतमस इय मार्षम्। अश्वमेधेऽश्वस्तुतौ विनियुक्ता। 'अच' एतस्मिन् काले 'ते' तव हे अश्व! 'रूपम्' अहम् 'उत्तमम्' उत्कृष्टम् 'अपश्यम्'। 'जिगीषमाणं' जेतु मिच्छमानम् 'इषे' अन्ने जेतव्ये निमित्तभूते 'आ पदे गोः' उपरि भूम्याः शरपथे वेद्यां वा। यज्ञेनापि ह्यन्न मेवामुष्मिंल्लोके जीयते, तस्माद् वेद्या मित्येव मुपपद्यते। किञ्च; 'यदा' यस्मिन् काले 'ते' तव 'मर्त्तः' मनुष्यः 'अनुभोगम्' 'आनट्' प्राप्नोति, वाहयन् वा, अथ परिश्रान्तस्त्वम् 'ओषधीः अगारीः' ओषधीर्गृहासि गिरसि वा। अन्ये हि प्राणिनः परिश्रान्ताः चरितुं न शक्नुवन्ति, त्वं तु

---

* "मूल्हा वयं सोऽमूल्हस्त्व मसि": क, ग। "मूळ्हा वयं सोऽमूळ्हस्त्व मसि" ख।

† "महित्व" क, ख, ग।

‡ १भा० ४२५ पृ० १५०।

§ "अचा ते रूप मुत्तम मपश्यं जिगीषमाण मिष आपदे गोः। यदा०—० रजोगः॥"—इति ऋ० सं० १, १, १२, १।

सुतरा मोषधीर्भक्षयसीत्येतदधिकं तव ॥ एव मत्र ओषध्यश्व-सम्बन्धात् "जिगर्त्तिः, गिरतिकर्मा वा ग्रहातिकर्मा वा"—इत्यु-पपद्यते ॥

"अमूरः(१७)"—इति *, अनवगतम्। "अमूढः"—इत्यवगमः। "मूरा अमूर०—०विश्पतिः सन्" †। चितस्याप्तस्यार्षम्। चिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। हे भगवन्नग्ने! 'अमूर!' अमूढ! 'मूराः' मूढाः 'वयं' स्मः। भवतो माहाभाग्यपरिज्ञानं प्रति मन्दबुद्धित्वात् 'न वयं चिकित्वः' न वयं भवतः प्रभावस्यान्तं विजानीमः। हे 'अग्ने!' 'त्वम्' एव आत्मनो महिमानं "महत्त्वम्" ‡ माहाभाग्यम् 'वित्से' वेत्सि; कस्त्वान्यो माहाभाग्यस्यान्तं वेत्तु मर्हतीत्यभिप्रायः। किञ्च; 'शये' शयपरिमाणे प्रदेशे उत्तरवेद्याख्ये 'वत्रिः' विशेषात्मा, तव रूपाख्यः 'चरति' समिद्धत्वात् मुहुर्मुहुश्चरति। स त्वं मनेन रूपेणोत्तरवेद्या मवस्थितो 'जिह्वया' ज्वालया तानि तानि हवींषि 'अदन्' भक्षयन् 'रेरिह्यते'। 'युवतिं' तां तां माहुतिं पुनः पुनः आस्वादयसि। 'विश्पतिः' विश्वस्य सर्वस्य पतिः, मनुष्यपतिर्वा 'सन्' यस्त्वं मेवं करोषि हितैषित्वाद् यजमानानाम्, सोऽस्माक मिदं नाम कुर्वित्यभिप्रायः॥ एव मत्र 'मूढाः'—इत्यात्मनिन्दाद्वारेण अग्निः "अमूढः"—इत्यनेन स्तूयते इत्यस्य 'अमूर'-शब्दस्य "अमूढः" —इत्येष विपरिणाम उपपद्यते ॥

---

* १भा० ४२५ पृ० ५५०।

† "मूरा अमूर न वयं चिकित्वो महित्व मग्ने त्व मङ्ग वित्से। शये वत्रिश्चरति जिह्वयादन्नरिह्यते युवतिं विश्पतिः सन्॥"—इति ऋ० सं० ७, ५, ३१, ४।

‡ 'महित्वम्'— इति ख-नामदत्तिपुस्तके।

"शशमानः(२८)"—इति *, अनवगतम्। "शंसमानः"—इत्यवगमः। "यो वां यज्ञैः ०——० गन्त मस्मयुः" †। दीर्घतमस ऋषिः। जगतीच्छन्दः। 'यः' यजमानः, युवां हे मित्रावरुणौ! 'यज्ञैः' निमित्तभूतैः 'शशमानः' "शंसमानः" स्तुवन् 'दाशति' ददाति हवींषि युवाभ्याम्। 'कविः' क्रान्तदर्शनः, 'होता' आह्वाता 'यजति'। 'मन्मसाधनः' मननसाधनः, विज्ञानसाधन इत्यर्थः। आह;—तस्य किम्? इति, उच्यते;—'उपाहतं गच्छथः' प्रत्युपागच्छथः युवाम्, 'वीथः' च 'अध्वरम्' अध्वाश्रितानि हवींषि। वयमपि च एवङ्गुणविशिष्टा एव। यतो ब्रूमः;—'सुमतिं' शोभनप्रज्ञं यजमानम् अनु लक्ष्य 'अच्छा गिरः' एताः अस्मद्गिरः आभिमुख्येन 'गन्तम्' गन्तु मिच्छथो युवाम्। 'अस्मयू' अस्मान् कामयमानावित्यर्थः॥ एव मत्र 'यज्ञैः शशमानः'—इति यज्ञसम्बन्धात् शब्दसारूप्याच्च "शशमानः = शंसमानः"—इत्येव सुपपद्यते॥

"देवो देवाच्या, कृपा(२९)"—इति ‡, एते § अनवगते। देवशब्दो ऽनयोरेव उपलक्षणार्थोऽपि समाम्नातः। देवः, देवाच्या, कृपा,—इति त्रीणि एतानि पदानि। 'देवाच्या'—इत्यस्य "देवान् प्रत्यञ्चितया"—इत्यर्थप्रतीतिः। 'कृपा'—इत्यस्यापि "कल्पितया"—इत्येव मर्थ-

---

* १भा० ४२५ पृ० ८प०।

† "यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः। उपाहतं मच्छथो वीथो अध्वरं मच्छा गिरः सुमतिं गन्त मस्मयू॥"—इति ऋ०१,१,११,२।

‡ १भा० ४२५ पृ० १०प०।

§ १भा० ४२४ पृ० (२९)-टीप्पनी द्रष्टव्या।

प्रतीतिः। "अग्निं होतारं ०——० मर्पिषः" *। परुच्छेपस्यार्षम्। अतिच्छन्दाः अत्यष्टिः। अग्निचयने इष्टकोपधाने विनियुक्ता। 'अग्निं' 'होतारम्' आह्वातारम् देवानाम् 'मन्ये'। 'दास्वन्तं' दानवन्तं दाततमम्, 'वसुं' वासयितारम् सर्वस्य जगतः। 'सूनुं'—'सहसः' बलस्य पुत्रम्, 'जातवेदसं' जातप्रज्ञानम्। 'विप्रं न जातवेदसम्' विप्र मिव जातप्रज्ञानम्; यथा हि कश्चित् कश्चिन्मनुष्यं समानपृष्ठोदरपाणिपादं विप्राप्रज्ञानं यथावत् जानीयात्, एव मह मग्निं यथावज्जाने। 'यः' अग्निः, 'स्वध्वरः' शोभनयज्ञः 'देवः'। 'ऊर्ध्वया' 'कृपा' कृपया सामर्थ्याख्यया कल्पितया, 'देवाच्या' देवान् प्रत्यञ्चितया गत्या, 'घृतस्य' 'विभ्राष्टिं' विभ्रंशम् 'अनु वष्टि' आहुतिप्रक्षेपम्। 'शोचिषा' ज्वालया अनुकामयते वाञ्छति। "वष्टि"—इति कान्तिकर्मसु पठितम्†। 'आजुह्वानस्य' उपरि श्रूयमानस्य 'सर्पिषः' सर्पणशीलस्य। य मग्नि मह मेवं जाने, यश्चैवङ्गुणयुक्तः, स इदं नामास्माकं करोत्वित्यभिप्रायः॥ एव मत्र "देवाच्या, कृपा"—इत्येतौ शब्दौ देवान् प्रत्यक्तया कल्पितयेत्येव मुपपद्यते, शब्दसारूप्यादर्थोपपत्तेश्च॥ ५ (८)॥

**अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात्। अथा सोमस्य प्रयती युवभ्या मिन्द्राग्नी**

---

* "अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम्। य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा। घृतस्य विभ्राष्टिं मनु वष्टि शोचिषाजुह्वानस्य सर्पिषः॥"—इति ऋ० सं० १, १, १२, १।

† १भा० १९९ पृ० २ख० ४ख० (७)

स्तोमं जनयामि नव्यम्॥ अश्रौषं हि बहुदातृतरौ* वां विजामातुरसुसमाप्ताज्जामातुर्विजामानेति † श्रश्व-दाक्षिणाजाः क्रीतापति माचक्षतेऽसुसमाप्त इव वरोऽभिप्रेतो जामाता जा अपत्यं तन्निर्मातोत वा घा स्यालादपि च स्यालात् स्याल आसन्नः संयोगेनेति नैदानाः स्याल्लाजानावपतीति वा लाजा लाजतेः ‡ स्यं शूर्पं स्यतेः शूर्प मश्नपवनं शृणातेर्वाथ सोमस्य प्रदानेन युवाभ्या मिन्द्राग्नी स्तोमं जनयामि (नव्यं§) नवतर मेमास इत्युपरिष्टाद् व्याख्यास्यामः॥ ६ (९)॥

॥ इति षष्ठाध्यायस्य द्वितीयः पादः॥ ६, २.

"विजामातुः(४०)"—इति ॥, अनवगतम्। उपसर्गस्यापरिसमाप्त्यर्थं वृत्तिरत्रानवगमः। "असुसमाप्त इव वरोऽभिप्रेतः"—इति भाष्य-कारो निराह्य विगतजामात्रभाव इव च; यो ह्यप्राप्तजामात्रभावः स विजामातेत्युच्यते; स हि दाक्षिणात्येषु प्रसिद्धः। "अश्वं हि ०——०जनयामि नव्यम्¶"। कुत्सस्यार्षम्। त्रिष्टुप्। "अश्रौषम्"

---

* "बहुदायितरौ" क, ख, ग।
† "विजामातुरसमाप्ताज्जामातुर्विजामातेति" क, ख, ग।
‡ "लाजा राजतेः" क, ख, ग।
§ नैतत्पदं दृश्यते क-ख-ग-पुस्तकेषु।
॥ १भा० ४२५ पृ० १७ पं०।
¶ ऋ० सं० १, ७, २८, २।

अहम् युवाम्। हे 'इन्द्राग्नी!' 'भूरिदावत्तरा' भूरिदातारौ। कुतः? 'विजामातुः' "असुसमाप्नात् जामातुः" यो हि असमाप्तजामाढ-भावो भवति, स जामाढगुणहीनत्वात् बहुदानेन कन्या पितृ-माराध्य तेभ्य आत्मानं रोचयति। ततोऽपि बहुतरस्य धनस्य दातारा-वह मश्नौषं भवन्तौ। "उत वा घा स्यालात्"। "घा"—इत्य-नर्थकः। 'स्यालात्' अपि बहुदातारौ युवा मह मश्नौषं भवन्तौ; स्यालोऽपि हि भगिनीप्रियचिकीर्षया बहुनेव ददाति। यत एव मह मश्नौषं भवन्तौ, एतस्मात् कारणात् 'सोमस्य' 'प्रयती' प्रदानेन, हे इन्द्राग्नी! 'युवाभ्यां' 'स्तोमं' 'जनयामि' उच्चारयामि, 'नव्यं' नवतर मन्येभ्यः स्तोमेभ्यः॥ एव मत्र 'विजामाढ'-शब्देन "असुसमाप्तजामाढभावः" उच्यते, तस्य बहुदाढत्वादित्युपपत्तिः॥

"विजामातेति" "श्वश्रूत्" प्रसिद्ध मेतत् "दाक्षिणात्याः* क्रीता-पतिं माचक्षते" तस्य निर्गुणत्वादात्मनः क्रीणाति कन्या मात्मनो भार्यार्थे। तस्मात् "असुसमाप्त इव" असौ "वरोऽभिप्रेतः"॥ "जामाता"। "जा अपत्यम्, तन्निर्माता" जामाता; स्त्रीत्वं हि मैथुनेन व्यवहारेणासौ निर्मिणोति, तेनासौ दुहितुः पतिर्जामाता भवति॥ "स्यालः आसन्नः संयोगेनेति" "नैदानाः" निदान-विदो मन्यन्ते। अथ "वा" "स्यम्"—इति "शूर्पम्" उच्यते; "स्यात्" तस्मादसौ गृहीत्वा विवाहे "लाजानावपति", तस्मात् स्याल उच्यते।† "सं शूर्पम्", "स्यतेः (दि०प०)" धातोः प्रचे-

---

* "दाक्षिणाजाः" मूलपाठः।

† इत उत्तरं लाजापदनिर्वचनव्याख्यानं व्याख्यातु मुचितम्।

पणार्थस्य; तेन हि तृषाः क्षिप्यन्ते॥ "शूर्पम् अशनपवनम्" तेन ह्यशनं पूयते। "शॄणातेः (क्या०प०)" तद्धि शरमयं भवति॥

"ओमासः(४१)"—"इति" *, एतत् पदम् "उपरिष्टाद् व्याख्यास्यामः" षष्ठदशेऽध्याये † "ओमासश्चर्षणीधृतः"—इत्यत्र ‡॥ ६(९)॥

इति निरुक्तवृत्तौ एकादशाध्यायस्य (षष्ठाध्यायस्य) द्वितीयः पादः॥ ६, २॥

---

॥ तृतीयः पादः॥

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः॥ सोमानं § सोतारं प्रकाशनवन्तं कुरु ब्रह्मणस्पते कक्षीवन्त मिव य औशिजः कक्षीवान् कक्ष्यावानौशिज उशिजः पुच उशिग्वष्टेः कान्तिकर्मणोऽपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्तं सोमानं॥ सोतारं मां ¶ प्रकाशनवन्तं कुरु ब्रह्मणस्पते॥ १ (१०)॥

"सोमानम्(४२)"—इति ¶, अनवगतम्। "सोतारम्"—इत्यवगमः। "सोमानं स्वरणं ०——० य औशिजः" **। मेधातिथेः

---

* १भा० ४२९ पृ० ४पं०।

† यास्कीयस्यास्य निरुक्तग्रन्थस्य द्वादशेऽध्याये इति यावत्।

‡ ष० दै० १९, ४, ९।

§,॥ "सोमानं" ङ, च।

¶ "मा" क, ख, ग।

** १भा० ४२९ पृ० ९पं०।

†† ऋ० सं० १, १, २४, १।

काण्वस्यार्षम्। अग्न्युपस्थाने विनियुक्ता; "सोमानं स्वरण मिति ब्राह्मणस्त्वयोपतिष्ठेत"—इति ह्युक्तम् *। 'सोमानम्' अनेकेषां "सोमानां" "सोतारम्" अभिषोतारम्, माम्, 'स्वरणं' शब्दयितारम्, सुयज्ञस्खिनं 'कृणुहि' कुरु हे 'ब्रह्मणस्पते!'। कथं च पुनः "प्रकाशनवन्तं कुरु"? इति,—"कक्षीवन्तं य औशिजः"। लुप्तोपम मेतत्। 'यः' 'औशिजः' कक्षीवान्, त मिव। अत्र करोतिसम्बन्धात् "प्रकाशनवन्तम्"—इत्येतदध्याहृतं भाष्यकारेण। 'कक्षीवान्' "कक्ष्यावान्" कक्ष्यया तद्वान्†। "अपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्"; स हि कक्षे उत्पन्नः, तदुत्पत्तिसंयोगात् कक्षीवान्। 'औशिजः' "उशिजः पुत्रः"। "उशिक्" पुनः "वष्टेः" कान्त्यर्थस्य‡। एव मत्र 'सोमानम्'—इत्यस्य शब्दसारूप्यात् "सोतारम् सोमानाम्"—इत्येष विपरिणाम उपपद्यते॥

अपि चैव मन्यथा स्यात्;—योऽहं सोमानां सोता, कक्षीवान् औशिजः, तमेवङ्गुणविशिष्टं मां प्रकाशनवन्तं कुरु हे ब्रह्मणस्पते!॥ १ (१०)॥

इन्द्रासोमा सꣳघशꣳसꣳभ्यꣳघं तपुर्यꣳयस्तु चुरꣳरग्निवाँ इव। ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्त

---

* "सोमान मिति पक्ष ब्राह्मणस्त्वया:"- इत्यादि सा०भा०(ऋ०मं०१,१,३४,१)।

† "कक्षः", "कक्ष्या" च १भा० १९५ ४० १पं०। "कक्ष्याः" तत्रैव २८२ ४० १७ पं०। (ऋ० सं० १, ११९—१२५ १, १२९, १—५; ९, ७४ सूक्तानां द्रष्टा।

‡ १भा० १९९ ४० २ऋ० ९ख० (७)। 'उशिजः'—इति मेधाविनामसु च (१भा० ३४३ ४०) द्रष्टव्यम्।

मनवायं किमोदिने ॥ इन्द्रासोमावघस्य शंसितार मघं हन्तेर्निर्हंसितोपसर्ग आहन्तीति तपुस्तपतेश्चरुर्मृच्चयो भवति चरतेर्वा समुच्चरन्त्यस्मादापो ब्रह्मद्विषे (ब्राह्मण-द्वेष्ट्रे*) क्रव्य मदते † (घोरचक्षसे ‡) घोरख्यानाय क्रव्यं विक्तत्ताज्जायत इति नैरुक्ता द्वेषो धत्त मनवाय मनवयवं § यदन्ये न व्यवेयुरद्वेषस इति वा किमोदिने कि मिदानी मिति चरते कि मिदं कि मिद मिति वा पिशुनाय चरते पिशुनः पिंशतेर्विपिंशतीति ॥ २ (११) ॥

"अनवायं(४२)", "किमोदिने(४४)"—इति ॥, एते अनवगते । 'अनवायम्'—इत्यस्य "अनवयवम्"—इत्यवगमः । 'किमोदिने'—इत्यस्य "किमिदङ्किमिदङ्कारी पिशुनः" ॥ "इन्द्रासोमा समघशस ०——० मनवायं किमोदिने" ¶ । वसिष्ठस्यार्षम् । हे "इन्द्रासोमौ !" सन्तापन्तं भवन्तौ, 'अघशंसं' पापस्य "शंसितारम्", 'अघ्यघं' पाप मेव कर्त्तुं सामिमुख्येन नित्यकाल मेव योऽवस्थितः, तं सन्तापयन्तम् । स च 'तपुः' युवाभ्यां सन्ताप्यमानः, "चरुरग्निवाँ इव" चरुरिव अग्निसंयुक्तः 'क्रव्यस्तु' क्रव्यं यावित्यर्थः । किञ्च; 'ब्रह्मद्विषे'

---

* नैतत्पदं दृश्यते क-ख-ग-पुस्तकेषु ।
† "मदने" क, ख, ग ।
‡ नैतत्पदं दृश्यते क-ख-ग-पुस्तकेषु ।
§ "धत्त मघवेय मनवयवं" क, ख, ग ।
‖ १भा० ४२९ पृ० १२ पं० ।
¶ ऋ० सं० ५, ७, ५, २ ।

"ब्राह्मणद्वेष्ट्रे", 'क्रव्यादे' क्रव्य मदते पृष्ठमांसभक्षयित्रे, 'घोरचक्षसे' घोरदर्शनाय, 'द्वेषः' सर्वलोकद्वेष्यतां 'धत्तम्' युवाम्। 'अनवायम्' "अनवयवं" सकल मित्यर्थः। अथ "वा" "यदन्ये" 'अतद्रुहः' "अद्वेषसः" अद्वेष्टारः "न व्ययेयुः" व्ययितुं वियोजयितुं घटमाना अपि न शक्नुयुः, तादृशं द्वेषो धत्तम्। 'किमीदिने' "पिशुनाय"—इत्यर्थः॥ एत मत्र 'अनवायम्'—इत्यस्य "अनवयवम्" अवियोजनं वा—इत्यर्थ-प्रतीतिः; तथाभीष्टत्वात्॥

किमिदी च पिशुनः; स हि "किमिदानीम्" वर्त्तते "इति" एव मन्वेषमाणः "चरते"; (अथ "वा" "किमिदं" वर्त्तते "इति" एव मन्वेषमाणः "चरते";*) स हि तस्य स्वभावः॥ "चरुः, स्रुचयो भवति" स्रुदादिसञ्चितो भवति। "चरतेर्वा" "समुचरन्ति" हि "अस्मादापः"॥ "क्रव्यं" मांसम्; तद्धि "विक्लित्तात् जायते"॥ "पिशुनः" "पिंशतेः (तु० प०)" धातोः; स हि स्वल्प मपि पापं "विपिंशति" विपुष्यतीत्यर्थः॥ २ (११)॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन। तृष्वी मनु प्रसितिं द्रुणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः॥ कुरुष्व पाजः पाजः पालनात् प्रसिति मिव पृथ्वीं प्रसितिः प्रसयनात्तन्तुर्वा † जालं वा याहि राजेवामात्यवानभ्यमनवान्स्ववान्वेराभृता गणेन गतभयेन

* बन्धनीचिह्नान्तर्गतानि पदानि ख-पुस्तके न दृश्यन्ते।
† 'प्रसहनात्तन्तुर्वा" क, ख, ग।

हस्तिनेति वा तृष्णानु प्रसित्या द्रूणानस्तृष्वीति क्षिप्रनाम तरतेर्वा त्वरतेर्वासितासि विध्य रक्षसस्तपिष्ठैस्ततमैस्तृततमैः प्रपिष्ठतमैरिति वा। यस्ते गर्भं ममीर्वा दुर्णामा योनिं माशयें। अमीवाभ्यमनेन व्याख्यातो दुर्नामा* क्रिमिर्भवति पापनामा क्षमिः क्रव्ये मेद्यति क्रमतेर्वा स्यात्सरणकर्मणः क्रामतेर्वा। अतिक्रामन्तो दुरितानि विश्वा। अतिक्रममाणा दुर्गतिगमनानि सर्वाण्यघा यदेनया विद्वाऽपवीयते। व्याधिर्वा भयं वा। अघे परेहीत्यपि निगमो भवत्यमतिरमामयी मतिरात्मयी। ऊर्ध्वा यस्यामतिर्भा अदिद्युतदित्यपि† निगमो भवति। शुष्टीति क्षिप्रनामाशु अष्टीति ॥ ३ (१२) ॥

"अमवान्(४५)"—इति‡, अनवगत मनेकार्थत्वं च। "क्षणुष्व पाजः ०——० रक्षसस्तपिष्ठैः§; वामदेवस्यार्षम्। अग्निचयने पुरुषव्याधारणे विनियुक्ता; "राक्षोघ्नेन व्याधारयेत्"—इति ह्युक्तम्॥ ॥ हे भगवन्नग्ने! 'क्षणुष्व' "कुरुष्व" एतदात्मीयं 'पाजः' बलम्, 'प्रसितिं

---

* "दुर्णामा" ङ, च।
† "ऋदिद्युतत्स्वरीमनीत्यपि"—इति ङ, च।
‡ १भा० ४२९ पृ० १७ पं०।
§ ऋ० सं० २, ४, २२, १।
॥ "क्षणुष्वपक्षोनारक्षोघ्नम्"—इत्यनुक्रमणिका।

म' "प्रसितिमिव", वागुरातन्तुं मिव, जालं मिव वा। 'पृथ्वीं' विस्तीर्णाम्। तत एव मेतद् विस्तीर्णं कृत्वा 'याहि' त्वं रक्षांस्यभिमुखः। कथं च पुनर्याहि? 'राजा इव' यथा राजा यायात् 'अमवान्' "अमात्यवान्" रीतियुक्तो विजयाय, तथा त्वं याहि *। अथ वा यथा "अभ्यमनवान्" रोगभूतः परेभ्यो भयदाता यायात्, तथा याहि। अथ वा यथा "स्ववान्" आत्मवित्तवान् सुभृतसैन्यो यायाद् विजयाय, तथा याहि। 'दृभेन' "दरीभृता" अन्नभृतेन "गणेन" सुपुष्टेन युक्तो यथा राजा यायात्, तथा याहि। अथ वा 'दृभेन' "गतभयेन" शूरेण "हस्तिना" यथा यायात्, तथा याहि। किञ्च; "दृंह्यो मनु प्रसितिं द्रूणानः"। क्षिप्रं मनु प्रसृतया गत्या, सन्ततया गत्या। 'गृणानः' रक्षांसि हिंसन् याहि। कस्मात् पुनरेव मुच्यते? इतः;—यस्मात् 'अस्ता असि' "असिता" क्षेप्ता त्वं रक्षांसि प्रति दीप्तायाः अर्चिषः। स त्वमेव मागत्य 'विध्य' एतान् "रक्षसः" असच्छ्चून् 'तपिष्ठैः' "तप्ततमैः" अर्चिभिः॥ एव मत्र राजोपमान-सम्बन्धात् "अमवान् = अमात्यवान्"—इत्येवमाद्युपपद्यते † ॥

'पाजः'—इति बलनाम‡, "पालनात्; तेन हि पाल्यते। 'प्रसितिः'—"प्रसहनात्"; "तन्तुर्वा जालं वा" उभाभ्या मपि ताभ्या मभिभूयन्ते मृगाश्च मत्याश्च ॥

"अमीवा(४६)"—इति§, अनवगतम्। "अभ्यमनेन" "अभ्यमन-

---

* 'यथा राजा अमात्यवान् रीतियुक्तो विजयाय याति, तथा त्वं याहि" इति क।

† अम मित्यस्य "भयं वा बलं वा"—इत्यर्थो वक्ष्यति दै० का० १०, १, ८।

‡ १भा० ११५ पृ० १अ० ९ख० (१); १११ पृष्ठायां च तद्वृत्तिर्द्रष्टव्या।

§ १भा० ४१० पृ० ५ पं०।

वान्"—इति यदुक्तं माधवीये मन्त्रे *, अनेनैव तद् "व्याख्यातम्" †। "यस्ते गर्भं ममीवा ०——० मनीनशत्" ‡। रक्षोहा नाम ब्राह्मणः, तस्येयं मार्षम्। पुत्रकामस्य षडाज्ञतो नाम स्थालीपाकः, तत्रेयं विनियुक्ता। 'यः' 'ते' तव हे स्त्रि! 'गर्भम्' 'ममीवा' रोगभूतः, 'दुर्णामा' "पापनामा क्रिमिः" पापप्रदेशे नतः परिणतः उत्पन्नः, 'योनिम्' 'आ' गत्य 'शये' शेते गर्भहिंसिता। तम् अग्निः ब्रह्मणा सह 'निर् अनीनशत्' नाशयतु। 'क्रव्याद्' मांसभक्षयितारम्॥ एव मन्त्र 'ममीवा'-इत्यस्य "क्रिमिः" अभिधेयः; क्रिम्युपहते हि योनौ गर्भो न सम्भवतीत्युपपत्तिः॥

"दुरितम्(४७)"—इति §, अनवगतम्। "दुर्गतिगमनम्"—इति अर्थप्रतीतिः। "वैश्वदेवीं सूनृता मारभध्वं शुद्धा भवन्तो यज्ञियाः पावकाः। अतिक्रामन्तो दुरितानि विश्वा शतं हिमाः सर्ववीरा मदेम"। 'वैश्वदेवीं' वाचं 'सूनृतां' सत्याम् 'आरभध्वम्' उपक्रमध्वम् वक्तुम्। तयैवंलक्षणया वाचा 'शुद्धाः' इह अनभिशस्ताः पूताश्च परलोके भवथ। 'यज्ञियासः' यज्ञियाः यज्ञसम्पादिनः। किञ्च; 'अतिक्रामन्तः' अतिक्रममाणा वयम्। तस्या वाचो माहाभाग्येन। 'दुरितानि' दुर्गतिप्रापकानि कर्माणि, 'विश्वा' विश्वानि। 'शतं हिमाः' शतं हेमन्तानां 'सर्ववीराः' अनवखण्डितपुत्रपौत्राः 'मदेम'

---

* अत्रैव खण्डे पुरस्तात् १८४१० १०पं०; १९१४० ५पं०।

† "व्याख्यातः"—इत्येव पाठः सर्वमूलपुस्तकेषु।

‡ यस्ते गर्भं ममीवा दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा सह निष्क्रव्यादं समीनशत्॥"—इति ऋ० सं० ८, ८, १०, १।

§ १भा० ४१७ ४० ९ पं०।

ह्येमेत्यर्थः ॥ एव मचातिक्रमणसम्बन्धात् "दुरितम् = दुष्कृतम्"—इत्युपपद्यते; तस्य हि अतिक्रमण मभीष्ट मिति ॥

"अपवा(४८)"—इति *, अनवगतम्। 'अपव्ययति'—इत्यवगमः। रोगजातिर्वा अभिधेया भयजातिर्वा; तया हि "विद्धः अपवीयते" अपवेष्यते प्राणैः। "अमौषां चित्तम् (ऋ०सं० ८,५,२३,६)"—इति उपरिष्टाच्छेषः † ॥

"अमतिः(४९)"—इति ‡, अनवगतम्। "अमामयी मतिः" अमतिः। एव मपि न प्रतीयत इत्याह;— "आत्ममयी" यस्य मतिः असावमतिरित्युच्यते। कश्चासौ? आदित्यः; तस्य हि आत्मप्रकाशमयी मतिः। "अभि त्यं देवं ०——० कृपाखः"§। नकुलस्यार्षम्। अतिच्छन्दाः; अष्टिः। प्रवर्ग्ये शस्यते; सोमसस्थाने चाध्वर्यवे ॥ विनियुक्ता। 'अभि अर्चामि' 'त्यं' तम् अहम्, 'देवं' सवितारम्'। 'श्रोणोः' द्यावापृथिव्योः यान्यन्तरा भूतानि वर्त्तन्ते, तेभ्यः सर्वेभ्यः सकाशात्। 'कविक्रतुं' क्रान्तप्रज्ञानम्, 'सत्यसवं' सत्याभ्यनुज्ञम्, 'रत्नधां' रमणीयानां धनानां दातारम्,

---

* १भा० ४३७ पृ० १३ पं०।

† प० दै० ९, ३, १९।

‡ १भा० ४३८ पृ० १पं०।

§ "अभि त्यं देवꣳ सवितार श्रोणोः कविक्रतु मर्चामि सत्यसवꣳ रत्नधा मभि प्रियं मतिम्। उद्धा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणि रमिमीत सुक्रतुः कृपा खः॥"—इति सा० ऋ० आ० ५, १, ३, ८।

॥ "सोमसस्थाने चाध्वर्यवे"—इति क।

'अभि मतिम्' अभिमन्तारं सर्वार्थानाम्, ईश्वरत्वात्; 'प्रियं' च सर्वाभूतानाम्। 'ऊर्द्धा' 'यस्य' सवितुः 'अमतिः' आत्मप्रकाशमयी मतिः। आह,— कतमा पुनरसावूर्द्धा? इति,—'भाः' याः 'अदिद्युतत्' अद्योतयत्। तम् अभ्यर्चामि। किञ्च; 'सवीमनि' प्रसवे यस्य सर्व मिदं प्रवर्त्तते; 'हिरण्यपाणिः' रश्मिपाणिः, सर्व मिदं जगद् 'अमिमीत' निर्मितवान्। 'सुकृतुः' सुकर्मा। 'कृपा' स्वया सामर्थ्य-कल्पनया। 'स्वः' आदित्यः, सु अरण इत्यर्थः * ॥ एव मत्र 'अमति'-शब्देन आत्मप्रकाशगत आदित्यस्य विज्ञान मुच्यते; स हि प्रकाशसतत्वएव नान्यत्प्रकाशान्तर मपेक्षत इत्युपपत्तिः ॥

"अुष्टौ(५०)"—इति †, अनवगतम्; "पुरन्धिः(५१)"—इति च‡। अुष्टौत्यस्य 'अश्वनम्'—इत्यवगमः; पुरन्धिरित्यस्यापि पुरां धीः—इत्यवगमः ॥ ३ (१२) ॥

ताँ अ॑ध्व॒र उ॑श॒तो य॑क्ष्य॒ग्ने अु॒ष्टी भग॒न्नास॑त्या॒ पुर॑न्धिम्। तानध्वरे यज्ञ उशतः कामयमानान्यजाग्ने अुष्टी भगन्नासत्यौ चाश्विनौ सत्यावेव नासत्यावित्यौर्णवाभः सत्यस्य प्रणेतारावित्याग्रायणो नासिकाप्रभवौ बभूवतुरिति वा पुरन्धिर्बहुधीस्तत्कः § पुरन्धिर्भगः पुरस्तात्तस्यान्वादेश इत्येक मिन्द्र इत्यपरं स बहुकर्म्मतमः

---

* ४भा० २१० ४० ७पं०।

†,‡ १भा० ४३८ ४० ७पं०।

§ "पुरन्धिर्बहुभिस्तत्कः" क, ख, ग। "पुरन्धिर्बहुधिस्तत्कः" रोथ्स ट्।

पुरां च दारयितृतमो वरुण इत्यपरं तं प्रज्ञया स्तौति। इमा मू नु कवितमस्य माया मित्यपि निगमो भवति। रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः॥ समिद्धस्य रुशददर्शि पाज इत्यपि निगमो भवति॥ ४ (१३)॥

"ते हि यज्ञेषु०——०नासत्या पुरन्धिम्" *। वसिष्ठस्यार्षम्। वैश्वदेवी। त्रिष्टुप्। 'ते' ये 'विश्वेदेवाः' 'यज्ञेषु' 'यज्ञियासः' यज्ञसम्पादिनः, 'ऊमाः' अवितारो रक्षितारः, अवनीया वा तर्पणीयाः, 'सधस्थं' वैश्वदेवं समानं स्थानम् 'अभि सन्ति' अभितिष्ठन्ते। किं तेषाम्? इति,— 'तान्' विश्वान् देवान् हे "अग्ने!" एतस्मिन् 'अध्वरे' "यज्ञे" 'उशतः' स्व भंशं, "कामयमानान्", 'अशुष्टी' "क्षिप्रम्" अविलम्बमानः 'यक्षि' "यज"; 'नासत्या' "नासत्यौ चाश्विनौ" यज, 'पुरन्धिम्' च यज॥ एव मत्र यागस्य विघ्नभयात् क्षिप्रप्रेष्टृत्वात् "अशुष्टि-इति क्षिप्रनाम"—इत्युपपद्यते †। अन्यत्र हि वक्ष्यति "अशुष्टीवरीः = सुखवरीः"—इति ‡, तस्मादेतदनेकार्थ मपि भवति॥

"सत्यौ एव नासत्यौ—इति", "और्णवाभः" आचार्यो मन्यते। तौ हि सत्य मेव ब्रूतः, न कदाचिदप्यसत्यम् §। तस्मान्नासत्यावित्युच्यते। द्विः प्रतिषेधः प्रकृति मापादयति। अथवा "सत्यस्य"

---

* ते हि यज्ञेषु यज्ञियासु ऊमाः सुधस्थं विश्वे अभि सन्ति देवाः। ताँ अध्वरे०——० पुरन्धिम्॥"—इति ऋ० सं० ५, ४, ९, ४।

† इतः पूर्वस्मिन् खण्डे उक्त मेतत् १८५ पृ० ११पं०।

‡ अत्रैवोपरिष्टात् ४ पा० ९खण्डे।

§ "अथो खल्वाहुः कोऽर्हति मनुष्यः सर्वं सत्यं वदितुम्? सत्यसंहिता वै देवा अनृतसंहिता वै मनुष्या इति॥"—इति ऐ० ब्रा० १, १, ९।

उदकस्य, (यज्ञस्य वा*) "नेतारौ" नासत्यौ; तथा हि "आयायणः" आचार्यो मन्यते। अथ "वा" ऐतिह्यासिकपक्षेण "नासिकाप्रभवौ बभूवतुरिति" †॥

"पुरन्धिः"। पुरन्धिशब्दोऽत्र गुणपदत्वात् सन्दिह्यते इति विचार्यते।—"तत्कः पुरन्धिः?"—इति। "भगः" अत्र "पुरस्तात्"; —'अष्टौ भगम्'—इति‡, "तस्य" अयम् "अन्वादेशः"—"इत्येकम्" आचार्यमतम्। नासत्यावनन्तरावपि सन्तौ न सन्दिह्येते द्विवचनवाच्यत्वात् तयोः,—एकवचनान्तत्वात् 'पुरन्धि'-शब्दस्य च। "इन्द्रः" उक्तः स्यात् पुरन्धिशब्देन,—"इत्यपरं" मतम्। किङ्कारणम्? "सः" हि इन्द्रः "बहुकर्मतमः" अन्येभ्यो देवेभ्यः। "धीः"—इति कर्मनामसु पठितम्§, तद्यस्य पुरु बहु स पुरन्धिः; (सचेन्द्रः। तस्मात् पुरन्धिः॥) इन्द्रः—इत्युपपद्यते। अथवा अन्येन पुरन्धित्व मिन्द्रस्य स्यात्;—"पुरां च दारयिष्टतमः" मेघपुरो ह्यसावेव दारयति। "वरुणः" पुरन्धिशब्देनोच्यते,—"इत्यपरम्" मतम्। किङ्कारणम्? "तं" हि अन्यत्रापि मन्त्रदृक् "प्रज्ञया" बुद्ध्या "स्तौति"। तद्यथा, —"दृमा मू नु ०——० नयः समुद्रम्"¶। अत्रेरार्षम्। वारुणी।

---

* नैतत् दृश्यते ख-पुस्तके।

† ऋ० सं० ७, ४, १२, १—२ ऋचौ द्रष्टव्ये। किञ्च, मात्स्यैकादशे "नासापुटाभ्यामुत्सृष्टम्"—इत्यादि।

‡ अत्रैव मन्त्रे १८९ पृ० १२ पं०।

§ १भा० १६२ पृ० २अ० १ख०(११)।

॥ नास्त्येतत् क-पुस्तके।

¶ "दृमा मू नु कवितमस्य मायां मही देवस्य न किरा दधर्ष। एकं यदुद्ना न पृणन्नेनीराषिच्यतीरवनयः समुद्रम्॥"—इति ऋ० सं० ४, ४, २१, १।

त्रिष्टुप्। 'इमां' 'मायां' प्रज्ञां 'कवितमस्य' मेधावितमस्य (द्योतमानस्य *) 'महीं' महतीं मायां 'न किरादधर्ष' न कश्चिदप्याधर्षयितुं शक्नोति। कतमां मायाम्? इति,—'एकम्' एतं सन्तं वरुणम् आदित्यम् †, 'यद्' एता 'उद्वा' उदकेन रश्मिना नद्यः 'एनीः' गमनशीलाः सतत मुदक मादाय आदित्यमण्डलं गच्छति। एवं नामाहर्निश मेता गच्छन्त्यो 'अवनयः' नद्य इव 'समुद्रं' सिञ्चन्त्यो 'न पृणन्ति' (न प्रीणयन्ति‡) (बुद्ध्या§)। तेषां रश्मीनां च मायाम् एवंलक्षणां भगवतो वरुणस्य 'आ धर्षयितुम्' अभिभवितुं विज्ञातुं न शक्नोति कश्चिदपि कथयितुम्। कथ मप्ययं न सम्पूर्यत इति॥ एव मत्र वरुणः प्रज्ञया स्तूयते, धीरिति च प्रज्ञानाम॥; सा यस्य पुर्वी बक्वी, स पुरन्धिः। वरुणश्च प्रज्ञया स्तूयते, तस्माद् "वरुणः = पुरन्धिः"—इत्युपपद्यते ¶॥

"रुशत्(५२)"—इति **, अनवगतम्। "रोचतेर्ज्वलतिकर्मणः"—इति निर्वचनम्। "रोचनम्"—इत्यवगमः। "अबोधि होता०

---

* नास्त्येतद् क-पुस्तके।

† "यो वा अग्निः स वरुणः"—इत्यादि ऐ० ब्रा० ६, ४, १०।

‡ नास्त्येतत् क-पुस्तके।

§ नास्त्येतत् ख-पुस्तके।

॥ १भा० ३१४ पृ० ३च० ९ख० (७)।

¶ "कवितमस्य०——०'यद्' यस्मात् 'एकम्' समुद्रम् 'उद्वा' उदकेन 'न पृणन्ति' न पूरयन्ति। काः? 'एनीः' एन्यः, शुभाः गमनशीला वा, 'सिञ्चन्तीः' उदकमासेचयन्त्यः, 'अवनयः' नद्यः। बक्वी नद्यः सर्वदोदकेन पूरयन्त्योऽपि नैक मपि समुद्रं पूरयन्तीति। इदं वरुणस्य महत् कर्मेति। अचान्तरिक्षविस्तारादिसमुद्रापूरणपर्यन्त कर्म परमेश्वरस्यैवोचितं न वरुणस्येति न वाच्यम्, तस्य वरुणादिरूपावस्थानात्; एष अचेत्यादिश्रुतेः॥"—इति सा० भा०।

** १भा० ४२९ पृ० १पं०।

——० स्तमसो निरमोचि"*। गविष्ठिरबुधयोरार्षम्। आग्नेयी। चिष्टुप्। अग्निचयने इष्टकोपधाने विनियुक्ता। 'अबोधि होता' बुध्यते होता 'अग्निः', 'यजयाय' यजमानाय, यष्टव्यतया देवान्। 'ऊर्ध्वः' ज्वलनक्रियायोगात्। 'प्रातः अस्यात्' अग्निहोत्रिणां गृहेषु योऽवतिष्ठते, 'सुमनाः' च शोभनमनाः। 'समिद्धस्य' च यस्य 'रुशत्' रोचिष्णुवर्णः 'अदर्शि' दृश्यते। 'पाजः' च बलं यस्य 'अप्रमितम्', यस्य प्रभावतो 'महान्'। 'तमसः' च सर्वं मिदं 'निरमोचि' निर्मोचयति, बुध्यते देवान् यष्टव्यतया॥ एव मग्न्यधिकारादत्र शब्दसारूप्यात् "रुशत्"—"इति" एतत् "वर्णनाम"—इत्युपपद्यते॥ ४ (१३)॥

अस्ति॒ हि वः॑ सजा॒त्यं॑ रिशा॒दसो॒ देवा॑सो अस्त्या॒प्य॑म्। अस्ति॒ हि वः॑ समानजातिता रेशयदा॒रिणो॑† देवा अस्त्याप्य माप्य माप्नोतेः सुदचः कल्या॒णदा॑नः। त्वष्टा॑ सुद॒चो वि द॑धातु रा॒य इ॒त्यपि॑ नि॒गमो॒ भव॑ति। सुविद॒चः कल्या॒णवि॒द्यः। आग्ने याहि॑ सुवि॒दचे॑भिर॒र्वाङि॒त्यपि॑ नि॒गमो॒ भव॑त्यानुषगिति नामानुपू॒र्वस्यानुषक्तं॑ भव॑ति। स्तृ॒णन्ति॑ ब॒र्हिरानु॒षगित्यपि॑ नि॒गमो॒ भव॑ति।

---

* "अबोधि होता यजयाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्यात्। समिद्धस्य रशददर्शि पाजो महान् देवस्तमसो निरमोचि॥"—इति ऋ० सं० १, ५, ११,१।

† "रेशयदारिणो"—इति ङ, इत्तिसम्मतश्च।

तुर्वणिस्तूर्ण्वनिः। स तुर्वणिर्महाँ अरेणुपाँस्य इत्यपि निगमो भवति। गिर्वणा देवो भवति गीर्भिरेनं वनयन्ति। जुष्टं गिर्वणसे बृहदित्यपि निगमो भवति॥ ५ (१४)॥

"रिशादसः(५२)"—इति *, अनवगतम्। "रेशयदाशिनः†"—इत्यवगमः। "अस्ति हि वः०——०नव्यसे"‡। मनोर्विवस्वतस्येयं मार्षम्। सतो हृहती। वैश्वदेवे सूक्ते। हे 'रिशादसः' "रेशयदाशिनः"!§, 'देवासः' देवाः! यो हि रेशयति हिंसावान् भवति, तस्मै त आयुधान्यस्यन्ति। "रेशयदारिणः"—इति केचिदधीयते निर्वचनम्; तेषां रेशयन्तं हिंसन्तं दारयन्तीत्यर्थः। 'अस्ति' 'सः' युष्माकं 'सजात्यं' "समानजातिता" देवत्वम्, 'अस्ति' च युष्माकम् 'आप्यम्' आप्तत्वं मनुष्यैः, ईश्वरा यूय मित्यभिप्रायः। यत एवं मतो ब्रवीमि;—'प्रवोचत' यूयम् अस्मभ्यं मनुजानीत। 'सुवित्राय' सुगताय, 'सुभोगाय' स्थानाय, 'सुम्नाय' सुखाय च पूर्वस्मै स्वभूताय, 'नव्यसे' नवतराय। कथं च पुनः प्रवोचत? इति,—'मक्षु' क्षिप्रमित्यर्थः। एवं मत्र शब्दसारूप्यादर्थोपपत्तेश्च "रिशादसः = रेशयदाशिनः‖, रेशय दारिणो वा"—इत्युपपद्यते॥

---

* १भा० ४२९ पृ० ६ पं०।

‡ अस्ति हि वः०——०अस्त्याप्यम्। प्रणः पूर्वस्मै सुवित्राय वोचत मक्षू सुम्नाय नव्यसे॥"—इति ऋ० सं० ६, २ ६२, ५।

†, §, ‖ "रेशयदाशिनः"—इति ख-पृ०।

"सुदत्रः(५४)"—इति *, अनवगतम्। 'सुदानः'—इत्यवगमः। "ता नो रासन् ०——० विदधातु रायः" †। वसिष्ठस्यार्षम्। दश-रात्रस्य चतुर्थेऽहनि तृतीयसवने वैश्वदेवशस्त्रे द्विपदा एताः शस्यन्ते। 'ताः' देव्यः, 'नः' अस्मभ्यं 'रासन्' 'वसूनि' ददत्वित्यर्थः। किंल-क्षणाः देव्यः? 'रातिषाचः' हविर्दानं याः सचन्ते सेवन्ते। किञ्च; आभिमुख्येन स्थित्वा 'रोदसी' रुद्रस्य पत्नी 'शृणोतु', 'वरुणानी' च। किञ्च; 'वरूत्रीभिः' वरयितव्याभिः सहितः 'सुशरणः' स्वाश्र-यणो 'नः' अस्माकम् 'अस्तु'। 'त्वष्टा', 'सुदत्रः' "कल्याणदानः" 'विदधातु' च अस्माकम् 'रायः' धन मित्यर्थः॥ एव मत्र 'रायः'-सम्बन्धात् "सुदत्रः = कल्याणदानः"—इत्युपपद्यते॥

"सुविदत्रः(५५)"—इति ‡, अनवगतम्। 'सुविद्यः'—इत्यवगमः। "कल्याणविद्यः"—इत्यभिधेयवचनम्। "ये तातृषुर्देवत्रा ०——० पितृभिर्घर्मसद्भिः" §। शङ्खस्य यामायनस्यार्षम्। त्रिष्टुप्। पैत्री। पितृयज्ञे खिष्टकृद्याज्यैषा। 'ये' 'तातृषुः' स्तीर्णवन्तः, 'देवत्रा' देवान् प्रति 'जेहमानाः' गच्छन्तः, 'होत्राविदः' स्तुतिविदः, 'सोमतष्टासः' सोमकर्त्तारः 'अर्कैः' मन्त्रैः सोमकर्त्तारः॥। यः

---

* १भा० ४३९ पृ० १० पं०।

† "ता नो रासन्नातिषाचो वसून्या रोदसी वरुणानी शृणोतु। वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः॥"—इति ऋ० सं० ५, ४२, १७, २।

‡ १भा० ४३९ पृ० १२ पं०।

§ "ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः। आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः॥"—इति ऋ० सं० ७, ६, १८, ४।

॥ मन्त्रैः सोमग्रथनप्रकारस्य ताण्ड्ये महाब्राह्मणे द्वितीयतृतीययोर्द्रष्टव्यः।

एवंलक्षणः पितरः, तैः साकम् 'आ याहि'। हे 'अग्ने!' 'सुविदत्रेभिः' "कल्याणविद्यैः" 'अर्वाङ्' अस्मानाभिमुख्येन, तैश्च साकम्। एवङ्गुण-युक्तैः 'पितृभिः' आगत्य 'सत्यैः' एतैः यथावत्संस्कृतैः 'कव्यैः' पितृ-देवत्यैः 'घर्मसद्भिः' यज्ञसादिभिः हविर्भिस्तृप्ति मुपयाहि। अथ वा सत्यवादिभिः पितृभिः कव्यवाहैः साक मायाहीति। एवं पितृ-विशेषणत्वेनैव* योज्य मेतदपि पदद्वयम्॥ एव मत्र शब्दसारूप्यात् 'सुविदत्र'-शब्दः "कल्याणविद्य"-वाचीत्युपपद्यते॥

"आनुषक्(४६)"—इति †, अनवगतम्। "अनुषक्तम्"—इत्यव-गमः। "नामानुपूर्वस्य"—इत्यर्थवचनम्। "आ घा ये अग्नि॰ ——॰ युवा सखा"‡। त्रिश्लोकस्यार्षम्। हृहतीसहस्रे हृचा-श्रीतिषु विनियुक्ता। 'ये' एव नित्य मग्निम् 'आ' आभिमुख्ये-नावस्थिताः 'दधते' यज्वानः, य एव यज्ञेषु 'बर्हिः' 'आनुषक्' "अनुषक्तं" 'स्तृणन्ति'; तेषा मेव 'इन्द्रः' 'युवा' नित्यः 'सखा' समानख्यानो याज्ञे कर्मणि भवति; नेतरेषा मयज्वनाम्। बर्हिः-सम्बन्धाद् 'आनुषग्'—इति "नाम" एतत् "आनुपूर्वस्य नाम"—इत्युपपद्यते॥

"तुर्वणिः(४७)"—इति §, अनवगतम्। "तूर्णवनिः"—इत्यर्थवच-नम्। तूर्णं हि यः सम्भजते, स तूर्णवनिता सन् तूर्णवनिरित्युक्तः।

---

* "पितृविशेषणेनैव"—इति ख।

† १भा॰ ४२९ पृ॰ १७ पं॰।

‡ "आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक्। येषा मिन्द्रो युवा सखा॥"—इति ऋ॰ सं॰ १, ३, ४२, १।

§ १भा॰ ४४० पृ॰ ४पं॰।

"स तुर्वणिर्महाँ०——०दामनि"*। इन्द्रस्य सव्यत्व मापन्नस्येयमार्षम्। जगती। ऐन्द्री। वैषुवतेऽहनि निष्केवल्ये शस्त्रे शस्यते। स इन्द्रः 'तूर्वणिः' तूर्णवनिता; इन्द्रो हि स्तोतारं तूर्णं सम्भजते। 'महान्' प्रभावतः। 'अरेणुपौंस्ये' अन्तरिक्षे हि यद् बलं भवति, तच्च न रेणवः सन्ति; तस्मादरेणुपौंस्य मित्युच्यते। "पौंस्यम्"—इति बलनामसु पठितम्†, तस्मिन् 'अरेणुपौंस्ये' बले अन्तरिक्षे, सङ्ग्रामे वा‡। 'गिरेः भृष्टिः' गिरिशृङ्ग मिव उच्छ्रितः भ्राजते। 'तुजा' वज्रेण प्रगृहीतेन 'श्रवः' श्रविष्ठो बलिष्ठ इन्द्रः। 'येन' वज्रेण 'प्रुष्णं'§ शोषयितारम्, 'असुरं' मेघम्, 'मायिनं' प्रज्ञावन्तम् 'आयसः' देवान् प्रति अयनशीलस्य सोमस्य 'मदे' प्राप्ते 'दुध्रः' दुर्द्धरः शत्रूणाम् 'आभूषुः' उपर्य्युपरि आत्मनो भवत मिच्छन् 'रामयन्नि दामनि' दाम्नीव न्यरमयत्, सुबध्नादित्यर्थः॥ एव मत्र शब्दसारूप्यादर्थोपपत्तेश्च "तुर्वणिः = तूर्णवनिः"—इत्युपपद्यते॥

"गिर्वणसे(५८)"—इति॥, अनवगतम्। 'गीर्वननीयः'—इत्यवगमः। "गीर्भिः" स्तुतिभिः "एनं वनयन्ति"—इति अर्थवचनम्।

---

* "स तुर्वणिर्महाँ अरेणुपौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा श्रवः। येन प्रुष्णं मायिनं मायुमेमदे दुध्र आभूषु रामयन्नि दामनि॥" इति ऋ० सं० १, ४, २१, ३।

† १भा० २१५ पृ० २अ० ६ख० (२४) "पौंस्यानि"।

‡ १भा० २६७ पृ० २अ० १७ ख० (४०) "पौंस्ये"।

§ "येन वज्रेण हि नित्यं प्रुष्णं"—इति क।

॥ १भा० ४४० पृ० ७पं० "गिर्वणाः"।

"आमासु पक्व ०——० गिर्वणसे बृहत्" *। नृमेधसः प्रियमेधसो वा ऋषय मार्षम्। बृहती। ऐन्द्रे सूक्ते। 'आमासु' अपक्वासु गोषु क्षीरं 'पक्वम्' 'ऐरयः' त्वम् इन्द्र!। तस्मादामासु सतीषु पक्वं दुह्रे इति ह विज्ञायते। तदिद मामायां सत्यां गवि मृतं पय इति। किञ्च; "आ सूर्यं रोहयो दिवि" 'आ रोहयः' 'सूर्यं' 'दिवि' द्युलोके इत्यर्थः। एव मिन्द्र मुक्त्वा स्तोतृनाह,—अस्मै इन्द्राय एवङ्गुणविशिष्टाय 'घर्मं न' घर्म मिव सुतप्तं सुष्ठु सुगुणं 'सामन्' साम 'तपत' स्थानकरणानुप्रदानवदुच्चारयतेत्यर्थः। 'सुष्टुतिभिः' शोभनाभिः स्तुतिभिः 'जुष्टं' प्रियं 'गिर्वणसे' इन्द्राय स्तुतिसम्भक्त्रे। कतमत् पुनस्तत्साम? इति,—'बृहत्' †; तद्धि प्रिय मिन्द्रस्य। एव मत्र "गिर्वणाः = देवः" उच्यते, शब्दसाम्याद्दित्युपपद्यते ॥ ५ (१४) ॥

**असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि॥ असुसमीरिताः सुसमीरिते वातसमीरिता माध्यमका‡ देवगणास्ते § रसेन पृथिवीं तर्पयन्तो भूतानि च कुर्वन्ति त आयजन्तेत्यतिक्रान्तं प्रतिवचनम्। अम्यक् सा त इन्द्र ऋष्टिः। अमाक्तेति वाभ्यक्तेति वा यादृश्मिन्**

---

* "आमासु पक्व मैरय आ सूर्यं रोहयो दिवि। घर्मं न सामन्तपता सुष्टुतिभिर्जुष्टं गिर्वणसे बृहत्॥"—इति ऋ० सं० ६, ६, १२, ७।

† तच्च साम सामवेदे आरण्यगानग्रन्थे १, ९, १, ११।

‡ "माध्यमिका" ङ, च।

§ "देवगणा ये" ङ, च।

धायि॒ तमप॒स्यया॑ विदत्। याद॒ग्नेऽधायि॑ त मपस्यया-
विदत्। उ॒स्रः पि॒तेव॑ जार॒यायि॑ य॒ज्ञैः। उस्र इव गोपिता-
जा॑यि य॒ज्ञैः॥ ६ (१५)॥

"अस्रर्त्ते सूर्त्ते(५९)"—इति *, एते अनवगते। "असुसमीरिताः", "सुसमीरिते"—इत्यवगमः। "त आर्यजन्त ०——०क्ष्णन्निमानि"†। विश्वकर्मणो भावनस्येय मार्षम्। वैश्वकर्मणीभ्यां जुहोतीति ह्युक्तं मन्त्रिप्रणयने; तत्र विनियोगः। 'असुर्त्ताः' असुः प्राणः, प्राणश्च वायुः; "योऽयं वायुः पवत एष प्राणः"—इति ह्युक्तम्‡, तेन समन्तात् ईरिताः "असुसमीरिताः" वातसमीरिताः इत्यर्थः। के पुनस्ते? "माध्यमका देवगणाः" मेघाः, इतरे च मरुदादयः। ते वातेन समीर्यन्ते; वात एव हि तान् वहति। क पुनरेतेऽवस्थिताः समीरिताः? इति,—'सूर्त्ते' "सुसमीरिते" विच्छिन्ने विस्तीर्णे इत्यर्थः। 'रजसि' अन्तरिक्षलोके 'निषत्ते' निषण्णे इत्यर्थः। समीरिताः किं कुर्वन्ति? इति,—'ये भूतानि समक्रन्वन्' समस्तानि कृतवन्तः 'इमानि'। तेषां किम्? इति,—'त आ यजन्ते' इति। "अतिक्रान्तं प्रतिवचनम्" प्रतिनिर्देशः प्रतिवचन मुच्यते, स एव पूर्वकाले प्रयोगार्हो यच्छब्दः पश्चात् प्रयुक्तः

---

* १भा० ४४० पृ० १४पं०।

† त आर्यजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूमना। अस्रर्त्ते सूर्त्ते ०——० न्निमानि॥"—ऋ० सं० ८, ३, १७, ४।

‡ "तस्मादाहुर्वायुः प्राणः"—इत्यादि ऐ० ब्रा० २, ३, १।

पश्चात्प्रयोगार्हश्च तच्छब्दः पूर्वं प्रयुक्तो मन्त्रपाठक्रमेण;—तदेतत् भाष्यकारेण प्रदर्शितं मस्मिन् मन्त्रे "त आयजन्त इति अतिक्रान्तं प्रतिवचनम्"—इति। त आयजन्तेत्यस्य पादस्य समासेनैतद्भाष्यकारेण निर्वचनमुक्तम्। "ते रसेन पृथिवीं तर्पयन्तो भूतानि च कुर्वन्ति" ते मेघाः, रसेन उदकेन, पृथिवीं तर्पयन्तः, भूतानि सर्वाण्युत्पादयन्ति, स्थितिं च एषां कुर्वन्ति। 'आ यजन्त' 'द्रविणम्' उदकम्, आभिमुख्येन ददति सर्वं मुदकम्, 'समस्मै' सर्वस्मिन् भूतजाते। एवं भूतान्युदकेन कुर्वन्ति अनुगृह्णन्ति च। अधुना दृष्टान्तमाह;—'ऋषयः पूर्वे' विश्वसृजः, 'जरितारः न' 'भूमना' भूम्ना कर्मणा वार्षसहस्रिकेण सत्रेण; तैर्हि सर्वो भूतग्रामः पूर्वं सृष्टोऽनुगृहीतश्च। एव मत्र शब्दसारूप्यादर्थोपपत्तेश्च 'असृक्त'-'सृक्त'—इत्येतयोः "असुसमीरिताः"-"सुसमीरिते"—इत्येते शब्दसमाधी उपपद्येते॥

"अभ्यक्(१०)"—इति *, अनवगतम्। "अमाक्ता इति वा, अभ्यक्ता इति वा" शब्दसमाधी। 'ऋष्टिः' अभिधेया; तां हि सङ्ग्रामे शत्रवो मन्यन्ते,—मा मेषा प्रत्यञ्चिता क्षिप्ता मा मेषा प्रत्यञ्चितेति। अथ वा "अभ्यक्तेति वा" अभिगतैव नित्यकालं शत्रून् प्रति भवतीति अभ्यगित्युच्यते। "अभ्यक् सा०——० दधति प्रयांसि" †। अगस्त्यस्यार्षम्। त्रिष्टुप्। ऐन्द्री। छन्दोमेषु द्वितीये-

---

* १भा० ४४१ पृ० १पं०।

† "अभ्यक् सा मंदस्य ऋष्टिरुग्रे सनेम्याभ्वं मुचतो जुनन्ति। अग्निर्धिया खातुवे प्रभ्रकाशापो न द्वीपं दधति प्रयांसि॥"—इति ऋ० सं० १, ४, ८, १।

ऽहनि मरुत्वतीये शस्त्रे शस्यते। 'अग्यक् सा ते' यदैवंलक्षणा रेवणा शक्तिः आभिमुख्येन मेघ मञ्चिता त्वया चिप्ता भवत्यात्मनस्तव या स्वभूता, अथ तदा मरुतोऽपि तदनुवित्त्यैव हे इन्द्र! 'अस्मे' अस्मदर्थं 'सनेमि' चिरन्तनम् 'अभ्वं' बलदक मिह पातयितुम् इति स्वान्यायुधानि मेघविदारणाय 'जुनन्ति' गमयन्ति। किञ्च; सर्वेषा मेवायुधानां मध्ये भावत्कैव शक्तिः 'अग्निरिव' 'अतसे' काष्ठे 'शुशुक्वान्' देदीप्यमान एतस्मिन् मेघे आस्ते। किञ्च; 'आपो न द्वीपम्' यथा ता द्वैप्या आपो द्वीपं परिवार्यात्मानं धारयन्ति; एव मेतानि मेघ्यानि 'प्रयांसि' उदकानि महत्त्वाद् दृष्टेः तानि मज्जयितु मशक्नुवन्ति द्वीप मिव परिवार्य धारयन्ति॥ एव मचाश्चतेर्गत्यर्थस्य (भू० प०) 'अग्यक्'—इत्येतद् दृष्टिसम्बन्धादित्युपपद्यते॥

"यादृग्मिन्(११)"—इति *, अनवगतम्। "यादृशे"—इत्यवगमः। "ज्यायांस मस्य०——०सो अरं करत्"†। अवत्सारस्येय मार्षम्। जगती। आग्नेयी। "तम्प्रत्नथा"—इत्येतस्मिन् सूक्ते ‡। उपहव्ये तृतीयसवने वैश्वदेवे शस्यते। 'ज्यायांसं' महत्तरम्। 'अस्य' 'यतुनस्य' (कर्मणि षष्ठ्यौ वा §) यतनशीलस्य भगवतः सूर्यस्य, 'केतुना' कर्मणा प्रज्ञया वा, 'ऋषिस्वरम्' ऋषिभिः स्वर्यते स्तूयते इत्यृषिस्वरः, त

---

* १भा० ४४१ पृ० टप्पं०।

† ज्यायांस मस्य यतुनस्य केतुना ऋषिस्वरं चरति यासु नाम ते। यादृग्मिन् धायि त मंपुस्यथाविदञ्च उ स्वयं वर्धते सो अरं करत्॥"—इति ऋ० सं० ४, १, १४, १।

‡ ऋ० सं० ५मं० २अं० १२ सू०।

§ नास्येतत् क-पुस्तके।

मृषिस्वरम्, स्तुवन् 'चरति' प्रचरति। "यासु नाम ते" 'यासु' क्रियासु 'नाम' नमनं 'ते' तव हे भगवन् अग्ने! स एवं चरन् तासु क्रियासु, 'यादृग्मिन्' "यादृग्ने" कामे 'धायि' मनो धत्ते, 'तम्' तादृशं कामम् 'अपस्यया' क्रियया हविःस्तुत्यादिलक्षणया तव प्रसादात् 'अविदत्' अलभतेत्यर्थः। किञ्च; 'य उ स्वयं वहते' त्वां प्रति आदरवान् प्रापयति स्तुतीः, 'सः' एव 'अरं करत्' पर्याप्तं मात्मनोऽभिप्रेतं मर्थं करोति॥ एव मत्र शब्दसारूप्याद् 'यादृग्मिन्'—इत्यस्य "यादृग्ने" —इत्येवं विपरिणाम उपपद्यते॥

"जारयायि(९२)"—इति *, अनवगतम्। "अजायि"—इत्यवगमः। "सास्माकेभि ०——० जारयायि यज्ञैः" †। भरद्वाजस्यार्षम्। आग्नेयी। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। "सास्माकेभिः" —इति छान्दस मात्वम्। 'सः अग्निः' 'अस्माकेभिः' 'शूषैः' सुखैः स्तोत्रैः 'स्तवे' स्तूयते। 'एतरी न' अतियितिरिव। 'दमे' यज्ञगृहे यज्ञे 'आ' आभिमुख्येनावस्थितैः स्तूयते 'जातवेदाः' जातविद्यो वा जातधनो वा 'द्रुन्नः' द्रुमान्नः 'वन्वन्क्रत्वा' वननीयकर्मा वननीयप्रज्ञानो वा। 'अनार्वा' अनर्वा, अनाश्रितः कश्चिदन्यम्। 'उक्षः पिता इव' साण्ड इव "गोपिता" गवां पिता 'जारजायि' "अजायि"। यथा साण्डः पुत्रपौत्रादिभिरनेकधा प्रजायते एवं यज्ञेषु विहियमाणः अनेकधा

---

* १भा० ४४१ पृ० १०पं०।

† "सास्माकेभिरेतरी न शूषैरग्निः स्तवे दम आ जातवेदाः। द्रुन्नो वन्वन्क्रत्वा-नार्वाक्षः पितेव जारयायि यज्ञैः॥"—इति ऋ० सं० ४, ५, १४, ४।

जायतेऽग्निः॥ एव मत्र 'जारजायि'—इत्यस्य "अजायि"—इत्यर्थप्रतीतिः॥ ६ (१५)॥

प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः॥ प्रास्थुर्वो जोषयमाणा अभवत सर्वेऽग्रगमनेनेति (वाग्रगरणेनेति*) वाग्रसम्पादिन इति वापि वाग्र मित्येतदनर्थक मुपबन्ध मादद्रीत। अङ्गोदिन्द्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमम्। अङ्गीन्द्र प्रस्थितानीमानि हवींषि चनो दधिष्व चन इत्यन्ननाम पचतिर्न्नामीभूतः। तं मेदस्तः प्रति पचतायभीष्टा मित्यपि निगमो भवत्यपि वा मेदसश्च पशोश्च सात्त्वं द्विवचनं स्याद्यच ह्येकवचनार्थः प्रसिद्धं तद्भवति। पुरोला अग्ने पचत इति यथा। शुरुध आपो भवन्ति शुचं सरन्त्यन्ति। ऋतस्य हि शुरुधः सन्ति पूर्वीरित्यपि निगमो भवत्यमिनोऽमितमाचो महान् भवत्यभ्यमितो वा। अमिनः सहोभिरित्यपि निगमो भवति। जज्झतीरापो भवन्ति शब्दकारिण्यः प्रदिवो† जज्झतीरिवेत्यपि निगमो भवत्यप्रतिष्कुतोऽप्रतिस्कृतोऽप्रतिस्खलितो वा। अस्मभ्य मप्रतिष्कुत इत्यपि निगमो भवति।

---

* नैतद् दृश्यते क-ख-ग-पुस्तकेषु।

† "मरुतो"—इति ख-ग-ङ-च-पुस्तकानां पाठो दक्षिणात्यसंमतविरुद्धः परं मक्षि च ऋक्संहितायां "मरुतो जज्झतीरिव"—इत्यपि निगमान्तरम् (ऋ० सं० ४,३,८,९)।

ग्राग्रदानः ग्राग्राद्यमानः। प्र त्वा मति मतिरुच्छाग्र-दान् इत्यपि निगमो भवति ॥ ७ (१६) ॥

॥ इति षष्ठाध्यायस्य तृतीयः पादः ॥ ६, ३०

"अग्रिया(९३)"—इति *, अनवगतम्। "अग्रगमनेन" अग्रियाः। अग्र मेव अग्रियाः, अनर्थक एवाग्रशब्दे 'या'कार उपबन्ध उपात्तः—"अपि वाग्र मित्येतदनर्थक मुपबन्ध मादद्दीत"—इत्युक्तं भाष्यकारेण। "अयं वो यज्ञ ०——० अग्रियोत वाजाः" †। वामदेवस्यार्षम्। आर्भवे चिष्टुप्। व्यूढस्य दशरात्रस्य पञ्चमेऽहनि तृतीये सवने वैश्वदेवे शस्यते। हे 'ऋभवः!' युष्माकम् 'अयं' 'यज्ञः' 'यम्' अह मकार्षम्। त मागत्य 'मनुष्वत्' मनुष्यवत्, 'प्रदिवः' प्रकर्षेण द्योतमानाः सन्तः, 'आदधिध्वे' धारयध्वे। एतद् 'वः' प्रब्रवीमि। किञ्च; "प्रवोऽच्छा जुजुषाणासो अस्युः" प्रस्थितानि यान्येतानि हवींषि, तानि यूयं "जोषयमाणाः" देवैः सेव्यमाना वा आत्मना 'अग्रिया' 'अग्रभूत' "अभवत"। 'उत वाजाः' अपि च हे वाजाः! यूय मग्रेव मेव भवत॥ एवम् "अग्रगामिनः अग्रसम्पादिनो वा अग्र मेव वा= अग्रिया"; तथार्थोपपत्तेः शब्दसारूप्याच्च॥

"चनः(९४)—इति ‡, अन्ननाम" "पचता(९५)"—इति, "पचतिः

---

* १मा० ४४१ पृ० १पं०।

† "अयं वो यज्ञ ऋभवोऽकारि य मा मनुष्वत्प्रदिवो दधिध्वे। प्र वोऽच्छा जुजुषाणासो अस्युरग्रियोत वाजाः॥"—इति ऋ० सं० ३, ७, ३, ३।

‡, § १मा० ४४१ पृ० ७पं०।

नामीभूतः"—इति भाष्यकारो ब्रवीति। "अद्धीदिन्द्र ०——०यजमानस्य कामाः" *। इय मग्नियुतस्य वाग्नियूपस्य वार्षम्। त्रिष्टुप्। ऐन्द्री। 'अद्धि' भक्षय। हे 'इन्द्र!' 'प्रस्थिता' "प्रस्थितानि," 'इमा' "इमानि" 'हवींषि', 'चनः' अन्नम्, एतत् हविर्लक्षणम् 'दधिध्व' प्रक्षिप जठरे। 'पचता' पक्वानि इमानि हवींषि, अत एवं ब्रवीमि दधिध्वेति। 'उत सोमम्' अपि च सोमं दधिध्व। 'प्रयस्वन्तः' अन्नवन्तो वयं हवींषि कामयमानं 'त्वा' त्वां 'प्रति हर्य्यामसि' प्रतिहर्य्यामः, कामयामहे। "सत्याः सन्तु यजमानस्य कामाः"—इत्यभिप्रायेण। 'हवींषि'—इत्यनेन सम्बन्धात् 'पचता'—इत्येतदन्नविषयं बहुवचन मुपपद्यते॥ "पचतिर्नामीभूतः"—इति धातुनिर्देशः॥

द्वितीय मुदाहरणं ब्रवीति, अर्थविशेषदर्शनादस्येति;—"तं मेदस्तः प्रति पचताग्नीष्टाम्"—इति। 'तं' पशुं 'मेदस्तः' यतस्तस्य मेदो वपासहयोगि, ततः, तेन प्रदेशेन 'प्रत्यग्नीष्टाम्' इन्द्राग्नी 'पचता' पक्व मित्यर्थः॥ एव मेतदेकवचनं भवति॥

"अपि वा" "मेदसश्च" वपासहयोगिनः "पशोः" पशुवदानस्य चाभिधायक मेतत्; "सात्त्वं" सत्त्वविषयं "द्विवचनं स्यात्"। सन्ति ह्येवंरूपाणि द्विवचान्यपि तद्यथा;—"दैव्या होतारा भिषजा" †॥

किं कारण मुच्यते "द्विवचनम्" एतत् "स्यात्"—इति? अतः;—यस्माद् "यच्च हि एकवचनार्थः प्रसिद्धम्" एव, निःसन्देह मेव

---

* "अद्धीदिन्द्र प्रस्थितेमा हवींषि चनो दधिध्व पचतोत सोमम्। प्रयस्वन्तः प्रति हर्यामसि त्वा सत्याः सन्तु यजमानस्य कामाः॥"—इति ऋ० सं० ८,१,२१,३।

† "दैव्या होतारौ, प्रथमाजदेवौ। अयं वामग्निरसौ च मध्यमो वायुः॥"—इति तत्रैव महीधरः। य० वा० सं० २१, १८।

"तद् भवति ;—'पुरोला* अग्ने पचतः'—इति यथा"। "पुरोला अग्ने०——०यविष्ठ्य" †। विश्वामित्रस्यार्षम्। गायत्री। आग्नेयी। आश्विनस्य द्विकपालस्य अतिरात्रे यदि स्विष्टकृद् भवति, तस्येयं पुरोऽनुवाक्या भवति। 'पुरोडाः' पुरोडाशः 'पचतः' पक्व इत्यर्थः। 'तुभ्यं' त्वदर्थम्। भगवन् 'अग्ने!'। 'व'-'घ'—इति अनर्थकौ। न केवलं पक्वः, किन्तर्हि? 'परिष्कृतः' सुसंस्कृत इत्यर्थः। तं 'जुषस्व' सेवस्व हे 'यविष्ठ्य' युवतम! अथ वा मिश्रयितम!॥ एव मत्र 'परिष्कृतः'—इत्येतस्मादेकवचनसम्बन्धात् 'पचतः'—इत्येकवचन मेव सिध्यति॥

"प्रुरुधः(६६)"—इति ‡, अनवगतम्। "आपो भवन्ति"—इति अभिधेयवचनम्। "प्रुचं संरुन्धन्ति"—इति निर्वचनम्। "प्रुप्रुधः"—इति न्याय्यम्। "ऋतस्य हि प्रुरुधः"—इति § दैवते शेषः॥॥

"अमिनः(६७)"—इति ¶ अनवगतम्। "अमितमात्रः"—इत्यवगमः; न यस्य मात्राणां मान मस्ति, सोऽमिन इत्युच्यते।

---

* निरुक्तमूलपुस्तकेषु तदुक्तिपुस्तकेषु च सर्वत्रैव "पुरोला"—इत्येव पाठो दृश्यते परं प्रातिशाख्यानुसारेण तु "पुरोळा"—इति भवितव्यम्; ऋक्संहितापाठस्तु "पुरोळा"—इत्येव मेव दृश्यते सर्वत्र।

† "पुरोळा अग्ने पचतस्तुभ्यं वा घा परिष्कृतः। तं जुषस्व यविष्ठ्य॥"—इति ऋ० सं० ३, १, ३१, २।

‡ १भा० ४४२ पृ० १७पं०।

§ ऋ० सं० ३, ६, १०, ३।

॥ 'दैवते' इत उत्तरस्मिन्नेव काण्डे (१०,४,४) 'शेषः' इत्र पठिताद्न्यो ऋगंशः।

¶ १भा० ४४२ पृ० १९पं०।

"अभ्यमितो वा" अनभिहिंसितो यः केन चिदसौ अमिनः। "महाꣳ इन्द्रो०——०कर्त्तृभिर्भूत्" *। भरद्वाजस्यार्षम्। त्रिष्टुप्। ऐन्द्री। दशरात्रस्याष्टमेऽहनि मरुत्वतीये शस्त्रे शस्यते, माहेन्द्रश्च ग्रहोऽनयैव गृह्यते। 'महान्' प्रभावतः, 'नृवत्' मनुष्यवत्, 'आचर्षणिप्राः' आपूरयिता 'चर्षणीनाम्' मनुष्याणां कामैः; यथा हि मनुष्य ईश्वरः परितुष्टः कामैरवश्यं भृत्य मापूरयति, वए मिन्द्रोऽपि स्तोतारम्। 'उत द्विबर्हाः' अपि च द्वयोः स्थानयोः मध्यमोत्तमयोः परिवृढः 'अमिनः' च अमितमात्रः, अथ वा अनभिहिंसितः केनचित्। केन पुनरमिनः? इति, उच्यते,— 'सहोभिः' बलैरित्यर्थः; न ह्यीन्द्रस्य बलमात्राः केन चिन्मितपूर्वा इत्यर्थः, अनभिहिंसितपूर्वो वा केनचिदिन्द्रः। 'अस्मद्' अस्मदनुग्रहाय अस्मद्धनाय 'वावृधे' वर्द्धते। 'वीर्याय' वीरकर्मणे वर्षार्थम्' 'उरुः' महान् परिमाणतः, 'पृथुश्च' विस्तीर्णो, यः, सोऽस्माकं प्रत्यभिमुखो दानायाभिप्रेताना मर्थानां 'सुकृतः' स्तुतिभिः एतैः कर्त्तृभिः ऋत्विग्भिः 'भूत्' भूयादित्यर्थः॥ एव मत्र 'अमिन'-शब्देन "अमितमात्रः" अनभिहिंसितभात्रो वा—इत्युच्यते शब्दसारूप्यादर्थोपपत्तेश्च॥

"जज्ञतीः(१८)"—इति †, अनवगतम्। शब्दानुकरणात् "आपः"—इति प्रतीयन्ते। "आ रुक्मैरायुधा०——०त्मना दिवः"‡।

---

* "महाँ इन्द्रो ह्यवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः। अस्मद्र्यग् वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत्॥"—इति ऋ० सं० ४, ९, ७, १।

† १भा० ४०३ पृ० ९५०।

‡ "आ रुक्मैरायुधा नरः ऋष्वा ऋष्टीरशिश्रयुः। अग्नेर्न यन्ति विद्युतो मरुतो जज्झतीरिव भानुरर्त्त त्मना दिवः॥"—इति ऋ० सं० ४, ३, ९, १।

श्यावाश्वस्यार्षम्। मारुती। पङ्क्तिः। 'आ' आभिमुख्येन 'शत्रून्' शातयितव्यान् मेघान् प्रति 'आयुधा' एतान्यायुधानि 'रुक्मैः' विकृतानि, एताश्च 'रुक्मीः' शक्तीः 'असृक्षत' असृजन्त हे 'नरः' मरुतः! किञ्च; 'अन्वेनान्' प्रहारान् 'विद्युतः' 'भानुः' आदित्यः 'इव' 'त्मना' आत्मना 'दिवः' द्युलोकाद् 'अर्त्त' अपगच्छन्तु। मेघेभ्यो हन्यमानेभ्यः तदन्वेव चापोऽपि 'अर्त्त' आगच्छन्तु। कथम्? इति,—'जज्झतीः इव' "शब्दकारिण्यः" इव स्रोतस्याः "आपः" 'पप्रथुः' प्रभूता इत्यर्थः॥ एव मत्र शब्दानुकरणात् "आपः = जज्झतीः" —इत्युपपद्यते॥

"अप्रतिष्कुतः(९९)"—इति *, अनवगतम्। "अप्रतिष्कृतः, अप्रतिस्खलितः वा"—इति शब्दसमाधौ। "स नो वृषन्०——० अस्मभ्यं मप्रतिष्कुतः" †। मधुच्छन्दस आर्षम्। गायत्री। ऐन्द्री। पृष्ठ्याभिप्लवयोः प्रातःसवनिके आवापे विनियुक्ता, ब्राह्मणाच्छंसिनः शस्त्रे। हे 'वृषन्' इन्द्र! वर्षितः! यः त्वम् अनुगृहीता 'नः' अस्माकम्, 'सः' त्वं शृणु यत् कुरुष्व। 'अमुं चरुम्' अमुं मन्तरिक्षचरणशीलं मेघम्। हे 'सचा दावन्' सततदान! 'अपावृधि' अपावृणु, उदकदानार्थं मस्मभ्यम्। 'अप्रतिष्कुतः' न क्वेन्द्रः "प्रतिष्कृतः" परान् प्रति पराङ्मुखः कृतपूर्वः केनचित्, अथ वा "अप्रतिस्खलितः" सङ्ग्रामेषु॥ एव मत्र 'अप्रतिष्कुत'-शब्दः "अप्रतिष्कृत"-वाची अथ वा "अप्रतिस्खलित"-वाची, तथार्थाविरोधः॥

---

* १भा० ४४२ पृ० १२ पं०।

† "स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि। अस्मभ्यं मप्रतिष्कुतः॥"—इति ऋ० सं० १, १, १४, १।

"शाशदानः(°०)"—इति *, अनवगतम्। "शाशाद्यमानः"—इत्यवगमः। "अभि सिध्मो०——०मतिरुच्छाशदानः"†। हिरण्यस्तूपस्यार्षम्। गोसव-विवधयोर्निष्केवल्ये शस्यते। 'अभि अजिगात्' अभ्यगच्छत्। 'अस्य' इन्द्रस्य स्वभूतः, 'तिग्मः' उत्साहवान् वज्रः शत्रून् प्रति 'सिध्मः' साधयिता शत्रूणाम्। 'वितिग्मेन' तीक्ष्णेन 'वृषभेण' वर्षप्रवर्त्तकेन। 'पुरः' मेघपुरः असुरपुरो वा 'अभेत्'। किञ्च; 'ससृजत् वज्रेण वृत्र मिन्द्रः'। स च भिद्यमानः 'प्रातिरत् स्वां मतिं' "न दातव्य मुदक मेषाम्"—इत्येतां मतिं स्वां 'प्रातिरत्' प्राजहादित्यर्थः। 'शाशदानः' पुनः पुनः "शाशाद्यमानः" इन्द्रेण॥ एव मत्र "शाशदानः = शाशाद्यमानः"—इत्युपपद्यते, शब्दसारूप्यादर्थाविरोधाच्चेति॥ ७ (१६)॥

इति निरुक्तवृत्तौ एकादशस्याध्यायस्य (षष्ठाध्यायस्य) तृतीयः पादः॥ ६,३॥

---

॥ चतुर्थः पादः॥

**सृप्रः सर्पणादिद मपीतरत्सृप्र मेतस्मादेव सर्पिर्वा तैलं वा। सृप्रकरस्न मूतय इत्यपि निगमो भवति। करस्नौ बाहू कर्मणां प्रस्नातारौ सुशिप्र मेतेन व्याख्या-**

---

* १भा० ४४२ पृ० १७ पं०।

† "अभि सिध्मो अजिगादस्य शत्रून् वि तिग्मेन वृषभेणा पुरोऽभेत्। सं वज्रेणासृजद् वृत्र मिन्द्रः प्र स्वां मति मतिरुच्छाशदानः॥"—इति ऋ० सं० १, ३, ३, ३।

तम्। वाजे सुशिप्र गोमतीत्यपि निगमो भवति शिप्रे हनू नासिके वा हनुर्हन्तेर्नासिका नसतेः। वि ष्यस्व शिप्रे वि सृजस्व धेने इत्यपि निगमो भवति। धेना दधाते रंसु रमणात्। स चिचेण चिकिते रंसु भासेत्यपि निगमो भवति। द्विबर्हा द्वयोः स्थानयोः परिवृढो* मध्यमे च स्थान उत्तमे च। उत द्विबर्हा अमिनः सहोभिरित्यपि निगमो भवत्यक्र आक्रमणात्। अक्रो न बभ्रिः समिथे महीना मित्यपि निगमो भवत्युराण उरु कुर्वाणः†। दूत ईयसे प्रदिव उराण इत्यपि निगमो भवति॥ १‡॥

"सृप्र(७१)"—इति §, अनवगतम्। 'सर्पेः'—इत्यवगमः। "सर्पणात्"—इति निर्वचनम्। "इदम् अपि इतरत् सृप्रम्", "एतस्मादेव" स्यात्, यदेतत् "सर्पिर्वा तैलं वा"; तदपि हि सर्पति। "सृप्रकरस्य मूतय"—इति॥ निगमः। "वृबदुक्थं हवामहे"—इति व्याख्यातः शेषः¶। "करस्नौ बाहू, कर्मणां प्रस्नातारौ" निर्वर्त्तयितारावित्यर्थः**॥

---

* "परिवृढो" च।
† "उरणपूर्णः" क।
‡ नाच खण्डसमाप्तिः ङ-च-पुस्तकयोः।
§ १भा० ४४४ पृ० १पं०।
॥ ऋ० सं० १, ३, २, ५।
¶ पृ० १४६ पृ० १पं०। तत्रैव "*" टीपन्यां पाठो द्रष्टव्यः।
** १भा १९० (७) द्रष्टव्यम्।

"सुशिप्रः(७१)"—इति *, अनवगतम्। तत् पुनः "एतेन" एव सूत्रशब्देन "व्याख्यातम्" सर्पतेरेवैतदपि †; "शिप्रे = हनू, नासिके वा", ते यस्य शस्ते, स सुशिप्रः। "वाजे सुशिप्र गोमति"—इति ‡ निगमो "विद्मा संखित्वम्"—इति व्याख्यातः §। नास्मिन् मन्त्रे नासिकयोर्हन्वोर्वा शिप्रशब्दवाच्यत्वे विशेषलिङ्गमस्तीति, अतः "शिप्रे हनू नासिके वा"—इत्युक्त्वा विशिष्टलिङ्गं मन्यदुदाहरणं ब्रवीति;—"वि ष्यस्व शिप्रे"—इति। "मादयस्व०——०प्रति नो जुषस्व" ॥। कुत्सस्येय मार्षम्। ऐन्द्री। जगती। दशरात्रस्य नवमेऽहनि मरुत्वतीये शस्त्रे शस्यते। 'मादयस्व' हर्षयस्व 'स्वम्' आत्मानम् हे 'इन्द्र!' 'हरिभिः' अश्वैः, 'ये' 'ते' तव स्वभूताः, तैः सह। कथं च पुनर्मादयस्व? इति,—'विष्यस्व' विमुञ्चस्व 'शिप्रे' सूत्रे, दीर्घे हनू हविर्भक्षणाय, नासिके वा गन्धाघ्राणाय; एवं मादयस्वात्मान मिति। 'विसृजस्व धेने' आधस्ये दंष्ट्रे वा, 'जिह्वोपजिह्विके वा'—इत्येके; तयोर्हि अन्नं धीयते। किञ्च; 'आ त्वा वहन्तु हरयः' हृष्टाः सन्त आवहन्तु त्वां हरयः अस्मान् प्रति। हे 'सुशिप्र!' 'उशन्' कामयमानः 'हव्यानि' हवींषि एतानि अस्मत्प्रत्तानि। स्तुतिभिरस्माभिरासेवितः 'प्रति जुषस्व नः' प्रति

---

* १भा० ४४४ ट० ५पं०।

† पु० ११० ट० ११पं०।

‡ ऋ० सं० १, २, २, ३।

§ पु० १११ ट० ६पं०; तत्रैव "*" टीप्पन्यां पाठो द्रष्टव्यः।

॥ "मादयस्व हरिभिर्ये ते इन्द्र वि ष्यस्व शिप्रे वि सृजस्व धेने। आ त्वा सुशिप्र हरयो वहन्तूशन् हव्यानि प्रति नो जुषस्व ॥"—इति ऋ०सं०१, ७, १२, ४।

सं सेवस्व नः कामैरित्यभिप्रायः॥ एव मच मादनसम्बन्धात्, हविः-सम्प्रदानसम्बन्धाच्च "शिप्रे = हनू नासिके वा"—इत्युपपद्यते॥

यत्तदुक्तम्,—"शिप्रे इत्युपरिष्टाद् व्याख्यास्यामः"—इति *, एतद् व्याख्यातम्,—"शिप्रे = हनू नासिके वा"—इति †॥

"हनुः, हन्तेः (अदा०प०)" धातोः। "नासिका, नसतेः" "नसतिराप्नोतिकर्मा वा नमतिकर्मा वा"—इति हि वक्ष्यति ‡॥

"रंसु(७१)"—इति §, अनवगतम्। 'रमणीयेषु'—इत्यवगमः। "रमणात्"—इति निर्वचनम्। "आयन्ने अभ्वं०——०मुहुरा युवा भूत्"॥ ‖ सोमाङ्कतेर्भार्गवस्यार्षम्। त्रिष्टुप्। आग्नेयी। प्रातरनुवाकाश्विनयोः शस्यते। 'आ पनन्त' आभिमुख्येन पनन्त, अस्तुवत। 'मे' मम स्वभूते कर्मणि। 'अभ्वं' महान्तम् अग्निम्, 'वनदः' वननीयस्य हविषो दातारः ऋत्विजः यं 'वर्णं' वरं वृण्वन्ति अस्मदर्थम्, तेभ्यः 'उशिग्भ्यः' मेधाविभ्यः। त मसौ वरणं प्रार्थनां 'न अमिमीत' न हिनस्ति। किन्तर्हि? यथाप्रार्थित मेव समर्द्धयतीत्यर्थः। किञ्च; 'सः' अग्निः 'चिचेण' चायनीयेन भासा युक्तः 'रंसु' रमणीयेषु स्थानेषु द्युलोकादिषु अग्निहोत्रेषु वा 'चिकिते'। किंलक्षणो 'यः' अग्निः? इति,—'जुजुर्वान्' पुनः पुनः जरावान् अपि

---

* १भा० ४०४ ४० १४ पं०।
† प० २१०४० १पं०।
‡ दै० का० ७, ४, ४।
§ १भा० ४४४ ४०९१०पं०।
‖ "आयन्ने अभ्वं वनदः पनन्तोशिग्भ्यो नामिमीत वर्णम्। स चिचेण चिकिते रंसु भासा जुजुर्वां यो मुहुरा युवा भूत्॥"—इति ऋ० सं० १, ५, १४, ५।

भवति, 'युवरा युवा भवत्' इत्यनन्तरात् पुनरित्यनं प्राप्य तस्योपरि दीप्यमानो युवर्युवः युवैव भवति॥ एव मत्र शब्दसाहचर्यादर्थावि-रोधाच्च 'रंसु'—इत्यस्य 'रमणीयेषु'—इति विपरिणाम उपपद्यते॥

"द्विबर्हाः(७४)"—इति *, अनवगतम्। 'द्विपरिवृढः'—इत्यत न्याय्यम्। मध्यमे च स्थाने वैद्युतात्मना, उत्तमे च सूर्यात्मना। "उत द्विबर्हाः"—इति † निगमः। "महाꣳ इन्द्रः"—इति व्याख्यातः शेषः ‡॥

"अक्रः(७५)"—इति §, अनवगतम्। 'आक्रमणः'—इति न्याय्यम्। "आक्रमणात्"—इति निर्वचनम्। प्राकारोऽभिधेयः। "अक्रो न बभ्रिः ०——० यक्रो अग्निः"॥। विश्वामित्रस्यार्षम्। त्रिष्टुप्। आग्नेयी। प्रातरनुवाकाश्विनयोः शस्यते। 'अक्रो न' अक्र इव, प्राकार इव। 'बभ्रिः' भर्त्ता, धारयिता। क्व? 'समिथे' सङ्ग्रामे। कस्य? 'महीनां' महतीनां शत्रुसेनानाम्। एवंलक्षणो योऽग्निः। किञ्च; 'दिदृक्षे यः' दृश्यते यः। 'सूनवे' सोमाभिषवकर्त्रे यज-मानाय नित्यकाल मेव। 'भाऋजीकः' प्रसिद्धभाः, प्रसिद्धदीप्तिः, नित्योज्वलित इत्यर्थः। किञ्च; सर्वस्य लोकस्य 'जनिता' जनयिता। 'उस्रिया उज्जजान' उस्रिया आहुतीः आत्मनि प्रक्षिप्ताः सतीः

---

* १भा० ४४४ पृ० १६ पं०।

† ऋ० सं० ४, ६, ७, १।

‡ पु० १०७पृ० १पं०; तत्रैव "*" टीप्पन्यां पाठश्च।

§ १भा० ४४५ पृ० १पं०।

॥ अक्रो न बभ्रिः समिथे महीनां दिदृक्षे यः सूनवे भाऋजीकः। उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यक्रो अग्निः॥"—इति ऋ० सं० १, ८, १५, १।

देवताऽग्निसमर्थेन रूपेण ऊर्ध्वाः 'यः' जनयति। अथ वा गाव एव वोक्षियाः स्युः, ता अपि ह्यसौ पशुकामकर्मणि अङ्गभावं गच्छन् जनयति। यश्च 'अपां गर्भः', यश्च 'नृतमः' मनुष्यतमः, यश्च 'यक्षः' महान्, 'अग्निः', स इदं नामास्माकं करोत्विति॥ एव मत्र शब्दसारूप्यादर्थाविरोधाच्च "अक्राः = प्राकारः"—इत्युपपद्यते; असौ हि आक्रम्यते जनैः॥

"उराणः(७६)"—इति *, अनवगतम्। "उरू कुर्वाणः"—इत्यवगमः। "वेरध्वरस्य दूत्यानि ०——० दिव आरोधनानि" †। वामदेवस्यार्षम्। त्रिष्टुप्। आग्नेयी। प्रातरनुवाकाश्विनयोः शस्यते। हे भगवन्नग्ने! 'वेः' त्वं जानीषे। किम्? 'अध्वरस्य' यज्ञस्य 'दूत्यानि' दूतकर्माणि, यानि दूतेन कर्त्तव्यानि। किञ्च; 'उभे अन्ता' उभावप्यन्तौ 'रोदसी' रोदस्योः 'विद्वान्' असि विजानीषे। किञ्च; समस्त मप्येतज्जगत् 'चिकित्वान्' असि; न ते विज्ञानप्रतीघातोऽस्ति कृत्स्नेऽपि जगति; विजानीषे सर्वाणि देवतास्थानानि। 'प्रदिवः' एव असि 'दूतः' चिरन्तनः सर्वेषां यजमानानाम्। यतोऽस्मासिन्ख मेतस्मिन् कर्मणि 'दूतः' दूतत्वेन 'ईयसे' याच्यसे, स त्वम् 'उराणः' अल्प मपि ऋतं हविः देवताऽग्निसमर्थं बहु कुर्वाणः। 'विदुष्टरः' विद्वत्तरः, मनुष्यहोतुः सकाशात्। 'दिव आरोधनानि'

---

* १भा० ४४५ पृ० ५पं०।

† "वेरध्वरस्य दूत्यानि विद्वानुभे अन्ता रोदसी सचिकित्वान्। दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि॥"—इति ऋ० सं० १, ५, ७, १।

आरोढव्यानि देवतास्थानानि * प्रति वह एतानि हवींषीत्यभिप्रायः॥ एवं मन्त्र शब्दसारूप्यादर्थोपपत्तेश्च 'उराणः'—इत्यस्य "उरु कुर्वाणः"—इत्येष विपरिणाम उपपद्यते ॥१॥

स्तिया आपो भवन्ति स्थायनात्। वृषा सिन्धूनां वृषभ स्तियाना मित्यपि निगमो भवति। स्तिपा स्तिया-पालन† उपस्थितान् पालयतीति वा। स न स्तिपा उत भवा तनूपा इत्यपि निगमो भवति॥ जबारु जवमान-रोहि जरमाणरोहि गरमाणरोहीति वा। अग्रे रुप आरुपितं जबार्वित्यपि निगमो भवति। जरूथं गरूथं गृणातेः जरूथं हन्यक्षि राये पुरन्धि मित्यपि निगमो भवति। कुलिश इति वज्रनाम कुलशातनो भवति। स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उप पृक् पृथिव्याः। स्कन्धो वृक्षस्य समास्कन्नो भवत्यय मपीतर स्कन्ध‡ एतस्मादेवास्कन्नं कायेऽहिः शयत उप-पर्चनः पृथिव्यास्तुञ्जस्तुञ्जतेर्दानकर्मणः॥ २ (१७)॥

"स्तिया:(७७)"—इति§, अनवगतम्। 'स्थायजाः'—इति न्याय्यम्।

---

* "दुरोहणं रोहति, स्वर्गो वै लोको दुरोहणम्"—इत्यादि, "आरुह्य दूरोहणं रोहति"—इत्यादि च ऐ० ब्रा० ४, ३, ५-६।

† "स्तिपा सृपां पालन" क, ख, ग। "स्तिपसासां पालन" ङ।

‡ "भवतीद मपीतरत् स्कन्ध" क, ख, ग।

§ १भा० ४४५ पृ० १० पं० "स्तियानाम्"।

"आपो भवन्ति"—इत्यभिधेयवचनम्। "स्त्यायनात्" संहननात् इत्यर्थः; आप एव हि पार्थिवाना मवयवानां संहनने हेतुभूता भवन्ति; अथ वा हिमप्रभावेन च ता आत्मनैव संहता भवन्ति। "वृषासि दिवो०——०मधुपेयो वराय"*। ग्रंथोर्बार्हस्पत्येय मार्षम्। ऐन्द्री। हे इन्द्र! 'वृषा असि' वर्षितासि 'दिवः', 'पृथिव्याः' च वर्षिता। 'स्निन्नूनां' स्यन्दमानाम् अपाञ्च वर्षिता। 'स्त्रियानां' संहन्त्रीणाम् अपाम्; अथ वा संहताना मात्मनैव हिमप्रभावेन। यावत् किञ्चित् सेचकर्म, तत् सर्वं त्वदधीन मित्यभिप्रायः। तस्मै ते एवंगुणविशिष्टाय 'वृष्णे' वर्षित्रे 'ते' तुभ्यम्। एष 'इन्दुः' सोमः, हे 'वृषभ' वर्षितः! 'पीपाय' पुनः पुनः आप्यायते; अथ वा पानाय संस्कृतः, 'स्वादू रसः' स्वादुरसमंयुक्तः' 'मधुपेयः' मधुरपेयः, 'वराय' तुभ्यं श्रेष्ठायेत्यर्थः॥ एव मत्र 'स्त्रिया'-शब्देन 'संहन्त्र्यः, संहता वा आपः' उच्यन्ते; शब्दसारूप्यात् "स्त्यै शब्दसङ्घातयोः (भू०प०)" —इत्यस्य॥

"स्त्रिपाः(७८)"—इति†, अनवगतम्। "स्त्रियापालनः"—इत्यवगमः। 'कूपः' अभिधेयः; स हि "उपस्थितान्" पान्थान् "पालयति"। "यं त्वा पूर्व०——०यदिदं ते अस्मे"‡। वाध्र्यश्वस्य सुमित्रस्येय मार्षम्। त्रिष्टुप्। आग्नेयी। 'हे अग्ने!' 'यं त्वां' वध्र्यश्वः

* "वृषासि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभः स्त्रियाणाम्। वृष्णे तु इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय॥"—इति ऋ० सं० ४, ७, १०, १।

† १भा० ४४५ इ० १५ पं०।

‡ 'यं त्वा पूर्वे मीळितो वध्र्यश्वः समीधे अग्ने स इदं जुषस्व। स नः स्त्रिपा उत भवा तनूपा दाचं रचस्व यदिदं ते अस्मे॥"—इति ऋ० सं० ८, १, १९, ४।

'ईडितः' अपि सर्वैर्महर्षिभिः, 'पूर्वे' 'समीधे' समेधितवान्, उपचीर्णवान्, तं त्वा मह मपि समिन्धे; को हि नाम त्वां न समिन्ध्यात्। 'सः' त्व मिध्यमानः अस्माभिः 'इदं' हविः 'जुषस्व' संसेवस्व। किञ्च; य एव मस्माभिः ईड्यसे त्वम्, 'सः' 'नः' 'स्तिपाः' कूप इव 'तनूपाः' भव; कूपो हि तृष्णयार्त्तान् पातॄन् पात्युदकसम्प्रदानेन। किञ्च; 'दात्रम्' दानम् 'रचस्व'। कतमत्? 'यदिदं ते' 'अस्मे' अस्मासु वर्त्तते इत्यर्थः॥ एव मत्राविरोधाच्छब्दसारूप्याच्च "स्तिपाः = कूपः"—इत्युपपद्यते॥

"जबारु(७९)"—इति *, अनवगतम्। "जबमानरोहि"—इत्येव माद्याः शब्दसमाधयः। "त मिन् त्वे इव संमना०——०आरुपितं जबारु" †। वामदेवस्यार्षम्। "वैश्वानराय मीळ्हुषे सजोषाः"—इत्येतस्मिन् वैश्वानरीये सूक्ते ‡। 'तम्' एव हे यजमान! त्वम् 'अभ्यक्षाः' प्राप्नुयाः वैश्वानरं सूर्यम्। 'समना' समानयैव, तदनुरूपयैव स्तुत्या 'समानम्'। केन पुनरभ्यक्षाः? 'क्रत्वा पुनती' स्वात्मपवनसमर्थेन कर्मणा प्रज्ञानेन वा। किंलक्षणः पुनर्यो वैश्वानरः त मभ्यक्षाः? 'सप्तस्य पृश्नेः' स्वपनस्य § द्युलोकस्य 'पृश्नेः' प्राप्तवर्णस्य॥ 'अधि' उपरि; स्वपन्तौव ¶ हि द्युलोको निश्चलत्वात्। 'चर्मन्'

---

* १भा० ४५१ सू० १९०।

† "त मिन् त्वे इ॒व संम॒ना संमान मभिक्रत्वा पुनती धीतिर॑क्षाः। स॒प्तस्य चर्मन्नधि चारु॒ रुश्मे॑रा॒रुपि॑तं॒ जबारु॥"—ऋ० सं० ३, ५, ९, २।

‡ ऋ० सं० ४म० ९अ० ५सू०। वस्तुत एषा ऋक् न तु वैश्वानरीये; अपि त्वाग्नेये, तथा चानुक्रम्यते "भद्राः सुमिचो बाध्रश्च आग्नेयं द्विजगत्यादौति" (ऋ० सं० १०म० ९अ० १सू० सा० भा०)।

§ "अयनस्य" क। ‖ "प्राप्तवर्णस्य" क। ¶ "स्वपितौव" ख।

चरणार्थम्। कथं नाम सौर्येण प्रकाशेन जनास्चरेयुरित्यनेनाभिप्रायेण। 'चारु' दीप्तिमत्। 'अग्ने' पूर्वमर्गादौ 'रुपः आरुपितम्' 'रिपः'—इति विपरिणामः, भूम्या इत्यर्थः, 'आरुपितम्' आरोपितं देवैः, 'जबारु' मण्डलं यस्य। तं त्व मभ्यश्याः। इह वा आदित्य आसीत्, त माभ्यां परिगृह्योपरिष्टात् तासां प्रजानां न्यदधुरिति विज्ञायते॥ एव मत्र "जबारु = आदित्यमण्डलम्" उच्यते; तद्धि जवमानं गच्छन् नभसेा मध्य मारोहति, जायते वा उदेतीत्यर्थः; जवमान मेव हि तत्तच्चोदेति। "जरमाणरोहि" वा स्यात्; तद्धि जरमाणं* सर्वभूतानि रोहति। "गरमाणरोहि वा" तद्धि गरमाणं रसानारोहति॥

"जरूथम्(८०)"—इति *, अनवगतम्। "गरूथम्"—इत्यवगमः। "गृणातेः (क्र्या०प०)"—इति धातुनिर्देशः। "त्वा मग्ने समिधा नेा ०——० सदा नः" †। वसिष्ठस्यार्षम्। आग्नेयी। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। हे भगवन् 'अग्ने!' 'वसिष्ठः' 'त्वां' 'समिधानः' सन्दीपयन् 'जरूथं' स्तोत्रं 'हन्' गमयन् त्वां प्रति; "हन्ति, सेधति"—इति गतिकर्मसु पठितम्‡। 'यक्षि' यजति। 'राये' धनप्राप्त्यर्थम्। 'पुरन्धिम्' बहुकर्मवतं धनसम्बन्धाद्वा बहुदातृतम मिति स्यात्। यस्त्वं वसिष्ठेन एव मिज्यसे, तं त्वां वय

---

* १भा० ४४९ पृ० ५ पं०।

† "त्वा मग्ने समिधानो वसिष्ठो जरूथं हन्यक्षि राये पुरन्धिम्। पुत्रवीया जातवेदो जरस्व यूयं पात स्वस्तिभिः सदा नः॥"—इति ऋ० सं० ५, २, १२, १।

‡ १भा० १ऋ० १४ व० (१०९), (११०)।

मपि यजाम एव। स त्वं 'पुरुनीथा' बहुस्तुत! 'जातवेदः' अस्माभिरिज्यमानो 'जरस्व' जुषस्वैतद्धविः अस्मत्प्रत्तम्। किञ्च; 'यूयम्' अस्मान् 'पात' रक्षत। एकस्यैव पूजनार्थं बहुवचनम्। 'स्वस्तिभिः' स्वस्त्ययनैः, आशीःप्रयोगैः पात 'नः'। 'सदा' नित्य मेवेत्यर्थः। एव मत्र जरतेः स्तुत्यर्थस्य शब्दसारूप्यादर्थाविरोधाच्च "जरूथम् = स्तोत्रम्" उपपद्यते॥

"कुलिशम्[८९]"—इति *, अनवगतम्। "वज्रनाम"—इत्यभिधेयवचनम्। "कूलशातनः"—इति शब्दसमाधिः। "अहन् वृत्रं०——० उपपृक् पृथिव्याः"†। ऐन्द्री। त्रिष्टुप्। हिरण्यस्तुपस्यार्षम्। अग्निष्टोमे निष्केवल्ये शस्यते। 'अहन्' हतवान्, हन्ति वा इन्द्रः 'वृत्रं' मेघम्। 'वृत्रतरम्'—इति तस्यैव वा विशेषणम्, अन्यो वा वृत्रतरो यः त मपि हन्ति। कथं पुनर्हन्ति? इति,—'व्यंसम्' विच्छिन्नसन्धिबन्धनं कृत्वा। केन पुनर्हन्ति? इति,—'वज्रेण महता' प्रहारेण। किञ्च; 'स्कन्धांसि इव' वृक्षशाखा इव, 'कुलिशेन' "कूलशातनेन वज्रेण" 'विवृक्णा' विवृक्णानि। स एवम् 'अहिः' अगमनो मेघः, क्रियमाणोऽस्याः पृथिव्याः 'उपपृक्' "उपपर्चनः", सम्पर्कस्य कर्त्ता ‡ भूत्वोदकभावेन, अस्या मेव पृथिव्याम् 'अहिः' 'शयते' अगमयत्। अवस्थानमात्र मेव स्वप्नोऽभिमतः॥ एव मत्र वधसम्बन्धात् "कुलिशः = वज्रः"—इत्युपपद्यते॥

---

* १भा० ४४९ पृ० ९पं० "कुलिशः"।

† अहन् वृत्रं वृत्रतरं व्यंसं मिन्द्रो वज्रेण महता वधेन। स्कन्धांसीव०——०पृथिव्याः॥"—इति ऋ० सं० १, २, २९, ५।

‡ "उपपृक् उपपर्जनः, सम्पर्ककर्त्ता" क।

"तुञ्जे(८१)"—इति *, अनवगतम्। "तुञ्जतेः" दानार्थस्येति निर्वचनम्। 'तुञ्जनम्'—इति स्यात्॥ २ (१७)॥

तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः। न विन्धे अस्य सुष्टुतिम्॥ दानेदाने य उत्तरे स्तोमा इन्द्रस्य वज्रिणो नास्य तैर्विन्दामि समाप्तिं स्तुतेर्बर्हणा परिबर्हणा। दृंहच्छ्वा असुरो बर्हणा कृत इत्यपि निगमो भवति॥ ३ (१८)॥

"तुञ्जेतुञ्जे०——०सुष्टुतिम्" †। मधुच्छन्दस आर्षम्। ऐन्द्री। गायत्री। प्रातःसवने ब्राह्मणाच्छंसिनः आवापे विनियुक्ता। 'तुञ्जेतुञ्जे' "दानेदाने" 'ये' 'उत्तरे' उत्तरोत्तरे दानपरितुष्टेन मया 'स्तोमाः' 'इन्द्रस्य वज्रिणः' चिन्त्यन्ते,—एतैः स्तोमैरसौ योग्यः स्तोतुमिति। किं तेषाम्? 'न' 'विन्धे' न 'अस्य' सर्वैरपि "तैर्विन्दामि" "सुष्टुतिं" "समाप्तिं स्तुतेः" इत्यर्थः। यावत्य एव स्तुतय उपादीयन्ते, ताः सर्वा एवेन्द्रं प्राप्य न्यूना भवन्तीत्यभिप्रायः॥ एवं मत्र स्तोमसम्बन्धात् 'तुञ्जे'-शब्दो दानपर्यायवचनः, तुञ्जतेश्च दानार्थस्य दर्शनात् ‡॥

"बर्हणा(८२)"—इति §, अनवगतम्। "परिबर्हणा"—इत्युपसर्गाध्याहारेणार्थप्रतीतिः। परिबर्हणा=परिवृद्धिः, परिहिंसा वा॥

---

* १भा० ४४१ पृ० ११ पं० "तुञ्जः"।
† ऋ० सं० १, १, १४, १।
‡ १भा० १७० १० ख० (९) "तुञ्जति"।
§ १भा० ४४१ पृ० १४ पं०।
॥ "बर्हणा", "परिबर्हणा" इति चात्र सर्वत्रैवान्त्यस्यवकारान्वितं क-पुस्तके।

"अर्चा दिवे बृहते०——०रथो हि षः"* । सव्यत्व मापन्नस्यास्ये-न्द्रस्यार्षम्। जगती। ऐन्द्री। चतुर्थे पादे 'रथः, हि, षः'—इति पदानि। हे स्तोतः! 'अर्च' प्रोचारय इन्द्राय 'दिवे' द्योतनवते 'बृहते' च महते, 'मूर्ध्यं' धनसंयुक्तम्, बलकृतिसंयुक्तं वा वचः। किलक्षणायेन्द्राय अर्च? इति,—'खच्चम् यस्य' स्व मेव चचं धनं बलं वा यस्य; न कदाचिदपि यः परकीय माकाङ्क्षतीत्यभिप्रायः। किञ्च; यस्य 'धृषतः' धर्षयतः; शत्रून् 'धृषत्' एव † धृष्टं 'मनः' भवति, तदर्थं मर्चेति। किञ्च; येनेन्द्रेण 'बृहच्छ्रवाः' बृहद्घोषः, 'असुरः' मेघो वा। 'बर्हणा' परिवृद्धा परिवृद्धेन बधेन परिहिंसया वा 'पुरः' अर्वाक् 'हरिभ्यां' प्राप्तैर्नैव तावदश्वौ हरी रथे युक्तौ त मसुरं प्राप्तुतः। अथेन्द्रेण शीघ्रास्त्वाद् दूरपातित्वाच्च 'वृषभः' वर्षिता 'कृतः'। अथ च तावद् 'रथो हि षः' रंहणो हि शीघ्रः स मेघः। तथाहि,—येनेन्द्रेण पुरैव हरिभ्यां प्राप्तैः ‡ प्रहारैर्जर्जरीकृत्य वर्षिता कृतो मेघः §, त मभ्यर्च॥ एव मत्र शब्दसारूप्यादसुरसम्बन्धाच्च "बर्हणा = परिबर्हणा"—इत्युपपद्यते॥ ३ (१८)॥

**यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह। अपाप शुक्रस्तनुष्टि॥ मूहति**

---

* "अर्चा दिवे बृहते मूर्ध्यं वचः खच्चं यस्य धृषतो धृषन्मनः। बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः॥"—इति ऋ० सं० १, ४, १७, ३।

† "धृषन्नेव" ख।

‡ "हरिप्राप्तैः" क।

§ "वर्षितातो मेघः" क।

॥ "शुक्रस्तनूष्टि" च।

तनूशुभं मघवा यः कवासखः ॥ घंस इत्यहर्नाम ग्रस्यन्तेऽस्मिन्वसा गोरूध उद्ग्ततरं भवत्युपोन्नद्ध मिति वा स्नेहानुप्रदानसामान्याद्राचिरप्यूध उच्यते स योऽस्मा अहन्यपि वा राचौ सोमं सुनोति भवति द्द्योतनवानपोहत्यपोहति शक्रस्तितनिषुं धर्मसन्तानादपेत मलङ्करिष्णु मयज्वानं तनूशुभं तनूशोभयितारं मघवा यः कवासखो यस्य कपूयाः सखायः। न्यावि॒ध्यदि॒लीबिश॑स्य दृ॒ल्हा † वि शृ॒ङ्गिणं॑ मभिन॒च्छुष्ण॒ मिन्द्रः। निरवि॒ध्यदि॒लाबिल॑शयस्य दृ॒ढानि॑ ‡ व्यभिन॒च्छृङ्गिणं॑ शु॒ष्ण मि॒न्द्रः ॥ ४ (१९) ॥

"ततनुष्टिः(८४)"—इति §, अनवगतम्। "तितनिषुः"—अयं स्यात्। "यो अस्मै घंस०——० कवासखः" ॥। प्राजापत्यस्य संवरणस्यार्षम्। ऐन्द्री। जगती। 'यः' 'अस्मै' इन्द्राय 'घंसे' "अहनि", 'उत वा' "अपि वा" 'यः' 'ऊधनि' "रात्रौ" 'सोमं' 'सुनोति' अभिषुणोति, नित्यकाल मेव यः सोमाभिषवे प्रयतते इत्यर्थः। तस्य किम्? इति,—स एव निश्चयेन 'द्युमान्' "द्योतनवान्" 'भवति'। अथ पुनः इतो यो विपरीतो भवति, पूर्वैश्च पूर्वतनैश्च "धर्मसन्तानात्" अनुष्ठिताद् "अपेतम्" त मलं कर्मभिरित्येवंवादिनम् "अलङ्क-

* "भवत्यच" ङ, च।
† "दृल्हा" ङ, च; संहितायां मध्येव मेव।
‡ दृल्हानि" क, ख, ग।
§ १भा० ४४७ पृ० १पं० "ततनुष्टिम्"।
॥ ऋ० मं० ४, १, १, १।

रिष्णुम्" "अयज्वानम्" अयजनशीलम्, आत्ममण्डनपरं वा; विषयोपभोगपरतया स्ववित्तं "तितनिषुम्" अनेकैः प्रकारैः यो वित्तानि तनितु मिच्छति, तम्; अश्रद्धानम् धर्मे *। 'शक्रः' शक्तः इन्द्रः, "अप ऊहति—अप ऊहति"†—उपसर्गाभ्यासदर्शनात् ऊहतेरप्यभ्यास आदरार्थं कृतः; पुनपुनरपोहति नाशयतीत्यर्थः ‡। 'तनूशुभ्रम्' "शरीरशोभयितारम्"; ततनुष्टेरेवैतद् विशेषणम्। यश्च अन्योऽपि 'कवासखः' कपूयसखो भवति §, त मप्यपोहति। 'मघवा' धनस्वामी इन्द्रः; अवश्यम्भावी तस्य हि विनाश इत्यभिप्रायः॥ के चित्तु 'कवासख'-शब्दं 'तनूशुभ्र'-विशेषण मेव वर्णयन्ति ॥। इतरो विषयप्रधानोऽपि भूत्वा साधुसम्पर्कात् कदाचित् प्रपद्येत, इतरस्त्वसाधुसम्पर्कादत्यन्तनष्ट एवेत्यनेनाभिप्रायेण॥ एव मत्र 'ततनुष्टि'-शब्देन 'विषयोपभोगप्रधानः' उच्यते, शब्दार्थाविरोधादित्युपपत्तिः॥

"ग्रंसः—इति अर्हनाम"¶, "ग्रस्यन्तेऽस्मिन् रसाः" सूर्येण। "गोः 'ऊधः' उद्भततरम्"—इति शब्दसाम्यप्रसक्तम्, तद्धि अन्येभ्योऽङ्गेभ्य उद्भततरं "भवति"। "उपोन्नद्धम्—इति वा"; तद्धि विज्ञा-

---

* "ततं धर्मसन्ततिं नुदति, वष्टि कामयते कामानिति ततनुष्टिः"—इति तत्रैव सा० भा०।

† "आपो ह अपोहति" क।

‡ "अपरोऽपशब्दः पूरणार्थः"—इति सा० भा०। पर मेतन्निरुक्तविरुद्धम्; यत्र हि "अपोहत्यपोहति"—इति दर्शनात्।

§ कपूयशब्दार्थेषु पुरस्तात् (११६ पृ०) द्रष्टव्यः। "कवासखः, कुत्सितपुरुष-सहायः"—इति सा० भा०।

‖ "ततनूशुभ्र-विशेषणत्वे वर्णयन्ति" ख।

¶ १भा० ५४१०, ५७१० १अ० ६ख० (१)।

यते केन चिच्चदुपश्लिष्य गोरुदरे नद्धं मिति। "स्नेहानुप्रदानसामान्यात् राचिरप्यूध उच्यते"; सापि ह्यवश्यायानोषधिवनस्पतिस्नेहकान् दधाति * ॥

"दलीबिश्नस्य(न्य)"—इति †, एतदेकपद मनवगतम्। "दलाबिलश्नयस्य"—इत्यवगमः। 'मेघः' अभिधेयः; स हि दलाहेतोरुदकस्य आत्मीयानि निर्गमनबिलानि संरुद्ध शेते, तस्मिन् वा बिलेषु दलाहेतुरुदकं शेते इति दलीबिश्नः। "न्याविध्यदिलीबिश्नस्य०——०मवधीः पृतन्युम्"‡। हिरण्यस्तूपस्यार्षम्। ऐन्द्री। त्रिष्टुप्। गोसववि-वधयोर्निष्केवल्ये शस्यते §। 'न्याविध्यत्' "निरविध्यत्" निरताडयत्, 'दलीबिश्नस्य' "दलाबिलश्नयस्य" मेघस्य 'दृव्हा' "दृढानि", दुर्भेद्यानि उदकसंरोधक्षमाणि स्थानानि। न च केवल मेतावदेव, किन्तर्हि? 'विभृष्टिणम् अभिनत्' भृष्टिणं शिखरवन्तं दीप्तिमन्तं वा विद्युद्वि-, 'भृष्णं' बलवन्तं मेघम्, 'इन्द्रः' एवं स्तूयमानः प्रत्यक्षीभूतः। प्रत्यक्षकृतः उत्तरोऽर्द्धर्चः। हे 'मघवन्!' 'यावत्तरः' यावद्बल मेतस्मिन् मेघेऽस्ति तावदेनं जहि। 'यावत्' च तव व्यथनसमर्थम् 'ओजः' बल मस्ति, या ते शक्तिः, तयैनं 'वज्रेण' 'शत्रुं' शातयितव्यम् 'अवधीः' जहीत्यर्थः। 'पृत-

---

* १मा० ४२४०, ४७४० १ष० ७ख० (२०)।

† १मा० ४४७४० ७पं० "दलीबिश्नः"।

‡ "न्याविध०——०मिन्द्रः। यावत्तरो मघवन् यावदोजो वज्रेण शत्रुं मवधीः पृतन्युम्॥"—इति ऋ० सं० १, ३, ३, १।

§ "येनि मारैगगादारैगारैग् दुर्दाण आदृणक्। छन्यासदुप आदृपित मनाहुधास आसता॥ अस्यासतो निरविध्यदभ्यादेवं क आसतः। न्याहणक् न किरादेवो न्याविध्यदेन मायुनक्॥"—इति ऋ० प्रा० २। ४०, ४१।

न्युम्' पृतना मिच्छन्तम् ॥ एव मत्र "इलीबिशः = मेघः" शब्दसाहचर्यादर्थाविरोधाच्च ॥ ४ (१९) ॥

अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः। गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥ अस्मै प्रहर तूर्णं त्वरमाणो वृत्राय वज्रमीशानः कियेधाः कियद्वा इति वा क्रममाणधा इति वा गोरिव पर्वाणि विरद मेघस्येष्यन्नर्णांस्यपां* चरणाय भृमिर्भ्राम्यतेः। भृमिरस्यृषिकन्मन्त्र्यान्ना मित्यपि निगमो भवति। विष्यितो विप्रान्नः†। पारन्नो अस्य विष्यितस्य पर्षन्नित्यपि निगमो भवति ॥ ५ (२०) ॥

"कियेधाः(८९)"—इति ‡, अनवगतम्। "कियद्वाः", "क्रममाणधा वा"—इत्यवगमः। कियदप्युदक मपरिमाणं धारयतीति कियद्वा मेघः। क्रममाणो वा धारयतीति क्रममाणधा मेघ एव ॥ "अस्मा इदु प्रभरा ०——० चरध्यै" §। नोधा नाम गौतमः, तस्येय मार्षम्। त्रिष्टुप्। ऐन्द्री। आहीनिकेष्वहःसु अहीनसूक्ते विनियुक्ता। हे इन्द्र! एष वृत्रः, 'कियेधाः' "कियद्वाः" कियदप्युदक मपरिमाणं धारयति, क्रममाणो वा धारयति। 'अस्मै' त्वं 'वृतुजानः'

---

* "मेघस्येष्यन्नर्णांस्यपां" क, ख, ग।
† "विष्यातः" क। "विष्याप्नः" ख, ग।
‡ १भा० ४४७ पृ० १२पं०।
§ ऋ० सं० १, ४, १९, १।

"त्वरमाणः", 'वज्रं' 'प्रभर'। 'ईशानः' ईश्वरो यस्मात् त्वं मस्माकं तस्मादेव मुच्यसे। किञ्च; प्रहृत्य वज्रं वज्रप्रहार सम्मूढस्यास्य मेघस्य 'गोर्न पर्व' गोरिव पर्वाणि 'विरद' विदारय; यथा गोविकर्त्ता गोः पर्वाणि 'विरदेत्' विच्छिन्द्यात्। एवं त्वं मध्येतं मेघ मवयवशो 'विरद' विच्छिन्धि। कथञ्च पुनर्विरद? इति,—'तिरश्चा' वज्रेण तिर्यक् गामिना। केन पुनरर्थेन विरद? इति,—'इयन् अर्णांसि' उदकानीच्छन्। 'चरध्यै' "चरणाय" 'अपाम्', प्रजाभ्यो दातुम्। एव मस्माद् द्विशकलीकृतादापो निश्चरिष्यन्तीत्यनेनार्थेन विरद॥ एव मत्र "किंयेधा = मेघः" शब्दसारूप्यादर्थाविरोधाच्च॥

"किंयेधाः = इन्द्रः"—इत्येव मेके मन्यन्ते*; स हि यदपि न ज्ञायते कियत्परिमाण मेतद् बल मिति, तदपि धारयति; क्रममाणो वा शत्रुबलं धारयतीति किंयेधाः। एवं सति इयं योजना,—यस्मादीशानस्त्वं किंयेधास्च, तस्मात् प्रहर वज्र मिति॥

"भूमिः(८७)"—इति †, अनवगतम्। 'भ्रमणम्'—इत्यवगमः। "भ्राम्यतेः"—इति निर्वचनम्। 'अग्निः'—अभिधेयः॥ "इमा मग्नेः ——० सृषिक्तन्मर्त्यानाम्" ‡। हिरण्यस्तूपस्यार्षम्। प्रातरनुवाकाश्विनयोः शस्यते। हे भगवन्! 'अग्ने!' 'इमां शरणिं' मरणलक्षणां हिंसाम्, इमां संसृतिं वा 'मीळ्हुषः नः' मार्जयस्व नाशयस्व नः।

---

* "यद्वा क्रममाणं शत्रुबलं दधात्यवस्थापयतीति किंयेधाः। हे इन्द्र! एवभूतस्त्वम्"—इति सा० भा०।

† १भा० ४४७ पृ० १७ पं०।

‡ "इमा मग्ने शरणिं मीळ्हुषो न इमं मध्वानं य मगाम दूरात्। आपिः पिता प्रमतिः सोम्यानां भूमिरसृषिक्तन्मर्त्यानाम्॥"—इति ऋ० सं० १, २, ३५, १।

कतमां शरणिम्? 'इमम् अध्वानम्', 'यम्' एतं संसाराध्वानम् 'अगाम' गतवन्तो वयम्; अमुष्मात्लोकादिमँल्लोकम्। अस्मासु एतां संसार-हिंसाम्, एतां वा संसारसृतिम्, एनम् आर्जवं जवीभवन्त मस्माकं मार्जय त्वम्*। कस्मात् पुनरेव मुच्यसे? इतः,—यस्मात् 'आपिः' त्व मस्माकं प्राप्तः, अथवा व्यापयिता कृत्स्नस्य जगतो महिम्ना। 'पिता' च रक्षिता, 'सोम्यानाम्' सोमसम्पादिनां मनुष्याणाम्। 'प्रमतिः' च प्रकृष्टमतिः। 'भ्रमिः' च, त्व मेव संसारे भ्रामयिता पञ्चाग्नि-विद्योक्तेन प्रक्रमेण; त्वदधीन एव संसारो मोचश्च। 'ऋषिकृत्' च, दर्शनकर्त्तासि त्वम्, त्वदधीन मेव दर्शनं 'मर्त्यानां' मनुष्याणाम्। सर्वविज्ञानप्रकाशेनानुगृह्यास्मान् मोचयस्यस्मात् संसारादित्यभिप्रायः। देवयानेनैव पथा गमय, मा पितृयानेनेति॥ एव मत्र "भ्रमिः = अग्निः" अर्थाविरोधात् (विशेष्यते†)॥

"विष्पितः(८८)"—इति ‡, अनवगतम्। "विप्राप्तः"—इत्यवगमः। विस्तीर्ण इतश्चेतश्च, सर्वतो यः प्राप्तः, स विष्पितः। "इमे दिवो ०——० विष्पितस्य पर्षन्"§। "यद्द्य सूर्य्य ब्रवोऽनागाः"—इत्येतस्मिन् सूक्ते; अस्य पुनः सूक्तस्य प्रथमा सौरीति प्रतिजज्ञे शौनकः;—अन्याः सर्वा मैत्रावरुण्य इति। 'इमे'—इति द्वयोरेव मित्रावरुणयोः पूजार्थे बहुवचनम्। अर्यमा वा तृतीयः स्यात्;

---

* "एत मार्जवं जवीभवन्तस्माकं मार्जयस्व" ख।

† नैतद् दृश्यते ख-पुस्तके।

‡ १भा० ४४८ पृ० ६पं०।

§ इमे दिवो निमिषा पृथिव्याः किमासो अत्र तस्थिवांस आयन्। प्रत्राजे चिन्नद्यो गाध मस्मि पारं नो अस्य विष्पितस्य पर्षन्॥"—इति ऋ० सं० ५, ५, १, १।

असावपि हि अस्मिन् सूक्ते श्रूयते। शौनकाभिप्रायस्त्वेवं सति परीक्ष्यः। 'दूमे' मित्रावरुणार्थ्यमाणः 'दिवः' एत्य 'अनिमिषाः' आदरवन्तः 'पृथिव्याः' पृथिवीलोकादित्यर्थः। 'चिकित्वांसः' सुकृतदुष्कृतानि कर्माणि प्राणिनां जानन्तः, 'अचेतसम्' अचेतयमानं प्राणिनं कर्मानुरूपेण अमुं लोकं 'नयन्ति'। यत एव मतस्तानहं ब्रवीमि;—'प्रव्राजे' प्रकृष्टे एतस्मिन् व्रजने मरणाख्ये मृत्युकाले उपस्थिते, (यदि*) 'गाधं' संसारगाहनसमर्थं कर्म, विज्ञानं वा 'अस्ति नः' अस्त्यस्माकम्, ततोऽस्य 'विष्पितस्य' "विप्राप्तस्य" संसाराध्वनो नद्या इव 'पारं पर्षन्' पारं यन्त्वित्यर्थः॥ एव मत्र शब्दसारूप्यादर्थाविरोधाच्च "विष्पितः = विप्राप्तः" संसाराध्वा—इत्युपपद्यते॥ ५ (२०)॥

तन्नस्तुरीपमद्भुतं पुरुवारं पुरुत्मना। त्वष्टा पोषाय विष्यतु राये नाभानो अस्मयुः॥ तन्नस्तूर्षापि महत्सम्भृतमात्मना त्वष्टा धनस्य पोषाय विष्यत्त्वित्यस्मयुरस्मान् कामयमानो, रास्पिनो रास्पी रपतेर्वा रंसतेर्वा रास्पिनस्यायोरित्यपि निगमो भवत्यृञ्जतिः प्रसाधनकर्मा (आ वं ऋञ्जसे ऊर्जा व्युष्टिष्वित्यपि निगमो भवति†) ऋजुरित्यप्यस्य भवति। ऋजुनीती नो वरुण इत्यपि निगमो भवति। प्रतद्वह प्राप्तवह। हरी इन्द्र प्रतद्वह अभि स्वरेत्यपि निगमो भवति॥ ६ (२१)॥

* नास्त्येतत् क-पुस्तके।

† नैष पाठः क-ख-ग-पुस्तकेषु, इत्तिलता अपहीतश्च; इत्तौ तु मतान्तरेण "ऋञ्जसे गिरा"—इति निगम उद्धृतो व्याख्यातश्च।

"तुरीपम्(८९)"—इति *, अनवगतम्। "तूर्णापि"—इत्यवगमः। 'उदकम्'-अभिधेयम्; तद्धि तूर्णं माप्नोति। "तन्नस्तुरीपु०——० नाभानेा अस्मयुः" †। दीर्घतमस आर्षम्। त्वाष्ट्री। अनुष्टुप्। आप्री-सूक्ते। 'तत् नः तुरीपम्' तदस्माकं तुरीप मुदकम्, 'अद्भुतं' च "महत्" इत्यर्थः। "अद्भुतः, बर्हिष्ठः"—इति महन्नामसु पठितम् ‡। 'पुरुवारं' च बहुदेशान्तर मातृणोत्युदकम्; 'पुरुत्मना' बहात्मना। यदेवंलक्षण मुदकम्, तत् 'नः' अस्माकं 'नाभा' नाभौ मध्ये 'त्वष्टा' 'विष्यतु' विमुञ्चतु वर्षभावेन। 'अस्मयुः' 'अस्मान् अनुग्रहीतुं "कामयमानः' 'राये पोषाय' "धनस्य पोषाय" इत्यर्थः; वर्षे हि सति पशवः पुष्यन्ति। अथवा 'नाभानः' —इति त्वष्टुरेव विशेषणं स्यात्, 'नाभानः' न अदीप्यमानः, किन्तर्हि? दीप्यमान एव विष्यतु॥ एव मत्र माध्यमिकस्त्वष्टेति §? विष्यत्वित्यनेन सम्बन्धात्, "तुरीपम् = उदकम्"—इत्युपपद्यते॥

"रास्पिनः(९०)"—इति ‖, अनवगतम्। 'रापी'—इति वा स्यात्, 'रासी'—इति वा; "रपतेः वा" शब्दार्थस्य, "रसतेः वा" शब्दार्थस्यैव। रपणशीलो वा रसनशीलो वा यः, स 'रास्पी'। "उत त्या मे——० रास्पिनस्यायोः" ¶। कक्षीवत आर्षम्। त्रिष्टुप्। वैश्व-

---

* १भा० ४४८ पृ० ६पं०।

† ऋ० सं० २, २, ११, ४।

‡ १भा० २९९पृ० ३अ० ३ख० (१३), (२४)।

§ "अथातो मध्यस्थाना देवताः (दै० का० १०, १, १)"—इत्यधिकृत्य यास्केन व्याख्यातत्वात् (दै० का० १०, २, ९)।

‖ १भा० ४४८ पृ० ९पं०।

¶ "उत त्या मे यशसा शेवृधा वक्ता पान्नोशिजो ऊचथ्यै। प्र वो नपात मपां क्षणुध्वं प्र मातरा रास्पिनस्यायोः॥"—इति ऋ० सं० २, १, १, ४।

देवे सूक्ते। 'उत त्यौ' अपि तौ, अश्विनौ। 'मे' मम 'यशसा' हविर्लक्षणेन धनेन तर्प्यमाणौ, 'श्येतनायै' उषसः काले प्राप्ते 'व्यन्ता पान्ता' वीताम् भक्षयेतां पुरोडाशम्, पिबेतां सोमम्। यतो ब्रवीमि,—हे 'औग्निजः' मेधाविनः! ऋत्विजः! 'ऊवध्ये' आकृयध्वं तावश्विनौ। किञ्च; 'प्र' ब्रवीमि 'वः',—'कृणुध्वम्' 'अपां नपातम्' अपि, एतस्मिन् कर्मणि भागिनम्। किञ्च; 'प्रमातरौ' द्यावापृथिव्यावपि सर्वभूतनिर्मात्र्यौ कृणुतैव, एतस्मिन् कर्मणि भागिन्याविति। एतच्च वो ब्रवीमि। कं च पुनरर्थं पुरस्कृत्य एतत् कुरुध्वम्? इति,—'रास्नितस्य आयोः' रपणशीलस्य वा रसनशीलस्य वा शब्दकारिणो वर्षभूतस्योदकस्य प्राप्त्यर्थम्, अथ वा स्तोतुः पुत्रस्य प्राप्त्यर्थम्। "आयवः"—इति मनुष्यनाम*॥ एव मत्र 'रास्नि'-शब्देन उदकं स्तोता वाभिधीयते, शब्दसारूप्यादर्थाविरोधाच्च॥

"ऋच्छतिः(९१)", "प्रसाधनकर्मा" †। "भाच्छजीकः"—इत्यनेन ‡ गतार्थता मस्य मन्यमानो भाष्यकारो निगमं नाधीते॥

के चित्त्वत्र एतं शेष मधीयते। "दूतं वो०——०मृच्छसे गिरा"§। वामदेवस्यार्षम्। गायत्री। आग्नेयौ। प्रातरनुवाकाश्विनयोः शस्यते। 'वः'—इत्येतस्य 'त्वम्'—इति विपरिणामः। हे यजमान!

---

* १भा० १७६ सू० १८२ सू० २ ऋ० २ ख० (१७)।

† १भा० ४४८ सू० १५ पं०।

‡ पु० १५० सू० १० पं०।

§ "दूतं वो विश्ववेदसं हव्यवाहममर्त्यम्। यजिष्ठमृञ्जसे गिरा॥"—इति ऋ० सं० १. ५, ८, १। ङ-च-पुस्तकयोस्तु 'आवं ऋञ्जसे (ऋ० सं० ८, १, ८, १)"—इति निगमो दृश्यते।

त्वम् 'दूतम्', 'विश्ववेदसम्' सर्वप्रज्ञानम्, 'हव्यवाहम्' हविषां वोढारम्, 'अमर्त्यम्' अमरणधर्माणम्, 'यजिष्ठम्' यष्टृतमम्, 'ऋञ्जसे' प्रसाधयसि 'गिरा' स्तुत्येत्यर्थः॥ एव मत्र "ऋञ्जतिः प्रसाधनकर्मा" दूतसम्बन्धात्॥

"ऋजुः(९२)"—"इत्यपि"*, "अस्य" एव ऋञ्जतेः "भवति"। "ऋजुनीती नो०——०देवैः सजोषाः"†। गोतमस्यार्षम्। वैश्वदेवसूक्ते। गायत्री। गवामयनस्य द्वितीयेऽहनि शस्यते मैत्रावरुणस्य शस्त्रे। 'ऋजुनीती' ऋजुनयनः, ऋजुप्रज्ञो वा 'वरुणः', 'नः' अस्मान् इतो लोकादमुं लोकं कर्मफलप्राप्त्यर्थं 'नयतु'। 'मित्रः' च 'विद्वान्' नयतु। 'अर्यमा' 'देवैः' 'सजोषाः' सहप्रीयमाणः नयतु॥ एव मत्र 'ऋजु'-शब्देन प्रसिद्धं नयनम्, प्रसिद्धा वा मतिरुच्यते॥

"प्रतद्वसु(९३)"—इति‡, अनवगतम्। "प्राप्नवसू"—इत्यवगमः। 'अश्वौ' अभिधेयौ। "इह त्या सधमाद्या०——०प्रतद्वसू अभिस्वर"§। नारदस्येय मार्षम्। उष्णिक्। महाव्रते औष्णिही ऋचाशीतिः, तस्यां शस्यते। हे 'इन्द्र!' 'इह' कर्मणि 'त्या हरी' तावश्वौ 'प्रतद्वसू' "प्राप्नवसू" प्राप्तधनौ; तयोर्हि ऋजीषं धानाश्च धनम्; स हि ताभ्यां यज्ञे भागः प्राप्तः। 'सधमाद्या' सहमदनौ

---

* १भा० ४४८ पृ० १८ पं० "ऋजुनीती"॥

† "ऋजुनीती नो वरुणो मित्रो नयतु विद्वान्। अर्यमा देवैः सजोषाः॥"—इति ऋ० सं० १, ९, १७ १।

‡ १भा० ४४९ पृ० १पं०।

§ इह त्या सधमाद्या युजानः सोमपीतये। हरी इन्द्र प्रतद्वसू अभि स्वर॥"—इति ऋ० सं० ९, १, १२, २।

'युजानः' युक्ता रथे, ततः 'सोमपीतये' सोमपानार्थम् 'अभिस्वर' अस्मान् प्रत्यागच्छ॥ एव मत्र "हरी"-इत्यनेन सम्बन्धात् "प्रतद्वसु = प्राप्नवसु" अश्वौ—इत्युपपद्यते॥ ६ (२१)॥

हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानाम्। ऋतस्य योगे वि ष्यध्व मूधः अुष्टीवरीर्भूतनास्मभ्यं मापः॥ प्रहिणुत नोऽध्वरं देवयज्यायै प्रहिणुत ब्रह्म धनस्य सननाय ऋतस्य योगे यज्ञस्य योगे याज्ञे शकट इति वा शकटं शक्नोतेः* भवति शनकैस्तकतीति वा शब्देन तंकतीति वा। अुष्टीवरीर्भूतनास्मभ्यं† मापः। (सुखवत्यो भवतास्मभ्य मापः‡) चोष्कूयमाण इन्द्र भूरि वामम्। ददिन्द्र बहु वननीयम्। एधमान-द्दिक्षुभयस्य§ राजा चोष्कूयते विश इन्द्रो मनुष्यान्॥ व्युदस्यत्येधमानानसुन्वतः॥ सुन्वतोऽभ्यादधात्युभयस्य राजा दिव्यस्य च पार्थिवस्य च चोष्कूयमाण इति चोष्कूयतेश्चर्करीतवृत्तं सुमत्वयं मित्यर्थः। उप प्रागात्सुमन्मे धायि मन्म। उपप्रैतु मां (स्वयं¶) यन्मे** मनो-

* "शक्नोतेः" क, ख, ग।
† "सुखवरी भूतनास्मभ्यं" क, ख। "सुखवती —" ग।
‡ न दृश्यतेऽयं पाठः क-ख-ग-पुस्तकेषु परं वृत्तिसम्मतः।
§ "०दिक्षुभयस्य" क, ख, ग।
॥ "व्युदस्यत्येधमानानर्हेद्यासुन्वतः" क, ख, ग।
¶ नास्त्येतत क-ख-ग-पुस्तकेषु।
** "यन्म" क, ख, ग।

ऽध्यायि यज्ञेनेत्याश्वमेधिको मन्त्रो दिविष्टिषु दिव एष-णेषु ॥ ७ *॥

"हिनोत(९४)"—इति †, अनवगतम्। "प्रहिणुत"—इत्यवगमः। "हिनोता नो०——०र्भूतनासाभ्य मापः ‡। कवषस्येव मार्षम् §। अपोनप्त्रीयास्वङ्गु शस्यते। "हे ऋत्विजः! 'हिनोत' "प्रहिणुत" प्रगमयत, प्रोत्सर्पयत। एतम् 'अध्वरं' यज्ञम् 'देवयज्या' "देवय-ज्यायै" देवयजनार्थम्। किञ्च; प्रहिणुत 'ब्रह्म' स्तुत्याख्यं यथाशास्त्र-दृष्टक्रमेण। 'सनये' लब्धये 'नः' अस्माकं धनानाम्। किञ्च; 'ऋतस्य' "यज्ञस्य" 'योगे' संयोगे यदेतत् 'ऊधः' इव सोमपूर्णम् अधिष-वणचर्म वर्त्तते, अथ वा योगसम्बन्धाच्छकटं योगः; तद्धि तत्र युज्यते, तेनाधिषवणचर्मणः ऊधसोऽधस्तादवस्थितेनेति मन्यमानो भाष्यकारो ॥ ब्रवीति,—"यज्ञे शकटे—इति वा"; यदेतद् यज्ञ-शकटस्याधस्तादुपरि वाधिषवणचर्म, एतद् 'वि ष्यध्वम्' विमुञ्चध्वम्। ग्रहचमसस्थाल्यादिषु यो निषेकः सोमस्य, एतद् विमोचनम् अधिषवणचर्मोधसः; तद्धि सोम उत्सिच्यमाने स्रथीभवति, यथेतरद्गो-ऊधो दुह्यमानायां गवि। एव ऋत्विज उक्ता अधुना ता एव सोम-सम्मिश्रा अपो ब्रवीति,—यूय मपि हे 'आपः!' एभिः ऋत्विग्भिः उत्सिच्यमानाः 'अष्टीवरीः' "सुखवत्यः" 'भूतन' "भवत" 'अस्मभ्यम्' ॥

---

* नाच खण्डसमाप्तिः ङ-च-पुस्तकयोः।

† १भा० ४४९ पृ० ४पं०।

‡ ऋ० सं० ७, ७, २९, १।

§ "दास्याः पुत्रः कितवोऽब्राह्मणः"—इत्यादि ऐ० ब्रा० २, २, १।

॥ "निरुक्तकारो"—इति सायणीयः पाठः।

एव मत्र 'प्र'-शब्देनार्थस्य सुतरां प्रकटता भवतीति भाष्यकारेण 'प्र'-शब्दोऽध्याहृतः, 'अध्वरम्'—इत्यनेन सम्बन्धाद्धिनोतेर्गत्यर्थत्व मुपपद्यते *॥"

"प्रहिणुत"—इति 'आपः' उच्यन्त इति केचित्॥

"शकटम्", "शक्नोदितं भवति"। यदा अनड्वान् युक्तः, शक्नुत् मुञ्चति, तेनेत मिति। "शनकैस्तकतीति वा"; तद्धि भाराक्रान्तं शनकैर्गच्छति "शब्देन तकतीति वा"; तद्धि शब्देन गच्छति॥

"चोष्कूयमाणः (९५),"चोष्कूयते(९६)"—इति †, एते अनवगते। धातुरेवाय मप्रतीतः। एते सुबन्ततिङन्ते; तदनयोः पूर्वं 'सुबन्तम्', उत्तरं तिङन्तम्। दानार्थे वर्त्तमानस्य "चोष्कूयमाण इन्द्र भूरि वामम्"—इति ‡ निगम मुक्त्वा 'ददिन्द्र'—इति हि पूर्वस्य निर्वचनं चकार भाष्यकारः॥ ॥ ब्रुदसने वर्त्तमानस्योत्तरस्य "चोष्कूयते विश्व इन्द्रा मनुष्यान्"—इति § निगम मुक्त्वा 'चोष्कूयते'—इत्यस्य शब्दस्य "ब्रुदस्यति"—इति निर्वचन माह भाष्यकारः॥ उभयत्रापि तु चोष्कूयति-शब्दस्यूर्करीतवृत्तेन द्रष्टव्यः॥

"चोष्कूयमाण इन्द्र भूरि वामम्"—इत्यस्य शेषः,—"नि सर्वसेन इषुधीँरसक्त ०——० दधि प्रवृद्धः"॥ ‖। हिरण्यस्तूपस्यार्षम्। ऐन्द्री।

---

* व्याख्यान मेतत् समग्र मेव ऋग्भाष्ये सायणेनोद्धृतं क्वीक्षतञ्च तत्रैव "एतस्या ऋचो व्याख्यानं निरुक्तटीकायां उद्धृतम्"—इति।

† १भा० ४४९ पृ० ८पं०।

‡ ऋ० सं० १, ३, १, ३।

§ ऋ० सं० ४, ७, २२, १।

‖ "नि सर्वसेन इषुधीँरसक्त समर्यो गा अजति यस्य वष्टि। चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्धः॥"—इति ऋ० सं० १, ३, १, ३।

त्रिष्टुप्। उद्भिद्वलभिदोर्निष्केवल्ये शस्यते। 'न्यसक्त' न्यबध्नात् 'इषुधीन्' तूणान्, पृष्ठे रथस्य, 'सर्वसेनः' समग्रसेनः इन्द्रः। एवं तूणान् मनस्य वध्वा, गोधाङ्गुलित्रवान् भूत्वा "स मर्य्यो गा अजति" इषुभिर्मेघान् छिन्दन् 'सम् अजति' समस्ताः क्षिपति, 'गाः' अपः, 'अर्य्यः' ईश्वरः इन्द्रः। कस्मै समजति? यस्य वष्टि। यस्य राज्ञो देशे कुटुम्बिनो वा क्षेत्रे कामयते, क्षेत्रम्, तस्मैव क्षिपति, वर्षं प्रवर्त्तयत इत्यर्थः। एवं स्तूयमानः स इन्द्रः प्रत्यक्षीभूतः; यतः प्रत्यक्षकृत उत्तरोऽर्द्धर्चः। हे इन्द्र! चोष्कूयमाणस्त्वं ददत् उदकं जनेभ्यः 'भूरि' "बभ्रु" 'वामं' "वननीयं" यस्य-सम्पत्करम्, पृणु यत् कुरुष्व। 'मा पणिः भूः' मा वणिक्शीलोऽस्मान् प्रति मन्दोदकदाता कृपणो भूः। किन्तर्हि? प्रवृद्धोदकः उन्नतचित्तः, अस्मान् प्रति बहूदकदाता भव॥ एव मत्र 'मा पणिर्भूर्भूरि वामम्'—इत्येभिः पदैः सम्बन्धात् 'चोष्कूयमाणः'—इत्यस्य "ददत्"—इत्येव मर्थ उपपद्यते॥

एव मत्र दानार्थः 'चोष्कूयतिः', "एधमानद्विलुभयस्व"—इत्यत्र व्युदसनार्थः। अस्य शेषः,—"पृणे वीर०——०इन्द्रो मनुष्यान्" *। गर्गस्य बार्हस्पत्यस्येय मार्षम्। त्रिष्टुप्। ऐन्द्री। 'दमायन्'—इत्येकं पदम्। 'पृणे वीरः' अश्रौष मह वीर मिन्द्रम्, 'उग्रम्' उद्गूर्णवज्रम्। आदरार्थो द्विरभ्यासः, आदरं चार्थभूयस्त्वम्; "अभ्यासे भूयांस मर्थं मन्यन्ते"-इति हि वक्ष्यति। अथवा 'उग्रं' शत्रुं प्रति उद्गूर्णवज्रम्। 'दमायन्' दमयितारं शत्रूणाम्। कथम्भूतमश्रौषम्? इति,—'अन्य

* "पृणे वीर उग्रमूतये दमायन्नन्य मन्य मतिनेनीयमानः। एधमानद्विलुभयस्व राजा चोष्कूयते विशु इन्द्रो मनुष्यान्॥"—इति ऋ० सं० ४, ७, २२, १।

मन्यम्' देवताविशेषम्, 'अतिनेनीयमानः' अतिशयेन स्वाभीष्टेन कामेन तुष्टूषया 'अमुष्मात् सुतात् कामान् प्राप्स्यथ'-इत्येवं पुनःपुनः नयमानः। किमुनर्लक्षणं वीर मश्रौषम्? इति,—'एधमानद्विट्' "एधमानान्" दीप्यमानानपि "द्वेष्टि" "असुन्वतः", सोमाभिषव मकुर्वाणान् अयज्वन इत्यर्थः। अत एवं वैपरीत्येन "सुन्वतोऽभ्याद्धाति"—इत्यध्याजहार भाष्यकारः। क्व पुनराद्धाति? 'सुकृतस्य लोके'—इति सामर्थ्याद् गम्यते। ये हि सुन्वते, त इष्टा इन्द्रस्य; ये न सुन्वन्ति, ते द्वेष्याः; इत्यभिप्रायः। 'उभयस्य राजा' "दिव्यस्य च" धनस्येश्वरो "पार्थिवस्य च" मानुषस्य च। किञ्च; 'चोष्कूयते' व्युदस्यति,— यो 'विशः' एधमानानसुन्वत इतरांश्च सुन्वतः 'मनुष्यान्' अभ्यादधाति सुकृतस्य लोके इति॥ एव मत्र 'एधमानद्विट्'—इत्यनेन सम्बन्धात् "चोष्कूयतिः, व्युदसनार्थः"—इति उपपद्यते॥

"सुमत्(९७)"—इति *, अनवगतम्। "स्वयम्"—इत्यवगमः। "उप प्रागात् सुमन्मे०——०चक्रमा सुबन्धुम्" †। दीर्घतमस आर्षम्। त्रिष्टुप्। अश्वदेवताका। अश्वमेधेऽश्वस्तोमीयेन षोडशाङ्गतयो ह्रियन्ते, तत्रेयं विनियुक्ता। 'उप प्रागात्' "उप प्रैतु" "मां" प्रकर्षेण एतु। 'सुमत्' "स्वयम्" एव। 'यत्' यदनेन "यज्ञेन" प्राप्नुयाम् "इति"। 'मे' मम 'मनः' अपि "अध्यायि" (अनेकविधान् सङ्कल्पविकल्पान् चकार, तत्तदह मेव; अहं मनसा‡)

---

१भा० ४४९ प० १२ पं०।

† "उपप्रागात् सुमन्मेऽधायि मन्म देवानाᳬ माशा उप वीतपृष्ठः। अन्वनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चक्रमा सुबन्धुम्॥"—इति ऋ० सं० १, १, ८, १।

‡ नास्त्येष पाठः क-पुस्तके।

ध्यातवानित्यर्थः। किम्पुनस्तत्? 'मन्म' मननीय मर्थजातम्। किञ्च; अय मपि 'वीतपृष्टः' कान्तपृष्ठोऽश्वः 'उपप्रागात्' उपगच्छतु। 'देवानाम्' 'आशाः' यम् एतं वयं देवानां 'पुष्टे' पोषणाय 'चक्रम' कृतवन्तः। 'सुबन्धुम्' शोभनयूपबन्धनम्। त मेत मुपगच्छन्तम् 'अनुमदन्ति' अनुमन्यन्ताम् 'विप्राः ऋषयः' मेधाविनः॥ एव मत्र शब्दसारूप्यादर्थोपपत्तेश्च 'सुमत्'—इत्यस्य "स्वयम्"—इत्येष विपरिणाम उपपद्यते॥

"आश्वमेधिकोऽयं मन्त्रः"—इति प्रकरणोपप्रदर्शनार्थं माह; मन्त्रार्थं निर्ब्रुवता प्रकरण मप्युपेक्षितव्य मिति, एतदनेन प्रदर्शितं भवति॥

"दिविष्टिषु(९८)"—इति *, अनवगतम्। "दिव एषणेषु"—इत्यवगमः। याभिः क्रियाभिर्दिव मिच्छन्ति गन्तुं ता दिविष्टयः॥७॥

स्थूरं राधः शृताश्वं कुरुङ्गस्य दिविष्टिषु। स्थूरः समाश्रितमाचो महान् भवत्यणुरनु स्थवीयांस मुपसर्गो लुप्तनामकरणो† यथा सम्प्रति कुरुङ्गो राजा बभूव कुरुगमनाद्वा कुलगमनाद्वा कुरुः कृन्ततेः कूर मित्यप्यस्य भवति कुलं कुणातेर्विकुषितं भवति दूतो व्याख्यातो जिन्वतिः प्रीतिकर्मा। भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नय इत्यपि निगमो भवति॥ ८ (२२)॥

॥ इति षष्ठाध्यायस्य चतुर्थः पादः॥ ६. ४.

---

* १भा० ४४९ पृ० १५ पं०।

† "मुपसर्गलुप्तो नामकरणो" क, ख, ग।

"स्थूरं राधः ०——० तुर्वशेष्वमन्महि" *। मेधातिथेरार्षम्। बृहती। दान मनया प्रशस्यते। 'स्थूरं' स्थूलं महत्, 'राधः' धनम्, 'अताश्वं' बद्धाश्वसंयुक्तम्। 'कुरुङ्गस्य' राज्ञः, 'त्वेषस्य' महतः, 'सुभगस्य' शोभनस्य 'दिविष्टिषु' क्रियासु दक्षिणाभूतं सर्वेष्वपि 'तुर्वशेषु' मनुष्येषु याः रातयः दत्तयः, तासु च; एतदेव स्थूल मित्येवं वयम् 'अमन्महि' मन्यामह इत्यर्थः॥ एव मत्र 'दिविष्टि'-शब्देन 'क्रिया' उच्यते; ताभिर्हि द्युलोक मियते गन्तुम्॥

"स्थूरः, समाश्रितमात्रो महान् भवति"; समस्ता हि तत्र मात्रा आश्रिता भवन्ति। स्थूलप्रसङ्गेनैव अणुशब्दो निरुच्यते,—"स्थवीयांस मनु" यो वर्त्तते, सः "अणुः"—इत्युच्यते। अन्वित्ययम् "उपसर्गः" "लुप्तनामकरणः" येन प्रत्ययेन न्याय्य मेतन्नाम स्यात्, सोऽत्र लुप्तो न श्रूयत इत्यर्थः। कथं लुप्तः? इति,—"यथा सम्प्रति" —इति। अस्मिन्नामकरणलोपेन प्रयोगसिद्धिः; साम्प्रतम्—इति हि न्याय्यम्, तथापि सम्प्रतीत्येव मपि वर्त्तमानकालविषयप्रयोगः प्रसिद्धः; एवमिहाप्यनुशब्दे। "कुरुङ्गो नाम राजा बभूव"। "कुरुगमनाद्वा" कुरुङ्गः; स हि कुरून् प्रति पुत्रत्वेन गतो जेतुं वा †। "कुलगमनाद्वा"; शत्रुकुलानि हि स नित्य मेव याति विजेतुम्। "कुरुः क्रन्ततेः;" स हि शत्रुन् क्रन्तति ‡। "क्रूरम्"—"इति" एतत् "अपि",

---

* स्थूरं ०——० दिविष्टिषु। राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि॥" —इति ऋ० सं० ५, ७, २२, ४।

† "तस्मादस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपञ्चालानां राजानः"—इत्यादि ऐ० ब्रा० ८, २, २।

‡ "कुरवः" १भा० ३५० ४० ३७० १८ ख०(१)।

"अस्य" एव छन्तेः "भवति" *। "कुलं कुष्णातेः (क्या०प०)"; तद्धि "विकुषितम्" इव "भवति", विस्तीर्णत्वात् ॥

"दूतः(९९)"—इति †, अनवगतम्। "जूतः"—इति न्याय्यम्। "जवतेर्वा द्रवतेर्वा"—इति व्याख्यातम् ‡ ॥

"जिन्वतिः(१००)" §, "प्रीतिकर्मा"—इति अर्थवचनम्, अप्रतीतार्थत्वात्। "समान मेतत्"—इत्यत्र उपरिष्टाद् व्याख्यास्यामो द्वादशोऽध्याये ॥ ॥ ८(२२) ॥

इति निरुक्तवृत्तौ एकादशाध्यायस्य (षष्ठाध्यायस्य) चतुर्थः पादः ॥ ६,४ ॥

---

॥ पञ्चमः पादः ॥

अमत्रोऽमात्रो महान् भवत्यभ्यमितो वा। महाँ अमत्रो वृजने विरप्शीत्यपि निगमो भवति। स्तवे वज्यृचीषमः। स्तूयते वज्यृचा समोऽनर्शराति मनश्लीलदान मश्लीलं पापक मश्रिमद्विषमम् ¶। अनर्शरातिं वसुदा मुपस्तुहीत्यपि निगमो भवत्यनर्वाप्रत्यृतो-

---

* १भा० २८० पृ० २अ० १९ ख० (७)।
† १भा० ४४९ पृ० १८ पं०।
‡ पृ० १पृ० ८पं०; ५ पृ० १पं०।
§ १भा० ४५० पृ० ४पं०।
॥ दै० का० ७, ५, २। क-पुस्तके "द्वादशाध्याये"—इति पाठो नास्ति।
¶ "मश्लिमद्विषमम्" क, ख, ग। "मश्लीम—" रोथ्स टी०।

ऽन्यस्मिन्। अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यं मक्कैः। अनर्व मप्रत्यृत मन्यस्मिन् वृषभं मन्द्रजिह्वं मन्दनजिह्वं मोदनजिह्व मिति वा बृहस्पतिं बर्हय* नव्य मर्कैरर्चनीयैः स्तोमैरसामि सामिप्रतिषिद्धं सामि स्तेः। असाम्योजो बिभृथा सुदानवः। असुसमाप्तं बलं बिभृत† कल्याणदानाः ॥ १ (२३) ॥

"अमत्रः(१०१)"—इति ‡, अनवगतम्। "अमात्रः"—इति शब्दसमाधिः। "महान् भवति"—इत्यर्थवचनम्; यो हि महान् भवति, न तस्य मात्राः प्रमातुं शक्यन्ते, अतोऽसावमत्र इत्युच्यते। "अभ्यमितो वा" स्यात्, अनभिहिंसितः केन चित्। "महाँ अमंचो बृजनें०——०हर्यश्व मन्दत्" §। विश्वामित्रस्यार्षम्। त्रिष्टुप्। ऐन्द्री। पृष्ठ्यस्य चतुर्थपञ्चमयोरक्नोर्माध्यन्दिने सवने अच्छावाकस्य शास्त्रे सम्पातं नाम सूक्तम् ॥, तत्रेयं विनियुक्ता। 'महान्' प्रभावतः। 'अमत्रः' च अपरिमाणमात्रः, 'इन्द्रः' 'बृजने' सङ्ग्रामे 'विरप्शी' विरावणशीलः, 'उग्रम्' उद्गूर्णम् अभ्युद्यतम्, 'ओजः' शत्रुबलम् 'पत्यते' पातयते। 'धृष्णोजः' धर्षयितृ यस्य ओजः,

---

* "वर्धया" क, ख, ग।

† "बिभृथ" क, ख, ग।

‡ १भा० ४५० पृ० ६५०।

§ 'महाँ अमंचो बृजनें विरप्श्यूग्रं शवः पत्यते धृष्णोजाः। नाहं विव्याच पृथिवी च नैनं यत् सोमासो हर्यश्व मन्दत् ॥"—इति ऋ० सं० २, २, १९, ४।

॥ पृष्ठ्याभिश्चतसृषडहयोर्माध्यन्दिनसवनेऽच्छावाकशस्त्रे चातुर्विंशिकातिदिष्टस्याहीनसङ्कस्य स्थाने चीणि सम्पातसूक्तानि, तत्रोपोत्तमावर्जं मेतत् प्रथमं सूक्तम्। सूचितञ्च,—"इमा नु त्वा"—इति आ० ७, ५।

बलम्, तत् 'पत्यते'। किञ्च; 'नाह विद्याच' 'नैनं' व्याप्नोति 'पृथिवी', नापि द्यौः, उपमानत्वेन। कदा पुनरेवं भवति ? 'यत्' यदा 'सोमासः' सोमाः 'हर्य्यश्वम्' इन्द्रम् 'अमन्दन्' अतर्पयन्नित्यर्थः॥ एव मत्र 'शवः', 'पत्यते', 'वृजने'—इत्यनेन सम्बन्धात् "अमाचः = महान्" —इत्युपपद्यते ॥

"ऋचीषमः(१०२)"—इति *, अनवगतम्। ईकारोऽज्ञानवगतः। "ऋचा समः"—इत्यवगमः। "इह श्रुत इन्द्रो०——०शुक्रे असाम्या"†। विमदस्यार्षम्। आस्तारपङ्क्तिः‡। ऐन्द्री। स पुनरैन्द्रो वा प्राजापत्यो वा वासुक्रस्य वा वसुक्रतः। पृष्ठ्यस्य चतुर्थेऽहनि निष्कैवल्ये शस्यते। 'श्रुतः' विख्यातः सर्वासु दिक्षु, 'इह' एतस्मिन् कर्मणि, 'अद्य' 'स्तवे' विजेतुं स्तूयतेऽस्माभिः 'वज्री'। किंलक्षणः? 'ऋचीषमः' "ऋचा समः" यावतैवार्थेन युक्तोचार्य्यते ऋक् स्तुत्यभिप्रायेण, तावानेवासौ भवत्यैश्वर्य्ययोगात् §। किञ्च; 'मित्रो न' मित्र इव, यथा हि कश्चिदाप्तो मित्रो जनेषु यशः कुर्य्यात्, एवं य इन्द्रो 'यशः' 'आ चक्रे' आभिमुख्येन सर्वासु दिक्षु करोति। किंलक्षणं पुनर्यशः करोति? 'असामि' असमाप्तं मनन्त मित्यर्थः। य एवङ्गुणयुक्त इन्द्रः, सोऽस्माभिरिह स्तूयते॥ एव मत्र स्तुतिसम्बन्धात् शब्दसारूप्याच्च "ऋचीषमः = ऋचा समः"—इत्युपपद्यते॥

---

* १भा० ४५० पृ० ६ पं०।

† "इह श्रुत इन्द्रो ऋक्षे ऋष स्वे वृत्राचीषमः। मित्रो न यो जनेष्वा यशश्चक्रे असाम्या"—इति ऋ० सं० ७, ७, ६, २।

‡ "पुरस्ताद्बृहती" क।

§ "ऋचीषमः। "यद्याव इन्द्र ते (सा० सं० आ० आ० १, १, १)"—इत्यादिकथा स्तुत्या समानगुण इत्यर्थः।"—इति सा० भा०।

"अनर्शरातिम्(१०२)"—इति *, अनवगतम्। "अनश्लीलदानम्" —इत्यवगमः। विग्रहप्रसक्तस्याश्लीलशब्दस्यार्थं माह,—"अश्लीलं पापकम्"—इति। न यस्याश्लीला रातिर्दानम्, सोऽनर्शरातिः। शब्दसारूप्यप्रसक्त माह,—"अश्लीलम्=अश्रिमद् विषमम्" तत्सारूप्योपपत्तितोऽश्लील मित्युच्यते†। "अनर्शरातिं०——०चोदयन्" ‡। "आयन्त इव सूर्यम्"—इत्यस्या अनन्तरैव §। नेमस्यार्षम्॥। ऐन्द्री। सतोबृहती। हे स्तोतः! 'अनर्शरातिम्' अपापदानम् ¶, एनम् इन्द्रम् 'वसुदां' वसु-दातारम्, 'उप' उपगम्योपगम्य चेतसा 'शुहि'। किङ्कारणम्? यस्माद् 'भद्राः' भन्दनीयाः 'इन्द्रस्य' 'रातयः' दत्तयः। किञ्च; 'सः' 'अस्य' 'कामम्' अभिप्रायं 'विधतः' दधतः, कामिनां कामान् 'न रोषति' न पीड़यति। 'मनः' च 'इन्द्रस्य' आत्मनः 'दानाय' 'चोदयन्' भवति, य एवं स्तुत्वा याचते॥ एवमेव शब्दसारूप्यार्थाविरोधाच्च "अनर्शरातिम्=अनश्लीलदानम्"—इत्युपपद्यते॥

"अनर्वा(१०४)"—इति**, अनवगतम्। "अप्रत्यृतः"—इत्यवगमः। यः "अन्यस्मिन्" न आश्रितो भवति, स्वप्रधान एव, सः 'अनर्वा'—

---

* १भा० ४५० पृ० १२ पं०।

† "कोणस्तु स्त्रियः पाल्यश्रिकोऽत्रयः"—इति अम० को० २, ८, ९३। "अश्रीरं चित्=अमङ्गलमपि"—इति सा० भा० (ऋ० सं० ४, ९, १५, ९)।

‡ "अनर्शरातिं वसुदा मुप स्तुहि भद्रा इन्द्रस्य रातयः। सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन्॥"—इति ऋ० सं० ९, ७, २, ४।

§ पृ० १७१ पृष्ठे सा ऋग् द्रष्टव्या।

‖ "चित्स्यार्षम्" क।

¶ "अनर्शरातिम्=अपापकदानम्, अपापिष्ठस्य दातारमित्यर्थः"—सा०भा०।

** १भा० ४५० पृ० १७ पं०।

इत्युच्यते। "अनर्वाणं वृषभं ——० नवमानस्य मर्त्ताः"*। अगस्त्यस्यार्षम्। बार्हस्पत्या। त्रिष्टुप्। हे स्तोतः! 'अनर्वाणं' स्वेन महिम्ना युक्तम्, अप्रतिगतं कञ्चिदन्यं प्रत्यधीनत्वेन†, 'वृषभं' वर्षितारम्, 'मन्द्रजिह्वम्' "मन्दनजिह्वम्"; हर्षकरो हि तस्य जनानां स्तनयित्नुघोषः; "जिह्वा, घोषः"—इति हि वाङ्नामसु पठितम्‡। 'बृहस्पतिं' 'वर्द्धयं'। 'नव्यं' स्तुत्यम्, 'अर्कैः' मन्त्रैः। किंलक्षणं बृहस्पतिम्? इति,—'गाथान्यः' स्तुतिप्रापणार्हाः 'देवाः', 'सुरुचः' सुदीप्तिमन्तः, 'यस्य' प्रभुम् 'आ' आभिमुख्येन स्थित्वा 'प्रयक्षन्ति' आदरेण, 'मर्त्ताः' च। 'नवमानस्य' नवो हि मानः तस्य, अहन्यहनि अनया स्तुत्या स्तुत्यस्य भवति, तेनासौ नवमानः, (तस्य; अथ वा 'नवमानस्य'§) प्रशासतः इत्यर्थः। अथ वाय मन्त्रो मन्त्रार्थः स्यात्, ऐतिहासिकपक्षेण,—'मन्द्रजिह्वः' हर्षकरी हि जिह्वा, तस्य स्तुतिः। 'गाथानीः' स एव पौरोहित्येन गाथाः स्तुतीर्नयति प्रापयति देवान् प्रति। स एव च 'सुरोचनः'। तस्यैव च 'नवमानस्य' स्तुवतो 'देवा आप्रयक्षन्ति', 'मर्त्ताः' च। "बृहस्पतिर्वै देवानां पुरोहितः"—इति हि विज्ञायते‖। तस्मादेव मन्त्रोपपद्यते। एवं मन्त्रार्थाविरोधात् "अनर्वा—अप्रत्यृतः"—इत्युपपद्यते॥

---

* अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः। गाथान्यः सुरुचो यस्य देवा आप्रयक्षन्ति नवमानस्य मर्त्ताः॥"—इति ऋ० सं० १, ५, १२, १।

† "अनर्वाणम् = अगन्तारं स्तोतुरधीनमित्यर्थः"—इति सा० भा०।

‡ १भा० ७४ पृ० १च० ११ख० (२९),(३०)।

§ नास्त्येषः पाठः क-पुस्तके।

‖ "तदप्येतदृषिणोक्तम्"—इत्यादीतरेयके द्रष्टव्यम् (८,५,३)। तदुत्पत्तिविवरणञ्च तत्रैव तदग्नितेति खण्डे (३, ३, ९)।

"असामि(१०५)"—इति *, अनवगतम्। सामीति समाप्तं मुच्यते, तस्य प्रतिषेधः असामि॥ "असाम्योजा०——०हृजत द्विषम्" †। कल्याणार्थम्। सतो हृहती। मारुती। हे 'सुदानवः' "कल्याणदानाः" मरुतः! यूयम् 'असामि' अपरिसमाप्तम् अनन्तम्, 'ओजः' "बलम्", 'शवः' अभिवृद्धिरूपञ्च बलम् 'बिभृथ' धारयथ। 'असामिधूतयः' असमाप्तगतयः। धवनं धूतिः; "धवति, धावति"—इति गतिकर्मसु पठितम् ‡। एतत् कुरुध्वम्। य एषः 'ऋषिद्विट्' स्तोढद्वेष्टा, तस्मै हे मरुतः! 'परिमन्यवे' प्रवृद्धक्रोधाय इषुम् इव 'द्विषं' सर्वलोकद्वेष्यतां 'हृजत' क्षिपत॥ एव मत्र "असामि = असुसमाप्तम्§"—इत्युपपद्यते, अर्थाविरोधात्॥ १ (२३)॥

मा त्वा सोमस्य गल्दया सदा याचन्नहङ्गिरा।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत्॥
मा चुक्रुधं त्वां॥ सोमस्य गालनेन सदा याचन्नहं गिरा गीत्या स्तुत्या भूर्णिं मिव मृगं न सवनेषु चुक्रुधं क ईशानं न याचिष्यत इति¶ (गल्दा धमनयो भवन्ति गलन मासु धीयते**)। आ त्वा विशन्त्विन्दव

* १भा० ४५१४० ५पं०।

† "असाम्योजा बिभृथा सुदानवोऽसामिधूतयः शवः। ऋषिद्विषे मरुतः परिमन्यव इषुं न हृजत द्विषम्॥"—इति ऋ० सं० १, ६, १९, ५।

‡ १भा० २२८४० (७४), (७५) टी०।

§ "असामि = असमाप्तम्" क।

॥ "त्वा" क, ख, ग।

¶ "याचिष्यतीति" क, ख, ग।

** नैष पाठः क-ख-ग-पुस्तकेषु।

आ गल्दा धमनीनाम्। नानाविभक्तीत्येते भवत आगलना* धमनीना मित्यचार्थः। (२४†)

"गल्दया(१०६)"—इति ‡, अनवगतम्। 'गलितधानी स्यात्' गलितं हि तस्यां धीयते। "धमनिर्भवति"—इत्यभिधेयवचनम्, नाड़ीत्यर्थः। "मा त्वा सोमस्य०——०न याचिषत्"§। मेधातिथेरार्षम्। ऐन्द्री। बृहती। महाव्रते बृहतीसहस्रे विनियुक्ता। हे इन्द्र! 'मा चुक्रुधं त्वा' मा क्रोधयेयम् 'अहं' 'सोमस्य' 'गल्दया' "गालनेन" धमनेन, पूरणेन सोमस्य 'सदा' नित्यकाल मपि 'याचन्' 'गिरा' गीत्या स्तुत्या च 'सवनेषु' यज्ञेषु। कथञ्च पुनर्मा चुक्रुधम्? इति। 'भूर्णिम् न' 'मृगम्' इव। भ्रमणशीलो भूर्णिः। कः पुनरसौ? व्याघ्रो वा सिंहो वा; स हि भ्रमणशीलो बिभर्त्ति च मृगालादीन्। तेनेन्द्र उपमीयते। यथा मृगालादयो लाङ्गूललालनादिनोपचारेणोपसर्पमाणः तं न क्रोधयन्त्येव महं सोमसम्प्रदानपूर्विकया स्तुत्योपसर्पमाणो मा चुक्रुधं भवन्त मिति। अथ मतम्,—यदि मम क्रोधाद् बिभेषि, मास्मान् याचेथा इति। "क ईशानं न याचिषत्" को हि नाम सोऽस्ति लोके, य ईशान मीश्वरं न "याचिष्यते"? न ह्ययाचतां वृत्तिः सिध्यति॥ एव मत्रेन्द्रस्य या 'गलना' धमनिः, यया सोम

---

* "भवतो गलना" क, ख, ग।

† अत्रैव चतुर्विंशखण्डसमाप्तिः ङ-च-पुस्तकयोः, खण्डप्रतीकपाठसम्मतश्च।

‡ १भा० ४५१ पृ० १५ पं०।

§ ऋ० सं० ५, ७, १२, ५।

आगल्यते सा, तेनैव आगलनेन उपलक्ष्यमाणा "गल्दा"—इत्युच्यते; न ह्येव मर्थविरोधोऽस्ति।

"गल्दा धमनिर्भवति"—इत्यस्य * भाष्यकारवाक्यस्य मन्त्रे नात्र धमनिलिङ्गं विद्यिष्ट मस्तीत्यतो विद्यिष्टलिङ्गं मन्त्रमुदाहरणं ब्रवीति,—"आ त्वा विशन्त्विन्द्वः"—इति †। हे इन्द्र! 'आ विशन्तु' 'त्वा' त्वाम् 'इन्दवः' सोमाः। कथञ्च पुनराविशन्तु त्वा मिन्दवः? 'आगल्दा धमनीनाम्' याः "आगलनाः" धमनयः, याभिरन्तःप्रविष्टाः सन्तो नवं मद मुत्पादयन्ति; अधोवाहिन्यो याः; ताभिराविशन्तु। शेषो मन्त्रः‡॥ एव मिह 'धमनी'-शब्दसह-योगी 'गल्दा'-शब्द इति कृत्वा "आगल्दा = धमनिः"—इति उपपद्यते॥

"नानाविभक्तीत्येते" पदे "भवतः"—'गल्दया', 'गल्दा'—इति; न तु नानार्थे। आह,—कोऽभिप्रायः? इति उच्यते,—पूर्वस्मिन् मन्त्रे§ यद्यपि धमनिशब्दो नास्ति, तथापि निगमे 'गल्दा'-शब्देन धमनिरेवोच्यते। तत्र "गल्दा धमनीनाम्"—इत्येतदेव ज्ञापक मित्यभिप्रायः। 'गल्दया'—इति तृतीयान्तम्, 'गल्दाः'—इति प्रथमाबहुवचनान्तम्। एतदनयोर्नानाविभक्तित्वम्॥ (२४)

**न पापासो मनामहे नारायासो न जल्गुवः॥**

---

* "गल्दा धमनयो भवन्ति"—इत्येव मद्दृष्टमूलपुस्तकपाठस्वरूपः।
† सा० सं० ऋ० आ० २, १, १, ४; उ० आ० ८, २, २, १?
‡ १भा० ५४ पृ० ११ख० (५४, टीकाया मध्येव मेव।
§ पृ० १४४ पृ० ११ पं०।
॥ "जल्गुवः" क, ख, ग।

न पापा मन्यामहे नाधना न ज्वलनेन हीना ऋत्यस्मासु ब्रह्मचर्य्यं मध्ययनं तपो दानकर्मेत्यृषिरवोचद्-कुरो भास्करो भयङ्करो भासमानो द्रवतीति वा॥ २ (२५)॥

"जल्हवः(१०७)"—इति *, अनवगतम्। "ज्वलनहीनाः"—इत्यवगमः। "न पापासो०——०कृणवामहै" †। भर्गो नाम प्रगाथपुत्रः, तस्येय मार्षम्। ऐन्द्री। बृहती। तस्या मेव ऋचाशीत्यां विनियुक्ता। 'न' वयं 'पापासः' "पापाः" इत्येवं 'मनामहे' "मन्यामहे"। किङ्कारणम्? अस्यस्मास्वपापत्वे हेतुः,—'ब्रह्मचर्यम्, अध्ययनम्, तपः, दानकर्म' च। अथ मतम्,—एतैरपि युक्तो यो निर्धनः, स पाप एवेति? तच्च न। किङ्कारणम्? 'न अरायासः' न वय मधनाः। अथापि स्याद्धनवत्त्वेऽपि सति अनाहिताग्नित्वात् ज्वलनहीनत्वेन पापवत्त्व मिति? तदपि न। किङ्कारणम्? 'न जल्हवः' न वयं "ज्वलनहीनाः", किन्तर्हि? आहिताग्नयो वयम्। तदेतदध्ययनाद्यपापत्वहेतुभूतं सर्वं मस्मास्वस्ति। किञ्च; 'यदिन्त्विन्द्रं' यस्माद् वयम् इन्द्रं 'वृषणं' वर्षितारम्, एतस्मिन् यज्ञकर्मणि 'सखायं' सहभूतस्य सोमपानस्य ख्यापयितारम्, अमीभिः सह मया सोमः पीत इत्येवं वक्तारं 'कृणवामहै'। तस्मात् न वयं पापाः, नापि वय मरायासः, नापि जल्हवः,—इत्येव मात्मानं मन्यामहे; न हि पापाना मधनाना मनाहिताग्नीनां

* १भा० ४५१ पृ० १८ पं०।

† "न पापासो मनामहे नारायासो न जल्हवः। यदिन्त्विन्द्रं वृषणं सचा सुते सखायं कृणवामहै॥"—इति ऋ० सं० ६, ४, २७, ६।

च इन्द्रः सखा भवतीत्यभिप्रायः॥ एव मच "जल्हवः = ज्वलनहीनाः" शब्दसारूप्यादर्थाविरोधाच॥

"बकुरः(१०८)"—इति *, अनवगतम्। "भास्करः, भयङ्करः, भास्वद्वर्णो वा"—इति शब्दसमाधयः॥ २ (२५)॥

यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषायदस्रा। अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय॥ (यव मिव वृकेणाश्विनौ निवपन्तौ†) वृको लाङ्गलं भवति विकर्त्तनाल्लाङ्गलं लङ्गतेर्लाङ्गूलवद्वा‡ लाङ्गूलं लगतेर्लङ्गतेर्लम्बतेर्वान्नं दुहन्तौ मनुष्याय दर्शनीयावभिधमन्तौ दस्युं बकुरेण ज्योतिषा§ वोदकेन वार्य ईश्वरपुचो॥ बेकनाटाः खलु कुसीदिनो भवन्ति द्विगुणकारिणो वा द्विगुणदायिनो वा द्विगुणं कामयन्त इति वा। इन्द्रो विश्वान् बेकनाटाँ अहर्दृशः उत क्रत्वा पणीँरभि। इन्द्रो यः सर्वान्¶ बेकनाटानहर्दृशः सूर्यदृशो य इमान्यहानि पश्यन्ति न पराणीति वाभिभवति कर्मणा पणींश्च** वणिजः॥ ३ (२६)॥

---

* १भा० ४५२ पृ० २पं०।
† नैष पाठः क-ख-ग-पुस्तकेषु।
‡ "लगते०——" क, ख, ग।
§ "ज्योतिषो" क, ख, ग।
॥ "ईश्वरः पुचो" क, ख, ग।
¶ "इन्द्रः सर्वान्"—इत्येव क, ख, ग।
** "कर्माण्यापणिंश्च" क।

"यवं वृकेणाश्विना०——०रार्याय"*। कक्षीवत आर्षम्। आश्विनौ। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। 'यवं' यवादि धान्यं 'वृकेण' लाङ्गलेन †। 'वपन्ता' "वपन्तौ" युवाम् 'अश्विना' हे "अश्विनौ!" तत्कर्तौ, यत्कर्ते महानुग्रहे ‡ सति वर्षादौ लाङ्गल-कर्मणः फलसम्पद् भवतीत्यतः तावेवाश्विनौ वपन्ता वित्युच्यते। 'इषम्' "अन्नम्" 'दुहन्ता' "दुहन्तौ" प्रपूरयन्तौ 'मनुषाय' "मनुष्याय"। 'दस्रौ' शत्रूणां दारयितारौ दंशयितारौ वा, कर्मणां कृष्यादीनां कारयितारौ वा वर्षाद्यनुग्रहेण, एतावेवंविधं कर्म कार-यन्तौ कुर्वाणौ वा। 'अभिदस्युम्' दारयितार मनाकालं दुर्भिक्षं 'धमन्ता' धमन्तौ विनाशयन्तौ, कृत्स्नं जगदभिपुष्यन्तौ युवाम्। केन पुनरभिधमन्तौ? इति,—'बकुरेण' जलसमूहेन, ज्योतिःसमूहेन च; मध्यस्थानो ह्युदकसमूहेन, द्युस्थानो ज्योतिषा, तस्य मनुग्रहाति; ततो दुर्भिक्षं ध्वस्यते जगच्च पुष्यति। किञ्च; युवा मेव 'उरुज्योतिः चक्रथुः' विस्तीर्णं सविकलं चक्षुः चक्रथुः। 'आर्याय' "ईश्वरपुत्राय", क्षत्रियाय; स हि युवाभ्यां मन्त्रीभूतः चक्षुष्मान् कृत इत्यभिप्रायः॥ एव मत्र ज्योतिःसमूह उदकसमूहश्च 'बकुर'-शब्देनोच्यते, शब्दार्था-विरोधात्। "ज्योतिषा वोदकेन वा"—इति भाष्यपाठः §॥

"बेकनाटान्(१०९)"—इति ‖, अनवगतम्। "द्विगुणकारिणो वा", "द्विगुणदायिनो वा", 'द्विगुणकामिनो वा'—इति शब्दसमाधयः।

---

* ऋ० सं० १, ८, १७, १।

† "वृकः" पु० ९९—१०५ पृ०। य० वा० सं० १२, ७१।

‡ "हे अश्विनौ! लक्षतमहानुग्रहे" क।

§ एवञ्च ङ-च-पुस्तकयोः पाठ एव सम्यगिति भावः।

‖ १भा० ४५२ पृ० ७पं०।

"इन्द्रो विश्वान्०——०अस्तृतम्" *। प्रागाथः कलिर्नाम, तस्यार्षम्। ऐन्द्री। हृहती। महाव्रते बार्हस्त्यां हृचाग्नीत्यां विनियुक्ता। 'इन्द्रः' 'विश्वान्' "सर्वान्" 'बेकनाटान्' "कुसीदिनः" वृद्धिजीवनान्, 'अहर्दृशः' यैरिहैव जन्मनि सूर्यो दृष्टो न पुनर्द्रक्ष्यन्तीत्यर्थः। अथवा "ये इमानि" एव "अहानि पश्यन्ति" विषयभोगप्रधानाः, नास्तिकतया; "न" पारलौकिकेष्वहःसु;—अस्य दुष्कृतस्य कर्मणः कोऽपि फलपरिणामो भविष्यतीत्येवं भावि[न] पश्यन्ति; तानभिभवति †। 'कृत्वा' स्वेन "कर्मणा"। 'उत पणीन्' अपि पणीन्। "पणिर्वणिग् भवति"; न हि विशुद्धेन कर्मणा व्यवहरन्ति। याभिरेतत् कर्म करोति, याभिः पुनरेवमादीन् दुष्कृतकारिणो (वि‡) भवति, 'कत् ऊ मही:' क ता महत्यः सेनाः? 'अस्य' इन्द्रस्य 'अधृष्टाः' अनाधर्षितपूर्वाः परैः, 'तविषीः' याश्च महत्यः। 'कत् उ वृत्रघ्नः' क च वृत्रघ्नः इन्द्रः? यस्य 'अस्तृतम्' अनुपहतं बलम्, येनैतान् हन्तीति॥ एव मत्र "बेकनाटाः = कुसीदिनः", अर्थाविरोधादित्युपपद्यते §॥ ३ (२६)॥

---

* "इन्द्रो विश्वान् बेकनाटाँ अहर्दृशं उत क्रत्वा पणीँरभि। कदू मही रधृष्टा अस्य तविषीः कदु वृत्रघ्नो अस्तृतम्॥"—इति ऋ० सं० ६, ४, ४९, ५। इहार्द्धर्चयोः पाठव्यतिक्रमश्च दृश्यते।

† अत एव कुसीदजीविनां मनौ निन्दा स्मर्यते,—"प्रेष्यान् वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत्"—इति ८, १०२।

‡ नैतद् दृश्यते क-पुस्तके।

§ "बेकनाटान्,—अनेन कुसीदिनो वृद्धिजीविनो वार्द्धुषिका उच्यन्ते। कथं तद्व्युत्पत्तिः? वे—इत्यपभ्रंशो द्विशब्दार्थे। एकं कार्षापण ऋणिकाय प्रयच्छन् द्वौ मह्यं दातव्यौ इत्यभिनयेन दर्शयन्ति, ततो द्विशब्देनैकशब्देन च नाटयन्तीति बेकनाटाः, तान्।" - इति सा० भा०।

जीवान्नो अभि धेतनादित्यासः पुरा हथात्। कद्ध स्थ हवनश्रुतः॥ जीवतो नोऽभिधावतादित्याः पुरा हननात् क्व नु स्थ ह्वानश्रुत इति मत्स्यानां जाल मापन्नाना मेतदार्षं वेदयन्ते मत्स्या मधा उदके स्यन्दन्ते माद्यन्तोऽन्योन्यं भक्षणायेति वा जालं जलचरं भवति जलेभवं वा जलेशयं वांहुरोंऽहस्वानंह्वरण मित्यप्यस्य भवति। कुखन्नं ह्वरणादुर्वित्यपि निगमो भवति। सप्त मर्यादाः कवयस्ततक्षुस्तासा मेका मिदभ्यंहुरो गात्। सप्त मर्यादाः कवयश्चक्रुस्तासा मेका मप्यधिगच्छन्नंहस्वान् भवति स्तेयं तल्पारोहणं* ब्रह्महत्यां भ्रूणहत्यां सुरापानं† दुष्कृतस्य कर्म्मणः‡ पुनः पुनः§ सेवां पातके नृतोद्य मिति बत इति निपातः खेदानुकम्पयोः॥४(२७)

"अभिधेतन(११०)"—इति॥, अनवगतम्। "अभिधावत"—इत्यवगमः। "जीवान्नो०——०हवनश्रुतः"¶। उक्त मार्षं भाष्यकारेणैवात्रोपप्रदर्शनार्थम्, एवं सर्वत्र परिज्ञेय मार्ष मिति**।

---

* "स्तेय मतल्पारोहणं" ङ, च।

† "सुरापार्णं" ङ, च।

‡ "दुष्कृतकर्मणः" क, ख, ग।

§ "पुनः सेवां" क।

॥ १भा० ४५२ पृ० १५ पं०।

¶ ऋ० सं० ६, ४, ५१, ५।

** अत्रेय मनुक्रमणिका,——"त्यान् नु सैका मत्स्यः सामदो मैत्रावरुणिर्मान्यो-वा वचवो वा मत्स्या जालनद्धा आदित्यानस्तुवन्"—इति।

गायत्री। आदितेयी। 'आदित्यासः' हे "आदित्याः!" 'जीवात् नः' "जीवतः" अस्मान् 'अभिधेतन' "अभिधावत" यूयम् 'पुरा हन्यात्' "पुरा हननात्" (अहतान्*) अस्मान्त्सम्भावयतेत्यभिप्रायः। 'कत् ह स्य' "क्व नु स्थ" यूयम्? येन न शृणुत क्षिप्रं नाभिधावत हे 'हवनश्रुतः!' ते ह्यार्त्ताना माक्रान्तं शृण्वन्ति॥ एव मत्र 'पुरा हन्यात्'—इत्यनेन सम्बन्धात् "अभिधेतन = अभिधावत"—इत्येषविपरिणाम उपपद्यते॥

ऋषेर्वा मत्स्यबधकारुणाभिभूतस्यैतदार्षम्, मत्स्यानां वा केचिन्मन्यन्ते। "मत्स्याः, मधौ उदके स्यन्दन्ते"; मधु इत्युदकनाम†, तत्र हि ते स्यन्दन्ते गच्छन्ति। "स्यन्दति, कर्मति"—इति गतिकर्मसु पठितम्‡। "माद्यन्ते" हृष्यन्ति "अन्योन्यं भक्षणाय—इति वा", मत्स्या हि इतरेतरभक्षजीविनः। "जालम्, जलचरं भवति"; तद्धि जले चरति। "जले भवं वा" जले वा भवति। "जलेशयं वा" जले वा शेते इति जालम्॥

"अंहुरः(१११)"—इति §, अनवगतम्। "अंहस्वान्"—इत्यवगमः। रो मत्वर्थे। "अंहुरणम्—इत्यघस्य भवति"—इति प्रासङ्गिकम्; एव मपि हि प्रयोगो भवतीति। "क्षितः कूपे०——०अस्य रोदसी"-"मम मर्यादाः"—इत्येते॥ क्षितस्यैव कूपे पतित-

---

* नास्त्येतत्पदं क-पुस्तके।

† १भा० ९९, १०१ पृ० (११)।

‡ १भा० २२९ पृ० २ख० १४ख० (५), (६)।

§ १भा० ४५२ पृ० १८ पं०।

॥ इच प्रथमा, "क्षितः कूपेऽवहितो देवान् हवत ऊतये। न च्छ्रोत बृहस्पतिः कण्वम्मे अहरणादुप क्षियं मे अस्य रोदसी॥"—इति ऋ० सं० १, ७, २२, १। उत्तरान्वित उत्तर मेव दर्शयिष्यति।

स्यार्षे । एतयोः पूर्वा कृत्स्नस्य वा । वैश्वदेवी । पङ्क्तिः । प्रातरनुवाकाश्विनयोर्विनियुक्ता । 'चितः' 'कूपे' 'अवहितः' पतितः, 'देवान्' 'हवते' आह्वयते, 'ऊतये' रक्षणायात्मनः । तस्य आह्वानं 'शृण्वन्तिः शृण्वाव' । "वित्तं मे अस्य रोदसी"—इत्येतत् पुनःपुनरुच्यमानं द्यावापृथिव्यौ शृण्वतुः । किं मित्येतदसौ आवयाञ्चकार ? इति,—'क्षुण्वन्' 'अंहुरणात्' अंहस्वतः कूपात् आत्मनः । 'उरु' विस्तीर्णं त्राणं कुर्वन् ॥ एवं मन्त्र "अन्धकूपः = अंहुरणः"—इत्युपपद्यते, प्रकरणाविरोधात् ॥

"सप्त मर्यादाः०——०धुरुणेषु तस्थौ" * । 'सप्त मर्यादाः' सप्त स्थितीः 'कवयः' मेधाविनः, हिरण्यगर्भ-मनु-प्रभृतयः 'ततक्षुः' कृतवन्तः । नित्या एव हि ताः, तैस्तु तत्प्रख्यापकोऽनुस्मरणार्थो ग्रन्थसन्दर्भोऽभिव्यञ्जितः; एतदेव करण मित्युपचर्यते । "तासा मेकामिदभ्यक्षरो गात्" । 'इत्'—इत्यनर्थकः, अवधार्थो वा । 'तासां' मर्यादानाम् 'एकाम्' "अभिगच्छन्" अभिक्रामन् "अंहुरान् भवति" । 'गात्'—इत्येतत्, अभेः समीप माक्षिप्य "एका मप्यभिगच्छन्"—इति । कतमाः पुनस्ता मर्यादाः ? इति,—"स्तेयम्", "तल्पारोहणम्"—इत्येवमाद्याः † । यः पुनरेतानभिगच्छति, तस्य किम् ?

---

* "सप्त मर्यादाः०——०गात् । आयोर्हे स्कम्भ उपमस्य नीळे पुरां विसर्गे धुरुणे तस्थौ ॥"—इति ऋ० सं० ७, ५, ३२, ६ ।

† सायणस्तु,—"सप्त मर्यादाः,—कामजेभ्यः क्रोधजेभ्यश्चोद्धृताः; पानम्, अक्षाः, स्त्रियः, मृगया, दण्डः, पारुष्यम्, अन्यदूषणम्'—इति सप्त मर्यादाः । यद्वा स्तेयम्०——०इति निरुक्ते निर्दिष्टाः सप्त मर्यादाः ।"—इत्याह ।

इति,—सः 'आयोः' अयनस्य सूर्यस्य 'स्कम्भे' स्कम्भने मण्डले 'उपमस्य' सर्वभूतोपनिर्मातुरादित्यान्तरपुरुषस्य 'नीडे' निलयने स्थाने, यानि धरुणानि धारयितृणि स्थानानि 'अप्रध्वंसीनि' आभूतसम्प्लवस्थायीनि, तेषु 'तस्थौ' तिष्ठति। आह,—कस्मिन् काले इति? उच्यते,—'पथां विसर्गे' विषयानुप्रवेशमार्गभूतानां मिन्द्रियाणां 'विसर्गे' विसर्जनकाले प्राप्ते, मृत्युकाल इत्यर्थः॥ मर्यादासम्बन्धात् स्पष्टतर एष निगम इत्यतो द्वितीय उपात्तः, स्मृतिसमाचारस्थानेन प्रतिविशिष्ट उपदर्शितो भविष्यतीत्येवं मन्त्र एवोपश्रुत्य सर्व एव समाचारः विशिष्टैः स्मृतिकारैः सन्दृष्टो न स्वतन्त्र इति* ॥

"बत—इति निपातः, खेदानुकम्पयोः"। "बत(११९)"—इति†, अनवगतम्; अनेकार्थञ्च। "निपातः"—इति पदजात्यवधारणम्। "खेदानुकम्पयोः"—इत्यर्थवचनम्॥ ४ (२७)॥

बतो बतासि यमं नैव ते मनो हृदयञ्चाविदाम।
अन्या किल त्वां कक्ष्येव युक्तं परिष्वजाते लिबुजेव

---

* मनावपि द्रष्टव्यम्। तथाहि;—(१) स्तेयम्—११ अ० ५४, ५७, ९९—१०१; १२ अ० ५७। (२) तल्पारोहणम्—११अ० ५४, ५८, १०२—१०६, १७०, १७१; १२ अ० ५८. (३) ब्रह्महत्याम्—११अ० ५४, ५५, १७२—१८६; १२ अ० ५५। (४) भ्रूणहत्या—११ अ० ८७ (ब्रह्महत्यासमानम्)। (५) सुरापानम्—११ अ० ५४, ५६, ९०—९८; १२ अ० ५६। दुष्कृतस्य कर्मणः (अतिपातकादीनां मन्यतमस्य ११ अ० २२९ श्लो०) पुनःपुनः सवाम्—११ अ० १३०—१३३। (७) पातके हतोऽयम्? हनोऽय मिति पाठे तु पापकर्मणां साहाय्यकरण मिति प्रतीयेत—११ अ० ५४, १७९—१८१।

† १भा० ४५१ ४० ४पं०।

वृक्षम्। बनो बलातीतो * भवति दुर्बलो बतासि यम नैव ते मनो हृदयञ्च विजानीमोऽन्या † किल त्वां परिष्वङ्क्ष्यते कक्ष्येव युक्तं लिबुजेव वृक्षं लिबुजा ‡ व्रततिर्भवति लीयते विभजन्तीति व्रततिर्वरणाच्च शयनाच्च § ततनाच्च वाताप्य मुदकं भवति वात एतदाप्यायय॒ति। पु॒नानो वा॒ताप्यं वि॒श्वश्च॑न्द्र मित्यपि नि॑गमो॒ भव॑ति। वने॒ न वा॒यो न्य॑धायि चा॒कन्। वन इव वायो वेः पुचश्चायन्निति वा कामयमान इति वा वेति च य इति च चकार शाकल्य उदात्तं त्वेव माख्यात ‖ मभविष्यदसुसमाप्तश्चार्थो रथर्यतीति सिद्धस्तत् प्रेषू रथङ्कामयत इति वा ¶। एष दे॒वो रथ॑र्यतीत्यपि नि॑गमो॒ भव॑ति (२८**)। धे॒नुं न॒ इषं॑ पिन्वत॒ मस॑क्राम्। अस॑ङ्क्रमणी॑म् ॥ ५ ††॥

॥ इति षष्ठाध्यायस्य पञ्चमः पादः ॥ ६. ५.

---

* "बलादतितो" क, ख, ग।

† "विजानाम्यन्या" क, ख, ग।

‡ "लिवुजा" क, ख, ग।

§ "सयनाच्च" ङ, च।

‖ "उदात्तं त्वेतदाख्यात" क, ख, ग।

¶ "रथं कमयन्त इति वा" क। "रथं कामयन्त इति वा" ख, ग। "रथं कामयन्ति इति वा" ङ।—सर्व एवैते पाठा वृत्तिविरुद्धाः।

** अत्रैवाष्टाविंशखण्डसमाप्तिः ङ-च-पुस्तकयोः।

†† नात्र खण्डसमाप्तिः ङ-च-पुस्तकयोः; पादसमाप्तेषु प्रसङ्गोऽपि ग।

"ब्रतो बतासि०——०वृत्तम्" *। यमौ, यमं ब्रवीति,—"दुर्बलः" 'बत' दुर्बलहृदयः त्वम्, अधर्मभीरुर्मोहमयस्त्वम्। एवं मत्कृतमया प्रार्थ्यमानः खेदं मुपयासि,—नेच्छसि मया सम्भोक्तुं स त्वं सर्वथा ह्यनुकम्प्यः, शोच्य इत्यर्थः। अथ वा 'नैव' 'ते' तव 'मनः' सङ्कल्पम्, 'हृदयं' हृदृत मध्यवसायञ्च 'विजानीमः'। अथ वा लभ्यस्ते मयाभिप्रायः;—'अन्या किल त्वां' मत्तो विशिष्टतरा योषित्, 'परिष्वजाते' "परिष्वङ्क्ष्यते" †; ततः 'किल' त्वं मां तयापहृतचेतस्त्वात् नेच्छसि परिष्वक्तुम्। कथञ्च पुनरन्या त्वां परिष्वङ्क्ष्यते ‡? 'कक्ष्येव युक्तम्', 'लिबुजेव वृत्तम्'। 'कक्ष्या' कक्षजाता 'इव' सुवृद्धा, 'लिबुजा' वल्ली, यथा 'युक्तम्' आत्मना संयुक्तम् समीपजं परिष्वजेत् परिवेष्टयेत, एवं किल त्वा मन्या परिष्वङ्क्ष्यते इति॥ एवं मत्र प्रकरणाविरोधात् 'बत'—इत्येष निपातः खेदानुकम्पयोः॥ अत्र 'कक्ष्येव युक्तम्'—'लिबुजेव वृत्तम्'—(इत्येकः 'इव'-शब्दोऽनर्थकः; अथ वोपमानद्वय मेव स्यात्,—कक्ष्येव च, लिबुजेव च §,—) यथा कक्ष्या च लिबुजा च परिष्वजनीयौ अश्वत्थवृक्षौ परिष्वजेते, एवं परिष्वङ्क्ष्यते इति॥

"वाताप्यम्(११२)"—इति ‖, अनवगतम्। "उदकं भवति"—इत्यभिधेयवचनम्। "वातः" हि "एतत्" उदकम् "आप्याययति" शीतं करोति। अथ वा आप्यायतिर्वृद्ध्यर्थः स्यात्; पुरो

---

* ऋ० सं० ७, ९, ८, २।

†,‡ उभयत्रैव "परिष्वज्यते" क।

§ नास्त्येष पाठः क-पुस्तके।

‖ १भा० ४५२ पृ० ९पं०।

वातेन हि वृष्टिभूत मुदकं संवर्द्धते। "नू नो रयि०——०वसुर्जगम्यात्" *। नोधसो गौतमस्यार्षम्। पावमानी सौमी। हे सोम! 'नु नः' क्षिप्रं मस्माकम् 'रयिम्' धनम् 'उपमास्व' उपनिर्मिणुहि। 'नृवन्तं' पुत्रपौत्रैः सहितम्। 'पुनानः' पूयमानः। 'वाताप्यम्' उदकं प्राप्य द्रवीभूतः। 'चन्द्रं' चायनीय मुदकम्। 'विश्वः' च सर्वः पूयमानः। किञ्च; 'प्रतारि' प्रतीर्णं दीर्घं कुरु—हे 'इन्दो' सोम! 'वन्दितुः' स्तोतुः 'आयुः'। किञ्च; तथा उपमास्व, यथा 'प्रातः' नित्य मेव 'धियावसुः' कर्मवसुः। इन्द्रः त्वां पातु मस्माकम् 'आ जगम्यात्' आगच्छेदित्यर्थः॥ एव मत्र "वाताप्यम् = उदकम्" अर्थाविरोधाच्छब्दोपपत्तेश्च॥

"चाकन्(११४)"—इति †, अनवगतम्। "चायन्"—इति, "कामयमानः"—इति शब्दसमाधौ॥ "वनं न वायो०——०तमः क्षुपावान्" ‡। वसुक्रस्येय मार्षम्। ऐन्द्री। त्रिष्टुप्। 'वने न' "वने इव" (वृक्षे इव §)। शकुनिः, स्वे नीडे वाय मात्मीयं पुत्रं 'न्यधायि' निदधाति 'शिशुकम्' अजातपक्षम्। स यया तत्र निहितः 'चाकन्' "चायन्" पश्यन्, भयाद् दिशो निरीक्षमाणः आसीत्; अथ वा "कामयमानः" तदुत्सुकमना आसीत्॥ एव मय मस्मासु वृक्षस्य नीडभूतेषु शकुनि-

---

* "नू नो रयि मुपमास्व नृवन्तं पुनानो वाताप्यं विश्वचन्द्रम्। प्र वन्दितुरिन्दो तारिषायुः प्रातर्मक्षू धियावसुर्जगम्यात्॥"—इति ऋ० सं० ७, ४, २, ५।

† १भा० ४५५ पृ० १५ पं०।

‡ "वनं न वा यो न्यधायि चाकञ्छुचिर्यो स्तोमो भुरण्यावजीगः। यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो वृक्तबर्हिः क्षुपावान्॥"—इति ऋ० सं० ७, ७, ११, १।

§ न दृश्यते इमे पदे क-पुस्तके।

पुत्रभूतः, 'शुचिः' व्यपगतसर्वदोषः युवयोः स्वभूतः, 'स्तोमः'। हे 'भुरण्यौ' भर्त्तारौ अश्विनौ! शीघ्रौ वा; भुरण्युरिति क्षिप्रनामेति *। किञ्च; यस्य स्तोमस्य 'पुरुदिनेषु' बहुष्वहःसु 'इन्द्रो होता' इन्द्रोऽप्याङ्गाता भवति,-ममायं स्तोमः स्यादिति। किंलक्षणः पुनरिन्द्र आङ्गाता? यः 'नृणां नृतमः' मनुष्याणा मपि मनुष्यतमः, शूराणा मपि मध्ये शूरतम इत्यर्थः। 'नर्यः' च नृभ्यो हितः, यः 'क्षपावान्' च रात्रिपर्यायेषु सोमभागी। एवङ्गुणयुक्तेन यः स्तोम इन्द्रेणापि प्रार्थ्यते, अस्मासु वर्त्तमानः, स युवां प्रति 'अजीगः' नित्यकाल मेव गच्छतीत्यर्थः॥

एवन्तावदेता मृच माश्विनी मिति कृत्वा व्याचक्षते, तदसाधु; ऐन्द्रे हि सूक्ते प्रथमेवेय मृग् भवति†। तच्च पुनः पृष्ठ्यस्य षष्ठेऽहनि स्तोमे वर्द्धमाने माध्यन्दिने सवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुज्यते‡। हे 'भुरण्यौ' भर्त्तारौ, देवतानाम् पतीः! य एषः स्तोमोऽस्मासु निहितः, 'शुचिः' व्यपगतदोषः, शकुनिपुत्र इव, 'वने' वनावयवे वृक्षे, 'चाकन्' पश्यन्निव कामयमान इव वा इन्द्रम् आस्ते। यः स्तोमः, तस्य किम्? इति,—यस्येन्द्रः पुरुदिनेषु बहुष्वहःसु आङ्गाता अभूत्; अपि नाम मा मनेन स्तोमेन स्तुयुरिति। किंलक्षणः पुनराङ्गाता यस्येन्द्रः? इति,—नृणां नृतमः नर्यश्च क्षपावांश्च। समान मेतत् पूर्वेणैवार्थेन। य मेव मिन्द्रः प्रार्थयते, स एषः

---

* १भा० २५७ पृ० २ष० १५ ख० (१४); २६१ पृ० ८पं।

† "वनेनवेत्यृचं चयोदशं सूक्तम्, वसुक्रस्यार्षं चेष्टुभ मैन्द्रम्, अनुक्रान्तञ्च वनेनाष्टाविति।"—इति तत्रैव सा० भा०।

‡ "स्तोमे वर्द्धमाने को अद्य नर्यो वने न वायः"—इति ऋ० ७. १२।

स्तोमः, तं प्रत्यजीगः, गच्छतीत्यर्थः। अथवा स एषः स्तोमोऽस्माभिरुदीर्यमाणः, तस्येन्द्रस्य गुणान् गृह्णातीति स्यात्; "जिगर्त्तिः०——०गृह्णातिकर्मा वा"—इति ह्युक्तम् *॥ एवं सत्र 'चाकन्'—इत्यस्य "चायन्"—इति, "कामयमानः—इति वा"—इत्येतौ विपरिणामावुपपद्येते, शब्दसारूप्यादर्थाविरोधाच्च॥

एतस्मिन्निगमे पदविभागतः कश्चिद् विचारोऽस्ति, तं माह भाष्यकारः,—"वा—इति च, यः—इति च, चकार शाकल्यः"—इति। शाकल्यः पदकारः। तदेतद् विचार्यमाणं न साधु भवति, किङ्कारणम्? "उदात्तं त्वेव माख्यात मभविष्यत्"। 'एवम्' एतस्मिन् पददये सति, यदेतत् 'आख्यातं' न्यधायीति, एतत् 'उदात्तम् अभविष्यत्'; यद्वृत्तात्परस्य नित्य माख्यातस्य निघातो न भवतीति लक्षणविदो मन्यन्ते†, न चेद मुदात्तम्; तस्मात् 'यः'-इति नेदं यद्वृत्तम्। किन्तर्हि? 'वायः'—इति एकं पदम्। किञ्च; "असुसमाप्तश्चार्थः" अपुष्कलः; एव मेतस्मिन् पददये सति मन्त्रस्यार्थो ऽसुसमाप्तो भवति। कथम्? द्विपदत्वे हि सति 'वा'-शब्दस्यार्थेन केन चिद् भवितव्यम्, न चेह विकल्पः समुच्चयो वा कश्चिदर्थोऽस्ति। तस्मादाख्यातस्यानुदात्तत्वादर्थासम्भवाच्च द्विपदत्वे, 'वायः'—इत्येतदेकपद मेव; "शकुनिपुत्रः" एव चास्याभिधेयः उपपद्यते॥

---

* पृ० १७४ ५० १७९।

† लक्षणविदः, पाणिन्यादिव्याकरणलक्षणवेत्तार इति यावत्। तथा च लक्षणम्,—"यद्वृत्तान्नित्यम्"—इति पा० ८, १, ६६।

"रथर्यति(११५)"—इति *, अनवगतम्। 'रथं हर्यति'—इत्यवगमः; हर्यति-शब्दोहि प्रेप्सायाम्; "रथं" हि यः "कामयते", स रथर्यति। "एष देवो०——०वग्वनुम्" †। शुनःशेपस्यार्षम्। पावमानी सोमी। गायत्री। यावस्तुत आवापे। 'एषः' सोमो 'देवः' 'रथर्यति' रंहण मात्मनो गमन मिच्छति। 'पवमानः' 'दशस्यति' दान मात्मन इच्छति; कथं नाम मां देवेभ्यो दद्युरिति। किञ्च; 'आविष्कृणोति' प्रकाशीकरोति 'वग्वनुम्' वचो वननीयम्, दत्त मां देवेभ्य इति॥ एव मत्र "रथर्यति = रथप्रेप्सुः" शब्दसारूप्यादेतदुपपद्यते॥ (२८‡)

"असक्राम्(११६)"—इति §, अनवगतम्। "असङ्क्रमणीम्"—इति शब्दसमाधिः। "पुरु हि वां०——०रति मगमन्" ‖। भरद्वाजस्यार्षम्। त्रिष्टुप्। आश्विनी। प्रातरनुवाकाश्विनयोः शस्यते। 'पुरु' बहु 'देष्णं' दानं 'वां' युवाभ्यां यज्ञे यस्मात् हे 'पुरुभुजौ' बहुभोजिनौ! अश्विनौ! तस्मात् युवां ब्रूमः,—'धेनुं नः' तर्पयित्रीं मस्मभ्यम् 'इषम्' अन्नलक्षणम् 'पिन्वन्तम्' प्रचारयन्तम्, 'असक्राम्' असङ्क्रमणशीलाम् अनपायिनीम् अस्मत्तः; अथ वा असङ्क्रमणशीलां

---

* १मा० ४५४ पृ० १पं०।

† "एष देवो रथर्यति पवमानो दशस्यति। आविष्कृणोति वग्वनुम्॥"—इति ऋ० सं० ९, ७, २०, ५।

‡ अत्रैव पञ्चमखण्डसमाप्तिः पादसमाप्तिश्च दृत्तिसमाप्ता परं मूलविरुद्धेति ज्ञात्वा नादरणीयेत्यस्माकम्। अष्टाविंशखण्डसमाप्तिषु ङ-च-पुस्तकानुसृतैव परं न तत्र क्वापि पाद व्यवस्थेति।

§ १मा० ४५४ पृ० ४पं०।

‖ पुरु हि वां पुरुभुजा देष्णं धेनुं न दृषिं पिन्वन्तं मसक्राम्। स्तुतश्च वां माध्वी-ष्टुतिषु रसासु ये वां मनु रति मगमन्॥"—इति ऋ० सं० ५, १, ४, २।

द्याम्, 'इषम्' इड्-हेतूदक मस्मादर्थं प्रत्ययत मिति स्यात्। किमुनः तद् युवयोर्बऊदानम्? इति,—'स्तुतश्च' स्तुत-शस्त्रवांश्च सोमो युवयोरन्नम्। हे 'माध्वी' मधुपौ! 'सुष्टुतिश्च' शोभनाभिः स्तुतिभिः सुष्ठु स्तुतः, 'रसाश्च' आज्यादयः, य एते 'रातिं' पुरोडाशस्यानुगच्छति, सर्व एते युवयोरेव। तस्माद् ब्रवीमि,—पिन्वत मिति॥ एव मत्र शब्दमारूप्यादर्थाविरोधाच्च 'अमक्रम्'—इत्यस्य शब्दस्य "असङ्क्रमणीम्" —इत्येष विपरिणाम उपपद्यते। इडभिधेया, द्यौर्वा॥ ५ * ॥

इति निरुक्तवृत्तौ एकादशाध्यायस्य (षष्ठाध्यायस्य)
पञ्चमः पादः॥ ६, ५॥

---

॥ षष्ठः पादः॥

**आधव आधवनात्। मतीनां च साधनं विप्राणां चाधव मित्यपि निगमो भवत्यनवब्रवोऽनवक्लृप्तवचनः। विजेषकृदिन्द्र इवानवब्रव इत्यपि निगमो भवति॥ १ (२६)॥**

"आधवः(११७)"—इति † अनवगतम्। "आधवनात्"—इत्यवगमः; आकम्पनादित्यर्थः। "मंसीमहि०——०चाधवम्"। ऐन्द्रस्य

---

* पादान्वितमूलपुस्तकानुरोधत एवेह पञ्चमखण्डसमाप्तिः पञ्चमपादसमाप्तिश्च स्वीक्रियतेऽस्माभिः, दृष्टौ लितः प्रागेव।

† १भा० ४५४ पृ० ११पं०।

‡ "मंसीमहि ला वय मस्माकं देव पूषन्। मतीनां च साधनं विप्राणां चाधवम्॥"—इति ऋ० सं० ७, ७, १२, ४।

विमदस्यार्षम्। अनुष्टुप्। पौष्णी। 'मंसीमहि' त्वां हे 'पूषन्'! 'देव!' 'मतीनां' च प्रज्ञाना मस्माकं साधयितारम्; आदित्येन हि प्राणिनां प्रज्ञा अभिव्यज्यन्ते। किञ्च; ये चान्ये 'विप्राः' प्राप्तप्रज्ञाः मेधाविनः, तेषाम् 'आधवम्' आकम्पयितारं स्वय मेव। तथा त्व मात्मनो गुणवत्तां दर्शयसि, यथा प्रोत्कम्पमानहृदयास्ते त्वां स्तुवते॥ एव मत्र शब्दसारूप्यादर्थाविरोधाच्च "आधवः = आकम्पयिता"—इत्युपपद्यते॥

"अनवब्रवः(११८)—इति *, अनवगतम्। "अनवच्छिन्नवचनः"—इति अवगमः। "विजेषकृदिन्द्र ——० यत आ बभूथ" †। मन्योरार्षम्। त्रिष्टुप्। मान्यवे सूक्ते। श्येनादिषु निष्क्रेवल्ये शस्यते। 'विजेषकृत्' विजयकृत्, 'इन्द्रः इव अनवब्रवः' इन्द्र इवानवच्छिन्नवचनः; न ह्येन्द्रस्य केनचिदाच्छिद्यते वचः। हे 'मन्यो!' यस्त्वम् अनवच्छिन्नवचनः इन्द्र इव, स त्व मस्माकम् 'अधिपाः' अधिष्ठाय पाता 'भव'। किञ्च; हे 'सङ्गरे' शत्रूणां सहनशील! 'प्रियं ते' यत् 'नाम', तेन त्वां 'गृणीमसि' नित्य मेव स्तुम इत्यर्थः। किञ्च; 'विद्म' जानीमो वयम् 'तम्' 'उत्तमम्' उत्स्यन्दनम्, 'यतः' त्वम् 'आ बभूथ'॥ एव मत्र शब्दसारूप्यादर्थाविरोधाच्च "अनवब्रवः = अनवच्छिन्नवचनः"—इत्युपपद्यते॥ १ (२८)॥

---

* १मा० ४५४ ४० १४ पं०।

† "विजेषकृदिन्द्र इवानवब्रवोऽस्माकं मन्यो अधिपा भवेह। प्रियं ते नाम सङ्गरे गृणीमसि विद्मा तमुत्तमं यत आ बभूथ॥"—इति ऋ० सं० ८, ३, १९, ५।

अरायि काणे विकटे गिरिं गच्छ सदान्वे। शिरिम्बिठस्य सत्वभिस्तेभिष्टा चातयामभि ॥ अदायिनि काणे विकटे काणो*ऽ(?)विक्रान्तदर्शन इत्यौपमन्यवः कणतेर्वा स्यादणूभावकर्म्मणः कणतिः शब्दाणूभावे† भाष्यतेऽनुकणतीति माचाणूभावात्कणो‡ दर्शनाणूभावात्काणो विकटो विक्रान्तगतिरित्यौपमन्यवः कुटतेर्वा स्याद्(विपरीतस्य?) विकुटितो भवति गिरिं गच्छ सदानोनुवे शब्दकारिके। शिरिम्बिठस्य सत्वभिः। शिरिम्बिठो मेघः शीर्यते बिठे (बिठ मन्तरिक्षम्॥) बिठं बीरितेन व्याख्यातं तस्य सत्त्वैरुदकैरिति स्यात्तैष्टा चातयामोऽपि वा शिरिम्बिठो भारद्वाजः कालकर्णीपेतोऽलक्ष्मीर्निर्णाशयाच्चकार तस्य सत्त्वैः कर्म्मभिरिति स्यात्तैष्टा चातयामश्चातयतिर्न्नाशने पराशरः पराशीर्णस्य वसिष्ठस्य स्थविरस्य जज्ञे। पराशरः शतयातुर्वसिष्ठ इत्यपि निगमो भवतीन्द्रोऽपि पराशर उच्यते (परा¶) शातयिता यातूनाम्। इन्द्रो यातूना मभवत्पराशर इत्यपि निगमो भवति। क्रिविर्हतो विकर्त्तनदन्ती। यचा

---

* "काणे" ङ।

† "शब्दानूभावे" क, ख, ग।

‡ "माचाणूभावात्काणो" ङ, "माचाणूभावात्कणा" च।

§, ‖, ¶ नैतानि दृश्यन्ते क-ख-ग-पुस्तकेषु।

वो दिद्युद्दंति क्रिविर्हीत्यपि निगमो भवति। कक्कलती क्षत्तदती* (अपि वा देवं कञ्चित् क्षत्तदन्तं दृष्ट्वैव मवक्ष्यत्†)॥ २(३०)॥

"सदान्वे(११९)"—इति‡, अनवगतम्। "सदानोनुवे"—इति शब्दसमाधिः। "अरायि काणे०——०चातयामसि"§। शिरिम्बिठस्य भारद्वाजस्य आर्षम्। अनुष्टुप्। दुर्भिक्षाधिदेवतोच्यते, कालकर्णी वा अलक्ष्मीः॥। हे 'अरायि' "अदायिनि!" दुर्भिक्षाधिदेवते! अथ वा हे अलक्ष्मि! दुर्भिक्षेण पीड़ितानां न दाने मतिः प्रवर्तते, नाप्यलक्ष्म्याभिभूतानाम्। 'काणे' दुर्भिक्षेण ह्यभिभूतानां मान्द्यं चक्षुषोर्भवति, अन्नाभावात्; अलक्ष्मीपक्षेऽपि तद्रूपा अलक्ष्मीरिति प्रतीयते; लोकेऽपि च या विरूपा भवति, अलक्ष्मीरिति सोच्यते। 'विकटे' दुर्भिक्षे दुर्बलत्वात् विकटेव प्राणिनां गतिर्भवति; अलक्ष्मीरपि तद्रूपा। 'गिरिं गच्छ' मात्रावस्थानं कार्षीः। 'सदान्वे' "सदानोनुवे शब्दकारिके"; दुर्भिक्षे हि क्षुत्पीडिताः प्राणिनो निश्वसन्तः सदैव शब्दं कुर्वन्ति; अलक्ष्मीरपि तद्रूपा,—पिशाचादीनि नित्यं मद्यकं शब्दं कुर्वन्ति;—पिशाचाद्या हि शृणु नसुनायन्तश्चेति लोके वकारो भवन्ति, एतत् प्रसिद्धम्। 'शिरिम्बिठस्य' मेघस्य स्वभूतैः 'मत्वभिः' "उदकैः"; "मत्वम्"—इति ह्युदकनामसु पठि-

* "ककलती क्षत्तदती" ग।
† नास्त्येष पाठः क ख-ग-पुस्तकेषु।
‡ १भा० ४५५ष्ठ० १पं०।
§ ऋ० सं० ८, ८, १९, १।
॥ "अरायि शिरिम्बिठो भारद्वाजोऽलक्ष्मीघ्नम्।"—इत्यनुक्रमणी।

नाश्यते। "अपि वा शिरिम्बिठो भारद्वाजः", "तस्य मन्त्रैः नामभिः" *, तेन यानि दृष्टानि नामानि, सम्भवनसमर्थानि, स्तुतिसंयुक्तानि, तैर्वयं त्वां नाशयामः॥ एव मत्र शब्दार्थाविरोधात् "सदान्वे"—इत्यस्य "सदानोनुवे"—इत्येष विपरिणाम उपपद्यते॥

निगमप्रसक्तान्यधुनोच्यन्ते;—"राति, रासति"—इति दानकर्मसु पठितः †, तस्य प्रतिषेधपूर्वस्य 'अ-राधि'—इति भवति। "कणतिः, शब्दाणूभावे भाष्यते,—अनुकणतीति"; "भाषाणूभावात्" "कणः" श्यामाकादिः, तत्सामान्यात् "दर्शनाणूभावात्" "काणः"। अथ वा "काणः = विक्रान्तदर्शनः"—"इत्यौपमन्यवः"; विक्रान्तं हि तस्य दर्शनं भवति, एकीभूतत्वात्। "काणः = अविक्रान्तदर्शनः"—इति वा, मन्दचक्षुष्ट्वात्। "विकटः = विक्रान्तगतिः" विक्रतगतिरित्यर्थः ‡। अथ "वा" "कुटतेः" धातोः "स्यात्"; असौ हि "विकुटितो भवति", कुत्सीभूत इत्यर्थः। "विठम्"—इत्यपठित मन्तरिक्षनामसु, तत् पुनरेतत् "बीरिटेन व्याख्यातम्"; अत्र ह्युक्तम्,—"बीरिट मन्तरिक्षम्, भियो वा भासो वा तितिः" §। तस्मिन् "बिठे" यः "शीर्यते", सः "शिरिम्बिठो(१९०) मेघः"॥। "अपि वा शिरिम्बिठो भारद्वाजः", सोऽनेन सूक्तेन "अलक्ष्मीः निर्नाशयाञ्चकार"—इति निदान मन्वाख्या-

---

* "तस्य सर्वैः कर्मभिः"—इत्येव पाठोऽस्मदुपलब्धेषु रोथ्यहस्तेषु च सर्वमूलपुस्तकेषु। साधणेनाप्येव सेव पाठ उद्धृतः ऋग्भाष्ये।

† १भा० ३५५ पृ० ३अ० १० ख० (४, ५)।

‡ "विकटः = विक्रान्तगतिरित्यर्थः" क।

§ पृ० १२२ पृ० १९ पं०।

॥ १भा० ४५५ पृ० ४पं०।

तम्*। अद्यापि योऽलक्ष्म्याभिभूतो भवति, स आस्यदग्ने उदकेऽवतीर्य सूक्त मेतज्जपति, तस्यालक्ष्मीर्निर्नश्यति† ॥

"पराशरः(१२१)"—इति‡, अनवगत मनेकार्थञ्च। "पराग्रीर्णः" —इत्यवगमः। "प्र ये गृहाद०——०व्युच्छान्"§। वसिष्ठस्यार्षम्। ऐन्द्रे सूक्ते त्रिष्टुप्। प्रकर्षेण 'ये' 'अममदुः' हृष्टवन्तः सोमेन, हृष्टवन्तो वा यज्ञेषु। हे इन्द्र! 'त्वाया' त्वया सह 'पराशरः' च 'शतयातुः' बहूनां रक्षसां यातयिता; तेन हि रक्षोघ्नं सच माहूत मासीदिति भारते श्रूयते। 'वसिष्ठः' च इत्येवमादयः। किं तेषाम्? इति,—'न' 'ते भोजस्य' भोगिनः तव 'सख्यं' सखिभावं 'मृषन्त' मार्जयन्ते नाशयन्तीत्यर्थः। 'अधा' अथैवङ्गुणयुक्तेभ्यस्तेभ्यः 'सूरिभ्यः', 'सुदिना' शोभनानि दिनानि 'व्युच्छान्' विभान्तीत्यर्थः। तेषा मेव सुप्रभाता रात्रयः इत्यभिप्रायः। एव मत्र "ऋषिः = पराशरः" वसिष्ठसम्बन्धात्॥

"इन्द्रोऽपि पराशर उच्यते"; स हि "परा" परितः "शातयिता" "यातूनां" यातयितव्यानाम्, असुरादीना मिति। "इन्द्रो यातूना मभवत् पराशरः"—इति॥। व्याख्यातः शेषः¶॥

"क्रिविर्दती(१२२)"—इति**, अनवगतम्। "विकर्त्तनदन्ती"—

---

* "निदानं व्याख्यातम्" क।

† "जपहोमादिभिरिदं सूक्त मन्त्रीनाशकरम्"—इति सा० भा०।

‡ १भा० ४५५ पृ० १ पं०।

§ "प्र ये गृहादममदुस्त्वाया पंराशुरः शुतयातुर्वसिष्ठः। न ते भोजस्य सुख्यं मृषन्ताधा सूरिभ्यः सुदिना व्युच्छान्॥"—इति ऋ० सं० ५, २, १८, १।

॥ ऋ० सं० ५, ७, ९, १।

¶ १भा० ३५० पृ० १२ पं०।

** १भा० ४५५ पृ० १२ पं०।

इत्यवगतमः। "यूयं न उग्रा०——०बर्हणा"*। अगस्त्यस्यार्षम्। जगती। हे 'मरुतः!' 'उग्राः' उद्गूर्णाः, 'अरिष्टग्रामाः' अनुपहिंसित-सङ्घाताः यूयम्, अस्माकं 'सुचेतुना' शोभनेन प्रज्ञानेन, एतां 'सुमतिं' शोभनां मतिम् 'पिपर्त्तन' पूरयत पालयत वा। केन पुनः पूरयत? कुतो वा पूरयत? इति,—"यच्चा वो दिद्युत्"। 'यच्च' यस्मिन् मेघे 'दिद्युत्' आयुधं क्षिप्तं युष्माभिः, त मेव मेघं 'रदति' विलिखति, विदारयति वर्षार्थम्। किंलक्षणा पुनर्दिद्युत्? इति,—'क्रिविर्दती' विकर्त्तनसमर्थैः दन्तैः या रदति। कथम्पुनर्या रदति? "रिणाति पश्वः सुधितेव" इति। यथा 'पश्वः' पशोः अङ्गानि 'रिणाति' पृथक् करोति, 'सुधिता' स्वधित्या, 'बर्हणा' परिवृद्धया हिंसया, एव मस्मिन् मेघे दिद्युदः ता रदन्ति। ततः प्रभ्रष्टेनोदकेन सुमति मस्माकं पिपर्त्तन॥ एव मन्त्रार्थाविरोधादायुधं 'क्रिविर्दती'-शब्देनोच्यत इत्युपपद्यते॥

"करूळती(१२२)"—इति †, अनवगतम्। "कृत्तदती"—इत्यवगमः॥ २ (३०)॥

**वामंवामं त आदुरे देवो ददात्वर्यमा। वामं पूषा वामं भगो वामं देवः करूळती॥ वामं वननीयं भवत्यादुरिरादरणात्तत्कः करूलती भगः पुरस्तात्तस्यान्वादेश इत्येकं पूषेत्यपरं सेऽदन्तकोऽदन्तकः पूषेति च**

---

* "यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन। यच्चा वो दिद्युद्-दति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा॥"—इति ऋ० सं० १, ४, १, १।

† १भा० ४५५ पृ० १७ पं०।

ब्राह्मणम्। दनो विश इन्द्र मृध्रवाचः दानमनसो नो मनुष्यानिन्द्र मृदुवाचः कुरु। अवीरा मिव मा मयं शरारुरभि मन्यते। अबला मिव मा मयं बालोऽभिमन्यते संशिशरिषुरिदंयुरिदं कामयमानोऽथापि तद्दर्थे भाष्यते। वसूयुरिन्द्रो वसुमानित्यर्थः। अश्वयुर्गव्यूरथयुर्वसूयुरित्यपि* निगमो भवति ॥ ३ (३१)॥

"वामंवामं त०——०देवः करूऊती"†। वामदेवस्यार्षम्। ऐन्द्रे सूक्ते। अनुष्टुप्। राचिपर्याये प्रशास्तुः शस्त्रे विनियुक्ता। 'वामं वामम्'—इति भूयस्त्वार्थोऽभ्यासः; "अभ्यासे भूयांस मर्थं मन्यन्ते"—इति हि वक्ष्यति। यद्यत् सुष्ठु "वननीयम्" दृष्टम्, 'ते' तव धनम्, तत्तत् हे 'आदुरे' आदरवन्! यजमान! स हि यागं प्रति नित्यम् आदृतो भवतीत्यत एवं सम्बोध्यते—हे आदुरे!। 'वामं ददात्वर्यमा'। यदर्यम्णो 'वामं' "वननीयम्" दृष्टम्, आत्मनो धनम्, तत् असौ तुभ्यं 'ददातु'। किञ्च; 'वामं पूषा' ददातु। 'वामं भगः' ददातु। 'वामं देवः करूऊती' ददात्वित्येतदेवानुवर्त्तते। 'करूऊती'—इत्येतद् गुणपदत्वात् सन्दिह्यते, "तत्" एतत् विचार्यते—"कः करूलती?"—इति। "भगः" पुरस्तात्" 'करूलती'-शब्दस्य। "तस्य" एवायम् "अन्वादेशः" सन्निधानसामर्थ्यात्।—"इत्येकम्" आचार्यमतम्। "पूषा—इति अपरम्"।

---

* "रथयुर्वसुयुरित्यपि" ङ, च।

† ऋ० सं० २, ९, १२, ४।

किङ्कारणम्? "सः" हि पूषा "अदन्तकः"। आह,—कुत एतत्? इति उच्यते,—"अदन्तकः पूषा—इति च ब्राह्मणम्"। (प्राग्निच-भागब्राह्मणे हि श्रूयते,—"तत् पूष्णे पर्याजहुः, तत् पूषा प्राश्नात्, तस्य दतो निर्जघान; * तस्मादाजः,—अदन्तकः पूषा"—इति †)। यत् पुनरेतदुक्तं सन्निधिसामर्थ्याद् भगः करूलती स्यादिति। अकारण मेतत्;—"यस्य येनार्थसम्बन्धो दूरस्थ मपि तस्य तत्। अर्थतो ह्यसमर्थाना मानन्तर्यं मकारणम्"—इति न्यायविदः पठन्ति॥ तस्मात् पूषैव 'करूळती'—इत्युच्यते‡, शब्दसारूप्या-दर्थोपपत्तेश्चेति॥

"दनः(१२४)"—इति §, अनवगतम्। "दानमनसः"—इत्यवगमः। "दनो विश्वं इन्द्र ०——० कुत्साय रन्धीः"॥। अगस्त्यस्यार्षम्। हे 'इन्द्र!' 'दनः' "दानमनसः" एव एतान् अस्मभ्यं 'विशः' "मनुष्यान्", "कुरु" 'मृळयाचः' "मृळयाचः"। कस्मात् पुनरेव मुच्यते? इतः,—'यत्' यस्मात् त्वम् 'सप्त' सृप्राः, 'पुरः' मेघपुरः, 'शारदीः' शरत्कालोत्थाः, संवत्सरोत्था वा; संवत्सरोऽपि हि शरदित्यु-च्यते,—"स जीव शरदः शतम्"—इति ¶लिङ्गात्। 'शर्म' सुख मिच्छन्

---

* ब्राह्मणग्रन्थे तु दृश्यते "तथेवूनं तदास"—इत्यधिकं दृश्यते।

† ग्र० प० ब्रा० सु० ७२ पृ०। बम्बनीचिक्काल्लगैतपाठेषु क-पुस्तके नास्ति।

‡ 'करूलती'—शब्दः प्रातिशाख्यशासनात् संहितापाठे 'करूळती' भवति; इतौ यत्र यत्र प्रतीकत्वेन गृहीतः, तत्र तत्रापीव मेव, नान्यत्र।

§ १भा० ४५९ पृ० ५पं०।

‖ दनो विश्वं इन्द्र मृळयाचः सप्त यत्पुरः शर्म शारदीर्दर्तं। तृणोरपो वनव-र्षाय सूनृतं पुरुष्यवे रन्धीः॥"—इति ऋ० सं० २, ४, १९, २।

¶ वा० स० ब्रा० १, ५, १७।

जनानां 'दर्त्' दारयसि। किञ्च; 'अनवद्यार्णाः' अनवद्योदकाः, ताः पुरः 'ऋणोः' अपगमितवानसि इमं लोकं प्रति 'अपः'। स्वभाव एवैष तव लोकाननुगृह्णातु मित्यभिप्रायः। किञ्च; "यूने वृत्रम्"। यौतिः स्तुत्यर्थः*। स्तोत्रे यजमानाय 'पुरुकुत्साय' बह्वस्तुतिकर्त्रे 'वृत्रं' धनं† 'रन्धीः' सम्पादितवानसीत्यर्थः। यत एव सुपकारे प्रवृत्तो भवान् स्तोतृणां मन्येषाञ्च जनानाम्, तस्माद् ब्रूमोऽस्माकमपि एतान् मृदुवाचः कुरु मनुष्यानिति॥ एवं मत्र 'दनः'—इत्यस्मिन् पदे दकारे "दानमनसः"—इति एतान्यक्षराण्यध्याहृतानि भाष्यकारेण, 'न'-कारस्यास्मद्योगे विभज्योदाहृतः; तथार्थोपपत्तिदर्शनात्। "कुरु"—इत्येतच्चार्थपरिसमाप्त्यर्थं मध्याहृतम्। उत्तरास्त्रयः पादा हेतुभावेन; 'सन्न यत् पुरः'—इत्येतस्मात् सर्वनामसम्बन्धात्॥

"शरारुः (१२५)"—इति‡, अनवगतम्। "संशिशरिषुः"—इत्यवगमः। "अवीरा मिव॰——॰ दिन्द्र उत्तरः" §। पङ्क्तिः। ऐन्द्री। इन्द्रपत्नी एवं ब्रवीति,—'अवीरा मिव' "अवला मिव" अपरिग्रहा मिव। 'माम् अयं' 'शरारुः' "बालः" मूर्खः "संशिशरिषुः" संशर्त्तुं मिच्छन् शरीरं नित्यनुरित्यर्थः। 'अभि मन्यते' अभिभवेव्याप्येता मित्येव मन्यते; क्षुद्रया बुधा। नक्षुषो ऽन्यो वा कश्चित्;

---

* १भा० ३२१ ष्ठ० ३ष्ठ० १४ ख० (२७)।

† १भा० ३२२ ष्ठ० ३ष्ठ० १० ख० (२७)।

‡ १भा० ४५६ ष्ठ० ७पं०।

§ अवीरा मिव मे यं शरारुरभि मन्यते। उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः॥"—इति ऋ० सं० ८, ४, २, ४।

"नऽऋषेण हीन्द्राणमभिभवितु मारब्धामीत्"—इत्याख्यानं श्रूयते *। "उताहमस्मि वीरिणी" अथ च तावदस्मि वीरिण्येव। केन च पुनर्वीरेण वीरिणी? 'इन्द्रपत्नी' इन्द्रस्याहं पत्नी;—'मरुत्सखा' यः 'इन्द्रः' 'विश्वस्माद्' सर्वस्माद् यश्च 'उत्तरः' 'जगतः' उद्यततरः प्रभावेन, स मे वीरः; तदयं बालो न मन्यते, येन मामभिभवितु मिच्छतीत्यभिप्रायः॥ एव मत्र "शरारुः= संश्रिशरिषुः", शब्दसारूप्यादर्थोपपत्तेश्च॥

"इदंयुः(१२६)"—इति †, अनवगत मनेकार्थञ्च। इद मिति यत् किञ्चिदभिप्रेतं निर्दिश्यते, तद्यः कामयते, स इदंयुरित्युच्यते। 'युः'—इत्येष शब्दोऽप्रसिद्धः कामयतेऽर्थे, तेनानवगत मेतत् स्यात्। "नानाधियो वसूयवः"—इत्यनेन ‡ गतार्थं मन्यमानो भाष्यकारो निगमं न ब्रवीति। वार्त्तिककारेणाप्युक्तम्,—"निगमवशादुत्कर्ष्यं भवति पदम्"; तद्धितः, तथा धातुः, उपसर्गगुणः, निपाताश्च मन्त्रगताः सर्वथा लक्ष्याः॥

"अथापि" 'युः'—इत्येषः, "तदर्थं भाष्यते"। आह,—किं मुदाहरणम्? "वसूयुरिन्द्रः"—इति, वसुमानित्यर्थः। "इन्द्रो अग्राये ०——० प्रयन्ता" §। सत्यत्व मापन्नस्येन्द्रस्येय मार्षम्॥

---

* "इषाकपिनामेन्द्रस्य पुत्रः, स चेन्द्राणीन्द्रश्चैते त्रयः संहताः संविवादं कृतवन्तः"—इति तत्रैव सूक्तारम्भे सा० भा०।

† १भा० ४५६ट० १२पं०।

‡ पु० १५५ट० ८ पं०।

§ "इन्द्रो अग्राये सुधो निरेके पृक्षेषु सोमो दुर्यो न यूपः। अश्वयुर्गव्यूरथयुर्वसूयुरिन्द्र इदायः क्षयति प्रयन्ता॥"—इति ऋ० सं० १,४,११,४।

॥ "अङ्गिरा इन्द्रतुल्यं पुत्र मिच्छन्नयध्यायत्, सत्य इतीन्द्र एवास्य पुत्रोऽजायतेति॥"—इत्यनुक्रमणी।

ऐन्द्री। त्रिष्टुप्। दशरात्रस्य सप्तमेऽहनि मरुत्वतीये शस्यते। यः 'इन्द्रः' 'अश्रायि' शृणाति, हिनस्तीत्यर्थः। 'शूरः' शूरविक्रमः, अजिह्मयोधी; अथ वा शोधयिता योधानां प्रहारैः, सुधीर्वा स्यात्*। क्व पुनः शृणाति? 'निरेके' सङ्ग्रामे यत्रैकोऽन्यः सहायो नास्ति, तत्र एक एव शत्रून् हन्ति। 'पञ्चेषु' प्रार्जितायुधेष्वपि पदेषु सङ्ग्रामेषु। किञ्च; 'सोमो न' सोम इव। यः प्रधानः चिकित् सोमः, पञ्चदश इति हि व्यपदेशः; सोमे प्रभवति सोमेन तस्य प्राधान्यात्†। किञ्च; यः इन्द्रः 'दुर्यो न' दुर्य 'इव यूपः' यः प्रधानः। तस्य किम्? इति,— स इन्द्रः 'अश्वयुः' अश्वैस्तद्वान्। 'गव्युः' गोभिः तद्वान्। 'वसुयुः' अन्नैर्वसुभिः तद्वान्। एवङ्गुणविशिष्टो 'यः इन्द्रः', सः 'रायेषु' धनेषु जनानां दातव्येषु 'चयति' दृष्टे। 'प्रयन्ता' प्रकर्षेण दातेत्यर्थः‡॥ एव मत्र 'वसुयुः'—इत्ययं यु-शब्दः "तद्वदर्थे"। किङ्कारणम्? न हीन्द्रो वसु कामयते, सुपूर्णत्वात्; परिशेषात् अयं "तद्वदर्थे भाष्यते"—इत्युपपद्यते॥ ३ (३१)॥

किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम्। आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन्रन्धया नः। किं ते कुर्वन्ति कीकटेषु गावः कीक-

---

* मूले तु "सुधः"—इति पाठः। "धीरितिकर्मनाम शोभना धीर्येषाम्"—इति च सायणः।

† नाष्ट्राद्वितीयतृतीयाध्यायौ द्रष्टव्यौ।

‡ "रायः" इति मूलपाठः। "रायः प्रयन्ता, धनस्य दाता; 'इन्द्र इत्' इन्द्र एव यजमानानाम्"—इत्याह च सायणः।

टा नाम देशोऽनार्यनिवासः कीकटाः किं कृताः किं क्रियाभिरिति प्रेप्सा वा नैव* चाशिरं दुहे न तपन्ति घर्मं हर्म्य माहर नः प्रमगन्दस्य धनानि मगन्दः कुसीदी माङ्गदो मा मागमिष्यतीति† च ददाति तदपत्यं प्रमगन्दोऽत्यन्तकुसीदिकुलीनः‡ प्रमदको वा योऽय मेवास्ति लोको न पर इति प्रेप्सुः पण्डको वा पण्डकः पण्डगः§ प्रार्हको वा प्रार्हयत्याण्डावाण्डावाणी इव व्रीडयति॥ तस्तम्भ॥ नैचाशाखं नीचाशाखो नीचैःशाखः शाखाः शक्नोतेराणिररणात्तन्नो मघवन्नभ्ययेति रध्यतिर्वशगमने बुन्द इषुर्भवति (वुन्दो वा**) भिन्दो वा भयदो वा भासमानो द्रवतीति वा॥ ४ (३२)॥

"कीकटेषु(१२७)"—इति ††, अनवगतम्। "किङ्कृताः"—इति शब्दसमाधिः, "किं क्रियाभिः—इति" "वा"। "किं ते कृण्वन्ति०——० अभ्यया नः" ‡‡। विश्वामित्रस्यार्षम्। ऐन्द्री। त्रिष्टुप्।

---

* "किं क्रियाभिरभिप्रेप्सा नैव" क, ख, ग।
† "माङ्गदो मां गमिष्यन्तीति" क, ख, ग।
‡ "प्रमगन्दोऽत्यन्तः कुसीदः कुलीनः" क, ख, म।
§ "पन्नकः" क, ख। "पन्नगः" म।
॥ "व्रीलयति" क, ख, म।
¶ "तस्त्रं" क, ख, ग। दक्षिणसम्मतश्च।
** नास्त्येष पाठः क-ख-ग-पुस्तकेषु।
†† १भा० ४५७५० ३प०।
‡‡ ऋ० सं० १, ३, २१, ४।

इन्द्र! याः 'कीकटेषु' अनार्यदेशनिवासिषु मनुष्येषु 'गावः', ताः 'ते' तव 'किम्' कमुपकारं कुर्वन्ति? न कञ्चिदपीत्यभिप्रायः। "नाग्निरं दुह्रे, न तपन्ति घर्मम्" नाग्नाग्निरार्थं दुह्यन्ते, नापि घर्मे तप्यमानेऽङ्गभावं गच्छन्ति; नाप्यग्निहोत्रादिषु कर्मसु अन्यास्वपि क्रियास्वित्यभिप्रायः। यत एव मतो ब्रूमः,—"आ हर नः" ताः गाः; वयं तव, ताभिराग्निरादिविनियोगेनोपकारं करिष्याम इत्यभिप्रायः। किञ्च; यदप्येतत् 'प्रमगन्दस्य' वृद्धिजीविनो धनम्, एतच्च तथा अस्मभ्यमाहर; तदपि न क्रियासु "तत्स्थं" विनियुज्यते, वयं तद् विनियोक्ष्याम इत्यभिप्रायः। "प्रमदको वा" नित्यप्रमुदितो विषयपरः प्रमगन्दः स्यात्। "षण्ढको वा" नपुंसकः प्रमगन्दः स्यात्। तयोर्वा धनानि क्रियासु न विनियुज्यन्ते, शब्दसारूप्यच्च प्रमगन्दशब्दे उभयोरस्ति; तस्मात् तावप्युपदिशते। "नैचाशाखं मघवन्नन्धया नः"। यदेतेषा मन्यतमस्य नीचशाखाप्रसूतस्य नीचवंशप्रसूतस्य दीनतुल्यस्य धनम्, तत्*। हे 'मघवन्!' शीघ्रं 'रन्धय' संसाध अस्मदर्थं कुर्वित्यर्थः॥

एव मत्र 'कीकटाः' "किं कृताः" किं ते कृताः? इत्येव मभिव्याहार मर्हन्ति, न तैः कश्चिदर्थोऽस्ति; न ते देवपितृमनुष्याणा मुपकारं कुर्वन्तीत्यर्थः। अथ "वा" "किं क्रियाभिः?"—"इति" एवं "प्रेप्साः" ते नास्तिका एवमभिप्राया इत्यर्थः।

---

* नीचासु शूद्रयोनिषूत्पादिता शाखा पुत्रपौत्रादिपरम्परा येन स नीचाशाखः। * * *। तत्सम्बन्धि धनं नैचाशाखम्॥"—इति सायणभाष्ये।

एतस्माच्छब्दसारूप्यादर्थोपपत्तेश्च "कीकटाः = अनार्यदेशनिवासिनः" —इत्युपपद्यते * ॥

"मगन्दः = कुसीदी"—इत्युच्यते; स हि "माम्"-इयात् अद्यतनोऽर्थः, अयञ्च "आगमिष्यति"—इत्येव मनुचिन्त्य, परेभ्यो धनानि "ददाति"। "तदपत्यं प्रमगन्दः, अत्यन्तकुसीदिकुलीनः" तद्धितार्थे प्रः, प्रमगन्दः; 'प्रस्कण्वस्य'—इति † यथा। "प्रमदकः" प्रमादशीलः;—"अय मेवैको लोकोऽस्ति, न परः"—"इति" एवं "प्रेप्सुः" नास्तिकः। "पण्डकः" क्लीबा प्रकृतिः; स हि "पण्डगः" पण्डं गच्छति, स्त्रीरूपत्वात्। "प्रार्दकः"—इति "वा" स्यात्; "प्र" प्रकर्षेण ह्यसौ "अर्दयति" अज्ञानैः सह स्त्रीत्वेन गच्छति "आण्डौ"। कस्मात् तौ "आण्डौ"? "आणी इव क्रीडयति"; तौ ह्यसौ पण्डको मुखे पुनर्मैथुने कर्मणि वर्त्तमानः "आणी इव क्रीड़यति" सम्भ्रमतीत्यर्थः ‡ ॥

"बुन्दः(१२८)"—इति §, अनवगतम्। "इषुर्भवति"—इत्यभिधेयवचनम्। "भिन्दो वा भयदो वा भासमानो द्रवतीति वा"—इति शब्दसमाधयः ॥ ४ (३२) ॥

---

* कीकटो मगधः। तथाहि—"कीकटेषु गया पुण्या, पुण्यं राजगृहं वनम्। यवनस्याश्रमः पुण्यो, पुण्या नदी पुनःपुना ॥"—इति शब्दकल्पद्रुमधृतं वायुपुराणवचनम्।

† प्रस्कण्वः = काण्वः ऋ० सं० १. ४४—५०; ८. ४९; ९. ९५।

‡ "शाखाः शक्नोतेः"—इत्यादि भाष्य मन्याख्यात मेव स्थितम्।

§ १मा० ४५७ पृ० ९पं०।

तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः॥
उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूधा॥
तुविक्षं बहुविक्षेपं* महाविक्षेपं वा ते सुकृतं सूमयं सुसुखं धनुः साधयिता ते बुन्दो हिरण्यय† उभौ ते बाहू (रण्यौ‡) रमणीयौ साङ्ग्राम्यौ वर्दूपे§ अर्हनपातिनौ गमनपातिनौ (शब्दपातिनौ दूरपातिनौ॥) वा मर्म्मण्यर्हनवेधिनौ गमनवेधिनौ (शब्दवेधिनौ दूरवेधिनौ¶)वा॥५ (३३)॥

"तुविक्षं ते ०——० दृदूधा"—इति**। "निरविध्य०——०खातम्"—इति"†† च। कुरुस्तुतेरार्ष मेतदृग्द्वयम्। ऐन्द्री। सतोबृहती पूर्वा; गायत्र्युत्तरा। हे इन्द्र! 'तुविक्षं' "बहुविक्षेपम्" बहूनां विक्षेपाणां——,'सुकृतं' शोभनानि हि येन कर्माणि क्रियन्ते तम्; अथ वा शोभनं कृतम्, 'सूमयं' च सुखकरं सुहृदाम्। किम्पुनस्तत्? 'धनुः'। किञ्च; "साधुर्बन्दो हिरण्ययः" 'साधयिता' स्तोमानां शत्रुसङ्घातानां वा 'बुन्दः' इषुः "हिरण्ययः" हिरण्यविकृत इत्यर्थः। किञ्च; 'उभा ते बाहू' उभावपि ते बाहू, 'रण्यौ'

* "बहुविक्षं" क, ख, ग।
† "हिरण्मय" क, ख, ग।
‡ नास्त्येतत् क-ख-ग-पुस्तकेषु।
§ "साङ्ग्राम्याद्वदूपे" क, ख, ग।
||,¶ नेमौ पाठौ दृश्येते क-ख-ग-पुस्तकेषु।
** ऋ० सं० १, ५, १०, १।
†† ऋ० सं० १, ५, १०, २।

"रमणीयौ" स्रायतौ पीनौ च, अथ वा "साङ्ग्यौ" रणयोग्यौ, 'सुसंस्कृतौ' समलङ्कृतौ, 'चदूपे' "अर्दनपातिनौ" अर्दनेन हि गमनेन क्षेपणेन तौ शत्रून् पातयतः। 'चदूदृधा' चदिति मर्मोच्यते, तत्र यौ विध्येते तौ चदूदृधौ मर्मवेधिनावित्यर्थः। भाष्य मत्र न सम्यगिव लक्ष्यते; तस्य सम्यक् पाठोऽन्वेष्यः, ततो योज्यम्*। एव मत्र धनुःसम्बन्धाद् "बुन्दः = इषुः"॥ ५ (३३)॥

**निरविध्यद्गिरिभ्य आ धारयत्पक्व मोदनम्। इन्द्रो बुन्दं स्वाततम्॥ निरविध्यद्गिरिभ्य आ धारयत्पक्व मोदन मुदकदानं मेघम्। इन्द्रो बुन्दं स्वाततं वृन्दं बुन्देन व्याख्यातं वृन्दारकञ्च॥ ६ (३४)॥**

"निरविध्य०——० स्वाततम्"†। 'पक्वम्' बहूनां मेघानां मध्ये यः पक्वो मेघः, उदकदाने समर्थः, तम्, 'इन्द्रः' 'निरविध्यत्'। विद्वा च तावत् 'आ धारयत्' यावन्निरुदकः संवर्त्त इति। कथं निरविध्यत्? इति,—'बुन्दं' 'स्वाततम्' स्वाकृष्टं माकर्णीकृत्वा। एव-मत्राकर्षणसम्बन्धात् "इषुः = बुन्दः"—इत्युपपद्यते॥

"वृन्दम्(१२९)"—इति‡, एतत् पदम् "बुन्देन" एव "व्याख्यातम्"; अस्यापि हि ता एव व्युत्पत्तयो या बुन्दशब्दे॥

---

* "एषा निरुक्ता एक मपि पदं विहाय यास्केन व्याख्याता। तदेव लिख्यते॥"—इति सा० भा०।

† ऋ० सं० ६, ५, ३०, १।

‡ १भा० ४५७ पृ० ८पं०।

"वृन्दारकश्च" 'बृन्देन' एव "व्याख्यातः"। इत्ती वृन्दारकः प्रकरणवशाद्वान्यः कश्चित् * ॥ ६ (३४) ॥

अयं यो होता किरु स यमस्य कमप्यूहे यत्समञ्जन्ति देवाः। अहरहर्जायते मासिमासि स्यथा देवा दधिरे हव्यवाहम्॥ अयं यो होता कर्त्ता स यमस्य कमप्यन्न † मभिवहति यत्समञ्जन्ति देवा अहरहर्जायते मासे-मासेऽर्द्धमासेऽर्द्धमासे वाथ देवा निदधिरे हव्यवाह मुल्ब मूर्णोतेर्वृणोतेर्वा। महत्तदुल्बं स्थविरं तदासी-दित्यपि निगमो भवत्यूबीस मपगतभास मपहृतभास मन्तर्हितभासं ‡ गतभासं वा ॥ ७ (३५) ॥

"किः(१२०)"—इति §, अनवगतम्। "कर्त्ता"—इत्यवगमः। "अयं यो होता०——० हव्यवाहम्"॥। ऋचोकस्याग्नेर्विश्वेषां देवानां संवादसूक्तम्¶, तच्चेयं विश्वेदेवाना मार्षम्। आग्नेयौ।

---

* अम० को० १, १, ९; २, १, ११२; २, २, १९। "वृन्दारकः सुरे पुंसि मनोज्ञश्रेष्ठयोस्त्रिषु"—इति मेदिनी।

† "क मप्यूहेऽन्न" ङ, च।

‡ "मनन्तर्हितभासं" क, ख, ग।

§ १भा० ४५७ पृ० १९ पं०।

॥ ऋ० सं० ८, १, १९, २।

¶ ऋचाच्च सायणः,—"सूक्तत्रयोक्तार्थं नैरुक्तीयब्राह्मणम्। 'अग्नेस्त्रयो ज्यायांसो भ्रातर आसन्, ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थं वावस्य आत्मा मा रिष्यतीति स निलायत सोऽपः प्राविशत् तं देवाः प्रैषमैच्छन्नित्यादि (तै० सं० १. ६. ६.)।

'यः अयम्' अग्निः, 'होता' आह्वाता देवानां पृथिवीस्थानः। किं तस्य? इति—'किः उ सः' 'यमस्य' भगवत आदित्यस्य; अग्नेर्हि सकाशात् प्रातरादित्यः प्रसूयते। तदुक्तम्,—"एष प्रातः प्रसुवति, तस्मात् प्रातर्वोपतिष्ठन्त इति *। "यस्मिन् वृक्षे सुपलाशे (ऋ० सं० ८,७,२३,१.)"—इत्यस्या ऋचि यमत्व मादित्यस्य वक्ष्यति †। किञ्च; 'कम् अपि ऊहे' "कं मध्यन्नम् अभिवहति"। "कम्"—इत्यन्ननाम ‡, अन्न मपि चाय मेवाभिवहति। कतमत्? 'यत्' एतत् हविर्लक्षणं 'समञ्जन्ति' "समञ्जन्ति" 'देवाः'। अञ्जतिरत्र प्रकरणवशाद् भोजनार्थः। किञ्च; अय मेव 'अहरहः' अहन्यहनि अग्निहोत्रिणां गृहेषु उद्बोध्यमानो महान् 'जायते'। 'मासिमासि' जायते पित्र्यज्ञेषु, "अर्द्धमासे ऽर्द्धमासे" च दर्शपूर्णमासेषु च। यस्मादेवङ्गुणविशिष्टो ऽय मग्निः, 'अथ' एतस्मात् कारणात् एत मग्निं सर्वे 'देवाः' 'दधिरे' "निदधिरे" 'हव्यवाहम्' हविषां वोढार मित्यर्थः। एव मत्र शब्दसारूप्याद् 'यमस्य'-इत्येतस्माच्च षष्ठीयोगात् 'किः'-इत्यस्य "कर्त्ता"-इत्येष विपरिणाम उपपद्यते॥

"उल्बम्(१२१)"—इति §, अनगतम्। 'जरायु'—इत्यवगमः। "ऊर्णोतेः"—इति धातुनिर्देशः। 'ऊर्णम्'—इति स्यात्। "वृणोतेर्वा" स्यात्; तेन हि गर्भ आवृतो भवति। "मृहन्तदुल्बं ०——० स्तृन्वो

---

* "अग्निर्वैश्वानरः प्राच्यावयत्, तस्य यद्रेतसः प्रथम मुददीप्यत, तदसावादित्योऽभवत्"—इति च ऐ० ब्रा० ३, ३, १०।

† प० दै० का० १२, ३, ८।

‡ १भा० ४७९ पृ० (१४) द्रष्टव्यम्।

§ १भा० ४५८ पृ० ३पं०।

देव एकः" *। 'महत्' परिमाणतः, 'तत्' 'उल्बं' जरायु 'आसीत्', 'स्थविरं' चिरन्तनञ्च तदासीत्। येन त्वम् 'आवेष्टितः' आवृतः, हे भगवन्! अग्ने! 'प्रविवेशिथ' प्रविष्टवानसि 'पूर्वम्' आदिसर्गे 'अपः'। किञ्च; 'विश्वाः' सर्वा तन्वः तव, हे 'जातवेदः!' 'बहुधा' अनेकेषु अभिधानेषु वर्त्तमानाः अपश्यत् 'एकः देवः' प्रजापतिः, कोऽन्यस्ततः तव तनूना मन्तं वेत्तु मर्हतीत्यभिप्रायः॥ एव मत्र 'जरायु' 'उल्ब'-शब्देनोच्यते, आवेष्टनसम्बन्धादित्युपपद्यते॥

"ऋबीसम्(१२९)"—इति †, अनवगतम्। "अपगतभासम्"—इत्येवमाद्याः शब्दसमाधयः। 'पृथिवी'—अभिधेया; सा हि कृष्ण-च्छाया ‡। तस्मादपगतभास मित्येवमाद्याः शब्दसमाधय उपपद्यन्ते॥ ७ (३५)॥

हिमेनाग्निं घंस मवारयेथां पितुमती मूर्ज्ज मस्मा अधत्तम्। ऋबीसे अचिं मश्विनावनीत मुन्निन्यथुः सर्वगणं स्वस्ति॥ हिमेनोदकेन ग्रीष्मान्तेऽग्निं घंस महर-वारयेथा मन्नवतीं चास्मा § ऊर्ज्जं मधत्त मग्नये योऽय मृबीसे पृथिव्या मग्निरन्तरौषधिवनस्पतिष्वप्सु त मुन्नि-न्यथुः सर्वगणं सर्वनामानं गणो गणनाद्गुणश्च यद्दृष्ट

---

* मुल्बमुल्बं स्थविरं तदासीद्येनाविष्टितः प्रविवेशिथापः। विश्वा अपश्यद्बहुधा ते अग्ने जातवेदस्तन्वो देव एकः॥"—इति ऋ० सं० ८, १, १०, १।

† १भा० ४५८ पृ० ७पं०।

‡ "क्षरच्छाया" क। 'ऋबीसे = अपगतप्रकाशे, पीडायन्त्रगर्ते"—सा०भा०।

§ "लोक्षा" ग।

ओषधय उद्यन्ति प्राणिनश्च पृथिव्यां तदश्विनौ रूपं तेनैतौ* स्तौति स्तौति ॥ ८ (३६) ॥

॥ इति षष्ठाध्यायस्य षष्ठः पादः ॥ ६. ६.

"हिमेनाग्निं ०——० सर्वगणं स्वस्ति"†। कक्षीवत आर्षम्। त्रिष्टुप्। आश्विनी। प्रातरनुवाकाश्विनयोः शस्यते। हे अश्विनौ! 'हिमेन' "उदकेन" अतिप्रवृद्धं "ग्रीष्मान्ते", 'अग्निम्', 'घर्मम्' "अहः"-लक्षणम्, द्यूमांल्लोकान् दिधक्षन्त मिव, युवाम् 'अवारयेथाम्'। वारयित्वा च 'पितुमतीम्' "अन्नवतीम्" पुरोडाशाद्यन्नसहिताम्, 'ऊर्जम्' आज्यलक्षणाम्, युवाम् 'अधत्तम्' 'अग्नौ' अग्नये हविर्भाजे; वर्षानुग्रहपूर्विकया ओषधिनिष्पत्त्या। किञ्च; "क्षुवीसे अग्निं मश्विनावनीतम्" युवा मेव हे 'अश्विनौ!' "योऽयम्" 'क्षुवीसे' "पृथिव्याम्" अग्निरनुप्रविष्टोऽन्तः, येनेमानि पृथिवीगर्भेषु उपनिहितानि तिन्दुकादीनि पच्यन्ते, य मवेत्योक्तम्,—"क्षुवीसपक्वं नाश्नीयात्" इति। 'तम् उत् निन्यथुः' युवाम्, ओषध्याद्यन्तर्वर्त्तिन मोषध्यादिरूपेणैव। 'सर्वगणं' "सर्वनामानम्" अग्निरेव ह्यय मनेनौषध्यादिरूपेणावस्थितः, सर्वैर्नामभिः अभिधीयते, अग्नेः सर्वात्पत्तिदर्शनात्‡। कमुनरर्थं पुरोधाय उन्निन्यथुः? इति,—

* "तेनैनौ" क, ख, ग।

† ऋ० सं० १, ८, ९, २।

‡ "अग्निर्वै देवयोनिः, सोऽग्नेर्देवयोन्या आऽऋतिभ्यः सम्भूय चिरञ्जरीर उर्द्धः स्वर्गंलोक मेष्यतीति"—इति, "अग्निः सर्वा देवताः"—इति च ऐ० ब्रा० २, १, १।

'स्वस्ति' स्वस्त्ययनायास्य जगतः; ओषध्याद्यभावेन हि सर्व मेव जगद्भङ्गयत ॥ एव मत्र 'क्षत्रौष'-शब्देन "पृथिवी"—इत्युच्यते ॥

"गणः, गणनात्"; स हि गण्यते वस्तुसंयोगात्। "गुणश्च" गुणोऽपि गणनादेव; अभावेपि हि गण्यत एव,—द्विगुणः, त्रिगुणः इति। निगमप्रसक्त मेतदुक्तम् ॥

अधुनास्य मन्त्रस्य भाव्यकारः समस्तार्थ माह,—"यद् वृष्टं ओषधयः उद्यन्ति प्राणिनश्च पृथिव्याम् तदश्विनो रूपम्" सोऽश्विनोरधिकारः, तदश्विनोर्माहाभाग्यम्। "तेन" माहाभाग्यलक्षणेन रूपेण "एतौ" अश्विनौ मन्त्रदृक् "स्तौति" * ॥ ८ (३६) ॥

इति निरुक्तवृत्तौ एकादशाध्यायस्य (षष्ठाध्यायस्य †)

षष्ठः पादः ॥ ६,६ ॥

इति श्रीजम्बूमार्गाश्रमवासिनः आचार्य-भगवद्दुर्गस्य कृतौ

ऋग्वेदार्थायां निरुक्तवृत्तौ

एकादशोऽध्यायः (षष्ठोऽध्यायः ‡) समाप्तः ॥ ६ ॥

---

* "ऋचेद माख्यानम्।—ऋचि ऋषि मसुराः श्रुतद्वारे पौड़ायन्नगरे प्रवेश्य तृषाग्निनाबाधिषत। तदाभौ तेन ऋषिणा स्तुतावश्विनावग्नि मुदकेनोपशमय्य तस्मात् पीडायन्नगराद्विकलेन्द्रियवर्गं सन्तं निरगमयता मिति॥"—इति त्रयैव सा० भा०।

†, ‡ १भा० १४९ए० "ग" द्रष्टव्यम्।

(१ २ ३ ४ ५ ६
(त्वमग्नेऽलातृणउद्दृहाऽऽजासउपलप्रक्षिणीकारुरह-
७ ८ ९ १० ११ १२ १३
मस्मेतेश्रायन्तइवाश्रवंहिसोमानमिन्द्रासोमाक्रणुष्वतां-
१४ १५ १६ १७ १८ १९
अध्वरेऽस्तिहिवोऽस्तूर्तेप्रवोच्छास्तप्रस्तुञ्जेतुञ्जेयोअस्मा-
२० २१ २२ २३ २४ २५ २६
अस्माइदुतन्नस्तुरोपंहिनोतामचोमात्वानपापामोयवं-
२७ २८ २९ ३० ३१ ३२ ३३
वृकेणजीवान्नोबतोधेनुंनोऽरायिकाणेवामंवामंकिन्तेतु-
३४ ३५ ३६
विक्षन्तेनिराविध्यदयंयोहिमेनाम्निं षट्चिंशत्॥ *)

॥ इति निरुक्ते पूर्वषट्के षष्ठोऽध्यायः ॥ ६ ॥

(यावन्तो मन्त्राः सर्वशाखासु, तेषु यानि, गुणपदानि लक्षणोद्देशतः, तानि सर्वाण्येव व्याख्यातानि॥ †)

(नैगमं काण्डं समाप्तम्)

॥ इति नैरुक्तपूर्वार्द्धः समाप्तः ‡ ॥

---

* ऋभा० १४६ पृ० "**" द्रष्टव्यम्।

† एषोक्तिस्तु वृत्तिकृतोऽस्य दुर्गाचार्यस्यैव, पर मध्यायसमाप्तिसूचक मितीत्यादिवाक्यादनन्तर मस्ति क-ग-घ-पुस्तकेषु; ख-पुस्तके तु दैवत-व्याख्यारम्भोपक्रमे; स एव सम्यगित्यस्माकम्।

‡ क-ख-पुस्तकयोरेवैष पाठो दृश्यते, अन्यत्र (ग-घ-ङ-च-पुस्तकेषु) न किमपि।

(इति पूर्वषट्कम्)

# ( अथ उत्तरषट्कम् )

## ॥ अथ सप्तमाध्यायः * ॥

तत्र,

### ॥ प्रथमः पादः ॥

॥ ॐ३म् ॥ अथातो दैवतं तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवत मित्याचक्षते सैषा देवतोपपरीक्षा यत्काम ऋषिर्यस्यां देवताया मार्थपत्य† मिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्च, तच्च परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य ॥ १ ॥

---

* ख-पुस्तके तु अतिस्तुत्यध्याय एवाच सप्तमत्वेन व्यवहृतः, अध्यापयन्ति च तथैवानेकाचार्याः। परं तन्न समीचीनम्; निघण्टौ तन्मूलदर्शनाभावेन तस्य परिशिष्टरूपत्वात्, तदुपक्रमे एव "व्याख्यातं दैवतम्"—इति दर्शनाच्च दैवतकाण्डात्मकोत्तरषट्कात्पर मेव तस्य निवेशो न्याय्यः।

† "मर्थपत्य" च, घ-नाम-टिप्पुस्तके च।

॥ ॐनमः * ॥ (समाप्तं चैकपदिकं प्रकरणं मन्त्रानुदैवतं तद्भवति, यस्याथ मादिः "अथातो दैवतम्" इति। (यावन्तो मन्त्राः सर्वशाखासु, तेषु यानि गुणपदानि लक्षणोद्देशतः, तानि सर्वाण्येव व्याख्यातानि†) द्वयोः प्रकरणयोः—नैघण्टुकैकपदयोः‡; संविज्ञातपदानि तु प्रधानस्तुतिभाग्देवताविषयाणि अग्न्यादीनि, सर्वमन्त्रेष्ववशिष्यन्ते; तानि च पुनरमूनि समाम्नातान्यस्मिञ्छास्त्रे अग्न्यादीनि देवपत्न्यन्तानि§। अतस्तदाचिख्यासयेद मारभ्यते।— ॥) "अथातोदैवतम्"—इति। 'अथ'-शब्दोऽधिकारार्थः। 'अतः'-शब्दः क्रमे, हेतौ वा। प्रकरणद्वयादनन्तर मिद मवश्यं समाम्नायानुक्रमप्राप्तं व्याख्यातव्य मित्येवं क्रमे; दैवत मन्तरेण न शक्यो देवतापदार्थः सम्यगवबोद्धुम्, देवतापरिज्ञानानुबद्धस्त्वखिलः पुरुषार्थ इत्यतः; दैवतं प्रकरणं व्याख्यास्याम इति वाक्यशेषः॥

एवं हेतौ आह;—किं सतत्वं पुनस्तद्दैवतं प्रकरणम्? इति, उच्यते,—"तद्यानि ०——० मित्याचक्षते"। 'यानि नामानि प्राधान्यस्तुतीनाम्' अग्न्यादीनां देवपत्न्यन्तानां 'देवतानां', 'तद्' दैवतं प्रकरणम् 'इति' एव माचार्याः 'आचक्षते'; निरूढा ह्येव मेतस्मिन् प्रकरणे सञ्ज्ञेत्यभिप्रायः॥

---

* ख-पुस्तकपाठ एषः; अन्यचान्यच तु लेखकादिभेदेन मङ्गलाचरणभेदः, स च सम्भवत्येव; इत्तिकृतो मङ्गलाचरणन्वादावेवैकच (१भा० १पृ०)।

† क-ग-घ-पुस्तकेष्वितः पुरस्तादेवैष पाठः (२८२ पृ० ८पं०)।

‡ १भा० १४५—१४९ पृष्ठयोर्द्रष्टव्यौ।

§ १भा० ४५९ पृष्ठात: ४९० पृष्ठान्तानि।

॥ नास्त्येवैषोपक्रमग्रन्थः क-ग-घ-पुस्तकेषु।

"सेषा देवतोपपरीक्षा"। सा, या पुरस्तात् प्रकरणमात्रयोपन्यासे नैघण्टुक मिदं देवतानां मप्राधान्येनेद मिति—"तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद् दैवत मित्याचक्षते, तदुपरिष्टाद् व्याख्यास्यामः"—इति प्रतिज्ञाता *, सा, इदानीं प्रकारणद्वये † निर्णिक्ते यथाप्रकरणोपन्यासेनैवावसरप्राप्ता, सामान्यविशेषतः स्वलक्षण-सत्वोपपत्तिभिः एकैकस्या देवताया उपगम्योपगम्य परीक्षा; वर्तिष्यत इति वाक्यशेषः। इद मिहोक्तम्,—प्राधान्यस्तुतिभाञ्जि यानि देवताभिधानानि, तत्समुदायो दैवतं प्रकरणम् ‡, तद् व्याख्यास्यामः इति §)। तस्य पुनरिय मेव समामतो व्याख्या यद्दैवतोपपरीक्षणम्, तदभिधानव्युत्पत्ति-तत्स्तुत्युदाहरण-तन्निर्वचनानि ॥॥

तत्पुनरेतत् सर्व मपि मन्त्राधिदैवतलक्षण मनुक्त्वा न शक्यं व्याख्यातुम् ¶, मन्त्राधीनत्वात् सर्वस्यास्य; अतो मन्त्रदेवतालक्षण-विदिधारयिषया ब्रवीति;—"यत्काम०——० भवति"। यदर्थवस्तु कामयमानः, 'ऋषिः' 'यस्यां देवतायाम्' अभिष्टुतायाम्, 'आर्धपत्यम्' अर्थपतिभाव मात्मनः 'इच्छन्' अमुष्याः देवतायाः प्रसादेनाह

---

* २भा० १४२ पृ० ७पं० ( १अ० ६पा० ६ख० )।

† तच्च प्रकरणद्वयम्, पूर्वषट्कान्तर्गतं, पूर्वभागान्तर्गतं पूर्वोद्धान्तर्गतं, वा नैघण्टुकं नैगमञ्च नाम २भा० ७पृ०—२भा० २८३ पृ० द्रष्टव्यम्।

‡ निघण्टुपञ्चमाध्यायात्मकम्, ऋचैव ऋग्न्यादीनि देवपत्न्यन्तानि देवताभिधानानि समाम्नातानि १भा० ४५९—४९७ पृ० )।

§ नास्त्येष पाठः घ-पुस्तके।

‖ तच्चेदं देवतोपपरीक्षणं छन्दोमपादान्तम्, ततश्च "अथातोऽनुक्रमिष्यामः"—इत्यारभ्य विशेषतो व्याख्यानम्।

¶ द्र०—२भा० (११९ पृ०) १अ० ६पा० १ख०, (१८८ पृ०) २अ० २पा० ४ख०।

मनुष्यार्थस्य पतिर्भविष्यामीत्येतां बुद्धिं पुरोधाय 'स्तुतिं प्रयुङ्क्ते', 'तद्दैवतः' एव 'स मन्त्रो भवति' *। एतत् मन्त्रे देवतालक्षणम्। एतेन लक्षणेन सर्वमन्त्रेषु देवतोपलक्ष्या। अथ वा देवताया मस्यार्थस्येयं देवता दातुं समर्थेति जानानः स्तुतिं प्रयुङ्क्ते येन मन्त्रेण, सा प्राधान्यस्तुतिभाग्देवता। सा पुनरियं स्तुतिः, चतुर्विधा;—नाम्ना, बन्धुभिः, कर्मणा, रूपेणेति; "स्तुतिर्नामरूप-कर्म-बन्धुभिः"—इत्युक्तम्॥

ऋच एव हि प्रायेणातितरा मपि हितार्थाः, न तथा यजूंषि; तासु हि विज्ञातासु यजूंष्यपि विज्ञातान्येव भवन्ति †। तस्मादृच एव पुरस्कृत्य ब्रवीति;—"तास्त्रिविधा ऋचः"—इति। याः काश्च सर्ववेदेषु 'ऋचः', 'ताः' सर्वा अपि 'त्रिविधाः' एव भवन्ति॥

तद्यथा;—"परोक्षकृताः, प्रत्यक्षकृताः, आध्यात्मिक्यश्च"—इति॥

तत् त्रैविध्यं सामान्यत उद्दिश्य अधुना प्रत्येकं लक्षणतो ब्रवीति, उदाहरणैश्च दर्शयति। 'तत्र' तस्मिन् त्रैविधे परोक्षकृताना मृचा मेतल्लक्षणं भवति;—"परोक्षकृताः ०——० ख्यातस्य" ॥ १॥

---

* "स मन्त्रोऽर्थाद् भवति"—ख-नाम ह०।

† साम्नां देवतापरिज्ञानाय तु देवताध्यायनाम दैवतं वा प्रसिद्धं सामवेदीयं पञ्चमं ब्राह्मण मेव विद्यते। तथा हि तस्यैव ब्राह्मणग्रन्थस्य भाष्यस्य भूमिकाया माह सायणः,—"तत्राद्या ब्राह्मणग्रन्थास्त्रयो व्याख्याताः पुरा। देवताध्यायसञ्ज्ञस्तु ग्रन्थो व्याक्रियतेऽधुना॥ साम्नां निधनभेदेन देवताध्यायनादयम्। ग्रन्थोऽपि नामतोऽन्वर्थो देवताध्याय उच्यते॥"—इत्यादि। तस्य हि ब्राह्मणस्येद मारम्भवाक्यम्,—"अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टाङ्गिरसः पूषा सरस्वतीन्द्राग्नी"—इति। "एताः सामदेवता इति शेषः" —इति च तद्व्याख्यानं सायणीयम्।

इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्र मिज्ञाथिनो बृहदिन्द्रेणैते तृत्सवो वेविषाणा इन्द्रायं साम गायत नेन्द्राहते पवते धाम किञ्चनेन्द्रस्य नु वीर्याणि प्र वोच मिन्द्रे कामा अयंसतेत्यथ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्व मिति चैतेन सर्वनाम्ना। त्व मिन्द्र बलादधि। वि न इन्द्र मृधो जहीत्यथापि प्रत्यक्षकृता स्तोतारो भवन्ति परोक्षकृतानि स्तोतव्यानि। मा चिदन्यद्वि शंसत कण्वा अभि प्र गायतोप प्रेत कुशिकाश्चेतयध्व मित्यथाध्यात्मिक्य उत्तमपुरुषयोगा अह मिति चैतेन सर्वनाम्ना ॥ २* ॥

तद्यथैतान्युदाहरणानि आनुपूर्व्येणैव सप्तस्वपि विभक्तिषु इन्द्रो दिव इत्येवमादीनि;—

"इन्द्रो दिव०——० इन्द्रः" †। रेणोर्वैश्वामित्रस्येय मार्षम्। ऐन्द्री। त्रिष्टुप्। सूर्यस्तुत्येकाहनिष्केवल्ये विनियुक्ता। 'इन्द्रो दिवः' 'ईशे' ईष्टे। 'इन्द्रः' एव 'पृथिव्याः' ईष्टे। 'इन्द्रः' एव 'अपाम्' ईष्टे वर्षकर्मादिना। 'इन्द्रः' एव 'पर्वतानां' मेघानाम् ईष्टे। 'इन्द्रः' एव 'वृधाम्' अतिप्रवृद्धाना मपि भूतानां मीष्टे। 'इन्द्रः' एव

---

* ङ-च-पुस्तकयोर्नास्ति खण्डसमाप्तिः।

† "इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपा मिन्द्र इत् पर्वतानाम्। इन्द्रो वृधा मिन्द्र इन्मेधिराणा मिन्द्रः क्षेमे योगे हव्य इन्द्रः॥"—इति ऋ० सं० ८, ४, १५, ५।

च 'मेधिराणां' यज्ञैस्तदता मीष्टे। 'इन्द्रः' एव हि 'योगे' अर्थसंयोगे प्राप्तव्ये, 'क्षेमे' च परिपालने कर्त्तव्ये 'हव्यः' आह्वातव्यो नान्यः कश्चित्समर्थः एतत्कर्त्तुं मित्यभिप्रायः। प्रथमाया मेतदुदाहरणम्। इन्द्र इत्येतस्मादुपपदा दीश इत्येष प्रथमपुरुष इति प्रतीयते, नोत्तमपुरुष इति॥

"इन्द्र मिद्०——०रनूषत"*। मधुच्छन्दस आर्षम्। महाव्रते महदुक्थ्ये शिरसि शस्यते। हे 'गाथिनः' सामगाः! 'इन्द्र मित्' इन्द्र मेव यूयं बृहता साम्ना† अभिष्टुत। यूय मपि हे होतारः! 'अर्किणः' 'अर्केभिः' अर्कैर्ऋग्भिः मन्त्रैः‡ इन्द्र मेवाभिष्टुत। यूय मपि च हे अध्वर्यवः! इन्द्र मेव 'वाणीभिः' वाग्भिर्यजुर्मयीभिः§ 'अनूषत' अभिष्टुत। द्वितीयाया मेतदुदाहरणम्॥

"इन्द्रेणैते०——०मुदासे"। इति तृतीयस्या मुदाहरणम्। व्याख्यातः शेषः॥॥

"इन्द्रायु०——०पनस्यवे"¶। नृमेधस आर्षम्। साचिकेष्वहःसु स्तोचियानुरूपवर्गे तृतीयसवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता।

---

* "इन्द्र मिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्रं वाणीरनूषत॥"—इति ऋ० सं० १, १, १२, १।

† "ला मिदि हवामहे (ऋ० सं० ४, ७, २७, १.=सा० सं० ऋ० आ० ३, १, ५, १.)"—इत्यस्या ऋचोऽयमेव बृहन्नामकेनेत्यर्थः। तच्च साम आरण्यगाने (१, १, २७) द्रष्टव्यम्।

‡ 'ऋङ्मयैर्मन्त्रैः' घ। "अर्को मन्त्रो भवति"—इत्याद्युक्तं पुरस्तात् ३२ पृ०।

§ १भा० ७४पृ० २अ० ११ख० (११)।

॥ पृ० १५९ पृ० (६अ० २पा० २ख०) द्र०।

¶ "इन्द्रायु सामं गायत विप्राय बृहते बृहत्। धर्मं कृते विपश्चिते पनस्यवे॥"—इति ऋ० सं० ६, ७, २, १।

हे उद्गातारः! 'इन्द्राय' बृहत्साम 'गायत'। 'विप्राय' मेधाविने 'बृहते' महते 'धर्मकृते' कृतधर्मणे 'विपश्चिते' विदुषे 'पनस्यवे' पन इच्छते, आत्मनः स्तुतिमिच्छते। चतुर्थ्या मेतदुदाहरणम्॥

"सूर्यस्येव०——०किं चन"*। रेणोर्वैश्वामित्रस्येय मार्षम्। पावमानी सौमी। जगती। यथा सूर्यस्य रश्मयस्तमसां 'द्रावयित्नवः' द्रावणशीला, एव मेते 'मत्सराः' सोमाः, पापानां द्रावणशीलाः। किञ्च; 'प्रसुपः' प्रसृता एतैर्ऋत्विग्भिः 'साकम्' इन्द्रं प्रति 'ईरते' गच्छन्ति इत्यर्थः। गत्वा च 'तन्तुं ततं' तन्तु मिव तन्त्ववयवाः 'परिसर्गासः' 'आशवः' परिसृताः 'यथा' व्याप्नुवन्ति, एव मेतं पातार मिन्द्रं स्वामिनं प्रत्यश्नुवन्ति व्याप्नुवन्तीत्यर्थः। कस्मात् पुनरेवं क्रमः? इतः,—यस्मात् 'नेन्द्रादृते' सोमः प्रातःसवनादीनां सोमसवनस्थानानां किञ्चिदपि ('धाम'†) 'पवते' पूयते‡। तस्मादेवं ब्रूमहे,—इन्द्र मेवैते व्याप्नुवन्तीति। पञ्चम्या मेतदुदाहरणम्॥

"इन्द्रस्य नु०——०पर्वतानाम्"§। हिरण्यस्तूपस्येय मार्षम्। निष्केवल्ये शस्त्रे। 'इन्द्रस्य' अहं 'वीर्याणि' वीरकर्माणि 'प्र वोचम्'। 'यानि' 'चकार' 'प्रथमानि' अकृतपूर्वाणि अन्यैः। 'वज्री' वज्रसंयुक्तः।

---

* "सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते। तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किञ्चन॥"—इति ऋ० सं० ७, १, २२, १।

† "इन्द्रस्य धाम्नो यष्टव्यत्वं च "ऋग्भिरिन्द्रस्य०——०प्रिया धामानि (य० वा० सं० २१,४७)"—इति मन्त्रवर्णाद् गम्यते।

‡ "इन्द्रं वर्जयित्वा अन्यद्देवशरीरं प्रति गच्छतीति वा"—इति ऋ-टीप्पनी।

§ "इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री। अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम्॥"—इति ऋ० सं० १, १, ३२, १।

'अहन् अहिम्' घ्नन् मेघम्। 'अनु ततर्द अपः' वर्षार्थं पुनः पुनश्च 'प्राभिनत्'। 'वज्रेण' उदकवहनशिराः 'पर्वतानाम्' मेघानाम्। एवमादीनि वीर्याण्यस्य मिन्द्रस्य प्रवोच मिति। षष्ठ्या मेतदुदाहरणम्॥

"इन्द्रे कामा अयंसत दिव्यासः पार्थिवा उत। त्य मू षु गृणता नरः॥"—इति। हे स्तोतारः! ये दिव्याः कामाः, ये च पार्थिवाः, ते इन्द्रे एव उपनिबद्धाः; तं प्रार्थयत; स हि कामाना मीष्टे। 'त्य मू षु' तं सुष्ठु कामप्राप्त्यर्थं 'गृणत' स्तुत, हे 'नरः!'। सप्तम्या मेतदुदाहरणम्॥

उक्तं परोक्षकृतमन्त्रलक्षणं सोदाहरणम्॥

अधुना प्रत्यक्षकृतमन्त्रलक्षण मुच्यते, तदधिकारार्थोऽयम् 'अथ'-शब्दः। "अथ प्रत्यक्ष०——०सर्वनाम्ना"। 'मध्यमपुरुषयोगाः' मध्यमेन पुरुषेण संयुक्ता ये मन्त्राः, ते प्रत्यक्षकृताः। 'त्व मिति चैतेन सर्वनाम्ना' संयुक्ताः, ते च प्रत्यक्षकृताः। यत्र त्व मित्येवं श्रूयते, तत्राविद्यमानोऽपि मध्यमः पुरुषोऽध्याहार्यः *; यत्र तु मध्यमः पुरुषः श्रूयते, तत्राविद्यमान मपि 'त्वम्'—इत्येतत् सर्वनामाध्याहार्यम्; सम्बन्धिशब्दत्वादनयोः। "त्व मिन्द्र बलादधि", "वि न इन्द्र मृधो जहि"—"इति" चैते उदाहरणे।——

"त्वमिन्द्र०——०दृषेदसि"†। देवजामयः सूक्तं ददृशुः।

---

* "मध्यमपुरुषयुक्त माख्यात मध्याहार्य मित्यर्थः"—इति ख-टीप्पनी।

† 'त्व मिन्द्र बलादधि सहसो जात ओजसः। त्वं कृष्ण दृषेदसि॥"—इति ऋ० सं० ८, ८, ११, १।

तत्रेयं महाराचिके पर्याये प्रशास्तुः स्तोत्रे विनियुक्ता। हे 'इन्द्र'! 'त्वम्' 'बलादधि जायसे' 'सहसः' अभिभवनसमर्थात्*, 'ओजसः' तेजसः†। किञ्च; त्वं हे 'वृषन्' वर्षितः! 'वृषा असि' वर्षिता असीत्यर्थः॥

"वि नं इन्द्र०——०तमः" ‡। ग्रामस्य भारद्वाजस्येयं मार्षम्। वैमृधस्य हविषो याज्या। हे 'इन्द्र!' 'वि जहि' 'नः' एतान् 'मृधः' मृधकर्त्तॄन्§ शत्रून्। किञ्च; 'नीचा' नीचैः 'यच्छ' तान्। 'पृतन्यतः' येऽस्मामिः सह पृतन्यन्ति, पृतनां कर्त्तुमिच्छन्तीत्यर्थः। किञ्च; 'योऽस्मान्' 'अभि दासति' अभ्युपक्षपयितुमिच्छतीत्यर्थः। तम् 'अधरं' 'तमः' 'गमय', नाशयेत्यर्थः॥॥

"अथापि०——०स्तोतव्यानि"। युग्मत्रयोगैर्हि क्वचित् स्तोतारः सम्बध्यते। तद्यथा,—"मा चिदन्यद् वि शंसत", "कण्वा अभि प्र गायत", "उप प्रेत कुशिकाश्चेतयध्वम्"—इति" चैतान्युदाहरणानि।——

"माचि०——शंसत"¶। प्रगाथस्येयं मार्षम्। बृहती। ऋचा-

---

* "'सहसः' परेषा मभिभावकाद् 'बलात्' 'अधि' 'जातः' असि। अधिः पञ्चम्यर्थानुवादकः। ऋचादिवधहेतुभूताद् बलाज्जेतास्मं प्रख्यातो भवसीत्यर्थः।" —इति सा० भा०।

† "ओजसः ओजो नाम बलहेतु हृदयगतं धैर्यम्, तस्मादपि त्वं जातोऽसि॥" —इति च सा० भा०।

‡ "वि नं इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। योऽस्मां अभिदासत्यधरं गमया तमः॥"—इति ऋ० सं० ८, ८, १०, ४।

§ 'सङ्ग्रामकारिणः"—इति सा० भा०।

॥ "अधरं निकृष्टम्, तमः अन्धकारं मरणलक्षणं गमय प्रापय"—इति सा०भा०

¶ मा चिदन्यद् वि शंसत सखायो मा रिषण्यत। इन्द्रमित् स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत॥"—इति ऋ० सं० ५, ७, १०, १।

शीतिषु विनियुक्ता। हे स्तोतारः! 'सखायः!' 'मा' 'अन्यत्' किं 'चित्' अपि 'शंसत' विविधाभिः स्तुतिभिः। 'मा' च 'रिषण्यत' चेतसा मागच्छत अन्यद् देवतान्तरम्*। किन्तर्हि? 'इन्द्रम् इत्' इन्द्र मेव 'वृषणं' वर्षितारं 'स्तोत' स्तुत। 'सचा' सहभूताः, एतस्मिन् 'सुते' सोमे। 'मुञ्चः' मुञ्चश्च हे होतारः! उक्थानि 'च' 'शंसत'॥

"क्रीळं वः०——०गायत"†। कण्वस्येय मार्षम्। क्रैलीनस्य हविषो याज्या। 'क्रीळं' शत्रूनपि दृष्ट्वा यत् क्रीडनशीलम्‡, 'मारुतं'§ 'शर्द्धः' बलम्, 'अनर्वाणम्' अनाश्रित मन्यत्र; स्वप्रभावयुक्त मेवेत्यभिप्रायः, 'रथेशुभं' रथे स्थितं शोभिष्ठम्, हे 'कण्वाः' मेधाविनः ऋत्विजः!॥ एतत् 'अभि प्र गायत' एतद् 'वः' ब्रवीमि॥

"उप प्रेत०——०ष्टये"¶। विश्वामित्रस्येय मार्षम्। हे 'कुशिकाः' स्तुतिकोष्टार ऋत्विजः!** 'उप प्र' 'इत' गच्छत। 'चेत-

---

* "मा रिषण्यत। मा हिंसितारो भवत। अन्यदीयस्तोत्रोच्चारणेन हतोपचीणा मा भवत"—इति सा० भा०।

† "क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम्। कण्वा अभि प्रगायत॥"—इति ऋ० सं० १, ३, ११, १।

‡ 'क्रीलनशीलम्' ग, घ। "क्रीङ् विहारे (भू० प०), पचाद्यच्।"—इति "विहरणशीलम्"—इति च सा० भा०।

§ "मरुतां सम्बन्धि * * * यद्वा समूहार्थेऽनुदात्तादेरञ्"—इति सा० भा०।

॥ "कण्वगोत्पन्ना महर्षयः। यद्वा मेधाविन ऋत्विजः"—इति सा० भा०।

¶ "उप प्र इत कुशिकाश्चेतयध्वं मरुतो रायः प्रभूषता सुदासः। राजा वृत्रं जङ्घनत् प्रामुगुदगथा यजाते वरु आ पृथिव्याः॥"—इति ऋ० सं० ३, ३, ११, १।

** "हे कुशिकाः' कुशिकगोत्पन्नाः, हे पुत्राः"—इति सा० भा०।

यध्वम्' विजानीध्व मेतद्,——यथैषः 'राजा' 'वृत्रं' शत्रुं 'जङ्घनत्' हतवान्, सर्वासु दिक्षु *, 'अथ' एवं सर्वहन्ता अमित्रो भूत्वा 'वरे' श्रेष्ठे प्रदेशे 'पृथिव्याः' ('यजाते') यजते। ते यूय मेतद् विज्ञाय उपप्रगच्छत। उपप्रगत्य चैत माश्वमेधिकम् 'अश्वम्' 'मुञ्चत' उत्सृजत, विधानतः प्रोक्ष्याश्वमेधयागाय †। योऽय मेतस्मिन् 'सुदासे' ‡ कल्याणदाने यजमाने वर्त्तते॥

एव मेतेषु युष्मद्गुणपदप्रयोगेषु सम्बद्धाः स्तोतारः स्तोतव्यानि तु यानि देवतान्तानि, तानि परोक्षकृताभिसम्बन्धीनि। एवंलक्षणं मन्त्रजात मुपेक्षितव्यम्॥

"अथा०——०योगाः"। उत्तमेन पुरुषेण या ऋचो युक्ताः, ता आध्यात्मिक्यः। "अह०——०नाम्ना" या उक्ताः, ताश्च आध्यात्मिक्यः। अत्रापि यत्राह मित्येतत् सर्वनाम श्रूयते, तत्राविद्यमानमपि ह्युत्तमपुरुषसम्बद्ध माख्यातपद मध्याहर्त्तव्यम्; यत्र चोत्तमपुरुषसम्बद्ध माख्यातपदं श्रूयते, तत्राविद्यमान मपि 'अहम्'—इत्येतत् सर्वनाम अध्याहार्यम्; सम्बन्धिशब्दत्वादनयोः॥ २॥

## यथैतदिन्द्रो वैकुण्ठो लबसूक्तं वागाभृणीय मिति(२१)

---

* मन्त्रस्थानां "प्राक् अपाक् उदक्"—इत्येतेषा मेव पदानां व्याख्यान मेतत्। सायणस्तु 'पूर्वपश्चिमोत्तरेषु देशेषु' व्याचष्टे, समीचीनतरश्चैतत्।

† 'राये'—इत्यव्याख्यात मेव स्थितम्। सायणस्तु 'दिग्विजयेन धनलाभाय'—इत्यर्थं कृतवान्।

‡ 'सुदासः'—इत्येव मूलपाठः। 'पैजवनस्य राज्ञः'—इति च सायणीयोऽर्थः।

§ इदैव द्वितीयखण्डसमाप्तिः ङ-च-पुस्तकयोः।

परोक्षकृताः प्रत्यक्षकृताश्च मन्त्रा भूयिष्ठा अल्पश आध्यात्मिका अथापि स्तुतिरेव भवति नाशीर्वाद इन्द्रस्य नु वीर्याणि प्र वोच मिति यथैतस्मिन् सूक्ते* ऽथाप्याशीरेव न स्तुतिः, सुचक्षा अह मक्षीभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयास मिति तदेतद्बहुल माध्वर्यवे याज्ञेषु च मन्त्रेष्वथापि शपथाभिशापौ। अद्या मुरीय यदि यातुधानो अस्मि। अध सा वीरैर्दशभिर्वि यूया इत्यथापि कस्य चिद्भावस्याचिख्यासा। न मृत्युरासीदमृतं न तर्हि। तम आसीत्तमसा गूळ्ह† मग्रे। अथापि परिदेवना कस्माच्चिद्भावात्। सुदेवो अद्य प्रपतेदनावृत्। न वि जानामि यदि वेद मस्मीत्यथापि निन्दाप्रशंसे। केवलाघो भवति केवलादो। भोजस्येदं पुष्करिणीव वेश्मेत्येव मक्षसूक्ते द्यूतनिन्दा च कृषिप्रशंसा चैव मुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति॥ ३॥

"यथा एतद्" उदाहरणत्रय माध्यात्मिकम्,—"इन्द्रो०——मिति" एवमादि। एव मन्येऽप्याध्यात्मिका मन्त्रा उपेक्षितव्याः।

विकुण्ठा नाम आसुरी बभूव, तस्याः किल तपसः प्रभावेनापत्यत्व मिन्द्र आ जगाम; स वैकुण्ठो नाम बभूव। तस्यात्मस्तुति-

---

* "यथैतस्मिन्सूक्ते" ङ, च।

† "गूळ्ह" ङ, च।

संयुक्त मेवमादि ब्रह्म प्रादुरभूत् *,—"अहं०——०भोजनम्" †। 'अहम्' एव 'भुवम्' अभवम् 'वसुनः' धनस्य 'पूर्व्यः' प्रथमः ‡ 'पतिः'। किञ्च; साम्प्रत मप्यह मेव पतिः। 'अहम्' एव च शत्रुभ्यः सकाशात् समस्तानि 'धनानि' 'जयामि' §। 'शश्वतः' नित्यकाल मेव। किञ्च; 'माम्' एव 'हवन्ते' आकृयन्ति 'पितरं न' पितर मिव, तासु तास्वार्त्तिषु 'जन्तवः' मनुष्याः। किञ्च; 'अहम्' एव 'दाशुषे' दत्तवते हवींषि, यजमानाय 'विभजामि' यथार्हं 'भोजनम्' धन मित्यर्थः॥

"इति वा०——०पा मिति"॥। लवमूक्ते स एव लवो ब्रवीति, —('इति वा इति') एवञ्चैवञ्च 'मे मनः' वर्त्तते। आह,—कथम्? इति। उच्यते,—'गा मश्वम्' गां च अश्वं च 'सनुयाम्' सम्भोजयेम् एतान् यजमानानिति। अथैव मतितरां प्रत्युपकाराभिप्राये सति किमर्थं ब्रूते? 'कुविद्' बहु अहं 'सोमस्य अपाम् इति'॥

---

* "अहं भुव मित्येकादशर्चं षष्ठं सूक्तम्। पूर्वसूक्तेन सप्तगुना स्तुतो हृष्टः सन्निदमादिसूक्तचयेन स्वय मात्मान मस्तौत्। तस्माद् वैकुण्ठस्येन्द्रस्य वाक्यत्वाद् 'यस्य वाक्यं स ऋषिः'—इति परिभाषयेन्द्र ऋषिः; वैकुण्ठस्येन्द्रस्य च स्तूयमानत्वाद् 'या तेनोच्यते सा देवता'—इति परिभाषयेन्द्र एव देवता।"—इति सा० भा०। सप्तगुः आङ्गिरसः।

† "अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः। मां हवन्ते पितरं न जन्तवोऽहं दाशुषे वि भजामि भोजनम्॥"—इति ऋ० सं० ८, १, ५,१।

‡ "पूर्व्यः मुख्योऽसाधारणः"—इति सा० भा०।

§ "स मित्येकीभावे, सह जयामि"—इति सा० भा०।

॥ "इति वा इति मे मनो गा मश्वं सनुया मिति। कुवित् सोमस्यापा मिति॥"—इति ऋ० सं० ८, ९, १९, १। "इति वा इति चयोदशर्चं सप्तमं सूक्तं गायत्रम्। इन्द्रो लवरूप माख्याय सोमपानं कुर्वन् तदानीं ऋषिभिर्दृष्टः सन् स्वात्मान मनेन सूक्तेनास्तावीत्। अतो लवरूपापन्न इन्द्र ऋषिः, स एव देवता॥"—इति सा० भा०।

"अहं रुद्रेभिः०——०मश्विनो भा" *। वागाम्भृणीये वागेव ब्रवीति †। 'अहम्' एव 'रुद्रैः', 'वसुभिः', 'आदित्यैः', ('विश्वदेवैः') विश्वैश्च देवैः सह भूता 'चरामि' स्तुतिरूपेण। 'अहम्' एव ('मित्रावरुणा') मित्रावरुणौ ('उभा') उभावपि, 'इन्द्राग्नी', ('अश्विना') अश्विनौ च ('उभा') उभावपि 'बिभर्मि' हविषा; मत्पूर्वकं हविःसम्प्रदानं सर्वदेवताभ्य इत्यभिप्रायः॥

"परोक्षकृताः०——०प्रत्यक्षकृताश्च मन्त्राः", भूयिष्ठाः शाखान्तरेषु बहवः; "अल्पशः" क्वचित् "आध्यात्मिकाः" लक्ष्यन्ते। आत्मान मेव स्तोतव्य मधिकृत्य येऽभिव्यक्तास्तदह शास्त्रे आध्यात्मिका उच्यन्ते॥

"अथापि" क्वचित् "स्तुतिरेव भवति", "नाशीर्वादः"; तच्च पुनराशीर्योज्या‡। किं कारणम्? आशिषो ह्यर्थे स्तुतिः प्रयुज्यते। आह,—किं मुदाहरणम्? इति। उच्यते,—"इन्द्रस्य०——०सूक्ते" (ऋ० सं० १,७२,१)। अत्र हि स्तुतिरेव श्रूयते, नाशीः; सा पुनर्योज्येति? प्रतिपादितम्।——। "अथापि" क्वचिद् "आशीरेव,

---

* "अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः। अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥"—इति ऋ० सं० ८, ७, ११, १।

† "अत्र मित्यृचं चयोदशं सूक्तम्। अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मान मस्तौत्; अतः सर्षिः। सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता। तेन स्तुषा तादात्म्य मनु भवन्ती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाह मेव सर्वं भवामीति स्वात्मानं स्तौति।"—इति सा० भा०। इद मेव 'देवीसूक्तम्'—इत्युच्यते मार्कण्डेयपुराणान्तर्गतदेवीमाहात्म्ये च "देवीसूक्तं परं जपन्"—इति विधानात् तस्याश्च सप्तशतिकायाः स्तुतेः पुरस्तादस्य पाठव्यवहारस्य।

‡,§ नैते आख्याने मूलसम्मते—इत्यस्माकम्, मूलपाठतस्तथावगतेर्बीजाभावात्।

न स्तुतिः"। तद्यथा,—"सुचश्चा०——०भूयास मिति"।——। "तदेतद्" एवंलक्षणं मन्त्रजातम् "आध्वर्यवे" वेदे* "बहुलं" प्रायेण दृश्यते। "याज्ञेषु च मन्त्रेषु" कर्मकरणेष्वितरयोरपि † वेदयोरिष्टाशीरेव भवति, न स्तुतिरेव केवला; यत्राप्याशीरेव केवला, तत्रापि तस्यार्थस्य या देवतेष्टा, तस्याः स्तुतिर्योज्या। किं कारणम्? न ह्यनभिष्टुता देवता आशिषं समर्द्धयति॥

"अथापि शपथाभिशापौ" भवतः। "अद्या मुरीय०——०इति" —इत्येकं मुदाहरणं द्वयोरपि। वसिष्ठः किल राजसख्यम्—इत्यभियुक्तः, सोऽनयर्चा शपथं प्रतिपेदे; परञ्चाभिशशाप ‡।

"अद्या०——०नेत्याहं" §। अद्यैवाहं म्रिये; 'यदि यातुधानः' स्याम्? यदि वा 'आयुः' 'ततप' तप्तवानहं कस्य चिदपि पुरुषस्य। अथ पुनरयातुधान मेव मां सन्तं यो मोघ मनृतं यातुधानस्य

---

* यजुर्वेदीति यावत्।

† एतच्च व्याख्यानं न सुष्ठित्यस्माकम्; अथर्ववेदस्याग्रहणात्। यज्ञार्थाः ये मन्त्राः, ताः सर्वा एव याज्ञाः; यदि चाथर्ववेदे सोमसम्याद्यानां सचादीनां नास्ति दर्शनं परं सख्येव तत्रापि कारीर्यादयो यागाः, सन्ति च तेषु बह्व्यः स्तुतिमन्त्रा आशीर्मन्त्राश्च। अत्र च यास्केन 'मन्त्रेषु'—इत्यस्य 'याज्ञेषु'—इति विशेषणमुपन्यस्तं तेनायाज्ञा अपि मन्त्रा विद्यन्त एवेति यास्कमतं परिस्फुटम्। एवञ्च "यज्ञार्थ एव वेदा प्रवृत्ताः"—इति वादिनः प्राभाकरादयो मीमांसकाः परास्ताः।

‡ 'अत्र के चिदाहुः।—हत्वा पुत्रशतं पूर्वं वसिष्ठस्य महात्मनः। वसिष्ठं राजसोऽसि त्वं वासिष्ठं रूप मास्थितः। अहं वसिष्ठ इत्येवं जिघांसुं राजसोऽब्रवीत्। अत्रोत्तरा ऋचो दृष्टा वसिष्ठेनेति नः श्रुतम्'—इति।"—इति ऋ० सं० ५, ०, ०, १. सा० भा०।

§ "अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य। अधा स वीरैर्दशभिर्वि यूया या मा मोघं यातुधानेत्याह॥"—इति ऋ० सं० ५, ०, ०, ५।

मित्येव माह, 'सः' 'वीरैः' पुत्रैः 'दशभिः' 'वि यूयाः' वियूयात् वियुज्यता मित्यभिप्रायः ॥

"अथापि कस्य चिद्" "भावस्य" अर्थस्य "आचिख्यासा" मन्त्रेषु भवति। "न मृत्यु०——०चनास" *। प्रजापतेः परमेष्ठिन आर्षम्। तम आसीदितीयच्च †। चिष्टुप्। भाववृत्तम् ‡।

('तर्हि') प्रागुत्पत्तेरस्य जगतः 'मृत्युः' इत्ययं व्यपदेशो 'नासीत्', मर्त्यस्याभावात्। 'न' 'अपि' 'अमृतम्' इत्ययं व्यपदेश आसीत्, मृत्योरभावादेव। इतरेतरापेक्षया हि मृत्युश्चामृतं च व्यपदिश्येते। 'न' एव 'रात्र्याः' ('प्रकेतः') प्रज्ञानम् 'आसीत्', इयं रात्रिरिति। नापि 'अह्नः'। एते अपि ह्यहोरात्रे यतो भगवतो विवस्वत उदयास्तमयाभ्यामुपलक्ष्येते; तदभावे ह्येते अपि नास्ता मित्येतदुपपद्यते। आह,—अथ किं मासीत्? इति। उच्यते,—अविशिष्टं मप्रज्ञातम् 'एकम्' एव सर्वशक्तिमद् 'ब्रह्म' आसीत्, तत्-कार्यकारणाभावात् 'अवातम्' 'आनीत्' अनिति प्राणितीत्यर्थः; सति हि कार्यकारणभावे परमात्मनि या प्राणनशक्तिः सा पञ्चधा भिद्यमाना प्राणापानादिभावमापद्यते, तदभावे न वातोऽस्तीति अवात मनितीत्युपपद्यते। 'स्वधया' अन्नेन अस्मिन्नेव परमात्मनि या अत्र शक्तिः, तया निमित्तभूतया प्राणितीत्यवशिष्यते 'तद्' ब्रह्म। आह,—किं मन्यदपि ततः

---

* "न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् केतुः। आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास॥"—इति ऋ० सं० ८,७,१७,१।

† अनुपदमेव द्वितीयोदाहरणत्वेन दर्शयिष्यते।

‡ नासदासीदिति सप्तर्चञ्च सूक्तं वियदादिभावानां सृष्टिस्थितिप्रलयार्थानां वर्णयितव्यत्वात् इदं सूक्तं भाववृत्तमुच्यते; अस्य च ऋषिः परमेष्ठीत्युक्तम्।

परस्तात् किञ्चिदासीत्? नेत्युच्यते,—'तस्मात् ह अन्यत्' 'न' 'परः' परस्तात् ('किं चन आस') किञ्चिदप्यासीत्। इद मेव तावदति-क्रान्तसर्वविशेषं ब्रह्म व्यपदेष्टु मशक्य मतो ऽपि परस्तात् कि मन्यद् भविष्यतीत्यभिप्रायः * ॥

द्वितीय मुदाहरण माचिख्यासाया मेव। "तम आसीत्०——० जायतैकम्" †। 'तम आसीत्' अग्रेनैव 'तमसा' ('गूळ्हम्') निगूढम् अविशिष्टम् ('अप्रकेतम्') अप्रज्ञातम् 'अग्रे' प्राक् सृष्टेरित्यर्थः; तदा हि न द्रष्टा, न दर्शनम्, नापि दृश्योऽर्थ आसीदित्यभिप्रायः। साङ्ख्यास्तु तमःशब्देन प्रधानसाम्यापन्नं गुणत्रय मुच्यमान मिच्छन्ति; ते हि परमार्षं सूत्र मधीयते,—"तम एव खल्विद मग्रे आसीत्", तस्मिंस्तमसि चेत्रज्ञ एव प्रथमोऽध्यवर्त्तत"-इति। 'सलिलं' सद्भावे लीनं 'सर्व मिदं' जगत्, सन्मात्रस्यैव भावस्योपरि लीन मासीत्। ('तुच्छ्येन') तुच्छेन सूक्ष्मीभूतेन पटमण्डपस्थानीयेन कर्मणा 'यद् अपि हितम्' इद मेव जगत् 'आसीत्' सर्गकालापेक्षित मनादिमत्त्वात् संसारस्य। 'तपसः' तस्यैव कर्मणो 'महिना' महिम्ना महाभाग्येन कारणावस्थायाम् 'एकम्' मपि 'सत्' अनेकधा उपस्थिते सर्गकाले प्रतिनियतकर्मोपभोगार्थम् 'अजायत' इति ‡ ॥

---

* इह खलु सायणेन बृहद् भाष्यं भाषितम्, तच्च द्रष्टव्यम्।

† "तम आसीत् तमसा गूळ्ह मग्रे ऽप्रकेतं सलिलं सर्व मा इदम्। तुच्छ्येना-भ्वपि हित यदासीत् तपसस्तन्महिना जायतैकम्॥"—इति ऋ० सं० ८, ७, १७, ३।

‡ इहापि खलु सायणीयं बृहद् भाष्यं द्रष्टव्य मेव। 'आभु'-पदव्याख्यानञ्च 'आ समन्ताद् भवतीत्याभु'—इति तत्रैव।

"अथापि परिदेवना, कस्माच्चिद् भावात्;—'सुदेवो अद्य प्रपतेदनावृत्', 'न वि जानामि यदि वेद मस्मि—इति"। उदाहरणे।

"सुदेवो——०अद्युः" *। पुरूरवस आर्षम्। त्रिष्टुप्। परिदेवना। 'सुदेवः' स शोभनो देवः स्यात्, यो ह्यनया प्रियया उर्वश्या वियुक्तो मृगुप्रपातम् ('अनावृत्') अनावर्त्तमानः 'अद्य प्रपतेत्'। ('परावतं परमां गन्तवे ऊम्') पतितश्च दूराद् दूरतरं गच्छेत्, ('अद्य') अथ गत्वा 'अयीत' मृतः सन् 'निर्ऋतेः' भूमेः 'उपस्थे' उपरि। ('अधा') अथ 'एनं' तां मवस्था मापन्नं 'वृकाः' विकर्त्तितारः अशृगालादयः 'रभसासः' रभस्वन्तो वेगवन्तः 'अद्युः' भक्षयेयुः। नाहं सुदेवः किन्तु स सुदेवो यस्तया वियुक्त एतां मवस्था मापद्येयादित्येव मेषा "परिदेवना" संशयोत्थापनम् †॥

"न वि जानामि०——०भाग मस्याः" ‡। दीर्घतमस आर्षम्। अस्यवामीये §। 'न' एतत् अहं ('वि') विशिष्टं 'जानामि',—'यदि वा इदम्॥ अस्मि' कारणं परं ब्रह्माख्यम्? अथ वा इदं

---

* "सुदेवो अद्य प्रपतेदनावृत्त परावतं परमां गन्तवाउ। अधा अयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः॥"—इति ऋ० सं० ८, ५, ३, ४।

† सायणेन अस्याः सर्वत एव व्याख्यानान्तरं कृतम्, तदपि द्रष्टव्यम्।

‡ "न वि जानामि यदिवेद मस्मि निण्यः संन्नद्धो मनसा चरामि। यदा मागन् प्रथमजा ऋतस्यादिद् वाचो अश्नुवे भाग मस्याः॥"—इति ऋ० सं० १, ३, २१, २।

§ अस्यवामीयं नाम ऋग्वेदीय-प्रथममण्डल-द्वाविंशानुवाकस्याष्टमं सूक्तं दैर्घतमसम्। द्विपञ्चाशदृचे तच्च सूक्ते सप्तविंशीयम्। "सूक्तं जघास्यवामीयं छिन्नं कुचेन किल्बिषात्"—इति ऋग्वि० १, २६। सूक्तस्यास्य प्रथमा ऋक् "अस्य वामस्य पलितस्य"—इति, अत एवेद मस्यवामीय मित्युच्यते। इत्यानुक्रमणीं सायणीयं तद्व्याख्यानञ्च विशेषतो द्रष्टव्यम्।

॥ "यत्, इव, इदम्"—इति पदकारपठितः पदच्छेदः।

तत्कार्यं द्वैत मस्मीति। अनयोः कार्यकारणयोर्द्वैताद्वैतयोरन्तरा वर्त्तमानो 'निण्णः' अन्तर्हितः, अविद्यया 'सन्नद्धः' च। अनेकैः सन्देहग्रन्थिभिः 'मनसा' उभे अपि द्वैताद्वैते 'चरामि' गच्छामीत्यर्थः। एवं सति 'यदा' 'मा आ अगन्' माम् आगच्छेत् 'प्रथमजा' बुद्धिः; सा हि सर्वेन्द्रियेभ्यः प्रथमं जायते 'ऋतस्य' भगवत आदित्यस्य स्वभूता; तस्य हि प्रकृष्टा बुद्धिः, प्रहीणसर्वसंशया, तया सर्वं मिद मसंशयं परिज्ञाय किं मद्दं कारणमतत्व उत द्वैतमतत्व इति। ततः 'अस्याः' कृत्स्न-प्रज्ञातायाः 'वाचः' 'भागम्' अहम् ('अश्नवै') अश्नुयाम्, यदियं कृत्स्ना वागभिवदति तत्सर्वं मह माप्नुया मित्यर्थः * ॥

एव मय मात्मनिन्दापूर्वको विलापः परिदेवनेत्युच्यते; यदि नाम एवं स्यात् साधु स्यादिति ॥

"अथापि" मन्त्रेषु "निन्दाप्रशंसे" भवतः। तद्यथा,—"केवलाघो भवति केवलादी", "भोजस्येदं पुष्करिणीव वेश्मा"—"इति"। एते उदाहरणे †।

"मोघ०——०केवलादी" ‡। भिचुर्नामाङ्गिरसस्येय मार्षम् §। त्रिष्टुप्। अददतो निन्दा। 'मोघं' वितथम् 'अन्नं' 'विन्दते'

---

* "ऋतस्य यात् इत्"—इत्येतानि नेह व्याख्यातानि; सायणव्याख्यानं द्रष्टव्यम्; तेन तस्या ऋचो विस्तृतं भाष्यं कृतम्।

† यथाक्रमेण निन्दा-प्रशंसयोः बोद्धव्ये इति यावत्।

‡ "मोघ मन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् तस्य। नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी॥"—इति ऋ० सं० ८, ९, १३, १।

§ अत्र भिचुरिति सञ्ज्ञा, गृहीतचतुर्थाश्रमः, भिचुको वा? विचार्यं मस्ति।

प्राप्नोति। आह,—कः? इति। उच्यते,—यः 'अप्रचेताः' अप्रदृङ्-ज्ञानः। 'सत्यम्' अहं 'ब्रवीमि',—'वध इत् स तस्य' वध एव सोऽन्नलाभस्तस्य; वर मलब्धं तेनान्न मित्यभिप्रायः। किमुनः कारणं मोघ मसावन्नं विन्दते? इति। उच्यते,—'न' असौ 'अर्यमणम्' आदित्यं 'पुष्यति'; ('नो') नापि 'सखायं' समानख्यानं मनुष्यम्; न देवान् पुष्णाति, नापि मनुष्यानित्यभिप्रायः। यत एव मतः 'केवलाघो भवति' सः 'केवलादी' आत्मनैव केवलं योऽन्न मत्ति, न देवपितृमनुष्येभ्यो ददाति, स केवल मघ मेव प्राप्नोति। तदुक्त मन्यत्रापि;—"भुञ्जते तेऽघं पापा ये पचन्त्यात्मकारणात्"—इति*। तस्माद् वध एव स तस्यान्नलाभ इत्युपपद्यते; न ह्यसत्यन्ने प्रत्यवेयाददददन्न मित्यभिप्रायः; अन्नसंयोग एव ह्यत्र वधोऽभिप्रेतः†।—

के चित्त्वेन मनध्यात्मविद मप्रचेतसं मन्यन्ते‡; स ह्यस्मिन् शरीरे विवक्षितः। 'न अर्यमणम्' आदित्यान्तरपुरुषं भोक्तारं पश्यति, ('नो') नापि 'सखायं' प्राणवायुम्; स हि भुज्यमानेऽन्ने करणभावं पुष्णातीति सखा; केवलं, त्वसाविद्वानात्मान मेव भोक्तार मत्र पश्यति, अतः स 'केवलाघो भवति'; यदि स देवताः पश्येदेव तर्हि अन्नभोक्त्रीः, स हि तत्र भुक्तेन न केवलाघः स्यादिति§॥

---

* "अयं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्"—इति म० १।११८।

† सायणभाष्ये एष एवार्थः परिव्यक्तः।

‡ अत्रैव ऋचि श्रुतस्य 'अप्रचेताः'—इति पदस्य 'अनध्यात्मवित्'—इति अर्थम् स्वीकुर्वन्नीति भावः; एवञ्चाध्यात्मिक एष मन्त्रः।

§ नैषोऽर्थो मनोरमोऽस्माकम्, नापि सायणसम्मतः।

"भोजाया०——०चित्रम्" *। दक्षिणा नाम प्रजापतेर्दुहिता †, तया सूक्त मात्मनः स्तुतिसम्बद्धं दृष्टम्। तत्रैषा चिष्टुप्। दातृप्रशंसा। 'भोजाय' राज्ञे ‡ 'अश्वम्' 'आशुं' शीघ्रं 'सं मृजन्ति' सम्मार्जयन्ति स्नापयन्ति भृत्याः। किञ्च; 'भोजाय' उद्वहनार्थं मन्यान् वरानपास्य ('शुम्भमाना') स्वलङ्कृता शोभमाना 'कन्या' 'आस्ते'; स हि ता महतीत्यभिप्रायः। किञ्च; 'भोजस्य' 'इदं' 'वेश्म' गृहं 'परिष्कृतं' संस्कृतं 'पुष्करिणी इव', ('देवमाना इव') पुष्करैर्देवतं विमान मिव § 'चित्रं' चायनीय मित्यर्थः। तदेतत् सर्वं मत्यस्य जन्मान्तरप्रतिविशिष्टदक्षिणासहितात् कर्मणोऽन्येभ्यः कर्मभ्यः सकाशात् फलातिरेक्य मित्येव मेषा दक्षिणाप्रशंसा॥

यथैव मिह मन्त्रद्वये निन्दा प्रशंसा च, "एव मक्षसूक्ते ‖ द्यूतनिन्दा च ऋषिप्रशंसा च" भवतीति विषयोपप्रदर्शनार्थं माह।

"अक्षैर्मा०——०मर्यः" ¶। मूजवान्नामा अक्षपुरुषस्येय मार्षम्। चिष्टुप्। 'अक्षैः मा दिव्य'—इति अक्षदेवनप्रतिषेधः; तत्र हि

---

* "भोजायाश्वं सं मृजन्त्याशुं भोजायास्ते कन्या शुम्भमाना। भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम्॥"—इति ऋ० सं० ८, १, ४, ५।

† दक्षिणायाः प्रजापति-दुहितृत्वे हेतुः ऋ० सं० ८, १, २, १ सा० भा० द्रष्टव्यम्।

‡ "भोजाय = दात्रे"—इति सा० भा०।

§ नभोमण्डल मिवेत्यर्थः। सायणेन त्वर्थालङ्कारं कृतम्।

‖ ऋ० सं० म०१०, अ०३, सू०५. "प्र वेपा इति चतुर्दशर्चं पञ्चमं सूक्तं मैलूषस्य कवषस्यार्षम् मूजवतः पुरुषाच्चाक्षस्य वा"—इति सा० भा०।

¶ "अक्षैर्मा दीव्यः कृषि मित् कृषस्व वित्ते रमस्व बहु मन्यमानः। तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः॥"—इति ऋ० सं० १०, ८, ५, ३।

बहवोऽनर्थाः सन्ति। 'कृषि मित् कृषस्व'—इति कृषिविधानम्। तस्यां हि बहवो गुणाः सन्ति। 'वित्ते रमस्व' स्वल्प एवोपार्जिते 'बहु' एतदेवेति 'मन्यमानः'; मा वित्तलोभेन दीव्यः, निजमपि वित्तं हारयिष्यसि, कृषिं पुनरेतस्मात् कारणात् कृषस्व। हे 'कितव!' 'तत्र' तस्यां कृषौ 'गावः' सन्ति, ('तत्र') तस्यां च 'जाया'। 'तत्' पुनरेतत् 'मे' मम 'सविता' देवः, 'अर्यः' ईश्वरः, ('वि') श्रुति-स्मृत्यनुशासनद्वारेण विविध मनेकप्रकारम् 'आ चष्टे'; उभे अपि ह्येते श्रुतिस्मृती मन्त्रादिद्वारेण आदित्यान्तरपुरुषप्रभवे एव, अत इदं मुक्तं सवितैवैतन्मम विचष्ट इति॥

"एवम्" अनेन प्रकारेण "उच्चावचैरभिप्रायैः" बहुभिः, अथ वा प्रकृष्टाप्रकृष्टमध्यमैः मन्त्राभिव्यक्तिनिदानभूतैः "ऋषीणां" "मन्त्रदृश्यः" मन्त्रदर्शनानि "भवन्ति"; विद्यमानाना मेव हि मन्त्राणा मृषयो येन केन चिन्निमित्तेन निदानभूतेन निन्दा-हर्ष-शोक-प्रशंसादिना मन्त्राणां द्रष्टारो भवन्ति; न तु कर्त्तार इत्य-भिप्रायः। तदप्यार्षानुक्रमण्यां निदान मार्षं च उभय मुपेक्षितव्यम्; परिज्ञातार्षनिदानो हि सुख मनेकविषयं मन्त्रार्थ मवबोद्धुं शक्नोतीति। तदेत दिह लक्षणोद्देशतो भाष्यकारेण प्रदर्शितम्* ॥ ३ ॥

**तद्येऽनादिष्टदेवता मन्त्रास्तेषु देवतोपपरीक्षा यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्त्यथान्यच**

* मन्त्राणां तात्पर्य्यानेकत्वे च हेतुः प्रदर्शितः; यदि हि एक एव द्रष्टा एक मेवार्थ मुद्दिश्य सर्वान् मन्त्रान् प्रणयेयुः, तर्हि सर्वेऽपि मन्त्रा एकतात्पर्यकाः स्युः। न तथाच; अत्र तु बहना ऋषीणां बहूनर्थान् साधयितुं बहुमन्त्रदर्शनानि सम्पन्नानि अत एव सर्वेषां मन्त्राणां नैकविध्य मिति मन्त्राणां तात्पर्यवैविध्ये हेतुप्रदर्शनम्।

यज्ञात् प्राजापत्या इति याज्ञिका नाराशंसा इति नैरुक्ता अपि वा सा कामदेवता स्यात्प्रायोदेवता वास्ति ह्याचारो बहुलं लोके देवदेवत्य मतिथिदेवत्यं पितृदेवत्यं याज्ञदैवतो मन्त्र इत्यपि ह्यदेवता देवतावत् स्तूयन्ते यथाश्वप्रभृतीन्योषधिपर्यन्तानि ॥ ४* ॥

"तद् ये अनादिष्टदेवता मन्त्राः"। दृष्टैतदुक्तम्;—"यत्कामा ऋषिर्यस्यां देवतायां मार्थपत्य मिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति"—इति †। तदेतद् प्रकटदेवतालक्षणेषु मन्त्रेषु मन्त्रदेवतालक्षण मुपपद्यते; ये त्वनादिष्टदेवतालिङ्गा मन्त्राः, तेषु देवता कथ मन्वेष्याः? इति तदेतद् विचार्यत इत्युपयुक्तस्तच्छब्दः। ये अनादिष्टदेवतालिङ्गा मन्त्राः, "तेषु" "देवतोपपरीक्षा" देवताया अतः परं परीक्षा ‡ उपपत्तितो वर्त्तिष्यत इति वाक्यशेषः।

"यद्दैवतः स यज्ञो वा यज्ञाङ्गं वा, तद्दैवता भवन्ति"। यद्दैवतः स यज्ञो यस्मिन् यज्ञे ते अनाविष्कृतदेवतालिङ्गा मन्त्रा विनियुज्यन्ते, तद्दैवता एव हि ते भवन्ति। तद्यथा,—"आग्नेयो ऽग्निष्टोमः"—इति श्रूयते §, तत्र योऽनाविष्कृतदेवतालिङ्गो मन्त्रः स्यात्, स आग्नेय एव स्यात्; प्रकरणाद्धि सन्दिग्धदेवतेषु देवतानियम

---

* नाच खण्डसमाप्तिः ङ-च-पुस्तकयोः।

† पृ० १८५ पृ० ८ पं०।

‡ 'तेषु देवता उन्नीयाः, अतः परं परीक्षा' घ।

§ "स वा एषोऽग्निरेव यदग्निष्टोमस्तं यदस्तुवंस्तस्मादग्निष्टोमस्य अग्निष्टोमं सन्त मग्निष्टोम मित्याचक्षते"—इत्येवमादि ऐ० ब्रा० २, ४, ५।

इति न्यायः। "यज्ञाङ्गं वा"। प्रातःसवने यो विनियुज्यते स आग्नेयः, यो माध्यन्दिने स ऐन्द्रः, यस्तृतीयसवने स आदित्यः *।

आह,—"अथ अन्यत्र यज्ञात्" कथं मन्त्रेषु देवतापरिज्ञानमिति अथ पुनरन्यत्र यज्ञाद् ये वर्त्तन्ते, येषां सुच्छन्नप्रयोगः; "उच्छन्नयज्ञो वा एषः"—इत्युच्छन्नता मपि दर्शयत्येव ब्राह्मणम्। तेषूच्छन्नप्रकरणप्रयोगेषु वाचस्तोमप्रयोगविनियोगकल्पेषु,—"किं ब्राह्मणस्य पितरं पृच्छसि किन्नु मातरम्। श्रुतविदस्मिन् वेद्यं स पितामहः॥"—इत्येवमादिषु कथं मन्त्रेष्वा देवता? इति। शृणु,—"प्राजापत्याः" ते मन्त्राः "इति याज्ञिकाः" मन्यन्ते। किं कारणम्? अनिरुक्तो हि प्रजापतिः; अनिरुक्तदेवतालिङ्गाश्च मन्त्रा इत्येतस्मात्सामान्यात्। "नाराशंसाः" ते "इति नैरुक्ताः" मन्यन्ते। नराशंसोऽग्निर्यज्ञो वा। वक्ष्यति हि,—"यज्ञ इति कात्थक्यः अग्निरिति शाकपूणिः"—इति †। यज्ञशब्देन च विष्णुरुच्यते "विष्णुर्वै यज्ञः" इति ह विज्ञायते ‡। "अग्निर्हि भूयिष्ठभाग् देवतानाम्"—इति §, अतोऽनाविष्कृतदेवतालिङ्गो मन्त्र आग्नेयः स्यात्। सर्वदेवताश्रयणाच्च "अग्निर्वै सर्वा देवताः" अत्र वै सर्वा वसति देवतेति ह विज्ञायते ‖। यस्मिन्नपि पदे नाराशंसो यज्ञः, तस्मिन्नपि

---

* ऐ० ब्रा० १प० ४ख० ८खण्डे, २प० १ख० १खण्डे च द्रष्टव्यम्।
† इहैव काण्डे परस्तात् ८, १, १।
‡ ऐ० ब्रा० १प० २ख० ४ख०।
§ ऐ० ब्रा० १प० ५ख० १खण्डप्रभृतिषु द्रष्टव्यम्।
‖ ऐ० ब्रा० १प० १ख० १ख०।

पत्ते यज्ञप्रभवत्वादस्य* जगतो यज्ञस्य श्रैष्ठ्यम्; अपरिग्रहश्च श्रेष्ठगामीति न्यायः। के चित्तु 'येन नराः प्रशस्यन्ते, स नाराशंसो मन्त्रः' —इति पश्यन्तो मनुष्यस्तुतयस्ता इत्येवं मन्यन्ते। तदुक्तम्; न हि मनुष्याणा मनाविष्कृतलिङ्गैर्मन्त्रै स्तुतिरुपपद्यते, दुर्बोधत्वात् तेषा मल्पबुद्धित्वाच्च मनुष्याणा मिति॥

"अपि वा सा कामदेवना स्यात्"। अपि वैव मन्यथा स्यात् सा ऋक्, स मन्त्रः, योऽनाविष्कृतलिङ्गः, स कामदेवतः स्यात्; कामतो हीच्छातस्तस्मिन् देवता कल्पयितव्येत्यभिप्रायः। किं कारणम्? गुणपदमयो हि सः; न हि तत्र देवतासंविज्ञानपदम् अन्यतमदेवताविशेषप्रख्यापक मस्ति, यतो विशेषात् कस्याश्चिदेकस्या देवताया मन्याभ्यो व्यावृत्त्यावतिष्ठेत, गुणपदानाञ्च सर्वेषां सर्वदेवनाश्रयत्वादैश्वर्ययोगात् सर्वासां देवताना मिति।

"प्रायोदेवता वा" तस्मिन् मन्त्रे स्यादिति वाक्यशेषः। प्राय इति ह्यधिकार उच्यते। यद्देवताधिकारे ह्यध्ययनपाठानुक्रमे योऽनाविष्कृतदेवतालिङ्गो मन्त्रो भवति, स तद्देवत एवेति बोद्धव्यम्। तद्यथा,—अग्न्यधिकारे वर्त्तमाने आग्नेय एव मन्त्रो भवति, इन्द्राधिकारे चैन्द्र एवेति। अथ वा प्राय इति बाहुल्य मुच्यते। तद्यथा,—अनृतप्रायो देवदत्त इत्युक्ते अनृतबहुल एवेति गम्यते। एव मिहापि प्रायोदेवतेत्युक्ते बहुलदेवतेति स्यात्। किं कारणम्?

* "प्रजापतिर्यज्ञ मसृजत, यज्ञं सृष्ट मनु ब्रह्मर्चे व्यसृज्येताम्"—इत्यादि, "प्रजापतिरकामयत प्रजायेय भूयान्त्सा मिति, स तपोऽतप्यत, स तपस्तप्त्वेमाल्लोकानसृजत पृथिवी मन्तरिक्षं दिवम्। * * *। योऽसौ तपति, स प्रजापतिः यज्ञ मतनुत"—इत्यादि च ऐ० ब्रा० ७, ४, १.—५, ५, ७।

"अस्ति ह्याचारो बहुलं लोके" अस्ति हीयं लोके बहुलस्य भूयस्त्वेन प्रसिद्धिः। निर्दिष्टेभ्यो द्रव्येभ्यो यदन्यदवशिष्यते, तत् साधारणं भवति। तद्यथा, कश्चित् निर्दिशति,—इदं मे "देवदेवत्यं" द्रव्यम्, इदं मे "अतिथिदेवत्यम्", इदं मे "पितृदेवत्यम्"—इति। तत्रैवं निर्दिष्टे ततो राशेर्यदन्यदवशिष्यते, तद्देवपितृमनुष्याणां साधारणं भवति। तथा चरुनिर्वपणकर्मणि इदं देवतानामिति निरुप्तमभिमृशेदं नः सहेति शेष मभिमृशति सर्वसाधारणत्वप्रख्यापनार्थम्, एव मिहाप्यादिष्टदेवतालिङ्गान्मन्त्रराशेर्योऽन्योऽनादिष्टदेवतालिङ्गो मन्त्रराशिः स्यात्, सर्वसाधारणत्वाद् बहुदेवतो वैश्वदेवः स्यादिति॥

आह,—कः पुनरेतस्मिन् विचारे निश्चयः? उच्यते,—"याज्ञदैवतो मन्त्रः" योऽनाविष्कृतदेवतालिङ्गो मन्त्रः स याज्ञो वा स्याद् दैवतो वा। "विष्णुर्वै यज्ञः"—इति* ह विज्ञायते। विष्णुः पुनरादित्य एव नैरुक्तानाम्, द्युस्थाने समाम्नानात्; "यच्च किञ्चित् प्रवल्हित मादित्यकर्मैव तत्"— इति हि वक्ष्यति†। तस्मादादित्यदेवतः स मन्त्रः, इति स्यात्। अथ वा दैवतः स मन्त्रः, देवता अस्मिन् देवतेति दैवतः; अविशिष्टं हि देवतात्व मग्नावेवं सर्वदेवताभिवादात् "अग्निर्वै सर्वा देवताः"—इति‡ ह विज्ञायते, "अग्निर्वै देवतानां भूयिष्ठभाग्"—इति§ च। 'अपरिग्रहं च प्रधानगामि'—इति न्यायः;

---

* ऐ० ब्रा० १प० ३ख० ४ख०।
† परस्मादिदैवाध्याये २पा० ४ख०।
‡ ऐ० ब्रा० १प० १ख० १ख०।
§ ऐ० ब्रा० १प० ५ख० १खण्डप्रभृतिषु द्रष्टव्यम्।

तस्मादाग्नेयः स मन्त्रः स्यादिति ॥ तद्यदुपोद्घात उक्तम् "नाराशंसा इति नैरुक्ताः"—इति, तदेव कात्यक्य-शाकपूणि-मतेनावधृतं यज्ञोऽग्निर्वेति ; तौ हि नैरुक्ताविति ॥

"यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति"—इत्येवमादीना मपरो व्याख्यामार्गः ।—'यद्दैवतः स यज्ञः' यद्देवतं प्रधानं हविः; तद्यथा,—प्रकृतावैन्द्रं सान्नाय्यं माहेन्द्रं वा, तत्संस्कारपरा दृषेत्वादयः (य०वा०सं०१,१.), तेनाविष्कृतदेवतालिङ्गा ऐन्द्रा एव भवन्ति, माहेन्द्रा वा। यद्देवते चाधिकारे चोदकेन प्रदिश्यन्ते, तद्देवता एव भवन्ति। तद्यथा,—कुविदङ्गेति प्राजापत्यग्रहणे विनियोगात् प्राजापत्य एव भवति *। यज्ञाङ्गं वेत्याघाराद्यभिप्रायेण। "ऋषभोऽसि शाक्करः"—इत्यनाविष्कृतदेवतालिङ्गः पूर्णस्रुचासादनमन्त्रः, स चैं विनियोगात्, तस्य च प्राजापत्यत्वात् प्राजापत्यः ॥

"अथान्यत्र यज्ञात्"। कान्यत्र यज्ञात् कर्मणो मन्त्राणां विनियोगः ? उपाकरण-ब्रह्मयज्ञ-जप-प्रायश्चित्तेषु नैष्ठिक-ब्रह्मचारिणश्च। 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण † याजयति वाध्यापयति वा स्थाणुं वर्च्छति, गर्त्तं वा पतति, प्रवाहीयते, * * * यातयामान्यस्य छन्दांसि भवन्ति'-इति‡ प्रत्यवायश्रवणात् सर्वत्रान्वेष्या § देवतेत्यारभ्य सथान्यत्र यज्ञादिति ॥

---

* "कुविदङ्ग नमसा"—इति ऋ० सं० ७, ९१, १। "कुविदङ्ग प्रति"—इति ऋ० सं० १०, ९४, १२। "कुविदङ्ग यवमन्तो"—इति ऋ० सं० १०, १३१, ९; य० वा० सं० १०, २२; १९, ९; २३, ३८।

† 'ऋविदार्षेयच्छन्दोदैवतमन्त्रेण'—इति ग, घ।

‡ सा० वे० ब्रा० ब्रा० १५० १ख०।

§ सर्वत्र पर्येष्या' ग, घ।

"प्राजापत्या इति याज्ञिकाः"। प्रजापतिस्तेषूपाकरणादिकर्मस्वपास्य इति याज्ञिका मन्यन्ते; स ह्यनिरुक्त इत्यनिरुक्तासामान्यात्। "नाराशंसा इति नैरुक्ताः" सौर्या वा आग्नेया वेति। "अपि वा सा कामदेवता स्यात्" अनाविष्कृतदेवतालिङ्गे मन्त्रे या विचार्यते देवता, कास्मिन् देवता स्यात्? इति, सा कामतः कल्प्या; इच्छात इत्यर्थः। गुणपदमयत्वात् तस्य। न मन्त्रवाक्यसामर्थ्याद् देवता नियम्यते तच; किन्तर्हि? प्रयोक्तुरिच्छासामर्थ्यात्। अथ वा प्रयोक्ता यत्कामस्तं मन्त्रं प्रयुङ्क्ते, तस्य कामस्य या देवता अधिपतिः, ता मेव तस्मिन्नभिसन्दधीत। "प्रायो देवता वा" समान मेव पूर्वेण *।

"अपि ह्यदेवता देवतावत् स्तूयन्ते"। "यत्काम ऋषिर्यस्यां देवतायां मार्थपत्य मिच्छन् स्तुतिं प्रयुङ्क्ते"—इति मन्त्रदेवतालक्षणमुक्तम्, तदुपपद्यते देवाना मार्थपत्यसम्बन्धात्; अनाविष्कृतदेवतेष्वपि संविज्ञातपदाभावात् कल्प्यते देवता कामस्य अधिपतिरपि। यत्र तु स्फुटम् अदेवता देवतावत् स्तूयन्ते ननु तत्रैतल्लक्षणं व्याहन्यते? तद्यथा,—"अश्वप्रभृतीन्योषधिपर्यन्तानि"†। एतस्मिन् वर्गे कानि चित् सत्त्वानि, कानि चिद् द्रव्याणि; अश्वादीनि सत्त्वानि,

---

* पु० १०७ उ० १ पं०।—। अत्रोच्यते नैतद्ग्रन्थस्यैष निष्कर्षोऽर्थः,—यद्यादन्यत्र उपाकरणादौ यज्ञयज्ञादिविहितानां मन्त्राणां सर्वेषा मेव प्रजापतिर्देवतेति याज्ञिकमतम्; नैरुक्तानां न च तत्रास्ति सम्मतिः; नैरुक्तमते तु क्वचित् (यत्र नरशंसा अर्थतो गम्यते तत्र) नाराशंसाः, क्वचित् कामदेवताः, क्वचिच्च प्रायोदेवताः प्रकरणानुसारतः विचारय इति।

† १भा० ४९४-४९५ उ०, ५, १, १—११।

अन्नादीनि द्रव्याणि। तानि च पुनरासन्न मर्थं चेतयन्ते; नातीतम्, नानागतम् इति; आत्मनो ऽपि च हिताहितं न प्रतिपद्यन्ते। तानि कथ मभिष्टुतानि, स्तोतुरभिमतस्यार्थस्य पतित्वं करिष्यन्ति? न हि तानि स्तुतिनिन्दे विशेषतो विदुः। अपिचान्नादिषु चितिरपि* काचिदस्ति, न त्वन्नादिष्वसावस्ति ॥ ४ ॥

अथाप्यष्टौ द्वन्द्वानि स न मन्येतागन्तूनिवार्थान्† देवतानां प्रत्यक्षदृश्य मेतद्भवति माहाभाग्याद् देवताया एक आत्मा बहुधा स्तूयत एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्त्यपि च सत्त्वानां प्रकृतिभूमभिर्कषय स्तुवन्तीत्याहुः प्रकृतिसार्वनाम्न्याच्चेतरेतरजन्मानो भवन्तीतरेतरप्रकृतयः कर्म्मजन्मान आत्मजन्मान आत्मैवैषां रथो भवत्यात्माश्च आत्मायुध मात्मेषव आत्मा सर्वं देवस्यदेवस्य‡ ॥ ५ (४) ॥

॥ इति सप्तमाध्यायस्य प्रथमः पादः§ ॥ ७. १.

॥तस्मात् "सः" शिष्यः मेधावी "न मन्येत" न जानीयात्,—

---

* "चित्तिरपि"—इति ख-पाठः।

† "मन्यतागन्तूनिवार्थानां" क, ख, ग।

‡ देवस्येत्यस्य द्विर्वचनं न दृश्यते ङ-च-पुस्तकयोः।

§ नाच पादसमाप्तिः क-पुस्तके। ङ-च-पुस्तकयोस्तु पादनियमो नैव।

॥ मूलोक्ता मष्टौ द्वन्द्वानीत्यव्याख्यात मेव स्थितम्। अष्टौ च तानि 'उलूखलमुसले"—इत्यादीनि १भा० ५, ६, १९—२१ द्रष्टव्यानि।

सम्यगविरुद्ध मेतल्लक्ष्येण लक्षण मुच्यत इति। अपि च सुतरां न मन्येत,—"आगन्तूनिवार्थान् देवतानाम्" मन्यमानः। लोके तावदेते मनुष्याणा मनित्याना मश्वादयो ऽर्थाः, आगन्तवः अपायिनश्चानित्याः। तद्यदि देवताना मप्येव मेव, ततस्तासां तेषां चानित्यत्वात् स्तुतिरनर्थिका। अपि च "प्रत्यक्षदृश्य मेतद् भवति" प्रत्यक्ष एवैतद् दृश्यते। यथा—उपकरण मश्वादयः, उपकर्त्तव्या मनुष्याः। देवताना मपि चेन्द्राग्निसूर्य्यप्रभृतीना मुपकरणं हरिरोहिद्धरित्प्रभृतयोऽश्वाः। तस्मादुभयेषा मुपकरणोपकर्त्तव्यतासामान्यात् मनुष्याश्ववदनित्यत्व मिति युक्तम्।

यत् स ग्रिष्यो न मन्यते नैतत् सम्यग् विधीयत इति, तस्मात् प्रतिसमाधातव्य मित्युपोद्घात्य उत्तर मुच्यते *;—"माहाभाग्यात् देवतायाः एक आत्मा बहुधा स्तूयते" यस्मात्, तस्मात् सर्व मेतत् सम्यगिति। भज्यत इति भागः सेव्यत इत्यर्थः। तत् पुनरैश्वर्यं महत्। "अणिमा महिमा लघिमा प्राप्तिः प्राकाम्य मेव च। ईशित्वं च वशित्वं च यत्र कामावसायिता † ॥"—इत्येव मनेन महदैश्वर्येण भज्यते। महदेतदैश्वर्यं भजत इति वा महाभागा देवता, तद्भावो माहाभाग्यम, तस्माद् माहाभाग्याद्धेतोरेकोऽपि सन् देवतात्मा बहुधा स्तूयते, प्रकृतिभेदेन वा अप्रकृतिभेदेन वा वर्द्धमानः; निगमोऽपि हि भवत्यैश्वर्यप्रख्यापकः;—"रूपं रूपं मघवा बोभ-

---

* "प्रतिसमाधातव्य मेतदिति उत्तर मुच्यते"—इति ख, ग।

† "विभूतिर्भूतिरैश्वर्य मणिमादिक मष्टधा"—इत्यमरः (१।६८)। पातञ्जलीययोगशास्त्रस्य विभूतिनाम-तृतीयपादे "ततोऽणिमादिप्रादुर्भावः"—इत्यादिके पञ्चचत्वारिंशत्तमे सूत्रे, राजमार्त्तण्डादिषु चैतद्विवरणं विशेषतो द्रष्टव्यम्।

वीति"—इति *। यथा यथा च लक्ष्यं तथा लक्षणं प्रवर्त्तयितु मर्हति, दृष्टानुविधानाच्छन्दसः; छन्दसि हि लक्ष्ये यावदभिधानं देवतानानात्वविधिव्यवस्था। संवादसूक्तानि च कयाशुभादीनि † इन्द्रमरुदादिसंवादव्यपदेशहेतुना गमयन्ति, तदशक्य मपामितुम्। तथा चिह्नानानां यान्यसङ्करवर्त्तीनि हविर्वहनरसादानलक्षणान्यग्नीन्द्रसूर्याणां कर्माणि लिङ्गान्यर्थदर्शनहेतूपबृंहितानि चित्वं गमयन्ति ‡, तदपि चाशक्य मपासितुम्। तथाचैकात्म्य मिन्द्रं मित्रं वरुण मग्नि मित्यादयो गमयन्ति निगमाः §, तदप्यशक्य मपासितुम्। चिच्वपि चैतेषु पक्षेषु ऐश्वर्य मपरिहीणं देवतायाः। तत्रैवं सत्यैकात्म्यं तावदाश्रित्य प्रतिसमाधानम्।—

"एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति"। माहाभाग्यादेकस्य देवतात्मनः प्रकृतिभेदेन चाप्रकृतिभेदेन चेति। चेतनाचेतनविकरणधर्मित्वादात्मानं॥ विकुर्वतोऽस्य अन्ये देवाः प्रत्यङ्गानि भवन्ति। अग्नीन्द्रसूर्याणां परस्परापेक्ष मन्यत्वम्; अनन्यत्वं त्वेकेन देवतात्मना सह। यथा घटादीनां मृदा; न ह्यङ्गिन

---

* "रूपं रूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं परि स्वाम्। त्रिर्यद्दिवः परिमुहूर्त्त मागात् स्वैर्मन्त्रैरनृतुपा ऋतावा॥"—इति ऋ० सं० ३, ३, २०, ३। "इन्द्रो मायाभिः पुरुरूपः"—इत्यपि द्रष्टव्यः। ऋ० सं० ४, ७, २३, ३।

† ऋग्वेदीयप्रथममण्डलस्य त्रयोविंशेऽनुवाके पञ्चदश सूक्तानि। तत्र कयाशुभीयं नाम पञ्चदशर्चं मार्च्यं सूक्तम्। अत्रेन्द्रामरुत्यमरुतां संवादः प्रतिपाद्यते। एतत्सूक्तस्य ऋक् कया शुभा सवयसः इति १, १२, १, १।

‡ यास्कोऽत्रैवानुपद मेव स्वयं वक्ष्यति।

§ "इन्द्रं मित्रं वरुण मग्नि माहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वान माहुः॥"—इति ऋ० सं० १, १, ११, ९।

॥ "चेतनविकरणधर्मित्वात्"—इति ख, ग।

मङ्गान्यतिरिच्यन्ते, भेदेनाग्रहणात्। न चाङ्गान्यनपेक्ष्य प्रत्यङ्गानि भवन्ति; न ह्यधिष्ठान मनपेक्ष्य प्रत्यधिष्ठानं नाम भवति। तस्मादग्नीन्द्रसूर्यात्मकस्य देवतात्मनोऽङ्गानि,— जातवेदो-वायु-भग-प्रभृतीनि *, शकुन्यश्वप्रभृतयश्च प्रत्यङ्गानि †। स एष महानात्मा अग्नीन्द्रसूर्याद्यङ्गप्रत्यङ्गभावेन व्यूह मनुभवन् एकोऽपि सन् बहुधा स्तूयते॥

"अपि च" एवं कृत्वा "सत्त्वानाम्" अश्वादीनां "प्रकृतिभूमभिः ऋषयः स्तुवन्तीत्याहः"। प्रक्रियन्ते अस्यां सर्वे विकारा इति प्रकृतिः; स सत्तालक्षणो महानात्मा हिरण्यगर्भ इति।वक्ष्यति हि,—"स एष महानात्मा सत्तालक्षणः, तत् परम्, तद् ब्रह्म ०——० स भूतात्मा, सैषा भूतप्रकृतिः"—इति ‡। तस्या भूमा बहुत्वम्; अनेकधा विपरिणामः स्थावरजङ्गमभावेन। प्रकृतेर्भूमानि बहुत्वानि यानि सत्त्वानां तैरनन्यविषयत्वं पश्यन्तः कार्यकारणयोरनन्यत्वात् कारण-महिमभिः तान्यश्वादीन्यभिष्टुवन्तीत्याहुरात्मविदः। तद्यथा,— "द्यौस्ते पृष्ठं पृथिवी शरीरं मात्मान्तरिक्षम्"—इत्येवमादीनि §। आत्मैव सर्वं स्थावरजङ्गम मित्यवेत्य अश्वमेधे 'मूलेभ्यः स्वाहा, शाखाभ्यः स्वाहा'—इत्येवमादिभिस्तेन तेन वैशेषिकेण स्थावरजङ्ग-मात्मना प्रकृतेरभिन्नेनावस्थानेनावस्थितो महानेवात्मेज्यते; न ह्यदेवता याग मर्हति। यावच्चान्यदपि किञ्चिदेवम्प्रकार मदे-

---

*,† १भा० ५अ० १—९ खण्डे द्रष्टव्यानि; इह चोपरिष्टात्।

‡ य० १२अ० १पा० १ख०।

§ य० वा० सं० ११, १०। "पृथिवी सुधस्थे"—इत्येव तच्छाखापाठः।

वताभिमत मिष्यते। गह्वे च वलिप्रभृतिकर्मादौ* सर्वत्र स एवेत्युपेक्ष्यम्॥

"प्रकृतिसार्वनाम्न्याच्च" एतदुपपन्नम्; नैताः (अदेवताः†) देवतावत् स्तूयन्ते, किन्तु महानेवाय मात्मा विश्वरूपः स्तूयत इति। प्रकृति-सार्वनाम्न्यादिति। नतिमात्रं नाम, नामनं सञ्ज्ञा‡ सर्वत्वेन नाम सर्वनाम, (प्रकृतेः सर्वनाम प्रकृतिसर्वनाम, तद्भावः प्रकृतिसार्व-नाम्नम्, तस्मात् प्रकृतिसार्वनाम्न्यात् हेतोः। यस्मात् महाभाग्ययुक्ता देवता, §) प्रकृतिः; यस्माच्च सर्वत्वेन नता, तस्माद्धेतोर्नैताः (अदे-वताः॥) देवतावत् स्तूयन्ते।

अपि चैतदभिहितम्,—'आगन्नूनिवार्थान् मन्यमानो हरिरो-हिद्धरितादीनिन्द्रादीनां मनुष्याश्ववदनित्यत्व मवेत्य न सम्यगभि-धीयत इति स न मन्येत'—इति¶। अत्र ब्रूमः,—मनुष्यधर्मविपरीतो हि देवताधर्मः, अनैश्वर्यान्मनुष्याणा मैश्वर्य्याच्च देवतानाम्। तत् कथम्? इति। अतो भेद माश्रित्य प्रतिसमाधीयते;—"इतरेतर-जन्मानो भवन्ति"। इतरेतर-प्रकृतयो देवाः, ऐश्वर्यात्; न मनुष्याणा मियं शक्तिरस्ति, अनैश्वर्यात्। मनुष्याणां हि पिता, पुत्रं जनयतीति पिता प्रकृतिः; न पुनरिच्छन्नपि पुत्रः पितरं जनयति। देवानां त्वग्नेः सूर्यो ऽजायत;—"एष प्रातः प्रसुवति"—इति ह विज्ञायते,

---

* "अथापरान् वलीन्०—०प्रथमो वलिर्भवत्योषधिवनस्पतिभ्यः (गो० ग्र० १प्र० ४ख० ९सू०)"—इत्येवमादावित्यर्थः।

† "नतिमात्रं नामनं संज्ञा"—इति घ।

‡, §, ॥ नैतेऽंशाः ख-ग-पुस्तकयोर्दृश्यन्ते।

¶ प० ३१२ ष्ट० १५ पं०—३१४ ष्ट० ९ पं०।

तस्मात् सूर्यस्याग्निः प्रकृतिः*। सूर्याच्चाग्निः सायं जायते, तस्मादग्नेः सूर्यः प्रकृतिः†। अदितेर्दक्षो दक्षाच्च अदितिरिति। अथाध्यात्मेऽपि;—कोष्ठ्यादग्नेर्नाद इन्द्रः, बलादिन्द्रान्मथ्यमानः अग्निरित्येवमादि‡। स एष सर्वथाप्यचिन्त्यो देवताधर्मः। तासा मानन्त्यान्महाभाग्यस्य। तचैवं सत्यशक्य मध्यवसातुम्,—यथा मनुष्याणा मागन्तवोऽस्यादयस्तथैव देवताना मपीति। तस्माद् दोषानुपपत्तिरनागन्तुत्वाद् देवास्यादीना मिति॥

अथ किमर्थ मीश्वराः सन्तो देवता जायन्ते? इति,—"कर्मजन्मानः" कर्मफलसिद्धये लोकस्य अग्नि-वायु-सूर्या जायन्ते; न ह्येतेभ्य ऋते लोकस्य कर्मफलसिद्धिः स्यात्—विद्यमान मपि चैश्वर्यं मैश्वर्यवति न प्रख्याति मियात्, ईप्सितव्य मर्थ मप्रतीत्य§। तस्मादैश्वर्यप्रख्यापनाय जायन्ते॥।

कर्मफलसिद्धै लोक मनुजिघृक्षन्तः कुतः पुनर्जायन्ते?—"आत्मजन्मानः" योऽसावेक आत्मा बहुधा स्तूयत इत्युपात्तः, सर्वमूर्त्तिस्थितौ उपरतसर्वमूर्त्तिः; प्रलये भावाख्यः सन्मात्रः, सर्गकाले षोढात्मानं

---

* "अग्निर्वैश्वानरः प्राविशत्, तस्य यद्रेतसः प्रथम मुददीप्यत, तदसावादित्योऽभवत्"—इति ऐ० ब्रा० १,१,१०। "अग्नेर्वा आदित्यो जायते"—इति च ऐ० ब्रा० ८, ५, ५।

† "उद्यन्वै खलु वा"—इत्यादितैत्तिरीयकं द्रष्टव्यम्(५, ५, १)। "आदित्यो वा अस्तं यन्नग्नि मनुप्रविशति"—इति च ऐ० ब्रा० ८, ५, ५।

‡ "बलान्मथ्यमानोऽधिजायते"—इत्यादितैत्तिरीयकं च द्रष्टव्यम्(८, ५, ५)।

§ "ईप्सितव्य मर्थप्रतीत्या"—इति ख, ग।

॥ अपिचेत्यादि-कर्मजन्मान इत्यन्तस्य यास्कीयग्रन्थस्य प्रकृतिवादे तात्पर्य मिति दुर्गाचार्यैरिदं व्याख्यानं नाङ्गीकारम्।

विभज्य जगद्भावं बिभर्त्ति*, तस्माज्जायन्त इत्यात्मजन्मानः। क एव तस्मान्न जायते? इति चेत्, सत्यम्! सर्वं तस्माद् जायते न कामकारेण, देवास्तु त आत्मानं पश्यन्तो योगेन ततः कामकारतो जायन्ते। किं मेषां जन्म? यदेषा मिच्छतां सङ्कल्पानुविधायिकर्मानुरूपं यथाकाल मात्मनः कार्यकारण मुत्पद्यते, तदेतेषां जन्म; तदनीश्वराणां नास्ति † ॥

यतश्चेश्वरास्ते तस्मादात्मनस्तत्सङ्कल्पानुविधायित्वात् "आत्मैवैषां रथः भवति, आत्मा अश्वः, आत्मा आयुधम्, आत्मा इषवः, आत्मा सर्वं देवस्य" । तच्च यदुक्तम्,—'अश्वादीनि सत्त्वानि, अक्षरथप्रभृतीनि च द्रव्याणि अदेवताः'—इति ‡, एतदयुक्तम्। देवता एवेमाः, रथादिरूपेण हि देवतैवात्मानं विकृत्य प्रकृतिभेदेन रथादिसाध्य मर्थं साधयति। सा तद्रूपा सती रथादिस्तुत्या स्तूयते, सा च स्तुतिः समवेत मर्थं माशासितं स्तोतुस्तेनैव रूपेण साधयितु मल मिति§ ॥

तस्मात् "माहाभाग्यादेकैकस्या अपि बह्वनि नामधेयानि॥" तासा

---

* अस्ति विपरिणमते इत्यादयः षट् भावाः २भा० ३४पृ० १पं० द्रष्टव्याः।

† सर्वं व्याख्यान मेत दसङ्गतम्, याज्ञवल्क्यवचनतात्पर्यविरोधात्; न हि कश्चिदपि पदार्थः आत्मवादिना मनात्मदर्शनसम्भवः।

‡ पु० ३१२पृ० ११पं०—३१३पृ० ५पं०।

§ इदमपि व्याख्यानं तथैव। अस्माभिस्तु,—'एषाम्' आत्मवादिनां मते 'आत्मा एव रथः, आत्मा (एव) अश्वः, आत्मा (एव) आयुधम, आत्मा (एव) इषवः, सर्वम् (एतत् चराचरम्) देवस्य आत्मा (एव) भवति' न हि आत्मान मृते किञ्चिदस्तीति सर्वेषा मेव पदार्थाना मात्मत्वं तदनुगतं देवत्वं च निर्विवाद मित्यात्मदृष्ट्यात्मवादिन ऋषयो रथादीनपि स्तुतवन्त इत्यात्मवादिमतोल्लेखने एव याज्ञवल्क्यवचनतात्पर्य मिति।

‖ एतच्चानुपद मेव षष्ठे खण्डे वक्ष्यति; तेन च सङ्गतिप्रदर्शने तात्पर्यम्।

मेव तिसृणा मग्न्यादीनां माहाभाग्यादैश्वर्ययोगादात्मान मनेकधा विकुर्वतीना मेकैकस्याः प्रतिविकारं नामधेयप्रतिलम्भात् तेनैव रूपेण धारयन्त्यात्मान मिति "यत्कामश्चर्षिर्यस्यां देवतायां मार्थपत्य मिच्छन् स्तुतिं प्रयुंक्ते"—इत्यस्य* लक्षणस्याव्याघातः, तस्मात्सम्यगेवोक्त मिति। अथ वा स्तुतिसङ्क्रमन्यायेन चतुर्दैवेऽध्याये† "यज्ञसंयोगात् राजा स्तुतिं लभेत"—इत्यत्र‡ पुनः प्रतिसमाधास्यामहे ॥ ५ ॥

॥ इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य) प्रथमः पादः ॥ ७, १ ॥

---

॥ द्वितीयः पादः ॥

तिस्र एव देवता इति नैरुक्ता अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानस्तासां माहाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवन्त्यपि वा कर्मपृथक्त्वाद्यथा होताध्वर्युर्ब्रह्मोद्गातेत्यप्येकस्य सतोऽपि वा पृथगेव स्युः पृथग्घि स्तुतयो भवन्ति तथाभिधानानि यथो एतत्कर्मपृथक्त्वादिति बहवोऽपि विभज्य कर्माणि कुर्युस्तच्च संस्थानैकत्वं सम्भोगैकत्वञ्चोपेक्षितव्यं यथा पृथिव्यां मनुष्याः पशवो देवा इति

---

* पृ० २८५ ४० ८वं०।

† चतुर्दैवेऽध्याये = यास्कीयनैरुक्तनवमे इति बोध्यम्।

‡ दृश्य परस्तात् ९, २, १ द्रष्टव्यम्।

स्थानैकत्वञ्च * सम्भोगैकत्वञ्च दृश्यते यथा पृथिव्याः पर्ज्जन्येन च वाय्वादित्याभ्यां च सम्भोगो ऽग्निना † चेतरस्य लोकस्य तचैतन्नरराष्ट्र मिव ॥ १ (५) ॥

"तिस्र एव देवता इति नैरुक्ताः"—इति उपोद्घातः। "सैषा देवतोपपरीक्षा"—इत्यधिकारे‡ वर्त्तमाने "यत्कामऋषिर्यस्याम्"—इत्येवमादि मन्त्रलक्षणदेवता मुक्तम् §, तत्पुनरदेवतात्वादश्वादीनाम् "आ नो मित्रो वरुणो अर्यमा"—इत्येवमादिषु व्याहन्यमान मपेक्ष्य "स न मन्येत"—इत्येव मादिनाचिप्ते ॥ "माहाभाग्यात् देवताया एक आत्मा बहुधा स्तूयते"—इत्येवमादिना ¶ "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्"—इत्येवमादिभ्यो** मन्त्रवाक्येभ्यः—"अथातो विभूतयोऽस्य पुरुषस्य"—इत्येवमादिभ्यश्च ब्राह्मणेभ्यः—"एष इन्द्र एष प्रजापतिः"—इत्येवमादिभ्यश्चैकात्म्ये सामर्थ्य मुन्नीयात्मवित्पचेण आत्मैवेदं सर्वम्—इत्यैकात्म्य मुक्तम् ††। आत्मविदां ह्यात्मन्युपजातविशिष्टभावनाना मात्मशरीरस्थाना मात्ममय मेवेदं सर्वं मनुपश्यता मात्मार्थः सर्वो वेदो ऽन्या च सर्वा वाक्;

---

* "स्थानैकत्वं" ङ, च।
† "सम्भोगो अग्निना" क।
‡ पु० २८५पृ० ७पं०; २८७पृ० १पं०।
§ पु० २८५पृ० ८पं०; २८०पृ० १२पं०।
‖ पु० ३१३पृ० ९पं०।
¶ पु० ३१३पृ० ७पं०।
** ऋ० सं० ८, ४, १७, १।
†† पु० ३१३पृ० १२पं० 'आत्मा सर्वं देवस्य"- इति।

न ह्यात्मनो ऽन्यद् व्यतिरिक्त मभिधेय मस्ति, स त्वशेषाद् यद-भिधान मभिदध्यात्। अथ पुनरुपक्रमः पुरुषार्थस्य,—प्रथम मनिश्रेणीफलकस्थानीयेन * केवलेनाधियज्ञेन तत्र चावधाने अधि-दैवताध्यात्मज्ञानं किञ्चिद् विदुषः पृथगात्मनो देवताः पश्यतः, परिच्छिन्नफलाभिप्रायस्याधियज्ञं प्रयुञ्जमाणस्य पूर्वजन्माविद्यावा-सितान्तःकरणस्याभिधानस्तुतिभेदाभ्यां विधिमन्त्रार्थवादविचारेण † यथायथं पृथगिव देवताः प्रकाशन्ते। तदुक्तम्,—"अथ योऽन्यां देवता मुपास्ते अन्योऽसावन्योऽह मस्मीति न स वेद"—इति। तदाहुः,—"आत्मयाजी श्रेयान् देवयाजी वा? इति, आत्मयाजीति ह ब्रूयात्" तदेवं ब्रह्म देवता-वृत्तस्य मूलम्, ऐकात्म्य मात्मविदः प्रत्यवभासते; (यावदभिधानन्तु याज्ञिकाः, प्रतिविधिमन्त्रप्रधानात्; यच्चावशिष्यते, तन्नैरुक्तात् प्रत्यवभासते ‡) अत इद मुच्यते,—"तिस्र एव देवता इति नैरुक्ताः"। तिस्र इति सङ्ख्या। एवेत्यवधारण मितरौ पक्षौ अपेक्ष्य॥

कतमास्ताः? इति,—"अग्निः पृथिवीस्थानः, वायुः वा इन्द्रः वा अन्तरिक्षस्थानः, सूर्यः द्युस्थानः"। कयोपपत्त्या त्रित्वं परिजगृहुः? स्थानभेदात्, प्रत्यक्षलिङ्गादन्यार्थदर्शनाच्च; लिङ्गं त्रिधा हि भवति,—"विश्वकर्मा ह्यजनिष्ट देव आदिद् गन्धर्वो अभवद् द्वितीयः। तृतीयः पिता जनितौषधीना मपां गर्भं व्यदधात् पुरुत्रा §॥"—इत्यत्र,

---

* "प्रथमनिश्रेणीफलकस्थानीयेन" ख. ग।

† "विधिमन्त्रार्थवादविचारेण" ख. ग।

‡ नैषोऽंशो दृश्यते क-पुस्तके।

§ ऋ० सं० य० वा० सं० १७, २१।

"अजस्य नाभावध्येकमर्पितम्*"—इत्यन्यार्थदर्शनाच्च। "प्रजापतिर्वै चीन् महिम्नोऽसृजताग्निं वायुं सूर्यम्"—इति† "प्रजापतिर्लोकानभ्यतपत् तेभ्योऽभितप्तेभ्यो रसान् प्राबृहदग्निं पृथिव्या वायु मन्तरिक्षात् सूर्यं दिवः"—इति‡ "अग्निः पृथिवीस्थानः, वायुर्वेन्द्रो वान्तरिक्षस्थानः, सूर्यो द्युस्थानः"—इति। "तिस्रः"—इति प्रकृतेः स्वरूपग्रहणात् स्थानभेदं त्रित्वे हेतु मुपमंस्तचयति। कुतो नियमः? अग्न्यादीनां पृथिव्यादिषु निगमेभ्यः;—"पृथिव्यसि जन्मना वशासाग्निं गर्भं मधत्याः, अन्तरिक्ष मसि जन्मना वशासा वायुं गर्भं मधत्याः, द्यौरसि जन्मना वशासाऽऽदित्यं गर्भं मधत्याः"—इत्येवमादिभ्यो निगमेभ्यः॥

"वायुर्वेन्द्रो वा"—इति किमेकस्य पर्यायवचनावेतौ शब्दौ, उताभिधेयौ भिद्येते? इति। कुतः सन्देहः? उभयथा हि प्रसिद्धिः;—प्रत्यभिधानञ्चार्थभेदो दृष्टः,—गौः अश्वः इति; यथाभिधानभेदेऽपि चैकार्थता दृष्टा,—हस्तः करः पाणिः इति यथा। अतो युक्तः संशय इति। याज्ञिकपक्षे तावददोषः। अर्थभेदेऽपि चैतेषां यावन्त्यभिधानानि तावत्यो देवताः, अस्य पुनराचार्यस्य स्वसिद्धान्तावलम्बिनः "तिस्र एव देवताः"—इति प्रतिज्ञावतः कुतो वाय्विन्द्रशब्दयोरर्थभेदः? भेदे हि प्रतिज्ञाहानिः स्यात्, अपि च भेदेऽभिप्रेते नैकवचनेन निरदेक्ष्यदन्तरिक्षस्थान इति; अभिधानमात्रे भिन्नेऽप्य-

---

* ऋ० सं० ८, ३, १७, ९।

† "प्रजापतिरकामयत"—इत्याद्यैतरेयकं द्रष्टव्यम् (५.५,७)।

‡ सा० छा० ब्रा० ४ प्र० १७ ख०। परमस्ति तत्र किञ्चिद् पाठभेदः।

भिधेयस्य चाभेदे अन्तरिक्ष मस्य स्थान मित्युपपत्तेः। षष्ठ्येकवचनो विशेष्योऽन्तरिक्षस्थानशब्देन विशेष्यते; इतरथा ह्यन्तरिक्षस्थानौ इत्यवक्ष्यत् द्वयोर्विशेष्ययोः। अपि च "वायुवायाहि दर्शत"—इति * वायोः प्राधान्यस्तुति मुदाहृत्य तां निरूच्य तस्यां सोमपानसम्बन्ध मुपलक्ष्य,—ऐन्द्रत्वं च सोमस्यावेत्य "अंशुरंशुष्टे"—इत्येतस्मिन्, "आ त्वा मिन्द्राय पायव", "तुभ्य मिन्द्रः पायतां"—इति † नान्यचेन्द्रशब्दात् मुख्याभिसम्बन्धिनो मध्यमात् सोमपानं सम्भवतीति प्रतीत्य ‡ वायुशब्दस्येन्द्रशब्दस्य समानार्थतां दृढ मवधार्य अमृष्यमाणो वायुशब्दस्य मध्यमार्थान्तरे वृत्ति मपर्यायशब्दवादिन माक्षिपन्नाह "क मन्यं मध्यमादेव मवक्ष्यत्"—इति §। उत्तर मपि च य मुदाजहार निगमं "तस्यैषा परा भवति"—इत्युपोद्घात्यैतदैन्द्रादेव सूक्तात् "अस्येन्द्रस्य वायोर्यथा भक्षो न विदस्येत्, तथा अत्र मेव मभिवहेयुः"—इति वायुशब्दस्येन्द्रविशेषणत्वं प्रतीत्य इन्द्रप्रधानत्वात् सूक्तस्य च इन्द्र उपात्तः ॥। तस्मादाचार्यस्य मध्यमपर्यायवचनावेतौ शब्दाविति ॥

सत्यपि तु पर्यायवचनत्वे मुख्यतरः सम्बन्धो मध्यमस्येन्द्रशब्देन, तथा वायुवरुणेन्द्रादिभिः। तत् कुतः? तथा निगमे दर्शनात्;—"सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः। स प्रथमो

---

* ऋ० सं० १, १, ७, १।—प० १०, १, १।

† य० वा० सं० ५, ७।

‡ पृ० ५९ ह० ९ ऋ० "इन्द्रः सोमस्य काणुका"—इत्यादि द्रष्टव्यम्।

§ १०, १, १। परस्तादिदैव वक्ष्यति।

॥ परस्ताद्वक्ष्यति तदनन्तरमेव १०, १, १—२। परं तत्र नैवं पाठः।

बृहस्पतिश्चिकित्वाँस्तस्मा३ इन्द्राय सुत मा जुहोत स्वाहा"—इति। सा प्रथमा संस्कृतिरित्येतस्मिञ्छुक्रामन्थिनोर्ह्वनमन्त्रे यो मध्यमो वरुणोऽपि मित्रोऽग्निः, तस्मै इन्द्राय सुतम् आ जुहोत इति वरुणादीन्यनुक्रम्य विशेषतश्चतुर्थ्यन्तेन इन्द्रशब्देन सम्प्रदानेन सम्बध्नाति तस्मै मध्यमायेन्द्रायेति, तस्मात् सम्प्रदानेन सामानाधिकरण्यात् मन्त्रान्ते मध्यमशब्देन्द्रशब्दयोर्मुख्यतरः सम्बन्ध इति गम्यते; यथा मध्यमस्य ज्योतिषो मुख्यः सम्बन्ध इन्द्रशब्देन, तथेतरयोरपि पार्थिवोत्तमयोरग्निसूर्यशब्दाभ्याम्, प्रसिद्धतरत्वात् सम्बन्धस्य, न तथेतरैर्जातवेदःप्रभृतिभिः। सति च गौणमुख्यत्वे युक्तं यदन्यभिधानेन प्रसिद्धतरसम्बन्धेन पार्थिवस्य ज्योतिष उपदेशः क्रियते, न जातवेदःप्रभृतिभिः; तथोत्तमस्य सूर्यशब्देन उपदेशः क्रियते, न सवितृ-भगप्रभृतिभिरिति॥

कस्मात् पुनर्मध्यमस्य शब्दद्वयेनोपदेशः क्रियते, पार्थिवोत्तमयोरेकैकेन? इति। मध्यमस्य हि द्वौ कर्मात्मानौ विद्युदाख्यौ। तयोरनित्यदर्शन एको विद्युदाख्यः, नित्यदर्शनस्तु वाय्वाख्यः त्वगिन्द्रियप्रत्यक्षः। तत्कथं नाम चिरेऽपि स्थानेष्वभिमानिन्यो देवताः कर्मात्मभिरवैषम्येण प्रत्यक्षत एवोपदिष्टाः स्युः? इत्यतो "वायुर्मध्यमस्थानः"—इति वाय्वाख्येन कर्मात्मना मध्यमस्थान मुद्दिश्यामुख्यत्वाद् वाय्वभिधानस्य, मुख्यत्वाच्चेन्द्राभिधानस्य "इन्द्रो वा"—इत्याह। एव मुभयं कृतं भविष्यति,—अनुपरतक्रियाव्यापारता च मध्यमस्य वाय्वाख्येन कर्मात्मना इतरज्योतिर्वद् दर्शिता भविष्यति, मुख्येन चेन्द्रशब्देन मुख्यः सम्बन्धो ऽपरिहापितो भविष्यतीत्युभय मुक्तम्,—

"वायुर्वेन्द्रो वान्तरिक्षस्थानः"—इति। न तु पार्थिवोत्तमयोर्द्वौ द्वौ कर्मात्मानौ स्तो यथा मध्यमस्थानस्य, तस्माद्दोषो मध्यमस्थाभिधान-द्वयोक्ताविति॥

आह;—यदिद मभिधानबहुत्वं जातवेदो वैश्वानर इत्येवमादि, चित्ते सत्येतत् किं कृतम्? इति। उच्यते,—"तासां महाभाग्यात् एकैकस्या अपि बह्वनि नामधेयानि भवन्ति"। तासा मेवं निर्गुणा मग्न्यादीनां महाभाग्यात् ऐश्वर्ययोगात् एकात्मान मनेकधा विकुर्वतीनाम् एकैकस्याः प्रतिविकारं जातवेदः, वैश्वानरः, वरुणः, रुद्रः, अश्विनौ, उषा इत्येवमादीनि बह्वनि नामधेयानि भवन्ति, प्रतिस्थानं स्वप्रकृत्यभेदादेकात्म्यवदेवैकत्वं न जहाति सा सा देवतेति॥

"अपि वा कर्मपृथक्त्वात्"। अपि चैवं विकरणधर्मित्वादभिन्न-प्रकृतीनां बहुनामता। अपि वा खं स्व मात्मान मविकुर्वतीना मेवा-नेककर्मयोगात् पृथक्कर्महेतुको नामधेयलाभः स्यात्। को दृष्टा-न्तः? "यथा,— होता, अध्वर्युः, ब्रह्मा, उद्गाता,—इति अपि एक-स्य सतः" कुण्डपायिना मयने। तत्र हि सप्त दीक्षन्ते, त एव च स्वयं कर्म कुर्वते; तेषां षट्, षोडशानां पर्यायेण कर्म कुर्वते, तत् कर्म कुर्वाणाः तदाख्या भवन्ति*; यथा लोके कारक-स्रावक-पाचकाद्यः। तदेतत् प्रदर्शितं भवति,— न किञ्चिदप्यत्र गौण

* यथा खल्वग्निष्टोमादौ षोडश दीक्षिता भवन्ति, षोडशानाञ्च तेषां होताध्व-र्यवोद्गात्रादीनि षोडश कार्याणि यथासङ्ख्य मुपदिश्यन्ते, नैवं कुण्डपायिना मयने; अत्र हि सप्तैव दीक्षा विधीयन्ते। तत्र यजमान एकः, अपरे षट्; त एव च षट् ऋत्विजो होतृ-पोतृ-नेष्टृादीनां सेवार्विज्यानि पर्यायेण कुर्वन्ति, तत्तत्कर्मकरणकाले च तत्तदाख्याश्च लभन्त इति।

मभिधानम्, संविज्ञानपदत्वे त्वग्न्यादीनां संज्ञाशब्दानां तेषां कारकादिशब्दैरेष विशेषो यदग्न-यनादिगुणयोगेऽप्यसति नाग्न्यादीन् जहति; कारकादिशब्दास्तु करणादियोगसमनन्तरमेव कारकादीन् जहति। एव मेतदगौणत्व मभिधानाना मपेक्ष्योक्तम्,—"अपि वा कर्मपृथक्त्वात्"—इति। अपि वैश्वर्यादुभयथापि शक्यप्रतीघात उपपद्यत एकैकस्या अपि बहुनामतेति॥

अपि वा पृथगेव स्युः पृथग्घि स्तुतयो भवन्ति"। अपि चैवं यथोक्त मेकैकस्या महाभाग्यात् कर्मपृथक्त्वाद्वा बहुनामता। अपि वा पृथक् पृथक् अत्यन्तभिन्ना एवौत्पत्तिकेन भेदेन स्युरिति याज्ञिका आहुः,—"पृथक् हि स्तुतयो भवन्ति"—इति। कुत एतत् याज्ञिका आहुः? इति। अधियज्ञे हि स्तुतिनियमो भवत्यभिधाननियमस्येति। अधियज्ञ मिति व्याख्येयम्*,—"पृथग्घि स्तुतयो भवन्ति"—इति। हीति हेतौ, यस्मात् पृथक् पृथक् अग्न्यादीनां स्तुतयो भवन्ति।—पृथगग्नेः—"अग्नि मीळे"—इत्येवमाद्याः†, पृथग् जातवेदसः—अग्निलिङ्गं सूक्तम् "प्र नूनं जातवेदसम्"—इति ‡, पृथगिन्द्रस्य—"हरिभ्याम्" §, पृथग्वायोः—"नियुद्भिः" ‖, पृथक् सूर्यस्य—हरिद्भिः ¶,

---

* इतोऽनन्तरं "यज्ञ मिति च"—इत्यधिकं ख-ग पुस्तकयोः।
† ऋ० सं० १, १, १, १।—उपरिष्टाच्च दर्शयिष्यतीत्येव ७, ४, १।
‡ ऋ० सं० ८, ८, ४९, १।—उपरिष्टाच्च दर्शयिष्यतीत्येव ७, ४, ७।
§ "हरी" १भा० १५१, १५२ पृ० (१)। ऋ० सं० १, ३, ५, १. इत्यादयः।
‖ "नियुतः" १भा० १५२, १५५ पृ० (१०)। ऋ० सं० ५, ९, १४, १. इत्यादयः।
¶ "हरितः" १भा० १५१, १५४ पृ० (३)। ऋ० सं० १, ८, ७, ४. इत्यादयः।

पूष्णोऽजाभिः *, अरूणीभिर्गोभिरुषसाम् †। स्तुतिव्यवहारे‡ च प्रायश्चित्तम्, तदनुपपन्नञ्च पर्यायवचनत्वे तेषाम्। ते वयं स्तुतिनियमात् पश्यामः पृथक् पृथगग्नि-वैश्वानरप्रभृतय इति॥

"तथाभिधानानि"। यथैव हि स्तुतिभेदात् स्तुत्यभेदः, एवमेवाभिधानभेदादभिधेयभेदोऽपि भवितु मर्हति। प्रसिद्धतरं चेदं लोके प्रत्यभिधान मर्थभेद इति, न तथैकस्यानेकाभिधानता। तस्मात् पृथग् पृथगग्निजातवेदोवैश्वानरादिशब्दाना मभिधेया इति स्थितिः। स्तुतिष्वेव हि अभिधानभेदत इति समानार्थता हेलाः? इति चेत्, न; विधावप्यभिधानेनियमदर्शनात्;—"आग्नेय मष्टाकपालं निर्वपेत्" इति§ येनैवाभिधानेन चोद्यते, तेनैव निर्वपणा दारभ्य समाप्यते, तस्मादसमानार्थतेति॥

"यथो एतत्" यत्पुनरेतदुक्तम् "कर्मपृथक्त्वादिति"। अनैकान्तिक एष दृष्टान्तः; दृष्टो हि प्रकृतिभेदात् प्रतिकर्मभेदः, सा च पृथक्त्वादिव्यवस्था माहाभाग्यादित्याचार्येणाच्च पृथक्त्वे हेतुर्न प्रयुक्तः॥, दृष्ट एव हि याज्ञिकपक्षे प्रत्यभिधान मर्थभेद इति। तत् किमेकत्वं नास्त्येव? तन्नास्ति; गुणतः॥

---

* "अजाः" १भा० १५१, १५४ पृ० (५)। ऋ० सं० १, २, १, ४. इत्यादयः।

† "अरुणी गावः" १भा० १५२, १५५ पृ० (७)। ऋ० सं० १, १, ९, १. इत्यादयः।

‡ व्यवहारोऽत्र व्यत्ययो बोध्यः। तथा चाग्निस्तुतौ जातवेदसः स्तुतिमन्त्रपाठो जातवेदसः स्तुतौ चाग्निस्तुतिपाठ इत्येवमादिः। "स्तुतिव्यत्यभिचारे"—इति ख-पाठः, "स्तुतिव्यभिचारे"—इति ग-पाठः।

§ "पुरोडाशमाग्नेयमष्टाकपालं प्रातः सवने"—इति (१, १, ५.), "अग्नयेऽग्निवतेऽष्टाकपालं पुरोडाशं निर्वपेत्"—इत्यादि च (७, १, ५—७) ऐ० ब्रा०।

॥ "हेतुर्न प्रयुक्तः," ख, ग।

कथम्? "तत्र संस्थानैकत्वं सम्भोगैकत्वं च उपेक्षितव्यम्"। तत्र तस्मिन् पृथक्त्वे सति संस्थानैकत्वं सम्भोगैकत्वं च उपपत्तित ईक्षितव्यम्। तत्र दृष्टान्तः,—"यथा पृथिव्यां मनुष्याः पशवो देवा इति स्थानैकत्वम्, सम्भोगैकत्वं च दृश्यते"। सह स्थानतया एकत्वं स्थानैकत्वम्; पृथिवीत्युक्ते यावतां सह भावेन समानं स्थानम्, ते सर्वे तद्ग्रहणेन गृह्यन्ते; एव मुत्तरयोरपि स्थानयोः। एवम्प्रकार मेकत्वं सम्भोगैकत्वं चोपेक्षितव्यम्। सम्भोगहेतुक मेकत्वं सम्भोगैकत्वम्। सम्भोगो नाम इतरेतरोपकारित्वम्, समानकार्यतेत्यर्थः। तच्च पुनर्भिन्नस्थानाना मपि भवति, कि मङ्ग पुनः समानस्थानाना मिति। "यथा पृथिव्याः पर्जन्येन च, वाय्वादित्याभ्यां च सम्भोगः"। कथम्? पृथिव्योषध्युत्पत्तौ स्वकार्यारम्भे पर्जन्यवाय्वादित्यकृत मुपकार मपेक्षते। तदुक्तम्,—"चयस्पन्ति पृथिवी मनूपाः"—इति *। "अग्निना च इतरस्य लोकस्य"। तदप्युक्तम्,—"अग्निर्वा इतो वृष्टिं समीरति, "दिव जिन्वन्त्यग्नयः"—इति † च। तदेवम्प्रकार मेकत्वं कार्यैकत्वात् स्थानैकत्वाद्वा भाक्तं न प्रतिषिध्यते, लोकेऽपि समानकार्यता भवति येषां तेषा मैक्य मित्युच्यते॥

कः पुनरत्राविरोधी भेदाभेदे दृष्टान्तः? इति। उभये हि प्रमाणं

---

* ऋ० सं० ७, ७, १९, ३। "इन्द्रस्याज्ञया पर्जन्यो वायु रादित्य इत्येते 'चयः' देवाः 'पृथिवीं' भूमिं तत्रस्था ओषधीरित्यर्थः 'तपन्ति' वृष्टिशैतोष्णैः सन्तापयन्ति। कीदृशाः? 'अनूपाः' वर्षादीना मानुपूर्व्येण वप्तारः प्रभावयितारः प्रचेतार इत्यर्थः"—इति सा० भा०।

† ऋ० सं० २, ३ २३, ५। "अग्नयः आहवनीयाद्याः खे ऊर्ध्वे 'दिवम्' आदित्यादिद्युलोकस्थान् देवान् 'जिन्वन्ति' प्रीणयन्ति"—इति सा० भा०।

भेदाभेदवादिनः—आत्मविन्नैरुक्तयाज्ञिकाः; न हि ते स्वमनीषिकया भेदाभेदौ प्रकल्पयन्ति, किन्तर्हि? मन्त्रार्थं सुदृश्य। तस्माद् वक्तव्यः समञ्जसो दृष्टान्तः? उच्यते;—"तत्र एतत् नरराष्ट्रम् इव"। यथा राष्ट्र मित्यभेदः, नरा इति भेदः; एवं पृथिव्यग्निरित्यभेदः, जातवेदा वैश्वानर इति भेदः। एव मुत्तरयोरपि स्थानयोः। तथा आत्मेत्यभेदः, लोकाश्च लोकिनश्चेति भेदः। सर्वत्रैव सामान्यविशेषधर्मौ द्रष्टव्यः। पुरुषबुद्ध्यपेक्षातश्च गुणप्रधानतोऽपेक्षा पुरुषानुरागविशेषतः॥

तत्रैवं सति आत्मविद आत्मनि चित्वनानात्वे गुणीकृत्य तदङ्गप्रत्यङ्गभावेन कल्पयित्वैक मात्मानं पश्यन्ति। तथा नानात्वैकत्वे नैरुक्ता इति चित्वे, तथा चित्वैकत्वे याज्ञिका नानात्वे। एव मेषा मविरोधः। अस्ति हि शब्दार्थयोः वक्तृ-प्रतिवक्तृवशेन तद्बुद्ध्यपेक्षया अन्वयव्यतिरेकाभ्यां वर्त्तितुं शक्तिः; न तु स्वाभाविक मभिधानाभिधेयसम्बन्ध मकृतक मप्रच्यवमानावभिधानाभिधेयौ जहीताम्; न ह्यग्नेरवभास्यं प्रत्यवभासनशक्तिः, अवभास्यस्य चावभास्यमानता शक्तिर्व्यवधानमन्तरेण विहन्यते; न ह्यकृतकं स्वय मप्यधीतको विकल्पते। वैदिकानां पदवाक्यप्रमाणाना मात्मभावानुशयवशेनात्मविन्नैरुक्तयाज्ञिका वेदस्याविपर्यासिनी मप्यध्यात्माधिदैवाधियज्ञविषयनियता मर्थाभिधानशक्तिं विपर्यासिनी मिव मन्यमाना परस्परतो विपर्यस्यन्ते। तदेतत् सर्वथापि भेदाभेदवर्त्ति देवतासतत्वं यथाग्रहं वक्तृप्रतिवक्तृवशेन प्रख्याति मुपनयत्। स्तुतिरूपकेणात्मनोऽर्थसतत्वं तथाभूतं मन्त्रैराविष्क्रियते। तदुक्तम्,—"तत्रोपमार्थेन युद्धवर्णा

भवन्ति"—इति *, दर्शितश्चैतन्मन्त्रेण,—"न त्वं युयुत्से"—इति †। निष्ठितरूपत्वेन खे खे विषयेऽध्यात्मादौ परमार्थतया ऐकात्म्ये निष्ठा, तदन्तत्वाद् वाचः। तदुक्तम्,—"यतो वाचो निवर्त्तन्ते"—इति‡॥ १॥

**अथाकारचिन्तनं देवतानां,पुरुषविधाः स्युरित्येकं चेतनावद्वद्वि स्तुतयो भवन्ति तथाभिधानान्यथापि पौरुषविधिकैरङ्गैः संस्तूयन्ते। कृधा त इन्द्र स्थविरस्य बाहू यत्सङ्गृभ्णा मघवन् काशिरित्ते। अथापि पौरुषविधिकैर्द्रव्यसंयोगैः। आ द्वाभ्यां हरिभ्या मिन्द्र याहि कल्याणीर्जाया सुरणं गृहे ते। अथापि पौरुषविधिकैः कर्मभिः। अङ्गोद्र पिब च प्रस्थितस्य। आशुकर्ण श्रुधी हवम्॥ २ (६)॥**

"अथाकारचिन्तनं देवतानाम्"। आह,— माहाभाग्याद् देवताया विकरणधर्मित्वादनियम आकारे, अथ नियमः? नन्वैश्वर्यव्याघातान्माहाभाग्याद्देवताया इत्येतद्व्याहन्यते, तस्मादथाकारचिन्तनं देवताना मित्येतदनारभ्यम्? उच्यते;— आरभ्य मेव। प्रकृतिसत्ता मनपेक्ष्य विकरणं नाम देवताधर्मो नास्ति, तस्मात् प्रकृतिश्चिन्त्यते

---

* १ भा० ११७ पृ० १ अ० ५ पा० १ ख० द्रष्टव्यम्।

† "यदचर०—०विवित्से (ऋ० सं० ८, १, १५, ६.)"—इति चोदाहृतं नचैव ११६ पृ०। तत्पूर्वञ्च (१०१ पृ० १६ पं०, १०८ पृ० १८ पं०, १०८ पृ० १५ पं०, ११३ पृ० १० पं०, ११५ पृ० १६ पं०) द्रष्टव्यम्।

‡ मै० उप० ६, ९।

देवतायाः। अपि च, यत एवेश्वरा देवास्तत एवोभयभावित्वात् किं साकारवत्त्वं स्वभावो देवतायाः अथ वा निराकारवत्त्वम्? इति सतत्त्वपरिज्ञानाय चिन्त्यते॥

अस्तु तावदियं चिन्ता; किं मिद मविशेषेण पञ्चत्रय मस्याश्चिन्ताया विषयः*, उत वा कस्मिंश्चिदेवैकस्मिन् पक्षे द्वयोर्वैतच्चिन्त्यते? इति॥

इह तावदात्मविदा मेक आत्मा स प्राग्विकारापत्तेः सन्मात्र उदस्तसर्वाकृतिः, सर्गस्थित्योरुपात्तसर्वाकृतिः; तदेव ममावनाकृतिः, सर्वाकृतिर्वा? इत्यनास्पदभूतोऽस्याश्चिन्ताया† आत्मवित्पक्षः।

अथ पुनर्यदासावुपात्तविज्ञानावस्थो नैरुक्तपक्षाभिमत मग्निवायुसूर्यभावं बिभर्त्ति, तदापि (प्रत्यक्षत्वादविषयत्व मस्याश्चिन्तायाः।‡) प्रत्यक्षत्वान्नेषा मपौरुषयविध्यस्य तत्पक्षेऽप्याकारचिन्ता विषयाभावादुदस्यत एव§।

अथ पुनर्याज्ञिकानां यावदभिधानं देवतापक्षवादिनाम्॥ अग्निवायुसूर्याभिधानानि प्रत्यक्षार्थाभिधानसम्बन्धीनि; जातवेदोरुद्रेन्द्रपर्जन्याश्विप्रभृतीन्यप्रत्यक्षार्थाभिसम्बन्धीनि; शब्दमात्रं प्रत्यक्षम्। अभिधानानां लोके दृष्ट माकृतिपदार्थवत्त्वम्, अनाकारार्थवत्त्वञ्च;

---

* आत्मवित्पक्षः, नैरुक्तपक्षः, याज्ञिकपक्षश्चेति वेदार्थविषये त्रयः पक्षा विद्यन्ते।

† "इत्यत्रास्पदभूते"—इति ख, ग।

‡ नास्त्येष पाठः ख-ग-पुस्तकयोः।

§ एवञ्च नैरुक्तमते प्रत्यक्षदृष्टाग्न्यादिनिरिक्तः कश्चनस्तदधिष्ठातृपुरुषो नास्त्येवेति सिद्धान्तः, अथ मेव च इष्टकृतिवाद इत्युच्यते।

॥ मीमांसादर्शनदर्शितमार्गस्थितानामिति यावत्।

रुद्रेन्द्रादीनां शब्दानां मन्त्रगतानां लौकिकैर्मनुष्यादिशब्दैर्वाय्वात्माकाशादिभिर्वाभिधानवत्त्वं तुल्यम्? तत्रैतद् भवति, अप्रत्यक्षत्वाद्रुद्राद्यभिधानानामर्थस्य,—किन्नु खल्वमी रुद्रादिशब्दाः मनुष्यादिशब्दवदाकारवर्थेनार्थवन्तः, उत वाय्वात्माकाशादिशब्दवदनाकारेण? इति॥

एव मय मस्याश्चिन्ताया याज्ञिकपक्षो विषयः "अपि वा पृथगेव स्युः"—इति*। अतएव याज्ञिकपक्षादनन्तर मिद मारभ्यम्,—"अथाकारचिन्तनं देवानाम्"—इति†॥

किं माकारस्य चिन्त्यते,—किं मस्ति उत नास्ति? इति। यद्यस्ति कीदृशः? इह द्विविधा आकारिणोऽर्थाः,—चेतनाश्चाचेतनाश्च। तत्र चेतना मनुष्यादयः, अचेतनाश्च पाषाणादयः। तत्रैतद् भवति किं ममी मनुष्यादिवच्चेतना उत पाषाणादिवदचेतना द्रव्यमात्रम्?—इत्युपोद्धत्य संशयः॥

तद्व्युदासाय पक्षः परिगृह्यते,—"पुरुषविधाः स्युः इति एकम्"—इति। मन्त्रप्रत्यय मस्तित्वं देवताया अभ्युपगतम्,—यत्काम इत्युपक्रम्य तद्देवतः स मन्त्रो भवतीति‡; सति हि देवतास्तित्वे तद्देवतत्वं मन्त्रस्य। यदि चैव माकारोऽपि! तत्प्रत्यय एव भवितु

* अस्याध्यायस्य पञ्चमखण्डे (३१२ पृ०) माद्राभाग्यादित्यादिना देवस्तेत्यत्तेन च आत्मवित्त्वं उक्तः, तदुत्तरस्मिन् खण्डे (३१० पृ०) तिसृणवेत्यादिना सतदृत्यत्तेन ग्रन्थसन्दर्भेण नैरुक्तपक्षोक्तः, ततस्तैव ऋषिवाष्टथगित्यादिना लोकस्तेत्यत्तेन च याज्ञिकपक्षोऽप्युक्तः।

† यदि चैतदारभ्यं तत्रेत्यादि-मतत्रयोपसंहारवाक्यादनन्तरं न तु याज्ञिकपक्षादव्यवहितमेव, तथापि याज्ञिकपक्षादनन्तरमेव मन्यते, उपसंहरणवाक्यस्यापि याज्ञिकपक्षपातित्वस्वीकारात्; अयं टीकाकारोऽपि हि याज्ञिक एवेति।

‡ पु० १८५ पृ० ७ अ० १ पा० १ ख० द्रष्टव्यम्।

मर्हति? अस्ति चेदं पौरुषविध्यं मन्त्रेषु देवतासम्बन्धीनि। यत उच्यते,—"पुरुषविधाः स्युः इति एकम्"। मन्त्रेषु दर्शनम् इति वाक्यशेषः। 'पुरुषविधाः' पुरुषप्रकाराः, पुरुषविग्रहा इत्यर्थः॥

कोऽत्र हेतुः? "चेतनावद्धि स्तुतयो भवन्ति"। 'हि'-शब्दो हेत्वर्थः; यस्माच्चेतनावता मिव स्तुतयो मन्त्रा अभिधायका भवन्ति। पूर्वो वतिर्मत्वर्थे, उत्तरस्तुल्यार्थे; तस्मात् पुरुषाकारविग्रहा इति।

ननु चैतन्य मपुरुषाकारविग्रहाणा मपि गवादीना मस्ति? न, नास्ति। न तु ते विवेकक्षमा आसन्नचेतनाः; लोकेऽपि यस्य हिताहितविवेकलक्षणं विशिष्टं संविज्ञानं न भवति, तं मधिकृत्य ब्रुवते निश्चेतनोऽय मिति। एव मेते च गवादयः सत्यपि चैतन्ये आसन्नचेतनत्वान्न विदुः श्वस्तनम्, न लोकालोकाविति ज्ञायते; तस्मादचेतना इवोपेक्ष्यन्ते। पुरुषस्तु वेद श्वस्तनम्, वेद लोकालोकौ; मर्त्येनामृतत्व मीप्सतीति। तस्माद्धिताहितपरिज्ञानात् पौरुषविध्यस्यैव सिषाधयिषितत्वादनपेक्ष्यसामान्यं विशिष्टचैतन्यः पुरुषो नियम्यते। यथैव चेतयमाना अर्थान् पुरुषाः शृण्वन्ते, तथैव देवता अपि। तस्मात् "पुरुषविधाः स्युः"—इत्युपपन्नम्॥

"तथाभिधानानि" यथैव पौरुषविद्धं मुपपद्यते चेतनावत्-सदृशस्तुतिभिः तत्प्रति ताः कारणं भवति, तथैव संवादसूक्तेषु परस्पर मभिधानानि उक्तप्रत्युक्तानि सम्बद्धार्थानि परस्परतः, कयाशुभीयादिषु कुतस्त्व मिन्द्रेत्येवमादीनि * तस्मात् पौरुषविद्धं देवतानाम्॥

* "यत् कयाशुभीयम्; एतेन ह वा इन्द्रोऽगस्त्यो मरुत्सखे समजानत"—इति ऐ० ब्रा० ५, २, १। ऋक्संहितायाः प्रथममण्डले चत्वारिंशानुवाकारभ्य एव कयाशुभीयं नाम सूक्तम्। तत्र पञ्चदश ऋचः सन्ति। तेषु "कुतस्त्वमिन्द्र" इत्येषा तृतीया।

अथाप्यय मपरो हेतुः पौरुषविद्धे देवतानाम्,—"पौरुषविधिकैरङ्गैः संस्तूयन्ते"। पौरुषविद्धत्वे यान्यङ्गानि, तैः संस्तूयन्ते। तद्यथा,—"कृष्वा तं इन्द्र स्थविरस्य बाह्व", "यत् सङ्गृभ्णा मघवन् काशिरित्ते"।—

"उरुं नो०——०बृहन्ता" *। शंयोरार्षम्। चिष्टुप्। ऐन्द्री। एकादशिन्या मैन्द्रस्य पशोर्वपाया याज्या। 'उरुं' विस्तीर्णं 'लोकं' यः त्वम् ('नः') अस्मान् 'अनुनेषि' अनुनयसि; स्वेन सुकृतेन कर्मणा गच्छतां गमनानुग्रहे वर्त्तसे। 'सर्वज्योतिः' आदित्यसमानं प्रकाशेन लोकम्, 'अभयम्', 'स्वस्ति' स्वस्त्ययनाय। तस्य 'ते' तव वयम् 'इन्द्र!' ('कृष्वा') कृष्वौ एतौ रेषणौ शत्रूणाम्, 'स्थविरस्य' महतः 'बाह्व' हस्तौ, ('बृहन्ता') बृहन्तौ महान्तौ, ('शरणा') शरणौ आश्रयणीयौ नित्यम् 'उप स्येयाम' उपतिष्ठेमेत्येतदाशास्महे॥

"यत् सङ्गृभ्णा मघवन् काशिरित्ते"—इति †। व्याख्यातः शेषः ‡। एव मस्मिन् मन्त्रद्वये बाह्वमुष्टिसम्बन्धदर्शनात् स्तुत्यस्येन्द्रस्य पौरुषविधम्; अन्यथा हि वितथाभिधानत्वं मन्त्रयोः, तथा च सत्यानर्थक्यं मन्त्राणाम्, सर्वेषां शास्त्रस्य च तदर्थलक्षणभूतस्य। तन्मा भूदित्यवश्य मेवेष्टव्यं पौरुषविधं देवताना मिति॥

"अथापि" अय मप्यपरो हेतुः पौरुषविधे देवतानाम्—"पौरुष-

---

* "उरुं नो लोक मनु नेषि विद्वान्त्स्वर्ज्योतिरभयं स्वस्ति। कृष्वा तं इन्द्र स्थविरस्य बाह्व उप स्येयाम शरणा बृहन्ता॥"—इति ऋ० सं० ४, ७, ११, २।

† ऋ० सं० २, २, १, ५।

‡ पु १२१, १२१ ४० (१, १, १,)।

विधिकैः द्रव्यसंयोगैः"। तद्यथा,—"आ द्वाभ्यां हरिभ्या मिन्द्र याहि", "कल्याणीर्जाया सुरणं गृहे ते"।—

"आ द्वाभ्या०——०मृधस्कः*"। गृत्समद ऋषिः। ऐन्द्री। त्रिष्टुप्। हे भगवन्! 'इन्द्र!' यदि तावत् तव द्वौ हरी सन्निहितौ, ततस्तावेव रथे युक्ता, ताभ्याम् ('हरिभ्याम्') 'आ याहि'। अथ चत्वारः? ततस्तैः ('चतुर्भिः'), अथ षट्? ततस्तैः ('षड्भिः'), अथाष्टौ? ततस्तैः ('अष्टाभिः'), अथ दश? ततस्तैः ('दशभिः') 'आ' याहि†। इदं 'सोमपेयं' सोमपानकर्म प्रति। किम्? इति। एवं ब्रूमहे,—'अयं' 'सुतः' सोमोऽभिषुतः त्वदर्थम्, स त्वम् हे 'सुमख' सुधन! 'मा' केन चित् 'मृधः' संग्रामं ('कः') कार्षीः; अविलम्बित मागच्छेत्यभिप्रायः‡॥

"अपाः सोम०——०दक्षिणावत्"§। विश्वामित्रस्यार्षम्। त्रिष्टुप्। हारियोजनस्यानुवाक्या। हे भगवन्! 'इन्द्र!' ('अपाः') पीतवानसि 'सोमम्' एतस्मिन् कर्मणि। स त्वं पुनः 'अस्तं' गृहं 'प्र याहि'। यस्मात् तव 'कल्याणीः जायाः', 'तव' 'बृहतः' च 'रथस्य' 'निधानं' रथशाला, 'विमोचनं' च 'वाजिनः' जिला

---

* "आ द्वाभ्यां हरिभ्या मिन्द्र याह्या चतुर्भिरा षड्भिर्ह्रूयमानः। आष्टाभिर्दशभिः सोमपेय मयं सुतः सुमख मा मृधस्कः॥"—इति ऋ० सं० २, ९, २१, ४।

† "यद्यपीन्द्रस्य द्वावेव हरी, तथापि तयोर्विभूतिभेदात् नानात्वम्; अतोऽश्वबहुत्व मविरुद्धम्"—इति सा० भा०।

‡ इह व्याख्यायाम् 'आ ह्रूयमानः'—इत्यगृहीत मेव स्थितम्।

§ "अपाः सोम मस्तं मिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते। यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत्॥"—इति ऋ० सं० २, २, २०, १।

सङ्गाम मागतस्य, 'दक्षिणावत्'* अन्यदपि, 'सुरणं' यद्यद्रमणीयं तत्तत्सर्वं ('ते') तव 'गृहे' वर्त्तते। तस्मात् पुनरस्तं प्रयाहि॥

—एव मेतयोर्मन्त्रयोर्हरिगृहजायारथाभिसम्बन्धात् पौरुषविद्धि मिन्द्रस्य; न ह्यपौरुषविद्धे सति सम्बन्धो जायादिभिरस्ति॥

"अथापि" अय मपरो हेतुः पौरुषविद्धे। कतमः? "पौरुष-विधिकैः कर्मभिः" संस्तूयन्ते देवताः। तद्यथा,—"अद्भीन्द्र पिब च प्रस्थितस्य", "आ अुत्कर्ण अधी हवम्"।—

"इदं हवि०——०प्रस्थितस्य"†। अग्नियुतो नाम स्थूरपुत्रः, तस्यार्षम्‡। चिष्टुप्। ऐन्द्री। हे 'मघवन!' 'इन्द्र!' 'इदं' 'हविः' आज्यादिकम्, 'तुभ्यं रातम्' मनसास्माभिः निरूपम्, पूर्वं निर्वप-णादौ संस्कारकाले। तदिदानीं हे 'सम्राट्!' ('अहृणानः') अहृणन् 'प्रति गृभाय' प्रतिगृहाण। अपि च 'तुभ्यं' त्वदर्थ मेवायं 'सुतः' अभिषुतः सोमः। अपि च हे 'मघवन्!' त्वदर्थ मेवैषः पुरोडाशः 'पक्वः'। स त्वम् अस्य सोमस्य 'प्रस्थितस्य' 'अद्भि पिब च' स्व मंश मिति शेषः।

"आ अुत्कर्ण०——० दन्तरम्"§। मधुच्छन्दस आर्षम्। अनुष्टुप्। ऐन्द्री। श्रोतारौ यस्य कर्णौ अप्रतिहतश्रवणौ सर्वत्र, स भवति

---

* "दक्षिणावत् प्रशोजनवद् भवति"—इति सा० भा०।

† इदं हविर्मघवन्तुभ्यं रातं प्रति सम्राळृहणानो गृभाय। तुभ्यं सुतो मघवन् तुभ्यं पक्वोऽद्रीन्द्र पिब च प्रस्थितस्य॥"—इति ऋ० सं० ८, ९, २१, १।

‡ "पिब स्वोरोऽग्नियुतोऽग्नियूपो वा"—इत्येनुक्रमणी।

§ "आ अुत्कर्ण अधी हवं नू चिदधिष्व मे गिरः। इन्द्र स्तोम मिमं मम कृष्या-यजस्य मन्तरम्॥"—इति ऋ० सं० १, ९, १०, २।

श्रुत्कर्णः, तस्य सम्बोधनम्—हे 'श्रुत्कर्ण!' ('श्रा') आभिमुख्येन 'शृधि' शृणु त्वम् ('हवम्') आह्वान मस्माकम्। श्रुत्वा च 'नू चित्' पुराण इव 'दधिध्व' धारयस्व, एताः अस्मद्-'गिरः' हृदयेन। किञ्च; हे भगवन्! 'इन्द्र!' 'मम' 'इमं स्तोमम्' 'युजः' त्वद्युक्तस्य त्वां प्रत्यादृतस्य पुनःपुनरपि ब्रुवतः 'कृध्व' कुरुष्व श्रोतुम् 'अन्तरम्' क्षण मित्यर्थः।

एव मनयोर्मन्त्रयोरध्याशृणुहीति आमन्त्रणपूर्वकादरश्रवणपूर्वको विनियोगः, स न सम्भवत्यपौरुषविधे; न हि गवादयोऽध्याशृणुहीत्युक्ताः किञ्चित् प्रपद्यन्ते। तस्मात् कार्यकारणसन्निवेशो मनुष्यवद्देवतानाम्, कार्यकारणापेक्षं च विज्ञानम्। तदेव मेतेभ्यो मन्त्रदर्शनेभ्यः स्थितं पौरुषविधं मन्त्रदेवताना मिति ॥ २ (६) ॥

अपुरुषविधाः स्युरित्यपर मपि तु यद् दृश्यते ऽपुरुषविधं तद्यथाग्निर्वायुरादित्यः पृथिवी चन्द्रमा इति यथो एतच्चेतनावद्वद्भि स्तुतयो भवन्तीत्यचेतनान्यप्येवं स्तूयन्ते यथाक्षप्रभृतीन्योषधिपर्यन्तानि यथो एतत्पौरुषविधिकैरङ्गैः संस्तूयन्त इत्यचेतनेष्वप्येतद्भवत्यभिक्रन्दन्ति हरितेभिरासभिरिति ग्रावस्तुतिर्यथो एतत्पौरुषविधिकैर्द्रव्यसंयोगैरित्येतदपि तादृश मेव सुखं रथं युयुजे सिन्धुरश्विन मिति नदीस्तुतिर्यथो एतत्पौरुषविधिकैः कर्मभिरित्येतदपि तादृश मेव होतुश्चित् पूर्वे हविरद्य माशतेति ग्रावस्तुतिरेवापि वोभयविधाः स्युरपि वा पुरुषवि-

धाना मेव सतां कर्मात्मान एते स्युर्यथा यज्ञो यजमानस्यैष चाख्यानसमयः ॥ ३ (७) ॥

॥ इति सप्तमाध्यायस्य द्वितीयः * पादः ॥ ७. २.

"अपुरुषविधाः स्युः इत्यपरम्" दर्शन मिति वाक्यशेषः। तदुक्तम् "अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तच्चोपमार्थेन युद्धवर्णा भवन्ति"—इति विज्ञायते †। तदाहुः "नैतदस्ति यद्देवासुरम्"—इति, "न त्वं युयुत्से"—इत्यपि चैतदुक्त मेव ‡।

"अपि तु यद् दृश्यते" देवानां किञ्चित् "अपुरुषविधम्" अपुरुषप्रकारं तदित्यर्थः। "तद्यथा— अग्निः, वायुः, आदित्यः, पृथिवी, चन्द्रमाः—इति"। प्रत्यक्षत एतान्यपुरुषप्रकाराणि इत्येतेषा मतोऽन्यथाभ्युपगमे दृष्टहानिः स्यात्! न चैतदिष्टम्। तस्मादपुरुषविधा अग्न्यादयः, तत्सामान्याददृष्टा इन्द्रादयोऽप्यपुरुषविधाः; न हि मनुष्यत्वे तुल्ये के चिदाकारिणः के चिदनाकारिण इति, तथैव देवतानामपि हि न्यायः। तस्मादपुरुषविधा इति ॥

"यथो एतत् चेतनावद्वत् हि स्तुतयः भवन्ति इति§, अचेतनान्यपि एवं स्तूयन्ते; यथा—अक्षप्रभृतीनि ओषधिपर्यन्तानि ॥"। तस्मात् चेतनावत् स्तुतिमत्त्व महेतुः पौरुषविधे देवतानाम्, अचेतनेष्वप्यक्षादिषु चेतनावत्स्तुतेर्दृष्टत्वादिति ॥

---

* प्रथमावध्यष्टमखण्डात्मक एषः प्रथमः पादः क-पुस्तके।

† १भा० ११७ पृ० १ख० ५पा० २ख० द्रष्टव्यम्।

‡ १भा० ११०पृ० १०पं० द्रष्टव्यम्।

§ इतः पुरस्तादेवायं प्रथमहेतुरुक्तः २२१पृ० ६पं०; २२४पृ० ४पं०।

॥ १भा० ४६४पृ० ५अ० १ख० (४)—(११)।

"यथो एतत् पौरुषविधिकैः अङ्गैः संस्तुयन्ते इति" अयं मन्त्रहेतुः *, व्यभिचरितत्वात्; "अचेतनेषु अपि एतद् भवति", तद्यथा —"गावस्तुतिः"। "एते वदन्ति०——०माशत" †। अर्वुदस्यार्षम्। जगती। गावस्तुतिः। 'एते' 'गावाणः' अभिषवकर्म कुर्वाणाः वदन्ति। कथम्? 'शतवत्' शत मिव। 'सहस्रवत्' सहस्रमिव। शब्दवाङ्मात्र्याभिप्रायम् 'अभिक्रन्दन्ति' आह्वयन्ति सोमपातॄन्— आगच्छतास्माभिरभिषुतं सोमं पातु मिति। 'हरितेभिः' सोमसंसर्गाद् हरिद्वर्णैः 'आसभिः' आस्यैः। तत्र या दृयं 'विष्टी' व्याप्तिः गावाणाम्, एतया 'सुकृत्या' शोभनया क्रियया एते 'सुकृतः' शोभनस्य कर्मणः कर्त्तारः 'होतुः चित् पूर्वे' होतुरपि अग्नेः, मानुषहोतुर्वा‡ पूर्वं प्रथमतरम्, 'हविः' एतत् सोमाख्यम्, 'अद्यम्' अदनीयम् 'आशत' अश्नन्ति। अभिषवे सोमसंयोगमात्र मन्त्र मुपचर्यते गावाणाम्। तस्मादपौरुषविध्य मिति; न हि गावाणां तथाभूतान्यास्यानि सन्ति, यत्संयोगेन च स्तूयन्ते, तद्वदिन्द्रादीना मन्त्रयथाभूतैर्बाङ्मुख्यादिभिः स्तुतिः स्यात्। तस्मादहेतुरयं यत् "पौरुषविधिकैरङ्गैः संस्तुयन्ते"—इति। तस्मादपुरुषविधाः॥

"यथो एतत् पौरुषविधिकैः द्रव्यसंयोगैः इति §, एतद् अपि तादृशम् एव" औपचारिकम्, रूपकमात्र मित्यर्थः; यथैव हि आस्यादिकल्पना दृष्टव्यभिचारित्वाद् गावप्रभृतिषु न सम्भवति रूप-

* इतः पुरस्तादेव पूर्वपक्षेऽयं च द्वितीय-हेतुवक्त्राः २२१४० ७पं०; २२५४० १पं०।

† "एते वदन्ति शतवत् सहस्रवदभिक्रन्दन्ति हरितेभिरासभिः। विष्टी गावाणः सुकृतः सुकृत्यया होतुश्चित् पूर्वे हविरद्यमाशत॥"—इति ऋ० सं० ८, ४, २९,१।

‡ "मनुष्यहोतुर्वा" ख, ग।

§ एतदप्युक्तं हेत्वन्तरं पुरस्तात् पूर्वस्मिन् पक्षे २२१४० ८पं०; २२५४० १८पं०।

कमाचं स्तुत्यर्थं सङ्कल्पतो बाङ्कादिकार्यसिद्धिः, एवं हरिरथजा-यादिस्तुतयो रूपकमाच मिति। अपि च "सुखं रथं युयुजे सिन्धुरश्विनम्—इति नदीस्तुतिः" न चास्यां स्तुतौ यथाभूतार्थत्वो-पपत्तिरस्ति, असम्भवात्। कथ मसम्भवः? न ह्युदकात्मिकाया नद्या वहन्त्या रथेऽवस्थानं सम्भवति।

"सुखं रथं०——०विरप्शिनः*"। सिन्धुश्चित्राम प्रियमेधसः पुत्रः, तस्येय मार्षम्। जगती। नदीस्तुतिः। 'सुखं' सुखहेतुं लो-कस्य, 'रथं' रंहण सुदकम् ('युयुजे') युक्तवती 'सिन्धुः' नदी 'अश्वि-नम्' अश्नेन व्यापनेन तद्वन्तम् उदकरथम्। तेन 'वाजम्' अन्नम् 'सनिषत्' सम्भजनवती उत्पादितवती 'अस्मिन्' 'आजौ' सङ्ग्रामे यतो यतो गच्छति, ततस्ततो व्रीह्यादि अन्नम् अभिनिष्पादयतीत्यर्थः। यस्माच्चाय सुदकरथोऽन्न मभिनिष्पादयति, तस्मात् तस्य 'महान्' 'महिमा' माहात्म्यं 'पनस्यते' स्तूयते स्तोतृभिः। 'अदब्धस्य' अनुपहिंसितस्य, 'स्वयशसः' स्वायत्तकीर्त्तेः, 'विरप्शिनः' विरपणशीलस्य शब्दकारिण इत्यर्थः। रथ मिव अश्विनम् इति केचित्॥

तदेवमादिष्वसम्भवात् मुख्यार्थकल्पनायाः, सर्वत्र रूपकप्रवादाः स्तुतय इत्युपेक्ष्यम्॥

"यथो एतत् पौरुषविधिकैः कर्मभिः†—इति, एतद् अपि तादृ-शम् एव।—'होतुश्चित् पूर्वे हविरद्यमाशत (ऋ०सं०८,४,२९,२)'

---

* "सुखं रथं युयुजे सिन्धुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ। मह्यान् चास्य महिमा पनस्यतेऽदब्धस्य स्वयशसो विरप्शिनः॥"—इति ऋ० सं० ८, २, ७, ४।

† एतच्चोक्तं हेलञ्जरं परस्तात् पूर्वपक्षे एव ३१२४० १०पं०; ३१७४० ५पं०।

इति" अग्नेनग्नक्रियया गावाणः स्तूयन्ते, न च पुनर्गावृणां यथाभूत मग्नेन मस्ति। तस्मादिद मपि रूपक मेव॥ "एते वदन्ति"—इत्यत्र व्याख्यातम्* ॥

"अपि वा उभयविधाः स्युः"। उभयहेतुप्रामाण्यात्† ॥

"अपि वाऽपुरुषविधाना मेव सताम्" पृथिव्यादीनां "कर्मात्मान एते स्युः" अपुरुषविधाः क्षितिजलादयः‡। परे तु §, अधिष्ठातारः पुरुषविग्रहाः; एव मुभयोः प्रत्यक्षागमयोरप्यनुग्रहः कृतो भविष्यति। "यथा,—यज्ञः यजमानस्य" कर्मात्मा; इद मेतेनाङ्गं संस्क्रियते, इद मेतेनाङ्ग मुपचीयत इति संस्कृत ममुष्मिंल्लोके परेति इति च विज्ञायते ॥।

"एष च आख्यानसमयः"। भारते चाख्यानसमय एष एव सिद्धान्त इत्यर्थः ¶ ।—पृथिवी, स्त्रीरूपेण भारावतारणाय ब्रह्माणं ययाचे। अग्निश्च ब्राह्मणरूपेण वासुदेवार्जुनावुभौ खाण्डवं ययाचे। पुरुषरूपेणाग्निरूपेण च खाण्डवं ददाह।—इत्येवमादि** ॥

---

* मूलोक्तं हेतुस्थिदित्युदाहरणमिति यावत्। पु० ३३८१० १०पं०।

† देवाना माकारचिन्तने (३३११० ५पं०) यश्च हतीयः पक्षः।

‡ एष एव सिद्धान्तपक्षश्चतुर्थो मीमांसकसम्मतः।

§ टीकाकारसमकालवर्त्तिनस्त्विति यावत्।

॥ एवञ्च देवाना माकारचिन्तने पुरुषाकृतिलाभाव एव देवाना मिति यास्कीयसिद्धान्तः, कर्मणा मेव फलदानशक्तिरित्येव देवत्वकल्पनं चित्यादीना मिति च मीमांसकमत मादृत मिति।

¶ एषा तु टीका परमतसम्मतैव, न तु यास्कसम्मता, मूले भारतपदस्यादर्शनात् न हि च भारतात् परं निरुक्त मिति। अस्मन्मते तु एषेत्यादिग्रन्थस्याय मर्थः—'एषः' कथिताकारचिन्तनविचारः 'आख्यानसमयः' सर्वेष्वेव मन्त्रेषु देवताव्याख्यानस्य सङ्केत इत्यनेन वाक्येन स विचार उपसंहृतो यास्केनेति।

** महाभारतीयादिपर्वणि जनविंशं पर्व खाण्डवदहनं नाम, तद् द्रष्टव्यम्।

तदेतच्चतुर्द्धा भिद्यते, मन्त्रार्थदर्शनादेव।—(१)पौरुषविध्यम्*, (२)अपौरुषविध्यम्†, (३)कर्माधात्मोभयविध्यम्‡, (४)नित्य मौभयविध मेवेति। सर्वं चैतदुपपद्यते, माहाभाग्ये सत्यैश्वर्यात्; कथमिव देवता न स्यात्— अमूर्त्ता, मूर्त्ता, एकधा, द्विधा, बहुधा चेति यथा तु वर्त्तमाना मपश्यन् मन्त्रदृशः तथा तथा अस्तुवन्; सर्वथैवादोषः, फलदर्शनात् §। नानावस्थादर्शनवदाख्यातृणां परिदेवनानिन्दादिष्वपि चेन्द्रादीनां कामकारतस्तद्रूप मवस्थितानां सा सा स्तुतिरेव, न निन्दा। उक्तञ्च;—"हीना न निन्दा, स्तुतिरेव सास्या देवान् मर्त्तः सम्यगभिष्टुयात् कः। शक्तिञ्चये ऽप्यध्वसन्ति गिष्टाः स्तोतुं न पश्यन्ति गतिं यतोऽन्याम्॥ ॥"—इति॥ ३ (७)॥

॥ इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य) द्वितीयः पादः¶ ॥ ७. २.

---

* पु० ३३१पृ० ५पं० "पुरुषविधाः स्तुरित्येकम्"—इत्यादि-प्रथमः पक्षो द्रष्टव्यः।

† पु० ३३८पृ० १२पं० "अपुरुषविधाः स्तुरित्यपरम्"—इत्यादि-द्वितीयः पक्षः।

‡ पु० ३३८पृ० २१पं० "अपि वोभयविधाः स्युः"—इत्यादि-तृतीयः पक्षो द्रष्टव्यः। वस्तुतोऽस्यामते तु तृतीयपक्षे उभयविध मेव देवाना मुररीकृतम्, न तु तत्र किञ्चिदपि विशेषेण मन्वेषणीयम्।

§ पु० ३३८ पृ० २१पं० "अपि वा"—इत्यादि-चतुर्थो मीमांसकपक्षो द्रष्टव्यः। अत्र खल्वस्यते नोभयविधं नापि क्रियातो विभिन्नत्व मुक्तं देवानाम्; अत एव हि "यथा यज्ञो यजमानस्य"—इति दृष्टान्त उपपद्यते। तथा हि,—'यजमानस्य यथा यज्ञः' (यज्ञः, अनुष्ठानम्, क्रिया, कर्म इति च पर्य्यायवचनम्) देवता भवति, तस्यापि स्तुतिश्रुतेः; तथैव अग्निस्तुतिक्रियादीना मेव देवत्वं फलप्रदत्वञ्च; न तत्र फलप्रदस्य कस्य चिदपि देवस्याकारचिन्तने प्रयोजनीयत्व मस्तीति मीमांसकमत मप्यनुगृह्णीतम्। एतेन वज्रहस्तपुरन्दरसमागमनात् कृषभङ्गभीतिरपाकृता।

॥ कारीर्यादौ इत्यादिदर्शनादिति भावः। इद मेव फलसंवादाख्यं मानम्।

¶ क-पुस्तके लिखितेव प्रथमपादसमाप्तिः, ङ-च-पुस्तकयोस्तु नास्त्येव पादविभागः।

॥ तृतीयः पादः ॥

तिस्र एव देवता इत्युक्तं पुरस्तात्तासां भक्तिसाहचर्यं व्याख्यास्यामोऽथैतान्यग्निभक्तीन्ययं लोकः प्रातःसवनं वसन्तो गायत्री त्रिवृत् स्तोमो रथन्तरं साम ये च देवगणाः समाम्नाताः प्रथमे स्थाने ऽम्नायी पृथिवीलेति स्त्रियोऽथास्य कर्म वहनञ्च हविषा मावाहनञ्च देवतानां यच्च (किञ्चिद्*) दार्ष्टिविषयिक मग्निकर्मैव तदथास्य† संस्तविका देवा इन्द्रः सोमो वरुणः पर्जन्य ऋतव आग्नावैष्णवञ्च हविर्न त्वृक्संस्तविकी दृश्यतयीषु विद्यते ऽथाप्याग्नापौष्णं हविर्न तु संस्तवस्तचैतां विभक्तिस्तुति‡ मृच मुदाहरन्ति— ॥ १ (८) ॥

अथाकारचिन्तनव्यवधानाद् देवताचयाधिकारस्य तद्विशेषविवक्षया तदनुस्मृतये च स एतत् प्रकरोति;—"तिस्रः एव देवताः—इति"§। यः पुनस्तत्र विशेषो विवक्षितः, स उच्यते;—"तासां भक्तिसाहचर्यं व्याख्यास्यामः"। तासा मेव तिसृणां भक्तिसाहचर्यम्। भक्तिश्च साहचर्यञ्च, भक्तिकृतं वा साहचर्य्य मिति। लोकादीना मेवाग्न्यादिभिर्भजनं भक्तिः, सहचरभावः साहचर्यम्। तत् किमर्थम्?

---

* नास्येतत् पदं क-ख-ग-पुस्तकेषु।
† "मग्निकर्मैतदथास्य" ङ, च।
‡ "विभक्तस्तुति" ग।
§ पुरस्तात् द्वितीयपादारम्भे एव यावत (३१०पृ० ११पं०)।

उच्यते,—अर्थविज्ञातपदे मन्त्रे भक्त्या साहचर्येण वा यथा देवता गम्येतेत्येवमर्थं भक्तिसाहचर्यं मुच्यते ॥

यद्येवं मुच्यतां तर्हि कानि किंभक्तीनि? इति। तदुच्यते;—"अथ एतानि अग्निभक्तीनि"। अथेति विशेषाधिकारे। अग्निं भजन्ते, अग्निना वा भज्यन्ते—इत्यग्निभक्तीनि। कतमानि? "अयं लोकः"—इत्येवमादीनि * अग्निभक्तीन्यवगन्तव्यानि। "ये च देवगणाः समाम्नाताः प्रथमे स्थाने"। तद्यथा;—आप्री †, अज्ञाः ‡, यावाणः §, अभीग्रवः ‖ इत्येवमादीनि ¶। "अग्नायी, पृथिवी, इला— इति स्त्रियः"। 'इला, पृथिवी, अग्नायी'—इति क्रमेण

---

* रथन्तरं सामेत्यन्तानि षट्, मूले एव द्रष्टव्यानि। परमिह तानि कथं न व्याख्यातानि? व्याख्यातव्यान्येवेत्यस्माकम्।

† आप्रीशब्देन निघण्टु-पञ्चम-द्वितीये पठिता इध्माद्यो द्वादश मन्त्रा १भा० ४९१ष्ठ० द्रष्टव्यम्। तच्च तु मानम्,—"अथात आप्रियः"—इत्यारभ्य "इतीमा आप्रीदेवता अनुक्रान्ताः"—इत्यन्तो यास्कग्रन्थः परस्ताद्यागमिष्यन्ति (८, १, १.—३, १.)

‡ १भा० ४९४, ४९९, पृ० ५, ३, (४); परस्ताच्च ८अ० १पा० ७, ८ ख०।

§ १भा० ४९४, ४९९ पृ० ५, ३, (५); परस्ताच्च ८अ० १पा० ८, ९ ख०।

‖ १भा० ४९५, ४९८ पृ० ५, ३, (११); परस्ताच्च ८अ० १पा० ५, ९ख०।

¶ निघण्टुपञ्चमाध्यायस्य प्रथमादित्रिखण्डत्रये प्रथमस्थानदेवताः समाम्नाताः (१भा० ४५९—४७४पृ०); परस्ताच्च "अथातोऽनुक्रमिष्यामः"—इत्यारभ्य "यजेति सम्प्रैषः"—इत्यन्तानि तद्व्याख्यानानि (७अ० ४पा० १ख०—९अ०)। तत्र यानि मन्त्रार्थकानि पदानि, तद्व्याख्या एव प्राथमिकदेवगणाः उच्यन्त इति टीकाकृन्मतम्। परे तु 'ये च देवगणाः समाम्नाताः प्रथमे स्थाने'—इत्युक्त्या प्रथमादित्रिखण्डत्रयपठितानां मन्त्राद्यानां सर्वेषां मन्त्राणामेव ग्रहः; अग्नायीत्यादित्रिस्त्रियां पुनरुक्तेष्वपि 'तक्रकौण्डिन्य'-न्यायेनेत्याहुः।

षकव्ये* क्रमभेदोऽग्नायी तत्समानाख्यानात् सन्निकृष्टतरा, न तथा पृथिवीति; तस्मात् प्रथम मुच्यते; ततः पृथिव्याश्रयसम्बन्धादग्नेर्न तथेला, परोक्षाद्भिधेयस्य। 'आप्री'—मध्ये 'तिस्रोदेवीः'—इत्यत्र इला, भारत्याः द्युस्थानाया अनन्तरं श्रूयमाणा;—"आ नो यज्ञं भारती तूयं मेत्विळा मनुष्वत् (ऋ०सं०८,६,८,२)"—इति † कथं पृथिवीस्थाना? इति। उच्यते;—अनुयाजेषु सामर्थ्यात्; "द्यां भारत्यादित्यैरस्पृक्षत् सरस्वतीमं रुद्रैर्यज्ञ मावीदिडैवेलया वसुमत्या"—इत्यतः सामर्थ्य मुन्नीय वसुसाहचर्यात् इडैवेलयेति चाग्निभक्तिरिलेत्याह, रुद्रैः साहचर्यात् सरस्वती मध्यस्थाना, आदित्यैः साहचर्यात् भारती द्युस्थानेति॥

"अथास्य कर्म" अथास्याग्नेः कर्म सहभावि, अनन्यदेवतागामि, यत्संयोगादसत्यप्यग्निशब्दे आग्नेय एव मन्त्रो भवति। "वहनं च हविषाम्"—इत्येवमादि। "दार्ष्टिविषयिकम्" दृष्ट्यनुग्रहो यस्य विषयः, तद्दार्ष्टिविषयिकम्; प्रकाशादि कर्मेत्यर्थः। "अग्निकर्मैव तत्"—इति पुनर्वचन मादरार्थम्; आध्यात्म्येऽपि यावान् कश्चित् प्रकाश इति॥

"अथास्य संस्तविका देवाः" यैः सह अग्निः स्तूयते। तद्यथा,

---

* निघण्टौ पञ्चमाध्यायस्य द्वितीयखण्डे 'तिस्रो देवीः'—इति दशमम्। तत्र तिसृषु भारतीलासरस्वतीषु देवीषु इलाया एव स्त्रिय इह ग्रहण मभीष्टम्; 'पृथिवी'—इति तु तदुत्तरस्मिन् खण्डे षड्विंशं पदम्; तत्रैव च खण्डेऽष्टाविंशं पदम् 'अग्नायी'।—इति क्रमः समाम्नायपाठस्य (१ भा० ४६१, ४६३ पृ०)।

† 'भारती, इला, सरस्वती'—एवं क्रमपठिताः श्रुतिमन्त्रेऽस्मिन् तिस्रो देव्यो बुद्ध्यन्ते। तिस्रोदेवीरिति तु आप्रीमध्ये पठितं दृश्यते (१भा० ४६१पृ० ५ख० १ख० १०.), व्याख्यास्यति चेडोपरिष्टात् (८ अ० २पा० ९ख०), उदाहरिष्यति च तत्रैवैनं मन्त्र मानो यज्ञ मिति। तदेतत्सर्वं तत्रैव द्रष्टव्यम्।

—"इन्द्रः, सोमः"—इत्येवमादयः। मन्त्रस्वभावप्रदर्शनाय संस्तवोदाहरणम्। अग्नेः पूर्वनिपादाद् देवतादन्द्वे मुख्यता *।—

"अग्नइन्द्रश्च दाशुषो"—इति†। विश्वामित्रस्येयं मार्षम्। विराट्। अनुष्टुप्। आग्नयणे विनियोगः। हे भगवन्! 'अग्ने!' त्वम् 'इन्द्रः च' 'देवा' देवौ, अस्य 'दाशुषः' दत्तवतः हवींषि, यजमानस्य 'दुरोणे' यज्ञगृहे 'सुतावतः' अभिषुतवतः 'यज्ञम्' सोमम्। ('अमर्धन्ता') मृधं सङ्गामं कुर्वाणौ अन्तरा केन चित् सह। 'सोमपेयाय' सोमपानार्थम् 'उपयातम्' इत्येतदाशास्महे॥

"अग्नीषोमाविमम्"—इति‡। सोमेन सह संस्तवः। गोतमस्यार्षम्। अनुष्टुप्। पौर्णमासे अग्नीषोमस्यानुवाक्या। हे 'अग्नीषोमौ!' युवा मुच्येथे। 'इमं' 'हवम्' आह्वानं 'मे' मम 'सु' सुष्ठु 'शृणुतम्' 'वृषणौ' वर्षितारौ। श्रुत्वा चागच्छतम्। आगत्य च 'प्रतिहर्यतं' प्रतिप्रेषितं, मया पूर्वं प्रेषितौ प्रति कामयेथाम् इमानि सूक्तानि श्रोतुम्। श्रुत्वा चेमानि 'भवतं' 'दाशुषे' युवां हविर्दात्रे 'मयः' सुखावित्यर्थः॥

"त्वं नो अग्ने वरुणस्य"—इति§। वरुणेन संस्तवः। वामदेव-

---

* "अभ्यर्हितञ्च (पा० २, २, ३४ सू० वा०)"—इति वचनात् अग्नीद्रौ, अग्नीषोमौ—इत्यादाविति भावः।

† अग्न इन्द्रश्च दाशुषो दुरोणे सुतावतो यज्ञमुपेयुषो यातम्। अमर्धन्ता सोमपेयाय देवा॥"—इति ऋ० सं० ३, १, २५, ४।

‡ "अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम्। प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः॥"—इति ऋ० सं० १, १, २८, १।

§ "त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेळोऽव यासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत्॥"—इति ऋ० सं० १, ७, ११, ४।

स्यार्षम्। त्रिष्टुप्। अवभृथे विनियोगः। हे भगवन्! 'अग्ने!' 'त्वम्' ('नः') अस्मान् यथावत् 'विद्वान्' जानामः भक्ता मम एते इति। 'वरुणस्य देवस्य' यः अस्मान् प्रति 'हेलः' क्रोधः, तम् अनेनावभृथकर्मणा 'अव यासिसीष्ठाः' अपगमय। किञ्च; यः त्वं 'यजिष्ठः' यष्टृतमः, देवानां होतृत्वे वर्त्तमानः 'वन्हितमः' वोढृतमश्च हविषाम्, स त्वं पुनः 'शोशुचानः' देदीप्यमानः तेषु तेषु कर्मसु ('विश्वा') विश्वानि सर्वाणि 'द्वेषांसि' द्वेष्याणि ('प्र') प्रकर्षेण 'अस्मत्' अस्मत्तः 'मुमुग्धि' मुञ्च अवयोजयेत्यर्थः॥

"अग्नीपर्जन्या०——०धत्त मरुते"*। पर्जन्येन संस्तवः। भरद्वाजस्यार्षम्। त्रिष्टुप्। हे 'अग्नीपर्जन्यौ!' युवाम् उच्येथे। 'अवतम्' अवगच्छतम् इमां 'धियं' इदं कर्म प्रति, 'मे' मम 'अस्मिन्' 'हवे' आह्वाने 'सुहवौ' स्वाह्वानौ 'सुष्टुतिं' शोभना मिमां स्तुतिं श्रोतुम्। आगत्य च श्रुत्वा इमाम् 'इडाम्' अन्नम् 'अन्यः' एकः 'जनयत्' जनयतु; 'गर्भम् अन्यः' गर्भ मेको जनयतु। तौ युवा मेवं प्रतिसंवत्सरं 'प्रजावतीः' प्रजासंयुक्ताः 'इषः' अन्नानि ('आ') आभिमुख्येन स्थित्वा 'धत्तं' दत्तम्, 'अस्मे' अस्मभ्य मित्यर्थः॥

"अग्ने देवाँ०——०ऋतुना"†। ऋतुभिः संस्तवः। मेधातिथेरार्षम्। गायत्री। ऋतुयाजेषु विनियोगः। हे भगवन्! 'अग्ने!' 'देवान्' 'इह' अस्माकं कर्मणि 'आ वह'। आहूय

---

* "अग्नीपर्जन्यावतं धियं मेऽस्मिन् हवे सुहवा सुष्टुतिं नः। इळां मन्यो जनयद् गर्भं मन्यः प्रजावतीरिषु आ धत्त मरुते॥"—इति ऋ० सं० ४, ८, १९, १।

† "अग्ने देवाँ इहा वह सादया योनिषु त्रिषु। परि भूष पिब ऋतुना॥"—इति ऋ० सं० १, १, ९८, ४।

देवान् 'सादय' 'योनिषु त्रिषु' सवनेषु त्रिषु। एतान् यथाकालं यज। अमुना प्रकारेण 'परि भूष' सर्वतो देवयागेनालङ्कुरुष्व एतं यज्ञम्, आत्मना 'पिब' चैतं सोमम् 'ऋतुना' सह॥

"आग्नावैष्णवं हविः"। हविर्ग्रहणात् हविष एव सम्प्रदानार्थत्वम्। या ऋचः ताः संस्तवेनाग्नाविष्णोः सन्ति।—

"अग्नाविष्णू सजोषसेमा वर्द्धन्तु वां गिरः। द्युम्नैर्वाजेभिरागतम्॥"—इति। वामदेवस्येय मार्षम्। गायत्री। आग्नावैष्णवे हविषि विनियोगः। हे 'अग्नाविष्णू' ('सजोषसा') सजोषसौ नित्यं सह जोषणौ नित्यं समानप्रीतौ 'वां' युवा सुष्ठ्येथे। ('इमाः') एताः युष्मद्-'गिरः' अस्मत्स्तुतयः 'वर्द्धन्तु' वर्द्धयन्तु युवाम्। वृद्धौ च सत्या मस्मत्सम्प्रदेयैः 'द्युम्नैः' द्योतनवद्भिः ('वाजेभिः') अन्नैरभ्युद्यतैः ('आगतम्') अस्मान् प्रत्यायातम्॥

"न त्वक् संस्तविकी दशतयीषु विद्यते"। 'न'—इति प्रतिषेधः। 'तु'-शब्दोऽवधारणार्थः। 'ऋक्' 'संस्तविकी' संस्तवयुक्ता, 'दशतयीषु' दशमण्डलावयवप्रविभागेन तायत इति दशतयः ऋग्वेदः, तस्य शाखाः दशतय्यः, तासु सर्वासु एकापि हविष्यविनियुक्ता शस्त्रमध्यपातिनी ऋक् अग्नाविष्णोः संस्तविकी नास्ति। स्यादन्यत्र संस्तविकी, न तु दशतयीषु। असंस्तवेन वा दशतयीष्वपि इत्युत्सर्गं दर्शयति, एव मेतन्मया निपुण मन्विष्यत इति॥

अथाप्यय मपर उत्सर्गः;—"अथाप्याग्नापौष्णं" "हविः" एव, "न तु संस्तवः"। तस्मिंस्तु हविषि किन्तु पृथक् पृथगेव अग्निः स्तूयते पूषा च "तत्र" तस्मिन् संस्तवे अग्निपूष्णोः "एतां विभक्तस्तुतिम् ऋचम्" "उदाहरन्ति" नैरुक्ताः—॥ १ (८)॥

पूषा त्वेतश्च्यावयतु प्र विद्याननष्टपशुर्भुवनस्य गोपाः। स त्वैतेभ्यः परि ददत् पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः। पूषा त्वेतः प्रच्यावयतु विद्याननष्टपशुर्भुवनस्य गोपा इत्येष हि सर्वेषां भूतानां गोपायितादित्यः स त्वैतेभ्यः* परि ददत् पितृभ्य इति सांशयिकस्तृतीयः पादः, पूषा, पुरस्तात्तस्यान्वादेश इत्येक मग्निरुपरिष्टात्तस्य प्रकीर्त्तनेत्यपरम्। अग्निर्देवेभ्यः सुविदत्रियेभ्यः। सुविदत्रं धनं भवति विन्दतेर्वैकोपसर्गादक्षतेर्वा स्याद् ह्युपरुगात् ॥ २ (६) ॥

"पूषा त्वेतः"—इति। देवश्रवसो यामायनस्यार्षम्। त्रिष्टुप्। पुनः (श्रवस्य†) कर्णे प्रमीतानुमन्त्रणे विनियोगः। सः प्रमीत उच्यते। 'पूषा' भगवान् "आदित्यः" पथा मधिपतिः, सः ('त्वा') त्वाम् 'इतः' मनुष्यलोकाद् विशिष्टेन पथा 'प्रच्यावयतु' 'विद्वान्' अव्यवहितज्ञानः। सर्वत्र ज्ञानाव्यवधानादेव च 'अनष्टपशुः'‡। 'भुवनस्य गोपाः'। 'भुवनस्य' भूतजातस्य 'गोपाः' रक्षिता। उपर्यवस्थितः 'सः' पूषा, एवंलक्षणः, ('त्वा') त्वां प्रगमय्य 'एतेभ्यः'

---

* 'गोपायिता स त्वैतेभ्यः" क, ख, ग।

† ऋ० सं० ७, ६. १२, ३।—इत्येवमादीनां चतसृणा ऋचां दीक्षितमरणे विनियोग माह्वायनायनः। ६, १० सू० द्रष्टव्यम्।

‡ नास्त्येतत् ग-घ-पुस्तकयोः।

§ "अनष्टपशुः अविनश्वरपशुयुक्तः; यस्मिन् सर्वे पशवस्तिष्ठन्ति न तु नश्यन्तीत्यर्थः।"—इति सा० भा०।

चन्द्रमण्डलोपान्तवासिभ्यः 'पितृभ्यः' 'परिददत्' परिददातु। तदुक्तम्,—"दक्षिणायनात् पितृलोकम्"—इति। 'अग्निः' अपि चैतेभ्यः उत्क्रम्य 'देवेभ्यः सुविदत्रियेभ्यः' ये विद्युतो मध्ये निवसन्ति, तेभ्यः परिददातु। तदप्युक्तम्,—"चन्द्रमसो वैद्युतम्"—इति*। स त्र मेव सुभावपि देवलोकपितृलोकावभ्यश्नुतीत्याशीः प्रमीतस्य। उक्तञ्च,—"ये देवयानाः पितृयानाश्च लोकाः सर्वांस्तानन्नृणाः सञ्चरेम'—इति† ॥

"स त्रैतेभ्यः०—०इति सांग्रयिकः तृतीयः पादः" संग्रयोऽस्मिन्नस्तीति सांग्रयिकः, तृतीयः पादोऽस्या ऋचः। कथं कृत्वा? यथा,—"पूषा पुरस्तात्" 'पूषा त्वेतश्चयवतु'—इति; "तस्य अन्वादेशः—इति एकम्" सामर्थ्यादर्थनम्। तथा व्याख्यात मेव। त्रयः पौष्णाः पादाः, एक एवाग्नेयः एव मियं विभक्तिश्रुतिः। अथ वा द्वावुत्तरावाग्नेयौ। तत्र अर्थयोजना,—पूष्णा प्रच्यावितं सन्तं सोऽग्निर्वक्ष्यमाणस्त्रा मेतेभ्यः पितृभ्यो देवेभ्यः सुविदत्रियेभ्यः परिददातु; मा पितृभ्यः प्रेतेभ्य इत्यभिप्रायः। तं प्रेतं दिष्ट मितोऽग्नय एव हरन्तीत्यपेक्ष्य सर्वनाम्नश्चोत्तरेणाग्निशब्देन सम्बन्ध मविरुध्यमानं व्यपेक्ष्य अकल्पयत्। "अग्निः उपरिष्टात्, तस्य प्रकीर्त्तना—इति अपरम्"—इति ॥

---

* "विद्युद् दक्षिणचन्द्रमा आदित्योऽग्निः"—इति परिभरः ऐ० ब्रा० ८, ५, ५।

† "देवयानान्—देवाः यैर्मार्गैर्यान्ति गच्छन्ति तान् (ऋ० सं० १, ५, १८, १०)"—इति, "पितृयानम्—पितरो येन मार्गेण गच्छन्ति तम् (ऋ० सं० ७, ५, १०, ७)"—इति च सा० भा०।

"सुविदत्रं धनं भवति" *,—"विन्दतेः वा" ("एकोपसर्गात्") सु-इति एतेन एकेन उपसर्गेण उपसृष्टात्। "ददातेः वा" ("द्व्युपसर्गात्") सु-विभ्यां द्वाभ्याम् उपसर्गाभ्यां युक्तात्। तद् येषा मस्ति, ते सुविदत्रियाः † ॥ २ (९) ॥

**अथैतानीन्द्रभक्तीन्यन्तरिक्षलोको माध्यन्दिनं सवनं ग्रीष्मस्त्रिष्टुप् पञ्चदशस्तोमो बृहत्साम ये च देवगणाः समाम्नाता मध्यमे स्थाने याश्च स्त्रियोऽथास्य कर्म रसानुप्रदानं वृत्रवधो या च का च ‡ बलकृतिरिन्द्रकर्मैव तदथास्य संस्तविका देवा अग्निः सोमो वरुणः पूषा बृहस्पतिर्ब्रह्मणस्पतिः पर्वतः कुत्सो विष्णुर्वायुरथापि मिश्रो वरुणेन संस्तूयते पूषा रुद्रेण च सोमोऽग्निना च § पूषा वातेन च पर्जन्यः ॥ ३ (१०) ॥**

"अथ एतानि इन्द्रभक्तीनि"—इति। पूर्ववत् सर्वम् "अन्त-

---

* १भा० ३२९ पृ० ४अ० २ख० (५५)। उक्तं च पुरस्तात् "सुविदत्रः = कल्याणवित्तः"—इति १९३५० ९, ३, ५। १९५५० ११पं० तट्टीकायाञ्च द्रष्टव्यम्।

† "सुविदत्रं ज्ञानं धनं वा, तदर्हाः सुविदत्रियाः; छान्दसो घ-प्रत्ययः।"—इति सा० भा०।

‡ "या च काचिद्" क, ख, ग।

§ "सोमो वायुना च" क, ख, ग।

रिक्तलोकः"—इत्येवमादि*। "ये च देवगणाः समाम्नाताः" मरुदादयः†। "याश्च स्त्रियः" अदित्याद्याः‡ ॥

"अथ अस्य कर्म"।—"रसानुप्रदानम्" अवस्यायनम्, वर्षादि, "वृत्रवधः" मेघवधः, "या च का च बलकृतिः" अन्यापि। "इन्द्रकर्म एव तत्"—इति आदरार्थं पुनर्वचनम्; अपि कीटपिपीलिकादिषु, यद्बलेन क्रियते सर्वम्, इन्द्र-कर्मैव तदिति ॥

"अथ अस्य संस्तविकाः देवाः"। "अग्निः, सोमः"—इत्येवमादयः। तद्यथा,—

"इन्द्राग्नी रोचना दिवः"—इति§। विश्वामित्रस्यार्षम्। गायत्री। ऐन्द्राग्ने हविषि विनियोगः। हे 'इन्द्राग्नी' 'रोचना' रोचनौ दीपनौ हविषा च उदकेन च 'दिवः' 'परिभूषथः वाजेषु' अस्मान् सर्वतः; येनान्नेषु स्वामित्वेन भवेमहि, तथा कुरुतम्।

---

* बृहत्सामेत्यन्तं षट्कं मिश्रैव मूले द्रष्टव्यम। तेषां व्याख्यानानि कथं न कृतानि?

† निघण्टुपञ्चमाध्यायस्य चतुर्थपञ्चमयोः खण्डयोरेव मध्यमस्थानदेवताः समाम्नाताः (१भा० ४७५ - ४९० पृ०। तेषाञ्च व्याख्यानं मिश्रैवोपरिष्टाद् नवम-दशमयोः "अथातो मध्यस्थाना देवताः" - इत्यारभ्य "मरुद्भिः सच्च रोदसी" - इत्यन्तेन वक्ष्यति। तत्र यानि बर्ह्यर्थकानि, तान्येव माध्यमिक-'देवगण'-वाचकानीति यावत्। तथा च "मरुतः (८)", "रुद्राः (९)"—इत्येवमादीनि द्रष्टव्यानि। "परे तु ये च देवगणाः समाम्नाताः"—इत्युक्त्या चतुर्थपञ्चमखण्डपठितानां सर्वेषा मेव ग्रहः; स्त्रियां पृथगुपादानन्तु विशेषप्रख्यापनायेति।

‡ विंशतिस्खङ्ख्याकाश्च ताः निघण्टुपञ्चमपञ्चमे (१९) (२९) पठिताः; व्याख्यास्यमानायेहोपरिष्टादेकादशे "अथातो मध्यस्थानाः स्त्रियः"—इत्यारभ्य या अध्यायपरिसमाप्तेः।

§ "इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः। तद्वां चेति प्र वीर्यम्॥"—इति ऋ० सं० १, १, १२, ४।

'तद्' वीर्यम् ('वाम्') भवतोः ('प्र') प्रकृष्टम् अहम् 'चेति' जाने; येन परिभावयथो यागेषु स्तोतॄन् पुरः। अत एव माशास्महे ॥

सोमेन संस्तवः,—"इन्द्रासोमा सꣳसघꣳसम्"—इत्यत्र व्याख्यातः* ॥

वरुणेन संस्तवः,—"इन्द्रावरुणा युव मꣳध्वराय नः"—इति व्याख्यातः शेषः † ॥

"इन्द्रा पूषणा"—इति ‡ पूष्णा संस्तवः। भरद्वाजस्येत्यार्षम्। गायत्री। ऐन्द्रापौष्णे हविषि विनियोगः। हे 'इन्द्रापूषणौ!' 'सख्याय' समानख्यानाय, 'स्वस्तये' स्वस्त्ययनाय च, 'वाजसातये च' अन्नसननाय च 'हुवेम' आह्वयामहे युवां वयं नित्यं यज्ञेषु इदं माशास्महे ॥

"इदं वामास्ये हविः"—इति § बृहस्पतिना संस्तवः। वामदेवस्यार्षम्। गायत्री। ऐन्द्राबार्हस्पत्ये हविषि विनियोगः। हे 'इन्द्राबृहस्पती!' 'इदं' 'हविः' यद् वयं ददुः, तत् 'प्रियम्' इष्टम् 'आस्ये' 'वाम्' अस्तु। यत् च इदम् 'उक्थं' 'शस्यते', 'मदः च' प्रतिगरेण सह, तच्च वां प्रियमस्तु। इत्येतदाशास्महे ॥

---

* पु० १८२१० ६ च० २ पा० २ ख०।

† पु० ९, ११२० ५ च० १ पा० २ ख०। मूले शेषार्द्धमेव व्याख्यातः।

‡ "इन्द्रा नु पूषणा वयं सख्याय स्वस्तये। हुवेम वाजसातये॥"—इति ऋ० सं० ७, ८, २२, १।

§ "इदं वामास्ये हविः प्रिय मिन्द्राबृहस्पती। उक्थं मदश्च शस्यते॥"—इति ऋ० सं० २ ७, २५, १।

"विश्वं सत्यं०——० जिगातम्" * ब्रह्मणस्पतिता संस्तवः। गृत्समदस्येय मार्षम्। चिष्टुप्। 'विश्वं' सर्वं जगत् 'सत्यं' यावदिदमस्ति। किञ्च; हे 'मघवाना' मघवानौ धनवन्तौ 'इन्द्राब्रह्मणस्पती!' युवा मुच्येथे। 'युवोः' युवयोः सर्वम् एतत् स्वभूतम्। किञ्च; यतः सर्वस्येशानौ स्थः, अतः ('आपश्च') आपोऽपि 'न प्रमिनन्ति' न हिंसन्ति, 'व्रतम्' कर्म 'वां' युवयोः यथामङ्क्त्यं वर्त्तते। यौ युवाम् एव मतिमहानुभावौ, तौ ('नः') अस्माकम् ('अच्छ') आभिमुख्येन इदं 'हविः' 'जिगातम्' आगच्छतं भोक्तुम्। ('युजा') युजौ 'इव' सहचारिणौ ('वाजिना') वाजिनौ रथाद् विमुक्तौ बुभुक्षू स्वम् 'अन्नम्'। इत्येतदाशास्महे॥

"इन्द्रापर्वता०——० मदन्ता" † पर्वतेन संस्तवः। विश्वामित्रस्येय मार्षम्। चिष्टुप्। हे 'इन्द्रापर्वता' इन्द्रापर्वतौ! ('देवा') देवौ युवा मुच्येथे। 'बृहता' महता रथेन, महतोदकरंहणेन उदकदानेन 'वामीः' वननीयाः 'दृषः' अन्नानि 'आवहन्तम्' ईरयन्तं, व्रीह्यादीनि प्रेरयन्तम्। 'सुवीराः' शोभनवीराः। ततः स्वे काले ईजानाना मस्माकं 'वीतं' भक्षयतम् 'हव्यानि' पुरोडाशादीनि 'अध्वरेषु'। 'वर्द्धयाम्' च 'गीर्भिः' स्तुतिभिः पुनःपुनः प्रतिकर्म 'इलया' अन्नेन ('मदन्ता') मदन्तौ हृष्यन्तौ। इत्येतदाशास्महे॥

---

* "विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनन्ति व्रतं वाम्। अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम्॥"—इति ऋ० सं० १, ७, २, १।

† "इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः। वीतं हव्यान्यध्वरेषु देवा वर्द्धयां गीर्भिरिळया मदन्ता॥"—इति ऋ० सं० १, ३, १९, १।

"इन्द्राकुत्सा ०——० स्तमांसि" * कुत्सेन संस्तवः। अवस्यो-रार्षम्। त्रिष्टुप्। ('इन्द्राकुत्सा') हे इन्द्राकुत्सौ! ('वहमाना') वहमानौ उह्यमानौ रथेन। युवां ब्रुवे। 'आ वहन्तु वाम्' 'अत्याः' अश्वाः 'अपि' 'कर्णे' नित्यं कर्मणे। ततश्च कर्मणा परितोषितः, अस्माभिः 'निःषोमझ्यः' 'निर्धमथ्यः' सर्वतः अरीन् 'षधस्थात्' समानस्थानादन्तरिक्षादझ्यः अपः। ततः ओषध्याद्युत्पत्त्या कालं कुर्वाणौ। 'मघोनः' महान्येतानि 'तमांसि' 'हृदः' हृदयस्य क्षाद-कानि अनाकालभयकृतानि 'वरथः' वारयथः। इत्येतदाशास्महे॥

"इन्द्राविष्णू ०——० वीरान्" † विष्णुना संस्तवः। वसिष्ठ-स्यार्षम्। त्रिष्टुप्। वैधातव्यां विनियोगः। हे 'इन्द्राविष्णू!' युवां 'दृंहिताः' स्थिरीकृताः 'शम्बरस्य नवतिं नव च पुरः' मेघस्य असु-रस्य वा स्वभूताः पुरः 'अथिष्टम्' हतवन्तौ स्थः। ताश्च त्वा मेघान्त-र्गताः 'शतं' 'वर्चिनः' दीप्तिमतः अन्नवतो वा 'सहस्रं च साकम्' अव-स्थितान् सहभावेन एकनिश्चयान् 'हथः' हतवन्तौ स्थः। 'अप्रति' अप्र-तीकारान् 'वीरान्' 'असुरस्य' शम्बरस्य स्वभूतान्। यौ युवा मेत-दतिदुष्कर मकार्षम्, तावस्माक मपि शत्रून् हथः। इत्येतदाशास्महे॥

"इन्द्रवायू इमे सुता"—इति ‡ वायुना संस्तवः। मधुच्छन्दस

---

* "इन्द्राकुत्सा वहमाना रथेना वां सत्या उपि कर्णे वहन्तु। निः षोमद्भ्यो धमथो निः षधस्थान्मघोनो हृदो वरथस्तमांसि॥"—इति ऋ० सं० ४, १, ३०, ४।

† "इन्द्राविष्णू दृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम्। शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान्॥"—इति ऋ० सं० ५, १, २४, ५।

‡ "इन्द्रवायू इमे सुता उप प्रयोभिरागतम्। इन्दवो वामुशन्ति हि॥"—इति ऋ० सं० १, १, २, ४।

आर्षम्। गायत्री। उपात्तद्विकर्मात्मनोऽपि हि मध्यमस्य एकस्यापि वाग्विन्द्रभावेन विकरणधर्मित्वात् द्वित्वं बिभ्रतः नैरुक्तपक्षेऽपि द्विवचनसंस्तुतिरविरुद्धा; यथा एकस्योदकस्य द्विपात्रस्थस्य द्विवचनोक्तिः। ऐन्द्रवायवस्य ग्रहस्य पुरोऽनुवाक्येयम्। हे 'इन्द्रवायू!' युवा सुचेये। 'इमे' 'सुताः' अभिषुताः 'इन्दवः' सोमाः इत्यर्थः। सुसंस्कृताः सोमा यस्माद् 'उशन्ति' कामयन्ते युवा मात्मपानाय, तस्मात् 'उपागच्छतम् पातु मेतान्। कथं पुनरुपागच्छतम्? 'प्रयोभिः' अन्नैः अस्मत्सम्प्रदेयैरभ्युद्यतैः। इत्येतदाशास्महे॥

"अथापि मित्रो वरुणेन संस्तूयते"। 'अथ'-शब्दः प्रकृतात् इन्द्राद् विशेषतो मित्रादीन् प्रकरोति। 'अपि'-इति सम्भावने। प्रकृताभ्यस्तिसृभ्यो देवताभ्यः पराण्यपरेणाभिधानेन संस्तवयुक्तानीति। भेदपक्षे अविरोध एव; नैरुक्तपक्षे यद्विरुद्धाभास मिव किञ्चिदत्र, तदिन्द्रवायुसंस्तवे प्रतिषमाहितम्*। 'मित्रो वरुणेन'—इत्येवमादिषु या प्रथमया निर्दिश्यते, सा मुख्या स्तुतिः; या तृतीयया निर्दिष्टा, सा अमुख्या †॥

"आ नो मित्रा ०——० सुक्रतू"‡। विश्वामित्रस्यार्षम्। गायत्री। मैत्रावरुणाः पयस्यायाः पुरोऽनुवाक्या। ('मित्रावरुणा') हे मित्रावरुणौ! 'सुक्रतू' शोभनकर्माणौ! युवा सुचेये। 'गव्यूतिम्' गोयूतिम्,

---

* एतत्पृष्ठाद्यपङ्क्तौ एव 'उपात्तद्विकर्मात्मनोऽपिहि'—इत्यादिना।

† उत्तरत्रापि "पूष्णा रुद्रेण च सोमः"—इत्यादौ सर्वत्रैवं बोधम्।

‡ "आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू॥"—इति ऋ० सं० ३, ४, ११, १।

यवसोदकोत्पत्तये 'रजांसि' च गोयूतेर्यान्यन्यानि स्थानानि व्रीह्यादिधान्योत्पत्तिक्षेत्राणि, तानि च व्रीह्याद्युत्पत्तये 'मध्वा' मधुरेण सस्यसम्पत्करणेन ('घृतैः') घृतेन उदकेन 'नः' अस्माकम् 'उक्षतम्' सिञ्चतम्। इत्येतदाशास्महे॥

"पूष्णा रुद्रेण च सोमः"। सोमापूष्णा ०——० नाभिम्"* पूष्णा सोमस्य संस्तवः। मत्समदस्यार्षम्। त्रिष्टुप्। सोमापौष्णस्य चरोः पुरोऽनुवाक्या। सोमापूष्णौ चन्द्रसूर्यौ, तावुच्येते। ('सोमापूषणा') हे सोमापूषणौ! युवां ('जनना') जननौ जनयितारौ 'रयीणां' धनानाम्, ('जनना') जनयितारौ च 'पृथिव्याः'। 'जातौ' जातमात्रौ एव युवां 'विश्वस्य' सर्वस्य 'भुवनस्य' भूतजातस्य 'गोपौ' गोप्तारौ बभूवथुः। 'देवाः' च रश्मयः युवा मेव 'अमृतस्य' उदकस्य 'नाभिं' नहनं बन्धनम्, आधारं सर्वलोकस्य 'अकृण्वन्' सदा कुर्वन्ति। युवा मिदं नाम अस्माकं कुरुत मित्याशिषा निराकाङ्क्षम्॥

"सोमारुद्रा ०——० अस्मत्"† रुद्रेण संस्तवः। भरद्वाजस्येय मार्षम्। त्रिष्टुप्। सोमारौद्रस्य चरोः पुरोऽनुवाक्या। ('सोमारुद्रा') हे सोमारुद्रौ! युवा मुच्येथे। एतानि सर्वाणि 'भेषजानि' 'अस्मे' अस्माकं 'तनूषु' शरीरेषु 'धत्तम्'। किञ्च; 'अवस्यतम्' नित्य

---

* "सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः। जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम्॥"—इति ऋ० सं० १, ८, ६, १।

† "सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम्। अवं स्यतं मुञ्चतं यन्नो असि तनूषु बद्धं कृतमेनो अस्मत्॥"—इति ऋ० सं० ५, १, १८, २।

मस्मानवितुं रक्षितु मिच्छतम्। किञ्च; 'यत्' ('नः') अस्माकम् मनोवाक्कायैः 'कृतम्' 'एनः' किञ्चित् अस्ति, 'तनूषु' तत् 'मुञ्चतम्' 'अस्मत्तः'॥

"अग्निना च पूषा" मध्यमस्थानेन * च द्युस्थानेन च † संस्तव इति; पार्थिवेन प्रतिषेधात्‡। ऋचं नोदाहरति; सृग्य मुदाहरणं येन संस्तवः॥

"वातेन च पर्जन्यः"। "धर्त्तारा दिव ०——० मे हवम्" §। वसुकर्णस्यार्षम्। त्रिष्टुप्। 'धर्त्तारः दिवः ऋभवः' 'सुहस्ता' शोभन-हस्तौ ('वातापर्जन्या') वातापर्जन्यौ च, 'आपः' च, ('ओषधीः') ओषधयश्च, 'भगः' च, 'रातिः' दाता, 'वाजिनः' ॥ च, ('धर्त्तारः') धारयितारः, ('दिवः') द्योतनवन्तः ये उक्काः उदकस्य। 'महिषस्य' महतः 'तन्यतोः' सर्वार्थतनितुः। ('हवं') हवन माह्वानम् 'नः' अस्माकम् 'आयन्तु' आगच्छन्तु। आगत्य च 'प्रतिरन्तु' प्रतीर्णाः कुर्वन्त्वेता अस्मद्-'गिरः' वर्द्धयन्त्वित्यर्थः। वातापर्जन्याविति अत्र संस्तवः॥ ३ (१०)॥

---

* १मा० ४७५ पृ० ५अ० ४ख० (२३)। इह च प० १०, १, १०।

† इहैवोपरिष्टाद् वक्ष्यति,—"अग्निरण्डादितिरुच्यते"—इत्यादि ११, ३, १।

‡ पु० "अथाप्याग्नापौष्णं हविर्नै तु संस्तवः"—इति ३४४पृ० ९पं०।

§ "धर्त्तारा दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः। आप ओष-धीः प्रतिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम्॥"—इति ऋ० सं० ८, १, १३, ५।

॥ "अग्निर्वायुः सूर्य्यस्ते वै वाजिनः"—इति तैत्तिरीयब्राह्मणम्।

अथैतान्यादित्यभक्तीन्यसौ लोकस्तृतीयसवनं वर्षा जगती सप्तदशस्तोमो वैरूपं साम ये च देवगणाः समाम्नाता उत्तमे स्थाने याश्च स्त्रियोऽथास्य कर्म रसादानं रश्मिभिश्च रसधारणं* यच्च† किञ्चित् प्रवल्हित मादित्यकर्मैव तच्चन्द्रमसा वायुना संवत्सरेणेति संस्तवः ॥ ४ ‡ ॥

"अथैतान्यादित्यभक्तीनि"—इति। पूर्ववद् "असौ लोकः"—इत्येवमादि। "सूर्यो द्युस्थानः"—इति § पूर्वं मधिकृत्य "अथ एतानि आदित्यभक्तीनि"—इति ब्रह्मब्रवीत् स्वपक्षोद्योतनानुस्मृतये ॥ ॥

"ये च देवगणाः समाम्नाताः उत्तमे स्थाने" आदित्यादयः ¶। "याश्च स्त्रियः"—उषाः**, सूर्या††, वृषाकपायी‡‡, सरण्यूः §§, देवपत्न्यः ॥ इति ॥

---

* "रसाधारणं" ङ, च।

† "यत्तु" क, ख, ग।

‡ नास्य खण्डसमाप्तिः ङ-च-पुस्तकयोः।

§ पृ० ३१० पं० १२ पं०।

॥ एवञ्च असौलोक इत्यस्य द्युलोक इत्यर्थो बोध्य इति भावः।

¶ १भा० ४९०पृ० ५अ० ९ख० (१४)—(३०)। षट्खण्डपठिताः सर्वा एव वा।

** १भा० ४९०पृ० ५अ० ९ख० (२)। परस्ताच्चैव ११, ४, १२।

†† १भा० ४९०पृ० ५अ० ९ख० (३)। परस्ताच्चैव १२, १, ७।

‡‡ १भा० ४९०पृ० ५अ० ९ख० (४)। परस्ताच्चैव १२, १, ८।

§§ १भा० ४९०पृ० ५अ० ९ख० (५)। परस्ताच्चैव १२, १, ९।

॥॥ १भा० ४९० पृ० ५अ० ९ख० (२१)। परस्ताच्चैव १२, ४, १०।

"अथास्य कर्म"—"रसादानम्"—इत्येवमादि; "यच्च किञ्चित् प्रवल्हितम् आदित्यकर्म एव तत्" *।

"चन्द्रमसा, वायुना, संवत्सरेण इति संस्तवः"। अल्पत्वात् स्वशब्दैरेव ब्रवीति, नाधिकारवचनं करोति अथास्येति †॥

"पूर्वापरं ०——०जायते पुनः" ‡। चन्द्रमसा संस्तवः। सूर्याया-श्चार्षम्। जगती। राजयज्ञेष्यां वैश्वदेवस्य चरोः पुरोनुवाक्येषा। 'पूर्वापरं चरतः' सूर्याचन्द्रमसौ पूर्वपक्षे पूर्वः सूर्यः अपरश्चन्द्रमाः, अपरपक्षे पुनरपरः सूर्यः पूर्वश्चन्द्रमाः। एवम् 'एतौ' चरण मनु-परन्तौ चरन्तौ सर्वदा चरतः। तौ पुनः 'मायया' योगैश्वर्यकृतया कयापि प्रज्ञयेति कस्त्वं वेद; न ह्ययोगिनौ एवं शक्तौ चरितु मिति। अपि चैतदपि चिन्त्यम्,—यदपरिखिद्यमानौ आभूतसम्प्लवात् 'शिशू' इव 'क्रीलन्तौ'। 'अध्वरं' यज्ञ मभिनिष्पादयन्तौ सर्व मिदं 'परि यातः' परि गच्छतः। तत्कथमिति,—"विश्वान्यन्यो भुवनाभिचष्टे"। 'विश्वानि' ('भुवना') भुवनानि भूतानि 'अभिचष्टे' अभिपश्यति 'अन्यः' आदित्यः; अथैतान्यभिद्रष्टव्यानि उपकारकत्वेन

---

* ऋचोक्तानां रसादानादीनां स्वरूपनिर्णयो विशेषतः प्रवल्हितपदस्यार्थः टीकाकारस्य कर्त्तव्य एव; पर मद्दो मूक एवाच दुर्गाचार्यः। किञ्च, अयं लोकं इत्यादीना मग्निभक्तित्वं कुतः? अन्तरिक्षलोक इत्यादीना मिन्द्रभक्तित्वञ्च कुतः? कुतो वा असौलोक इत्यादीना मादित्यभक्तित्वम्? इत्यपि नोक्त मत्र तेन।

† यथा च पूर्वपूर्वचोक्तम् "अस्य संस्तविकादेवाः"—इति (१४ पृ० ७पं०, १५१ पृ० १पं०) नात्र तथेति भावः।

‡ "पूर्वापरं चरतो मायया तौ शिशू क्रीळन्तौ परि यातो अध्वरम्। विश्वान्य-न्यो भुवनाभिचष्ट ऋतूंरन्यो विदधज्जायते पुनः॥"—इति ऋ० सं० ८, १, १३, १।

तयैव मन्त्रानि पश्यति। 'ऋतून्' 'अन्यः' चन्द्रमाः 'विदधत्' अभिनिष्पादयत् स्वगत्या। ('पुनः') पुनःपुनः प्रतिमासं ('जायते') जायमानः उदेति अस्त मेति च *। असंस्तवेनोत्तरोर्द्धर्चः। यावेतदेव मत्यद्भुतं किं मपि चरणं चरतः, तावेतौ अगद मस्मद्यजमानं कुरुत मित्याशिषा निराकाङ्क्षः॥

वायुना संस्तवः "सप्त ऋषयः प्रतिहिताः (य० वा० सं० ३४, ५५)"—इत्यत्र। तत्र 'जाग्रतो अस्वप्नजौ'—इत्येतस्मिन् पादे "वाय्वादित्यौ"—इति वक्ष्यति †॥

संवत्सरेण च संस्तवः "पञ्चपादं पितरम् (ऋ० सं० २,३,१६, १०)"—इति व्याख्यातः ‡॥ ४॥

**एतेषवेव स्थानव्यूहेषृतुच्छन्दस्तोमपृष्ठस्य भक्तिशेष मनुकल्पयीत शरदनुष्टुबेकविंशस्तोमो वैराजं सामेति पृथिव्यायतनानि हेमन्तः पङ्क्तिस्त्रिणवस्तोमः शाक्करं सामेत्यन्तरिक्षायतनानि शिशिरोऽतिच्छन्दास्त्रयस्त्रिंशस्तोमो रैवतं सामेति द्युभक्तीनि॥ ५ (११)॥**

"एतेषु एव स्थानव्यूहेषु ऋतुच्छन्दस्तोमपृष्ठस्य भक्तिशेष मनुकल्पयीत"। ऋतवश्च छन्दांसि च स्तोमाश्च पृष्ठानि च ऋतुच्छन्दः-

---

* "यद्युभयोरपि पुनर्जामित्वं तथापि सूर्यस्य सर्वदा प्रवृद्धेः उदयो नाभिप्रेतः, चन्द्रस्य तु ह्रासवृद्धिसद्भावात् पुनःपुनः जायत इत्युक्तिर्युक्ता। 'चन्द्रमा वै जायते पुनः'—इत्यादिश्रुतेः"—इति सा० भा०।

† उपरिष्टादिहैव 'वाय्वादित्यौ', 'प्राज्ञश्चात्मा तैजसश्च'—इति चाधिदैवत मध्यात्मं चोभयविधं व्याख्यानं द्रष्टव्यम् (१२, ४, ६)।

‡ १भा० ४९० पृ० १०पं०; ४९५पृ० ४पं०।

स्तोमपृष्ठम्, तस्य ऋतुच्छन्दःस्तोमपृष्ठस्य। ऋतुभक्तिशेषम्*, छन्दोभक्तिशेषम्†, स्तोमभक्तिशेषम्‡, पृष्ठभक्तिशेषञ्च§ ॥

तद्यथा;—"शरत्, अनुष्टुप्, एकविंशस्तोमः, वैराजं साम—इति पृथिव्यायतनानि"। अनग्निलिङ्गेऽपि चेन्मन्त्रे एतेषा मन्यतमं स्यात्, स आग्नेय इति प्रतिपत्तव्यम्। एव मेवोत्तरयोरपि स्थानव्यूहयोः। व्यूहो नाम विस्तारः। "हेमन्तः, पङ्क्तिः, त्रिणवस्तोमः, शाक्करं साम—इति" ("अन्तरिक्षायतनानि") अन्तरिक्षलोकायतनानि। "शिशिरः, अतिच्छन्दाः, त्रयस्त्रिंशस्तोमः, रैवतं साम—इति" "द्युभक्तीनि" द्यां भजन्त इति द्युभक्तीनि; अपिवा आदित्यं भजन्त इति द्युभक्तीनि। विभक्तिग्रहणं प्रनाडिकोपदर्शनार्थम्; एतेषां स्तुतिः सा स्तुतिसङ्क्रमणन्यायेन स्थानाधिपतेः सूर्यस्य स्तुतिरिति। सर्वत्रैवम् ॥ ५ (११) ॥

---

* "पञ्चर्तवो हेमन्तशिशिरयोः समासेन, तावान् संवत्सरः"—इति ऐ० ब्रा० १, १, १। "षड् वा ऋतवः, ऋतुश एव तत् संवत्सर माप्नुवन्ति"—इति ऐ० ब्रा० ४, २, २। "तां वासन्तिकाभ्यां मासाभ्या मन्वयुञ्जत * * * तां ग्रैष्मिकाभ्यां तां वार्षिकाभ्यां तां शारदाभ्यां तां हैमन्तिकाभ्यां मासाभ्या मन्वयुञ्जत * * * तां शैशिराभ्यां मासाभ्या मन्वयुञ्जत तां शैशिराभ्यां मासाभ्या माप्नुवन्नाप्नोति"—इति च ऐ० ब्रा० ४, ४, ५।

† छन्दांसि वा अन्योन्यस्यायतन मध्यधायन्। गायत्री त्रिष्टुभश्च जगत्यै चायतन मध्यधायत्, त्रिष्टुप् गायत्र्यै च जगत्यै च, जगती गायत्र्यै च त्रिष्टुभश्च"—इति, "सा गायत्री गर्भं मधत्त सानुष्टुभ मसृजत, त्रिष्टुप् गर्भं मधत्त सा पङ्क्ति मसृजत, जगती गर्भं मधत्त सातिच्छन्दस मसृजत"—इति च ऐ० ब्रा० ४, ४, ५; ६।

‡ त्रिष्टदादयः षट् स्तोमाः सामवेदीयाः सन्ति। तत्प्रग्रथनप्रकारादयश्च सामवेदीये ताण्ड्ये महाब्राह्मणे तृतीयाद्यध्यायत्रये श्रूयन्ते स्फुटम्।

§ "बृहच्च वा इद मग्रे रथन्तरं चासां * * * तद् वैरूप मसृजत * * * तद् वै राज मसृजत * * * तच्छाक्कर मसृजत * * * तद्रैवत मसृजत * * * षट् पृष्ठान्यासन्"—इति ऐ० ब्रा० ४, ४, ६। "पृष्ठः षडहो भवति"—इत्यादिकञ्च ताण्ड्यम्।

## ॥ तिसृणां देवानां भक्तयो भक्तिशेषाश्च ॥

॥ नव '*'—एतच्चिह्नयुक्ताः सर्वेएव भक्तिशेषाः ज्ञेयाः ॥

| | | अग्नेः | इन्द्रस्य | आदित्यस्य |
|---|---|---|---|---|
| लोकाः | ... | पृथिवी | अन्तरिक्षम् | द्यौः (१) |
| सवनानि | ... | प्रातः | मध्यन्दिनम् | तृतीयम् (२) |
| ऋतवः(३) | ... | वसन्तः<br>शरत्* | ग्रीष्मः<br>हेमन्तः* | वर्षा<br>शिशिरः* |
| छन्दांसि(१०) | | गायत्री(४)<br>अनुष्टुप्*(५) | त्रिष्टुप्(६)<br>पङ्क्तिः*(७) | जगती(८)<br>अतिच्छन्दाः*(९) |
| स्तोमाः(११) | | त्रिवृत्(४)<br>एकविंशः*(५) | पञ्चदशः(६)<br>त्रिणवः*(७) | सप्तदशः(८)<br>त्रयस्त्रिंशः*(९) |
| सामानि | ... | रथन्तरम्(४)<br>वैराजम्*(५) | बृहत्(६)<br>शाक्करम्*(७) | वैरूपम्(८)<br>रैवतम्*(९) |
| देवगणाः | ... | निघ०५।१—३। | ५।४,५। | ५।६। |
| स्त्रियः | ... | सत्रय | तत्रैव | तत्रैव |
| कर्माणि | ... | हविर्वहनम्<br>देवयाजनम्<br>दार्ष्टिविषयिकम् | रसानुप्रदानम्<br>वृत्रवधः<br>बलक्षत्तिः | रसादानम्<br>रसधारणम्<br>प्रवर्जितम् |

## ॥ तिसृणां देवानां संस्तविकाः देवाः ॥

| | | |
|---|---|---|
| अग्नेः | ... | रुद्रः, सोमः, वरुणः, पर्जन्यः, ऋतवः।<br>आग्नावैष्णवम्, आग्नापौष्णं च हविः; न तु संस्तवः(१९)। |
| इन्द्रस्य | ... | अग्निः, सोमः, वरुणः, पूषा, बृहस्पतिः, ब्रह्मणस्पतिः,<br>पर्वतः, कुत्सः, विष्णुः, वायुः, मित्रो वरुणेन,<br>सोमः पूष्णा, सोमो रुद्रेण, पूषा अग्निना, पर्जन्यो वातेन। |
| आदित्यस्य | ... | चन्द्रमाः, वायुः, संवत्सरः। |

(१) "स तपस्तप्त्वेमांल्लोकान्सृजत पृथिवीं मन्तरिक्षं दिवम्। * * *। तेभ्यो ज्योतींष्यजायन्ताग्निरेव पृथिव्या अजायत वायुरन्तरिक्षादादित्यो दिवः (ऐ० ब्रा० ५, ५, ७)"—इति श्रुतेः पृथिव्यादिलोकाना मग्न्यादिभक्तित्वम्।

(२) "अग्नये वसुभ्यः प्रातः सवने। * * *। इन्द्राय रुद्रेभ्यो मध्यन्दिने। * * *। विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीयसवने (ऐ० ब्रा० ३, २, २)"—इत्यादिश्रुतेः प्रातरादिसवनाना मग्न्यादिभक्तित्वम्।

(३) ऋतूनां विभक्तित्वं च गमयन्नाहैतरेयके "देवासुरा"—इत्युपक्रम्य "त इमा-स्त्रिस्रः सतीरुपसदो द्विर्द्विरेकैका मुपायंस्ताः षट् सम्पद्यन्त, षड् वा ऋतवः"—इत्या-दिना (१, ४, ६)। "वसन्तेनर्तुना"—इत्यादयश्च षट् ऋचो द्रष्टव्याः। य०वा० सं० २१, २२—२८। वसन्तादीना मग्न्यादिभक्तिनिदानन्तु आयुर्वेदविदो विदन्ति च।

(४) "अग्निर्वै देवता प्रथम महर्वहति त्रिवृत्स्तोमो रथन्तरं साम गायत्री-च्छन्दः"—इति, "अभित्वा शूर नोनुमः (सा० सं० छ० आ० २, १, ५, १। अ० मा० १, १, २१) * * *—इति रथन्तरं पृष्ठं भवति"—इति च ऐ० ब्रा० ४, ५, १।

(५) "वाग् वै देवता चतुर्थमहर्वहत्येकविंशस्तोमो वैराजं सामानुष्टुप् छन्दः"—इति, "पिबा सोम मिन्द्र मन्दतु त्वा (सा० सं० छ० आ० ५, १, १, ८। गे० मा० १०, ९, ३१) * * *—इति वैराजपृष्ठं भवति"—इति च ऐ० ब्रा० ५, १, ४।

(६) "इन्द्रो वै देवता द्वितीय महर्वहति पञ्चदशस्तोमो बृहत्साम त्रिष्टुप् छन्दः" —इति, "त्वा मिद्धि हवामहे (सा० सं० छ० आ० २, १, ५, २। अ० मा० १, १, २७) * * *—इति बृहत्पृष्ठं भवति"—इति च ऐ० ब्रा० ४, ५, ३।

(७) "गौर्वा देवता पञ्चम महर्वहति त्रिणवःस्तोमः शाक्करं साम पङ्क्तिश्छन्दः"— इति ऐ० ब्रा० ५, ९, १। "महानाम्नीष्वच स्तुवते शाक्करेण साम्ना"—इत्यादि। ऐ० ब्रा० ५, ९, ९। महानाम्न्यृक्षु स्वनामप्रसिद्धे सामवेदीयार्चिकग्रन्थविशेषे, तत्साम च सामवेदीयं महानाम्नीसामेति प्रसिद्धम् गानग्रन्थचतुष्टयेभ्यः पृथगेव।

(८) "विश्वे वै देवा देवतास्तृतीय महर्वहन्ति सप्तदशस्तोमो वैरूपं साम जगती-च्छन्दः"—इति, "यद् द्याव इन्द्र ते शतम् (सा० सं० छ० आ० ३, २, ४, ६। अ० मा १, १, १—८) * * *—इति वैरूपं पृष्ठं भवति"—इति च। ऐ० ब्रा० ५, १, १।

(९) "द्यौर्वै देवता षष्ठ महर्वहति त्रयस्त्रिंशः स्तोमो रैवतं सामातिच्छन्दाश्छन्दः" —इति, "रेवतीर्नः सधमादे (सा० सं० छ० आ० ९, २, १, ९। अ० मा० ९, १,

१७—१८) * * *—इति रैवतं पृष्ठं भवति"—इति च। ऐ० ब्रा० ५, २, ७।

(१७) छन्दःशास्त्रे तु सप्त छन्दांसि दृश्यन्ते। तथा हि पैङ्गलतन्त्रेऽध्याये—"छन्दः (१), गायत्री (२), तान्युष्णिगनुष्टुबृहतीपङ्क्तित्रिष्टुब्जगत्यः (१४)"—इति सूत्राणि; ऐतरेय ब्राह्मणेऽपि च "अग्निर्गायत्र्या, सविताऽष्णिहा, सोमोऽनुष्टुभा, बृहस्पतिर्बृहत्या, मित्रावरुणौ पङ्क्त्या, इन्द्रस्त्रिष्टुभा, विश्वेदेवा जगत्या"—इति ८, १, १। यास्कोऽप्यत्र मुपरिष्टाद् (१३, १, ७) वक्ष्यति च "सप्तच्छासः सप्त छन्दांसि"—इति। इह तु वेषां पक्षाणा मेव देवतानिर्णयो ध्वनित इति विचार्यम्। बृहत्यास्त्रिष्टुभेवभक्तित्वादिह प्रवेशो न सम्भवतीत्यपि सम्भाव्यतेऽस्माभिः। तथाह्यैतरेयकम्,—"चयस्व वा एते"—इत्यादि। ४, ४, १। अतिजगत्यादीना मतिच्छन्दसान्तु सप्तानां मेवादित्यभक्तित्व मुपदिश्यते। तल्लक्षणञ्च सोदाहरणं श्रूयते ऐतरेयके। तथाहि,—"चिकित्वत्सु मन्विषो यवाग्निरम् (सा० सं० छ० आ० ५, १, ३, १, अष्टिः), प्रोष्ठेशये पुरोरथम् (सा० सं० उ० आ० ९, १, १४, १, अतिजगती)—इत्यतिच्छन्दसः शंसति। छन्दसां वै योऽरसोऽत्यचरत् सोऽतिच्छन्दस मभ्यत्यचरत् तदतिच्छन्दसोऽतिच्छन्दस्त्वम्"—इति ४, १, ३। छत्यादीनां विच्छन्दसान्तु सप्तानां क्व निवेशः स्वीकार्य इति च चिन्तनीय मेव स्थितम्।

(११) देवा वा असुरैर्विजिग्याना ऊर्द्धाः स्वर्गं लोक मायंस्तोऽग्निर्दिविस्तृग्रुद्धं उदश्रयत सः स्वर्गाय लोकस्य द्वार मपणोदग्निर्वै स्वर्गस्य लोकस्याधिपतिस्तं वसवः प्रथमा आगच्छन् * * * तं ते चिटता स्तोमेनास्तुवन्। * * * तं रुद्रा आगच्छन् * * * तं ते पञ्चदशेन स्तोमेनास्तुवन्। * * * त मादित्या आगच्छन् * * * तं ते सप्तदशेन स्तोमेनास्तुवन्। * * * तं विश्वेदेवा आगच्छन् * * * तं त एकविंशेन स्तोमेनास्तुवन् (ऐ० ब्रा० ३, ४, ४)"—इत्यादौ, "विश्वे त्वा देवा आनुष्टुभेनच्छन्दसैकविंशेन स्तोमेन वैराजेन साम्ना रोहन्तु (ऐ० ब्रा० ८, ४, ३)"—इत्यत्र चैकविंशस्तोमस्य वैश्वदेवत्वं श्रूयते, विश्वेदेवाश्च द्युस्थानभागिन इति कथ मेकविंशस्याग्निभक्तित्वेषत्व मित्यपि चिन्तनीयम्।

(१९) "आग्नावैष्णवं पुरोडाशं निर्वपन्ति"—इत्याद्याग्नावैष्णवहविषो विधायकं ब्राह्मणम्। ऐ० १, १, १। "अग्निश्च विष्णो तप उत्तमं मह इत्याग्नावैष्णवस्य हविषो याज्यानुवाक्ये भवतः"—इति च ऐ० ब्रा० १, १, ४। आग्नापौष्णहविष उदाहरणन्तु मूले एव द्रष्टव्यम्।

सर्वं मेतन्मन्त्राश्रय मित्युक्तम्, त एव तावत् मन्त्राः कस्मात्? इति वक्तव्य मत आह;—

**मन्त्रा मननाच्छन्दांसि छादनाद्यजुर्यजतेः* साम समिति मृचा स्यतेर्वर्चा समम्मेन इति नैदाना गायत्री गायतेः स्तुतिकर्म्मणस्त्रिगमना वा विपरीता गायतो मुखादुदपतदिति च ब्राह्मणम्॥ ६†॥**

"मन्त्राः मननात्"; तेभ्यो ह्यध्यात्माधिदैवाधियज्ञादि‡ मन्तारो मन्यन्ते, तदेषां मन्त्रत्वम्§॥

ते पुनश्छन्दोमयाः, नाच्छन्दसि वागुच्चरतीति॥ अथ "छन्दांसि" कस्मात्? "छादनात्"। "यदेभिरात्मान माच्छादयत् देवा मृत्योर्बिभ्यत, तच्छन्दसां छन्दस्त्वम्"—इति विज्ञायते॥

अथ "यजुः" कस्मात्? "यजतेः" धातोः; तेन हि विशेषत इज्यते, सर्वत्र याज्यान्ते वषट्कारविधानात्¶॥

---

* "छन्दांसि छादनात् स्तोमः स्तवनात् यजुर्यजतेः" ङ, च।

† नाच खण्डसमाप्तिः ङ-च-पुस्तकयोः।

‡ न जानेऽचादिपदात् पुनः कस्य ग्रहण मभीष्टं टीकाकृतः?

§ "मनो वै दीदाय मनसो हि न किञ्चन पूर्व मस्ति, मन एव तत् सम्भावयति मनः संस्कुरुते"—इति ऐ० ब्रा० २, ५, ८।

॥ "छन्दांसि छन्दयतीति वा"—इति सां दै० ब्रा० २, १९।

¶ छन्दःप्रभृत्यन्तरा न वागुच्चरतीत्येव मिह प्रभृतिग्रहणं कर्त्तव्यम्, यजुषो साम्नश्च ग्रहणाय। यजुरपि छन्दोविशेषमेव, सामापि छन्दोमूलक मेवेति सङ्कीर्णमनस्त्व मिह नादरणीयम्; मूले तु तयोरपि लक्षणे उक्ते तचाप्यवतरणी वक्तव्यैव टीकाकृताम्।

अथ "साम" कस्मात्? तद्धि "सम्मितम् ऋचा" यावती ऋक् तावदेव परिमाणतः। "अश्नुतेः वा" क्षेपणार्थस्य (दि० प०); प्रक्षिप्त मिव हि तत् ऋचि भवति। विज्ञायते च "तस्मादृच्यध्यूढं साम गीयते"†। अथ वा "स्नुतेः वा" इति। "षो अन्तकर्मणि (दि० प०)"; अन्त्यं तत् कर्म भवति, संहिता—पदम्—साम इति। "ऋचा समं मेने—इति नैदानाः"। 'ऋचा' एतत् 'समम्' इत्येवं प्रजापतिः 'मेने' ज्ञातवान्। अथ वा आत्मान मेव 'ऋचा समं' 'मेने' ज्ञातवत्, तत् साम्नः सामत्वम्। इत्येवं 'नैदानाः' मन्यन्ते। निदान मिति ग्रन्थः, तद्विदो नैदानाः‡॥

"छन्दांसि छादनात्"—इत्युक्तम्, तानि च पुनरमूनि गायत्री-प्रमुखानि। अतो गायत्रीं निराह,—"गायत्री, गायतेः स्तुति-कर्मणः§" तया हि गीयन्ते स्तूयन्ते देवताः॥ ॥ ६ ॥

**उष्णिगुत्स्नाता भवति स्निह्यतेर्वा स्यात्कान्तिकर्म्मण उष्णीषिणो वेत्यौपमिक मुष्णीषं स्नायतेः ककुप् ककुभिनी भवति ककुप् च कुञ्जश्च कुजतेर्वाञ्जतेर्वानुष्टुबनु-**

---

* अस्मन्मते तु ऋध्वरक्रियायैव यज्ञदेहनिर्माणात् यजने यजुष एव प्राधान्यम्।

† छान्दोग्यब्राह्मणस्य द्वितीयप्रपाठके पञ्चमादिखण्डत्रये वक्ष्यते द्रष्टव्यम्।

‡ एतच्चातिपाण्डित्यमूलकं व्याख्यानम्; यास्ककाले हि निदानग्रन्थस्य तु प्राग-भाव एव; पदञ्चाच नैदानशब्देन शब्दमूलान्वेषिणो नैरुक्ता एवेत्यस्माकम्। वस्तुनः "साम सम्मितम्"—इत्यादेर्व्याख्यानं सर्वं मेव न रोचते सामगेभ्यः।

§ सा० दै० ब्रा० १. १. तत्रायेव मेव। तथाच तत एवोद्धृतमिद मिति, गम्यते।

॥ "अष्टाक्षरा वै गायत्री (ऐ० ब्रा०२, १, १२)"—इति, "अष्टाक्षरा गायत्र्यभवत् * * * साष्टाक्षरा गायत्री प्रातः सवन मुदयच्छत् (ऐ० ब्रा० २, २, ४)"—इति च, "चतुर्विंशत्यक्षरा गायत्री (ऐ० ब्रा० २, ४, १)"—इत्यपि द्रष्टव्यम्।

**ष्टोभनाङ्गायत्री मेव चिपदां सतीं चतुर्थेन पादेनानुष्टोभतीति च ब्राह्मणम् ॥ ७ * ॥**

अतः पर मुष्णिगादीनि छन्दांसि चतुरुत्तराणि तानि; तत्प्रसङ्गेनैव निराह।—

तत्र तावत्, "उष्णिक्" "उत्स्नाता" गायत्रीतश्चतुर्भिरक्षरैरधिकैरुद्वेष्टिता इव "भवति"। उष्णिग्गायत्र्यौ जागतश्चेति। "स्निह्यतेः वा स्यात् कान्तिकर्मणः" स्निग्ध मिष्टं देवतानां कान्त मेतच्छन्दः। "उष्णीषिणी इव वा,—इति औपमिकम्"। चत्वार्यक्षराण्यस्याः उष्णीष मिव लक्ष्यन्ते, तेनोष्णिक्†। अथोष्णीषं कस्मात्? "उष्णीषम्", "स्नायतेः" शौचार्थस्य; शुद्धं हि तद् भवति शुक्लम्‡॥

"ककुप्", "ककुभिनी" इव "भवति"। सैवोष्णिक् जागतेन पादेनोपहितेन मध्यतः ककुबित्युच्यते; स तस्याः ककुबिव मध्यतो भवति, तेन ककुभिनीव ककुप्§। अथ "ककुप्" कस्मात्? "कुजतेः" "वा" कौटिल्यार्थस्य, "उज्जतेः" "वा" न्यग्भावार्थस्य; नतं हि तद् भवति॥

"कुज्जश्च" कुज्जोऽप्यनयोरेवान्यतरस्मात्॥॥

---

* नाचापि षण्डसमाम्निः ङ-च-पुस्तकयोः।

† "चतुरश्चतुरः प्राजापत्याद्याः"—इति पि० सू० ३, ११।

‡ सर्वश्चैतदेवमेव सा० दै० ब्रा० ३, ४।

§ "ककुप् ककुद्रूपिणीत्यौपमिकम्"—इति सा० दै० ब्रा० ३, ५।

॥ सर्वश्चैतदेव मेव सा० दै० ब्रा० ३, ६।

"अनुष्टुप्", "अनुष्टोभनात्"। किमिय मनुष्टोभन मिति? "गायत्री मेव त्रिपदां सतीं चतुर्थेन पादेन अनुष्टोभति,—इति च ब्राह्मणम्"। स्वमतं 'च'-शब्देन समुच्चिनोति। गायत्री, त्रिभिरष्टाक्षरैः पादैः समाप्यते, तस्माच्च पुनरपरः चतुर्थः पादो भवति, येन ता मेव अनुष्टुप् अनुष्टोभति, तस्मादनुष्टुप्* ॥ ७॥

**बृहती परिबर्हणात् पङ्क्तिः पञ्चपदा त्रिष्टुप् स्तोभत्युत्तरपदा का तु त्रिता स्यात्तीर्णतमच्छन्दस्त्रिवृद्वज्रस्तस्य स्तोभतीति वा यत्त्रिरस्तोभत्तत्त्रिष्टुभस्त्रिष्टुत्व मिति विज्ञायते ॥८(१२)॥**

"बृहती", "परिबर्हणात्" परिवृद्धासौ भवति, अनुष्टुभश्चतुर्भिरक्षरैः; उक्तं हि—"बृहती जागतस्त्रयश्च गायत्राः"—इति† ॥

"पङ्क्तिः", "पञ्चपदा" पञ्चभिः पादैः पङ्क्तिरित्युच्यते‡ ॥

---

* "अनुष्टुबनुस्तोभनात्। अन्यस्तोदिति हि ब्राह्मणम्"—इति च सा० दै० ब्रा० १, ७—८। "अथातश्छन्दांस्येव व्यतिषजति" इत्यादि चैतरेयकं द्रष्टव्यम् ४, १, १।

† "बृहती बृंहतेर्वृद्धिकर्मणः"—इति सा० दै० ब्रा० २, ११। "षट्त्रिंशदक्षरा वै बृहती। * * *। ते वै दशभिरेवाक्षरैरिमं लोक माप्नुवत दशभिरन्तरिक्षं दशभिर्दिवं चतुर्भिश्चतस्रो दिशो द्वाभ्या मेवास्मिन् लोके प्रत्यतिष्ठन्"—इत्यादि च ऐ० ब्रा० ४, ४, १।

‡ "पङ्क्तिः पचिनी पञ्चपदा"—इति सा० दै० ब्रा० २, १२। पङ्क्तयश्च विविधाः सन्ति। तल्लक्षणानि तु छन्दःशास्त्रीयषष्ठाध्याये द्रष्टव्यानि। "पञ्चपदा पङ्क्तिः, पाङ्क्तो यज्ञः, पाङ्क्ताः पशवः पशवच्छन्दोमाः पशूना मवरुध्यै"—इति ऐ० ब्रा० ५, १, ५।

अथ "चिष्टुप्" कस्मात्? ततो विग्रह्योत्तरं पदं निराह,—"स्तोभत्युत्तरपदा" स्तोभतिर्धातुरुत्तरं पदं यस्याः, सेयं स्तोभत्युत्तरपदा। "का तु चिता स्यात्?" अथ पुनः पूर्वपदे येयं चिता चित्वं श्रूयते 'चि'—इति, एतत् किमर्थ मिति? "तीर्णतमं" स्ततम मिदं "छन्दः", गायत्र्यादिभ्यो बहुत्वात्, सेयं तीर्णतमा च स्तोभति च चिष्टुप्। "चिवद् वज्रः, तस्य स्तोभति इति वा" वज्र मायुधम्, तच्च पुनः प्रायः त्रिसन्धि—शरो वेणुः शुङ्गं शल्य मिति विज्ञायते, तस्य स्तोभति स्तुतिः। अथवा ऐन्द्र मेतच्छन्दः, वज्रं चेन्द्रभक्ति, तस्मादुपपद्यते। "यत् चिः अस्तोभत्, तत् चिष्टुभः चिष्टुप्त्वम्—इति विज्ञायते"* ॥ ८(१२ ॥

**जगती गततमं छन्दो जलचरगतिर्वा† जल्गल्यमानोऽसृजदिति चब्राह्मणं विराड्विराजनाद्वा विराधनाद्वा विप्रापणाद्वा विराजनात्सम्पूर्णाक्षरा विराधनादूनाक्षरा विप्रापणादधिकाक्षरा पिपीलिकमध्येत्यौपमिकं पिपीलिका पेलतेर्गतिकर्मणः ॥ ९‡ ॥**

"जगती", "गततमं छन्दः" अन्त्य मित्यर्थः। अतःपर मतिच्छन्दांसि। "जलचरगतिर्वा" जलोर्मिप्रकारो हि तस्याः प्रस्तारः।

---

* सा० दै० ब्रा० ३, १४-१५-१९. द्रष्टव्यम्। 'एकादशाक्षरा वै चिष्टुप्"—इत्यादि ऐ० ब्रा० ३, ९, १। "अक्षरा चिष्टुप्, सैकादशाक्षरा भूत्वा माध्यन्दिनं सवन मुद्यच्छत्"—इति च ऐ० ब्रा० ३, ३, ४। "चिष्टुविन्द्रस्य वज्रः"—इत्यादि च ऐ० ब्रा० ९, १, १।

† "जलचलगतिर्वा" क, ख, ग।

‡ नेह खण्डसमाप्तिः ङ-च-पुस्तकयोः।

"जल्गल्यमानोऽसृजत्—इति च ब्राह्मणम्"। 'ग्लै हर्षक्षये (भ्वा० प०)'। 'ग्लैहर्ष इव किलैतां प्रजापतिः ससृजे, ददर्शेत्यर्थः; न हि छन्दांसि क्रियन्ते नित्यत्वादेव छन्दसाम्*॥

विराजः पुरस्तात् त्रिष्टुप् निरुक्ता, बाहुल्यादधियज्ञे च प्रयोग-भूयस्त्वात्। अथ पुनर्विराजं निराह,—"विराट्", विराजनाद् वा, विराधनाद् वा, विप्रापणाद् वा"। "विराजनात्, सम्पूर्णाक्षरा" साकल्याद् विराजत इव। "विराधनात्, ऊनाक्षरा"; वैकल्याद् विराध्नोतीव हि सा। "विप्रापणाद्, अधिकाक्षरा"; विप्रुतेव हि सा स्वरूपात्†।

"पिपीलिकमध्या इति औपमिकम्" मध्यात्याक्षरपादा या, सा पिपीलिकमध्येव भवति, पिपीलिकस्वरूपा। "पिपीलिका" कस्मात्? "पेलतेः" ("गतिकर्मणः") गत्यर्थस्य‡॥ ६॥

इतीमा देवता अनुक्रान्ताः सूक्तभाजो हविर्भाज ऋग्भाजश्च भूयिष्ठाः काश्चिन्निपातभाजोऽथेताभिधानैः संयुज्य हविश्चोदयतीन्द्राय वृत्रघ्न (इन्द्राय वृत्रतुर§)

---

* सा० दे० ब्रा० १, १७. प्राय एव मेव पाठोऽपि। "द्वादशाक्षरा वै जगती"—इत्यादि ऐ० ब्रा० १, २, १। "एकाक्षरा जगती सा द्वादशाक्षरा भूत्वा तृतीयसवन मुदयच्छत्"—इति च ऐ० ब्रा० २, ३, ४।

† सा० दे० ब्रा० १, १२. तत्राप्येव मेव। "दशाक्षरा विराट्"—इत्यादि ऐ० ब्रा० ६, ५, १०। "त्रिंशदक्षरा वै विराट्"—इत्यादि च ऐ० ब्रा० ८, १, ४। "पञ्चपदा पङ्क्तिः * * * तानि द्वेधा पञ्चान्यानि पञ्चान्यानि दश सम्पद्यन्ते सा दशिनी विराट्"—इत्यादि च ऐ० ब्रा० ५, ३, ४।

‡ सा० दे० ब्रा० १, ९; १०. तत्राप्येव मेव।

§ नास्त्येषोंऽशः क-ख-ग-पुस्तकेषु टीकायां विवृतत्वात्।

इन्द्रायाहोमुच इति तान्यप्येके समामनन्ति भूयांसि तु समाम्नानाद्यत्तु संविज्ञानभूतं स्यात् प्राधान्यस्तुति तत्समामनेऽथेात कर्मभिर्ऋषिर्देवता स्तौति वृचहा पुरन्दर इति तान्यप्येके समामनन्ति भूयांसि तु समाम्नानाद् व्यञ्जनमाचं तु तत्तस्याभिधानस्य भवति यथा ब्राह्मणाय बुभुक्षितायौदनं देहि स्नातायानुलेपनं पिपासते पानीय मिति ॥ १० (१३) ॥

॥ इति सप्तमाध्यायस्य तृतीयः पादः ॥ ७. ३. .

"इति इमाः देवताः अनुक्रान्ताः"। इतिकरणः प्रकरणसमाप्त्यर्थः। अथ वा इतिकरणेनाभिनयेन दर्शयन्निव ब्रवीति। एव मनेन प्रकारेण यथापरिभाषितेन "यत्काम ऋषिः"—इत्येवमादिना *। इमा देवता अनुक्रान्ताः— अग्निः, जातवेदाः, वैश्वानरः— इत्येवमाद्याः † समाप्ततो निर्णीता इत्यर्थः। ताः पुनः "सूक्तभाजो हविर्भाजः"। काश्चित् हविर्भजन्ते न सूक्तम्, काश्चित् सूक्तं भजन्ते न हविः, काश्चित् उभयं भजन्ते। वक्ष्यति हि— "इतीमानि सप्तविंशतिर्देवतानामधेयान्यनुक्रान्तानि सूक्तभाञ्जि हविर्भाञ्जि, तेषा मेतान्यहविर्भाञ्जि"— इति ‡। "ऋग्भाजस्तु भूयिष्ठाः" प्रायेणेत्यर्थः। तद्यथा,—आप्रीसूक्ते एकैका ऋचं भजन्ते लक्षणभेदा-

* सप्तमाध्यायारम्भेणेति यावत्। पृ० १८५ पं० द्रष्टव्यम्।

† निघण्टु-देवताकाण्डपठिता इत्यर्थः। १भा० ४५९—४९७ पृ० द्रष्टव्यम्।

‡ इहैवोपरिष्टात् १०, ४, ५ द्रष्टव्यम्। तानि च वेन आदीनि।

दिभिः*। अर्द्धर्चभाजोऽपि क्वचिदुपेक्षितव्याः। तद्यथा,—"ऋचः सूर्याय गीयन्त उद्येतीत्यर्द्धपञ्चमाः"†। "यचा चक्रुः"—इत्यस्याः पूर्वोऽर्द्धर्चः सौर्यः शौनकस्य उत्तरो मैत्रावरुणः‡। पादभाजोऽपि क्वचिदुपेक्षितव्याः। तद्यथा,—"नवो नवो भवति जायमानः (ऋ० स० ८, ३, २३, ४)"—इत्यस्याः आदित्यदैवतो द्वितीयः पादो भवति§। भूयिष्ठग्रहणाच्च दर्शयति असमाम्नाता अपि सन्ति, ता अप्युपेक्षितव्या इति; ताश्च यथालक्षणं चिषु स्थानेषु कल्प्याः। तद्यथा,—परमेष्ठि-ग्रह-नक्षत्र-सर्प-लाङ्गल-कुसुम्भकप्रभृतीनि॥

"कांश्चित् निपातभाजः"—इति। निपातो हि द्विविधः। देवतान्तरैः सह साधारणेनोपस्तुतो नैघण्टुकत्वेन च। तत्र साधारणं नाम तद्यथा,—"विधाता धाचा व्याख्यातः। तस्यैष निपातो भवति बहुदेवताया ऋचि। सोमस्य राज्ञः" इति॥। अस्यां सोमप्रभृतिभिः सह विधानात् श्रूयते साधारणेन। नैघण्टुकत्वेन पुनः तद्यथा,—"पृथिवी व्याख्याता। तस्या एष निपातो भवत्यैन्द्राग्न्या ऋचि। "यदिन्द्राग्नी परमस्यां पृथिव्याम्"—इति¶। ताभ्या मिन्द्राग्निभ्यां

---

* ऋ० सं० १०म० ९अ० ११सू० एकादशर्चं माप्रीसूक्तम्। अस्य सूक्तस्य एकादशाना मेवर्चां देवता विभिन्ना इति भावः।

† इति तु अनुक्रमणीवचनम्। उद्येतीति (७म० ४अ०) षडर्चं सप्तमं सूक्तम्, तस्य आद्यात्मनः पञ्चम्याः पूर्वार्द्धस्य सूर्यदेवत्यात्, अवशिष्टात्मयोऽर्द्धर्चो मित्रावरुणदेवत्या इति तदर्थः।

‡ उद्येतीत्यस्मिन्नेव सूक्ते यचाचक्रुरितीय ऋक् पञ्चमी (ऋ० सं० ७, ४, ८, ५)।

§ "आदित्यदैवतो द्वितीयः पाद इत्येके"—इति चोपरिष्टाद् वक्ष्यति ११,१,६।

॥ उपरिष्टात् वक्ष्यति इहैव, तदेतत्तत्रैव द्रष्टव्यं भविष्यति ११, १, ११।

¶ एतच्चोपरिष्टाद् वक्ष्यतीहैव,तदिदं तत्रैव द्रष्टव्यं भविष्यति ११, २, ११।

सह साधारणेन पृथिवी न स्तूयते, किन्तर्हि? लक्षणत्वेनैन्द्राग्नो-रेवोपादीयते। एवं तावदय मिहाधिकारे काश्चिन्निपातभाज इति द्विप्रकारो निपात उक्तः॥

अथाय मपरो निपातप्रकार उपेक्ष्यः; तद्यथा,—अत्यन्त-नैघण्टुकम्, देवताभिधान मनत्यन्तनैघण्टुकञ्च। तत्र अत्यन्तनैघण्टुकं नाम अत्यन्त मदृष्टस्वप्रधानस्तुतिः। तद्यथा आदित्यस्व स्वः-पृश्निः-प्रभृतिभिः *। अथ पुनः दृष्टस्वप्रधानस्तुतिमद्देवतापदं वाक्यार्थो-पजनितपारतन्त्र्य माच्छिन्नस्वाभिधेयसामर्थ्य मुपमानशब्देन स्व मर्थ मन्यस्मिन् देवतापदे प्रधाने वाक्यार्थसामर्थ्योपजनितप्राधान्यसामर्थ्यं यत् निगमयति, अनत्यन्तनैघण्टुकं तद् भवति। तद्यथा,—"अग्निरिव मन्यो"—इति †। अग्निशब्द इवेत्यनेनोपमानशब्देन वाक्यार्थोप-जनितसामर्थ्येनाच्छिन्नस्वाभिधेयसामर्थ्यो विशेष माकाङ्क्षन् सम्बोध-नान्तं मन्युशब्दं वाक्यगतैः पदैरुन्नीयमानसामर्थ्य मर्थिनिवेषणपक्षे स्व मर्थं मन्युशब्दे निगमयन् निपततीति नैघण्टुकं तदिति ‡। एव मनेकप्रकारो निपात उपेक्ष्यः॥

"अथ उत अभिधानैः संयुज्य हविः चोदयति"। 'अथ'—इति विशेषाधिकारे। 'उत'—इत्यर्थे। अपर मपर मभिधान मपेक्ष्या-पेक्ष्य। तद्यथा,—अभिधानैः संयोज्य विशेषणशब्दैः तच्चैतदभिधान

---

* १भा० ३१, ३७७—३७८ पृ०; १भा० ११०पृ० १ब्र० ४पा० १ख०।

† ऋ० सं० ८, ३, १९, २। "मन्युः" १भा० निघ० २, १३; ५, ४। इह चोपरि-ष्टात् (१०, ४, २) विशेषो द्रष्टव्यः।

‡ "वाक्यार्थोपजनितसामर्थ्येन पारतन्त्र्य माच्छिन्नस्वाभिधेयसामर्थ्यविशेष * * * मर्थिनिवेषणापेक्षे * * * नैघण्टुकं सम्पद्यते"—इति ग, घ।

मिन्द्रादिसंविज्ञानाद् दृढ मिन्द्रादौ देवतार्थे आम्नायविधौ प्रयोगे च हविश्चोदयति ॥

तद्यथा,—"इन्द्राय वृत्रघ्ने एकादशकपालं निर्वपेत्" इति, तथा "इन्द्रायांहोमुचे इति"—"इन्द्रायांहोमुचे एकादशकपालं निर्वपेत्"—इति* ॥

ततः किम्? "तान्यप्येके समामनन्ति"। 'एके' नैरुक्ताः 'तान्यपि' गुणपदानि वृत्रहांहोमुक्प्रभृतीनि, अग्न्यादौ देवतापदसमाम्नाये पृथक् पृथक् 'समामनन्ति' अहं तु न समामने। कस्मात्? "भूयांसि तु समाम्नानात्" यानि तेषु गुणपदानि वृत्रहांहोमुक्-प्रभृतीनि समामनन्ति, ततोऽन्यान्यपि 'भूयांसि' बहुतराणि सन्ति एव, माहाभाग्यात् देवतायाः गुणाना मियत्ता नास्ति; तेषां तु सर्वेषां समाम्नाने समाम्नायस्यापरिनिष्ठैव स्यात्, तथा च सति तेषां शास्त्रे असमाप्तिः; तन्ममापि मा भूदित्यतः "यत् तु संविज्ञान-भूतं स्यात् प्राधान्यस्तुतिः, तत् समामने" इति। यदेतत् संविज्ञान-भूतं रूढ मगौणं केवल मपि निर्विशेषणं लब्धप्रधानस्तुतिदेवतापद मग्न्यादि, तत् समामने; न गौणं व्रतभृत्-व्रतपत्यादि† ॥

---

* "पुरैवा एतान् देवा अक्रत यत्पुरोडाशास्त्पुरोडाशानां पुरोडाशत्वं तदा-ऽऽहुरनुसवनं पुरोडाशान् निर्वपेत् अष्टाकपालं प्रातःसवन एकादशकपालं माध्यन्दिने सवने द्वादशकपालं तृतीयसवने"—इत्यादि ऐ० ब्रा० १, ३, ५।

† ऋक्संचितायान्तु न दृश्यते व्रतभृत्पदं, नापि व्रतपतिरिति; अन्यच्च लक्ष्येव "सोऽग्नये व्रतभृतेऽष्टाकपालं पुरोडाशं निर्वपेत्"—इति, "सोऽग्नये व्रतपतयेऽष्टाक-पालं पुरोडाशं निर्वपेत्"—इति च ऐ० ब्रा० ७, १, ८। "अग्ने व्रतपते व्रतं चरि-ष्यामि"—इत्यादि च सा० म० ब्रा० १, ६, ९—१३।

अथवा तान्यप्येकं समामनन्तीत्यत उत्तरस्य "भूयांसि तु समाम्नानात्"—इत्यस्यापरोऽर्थः। भूयांसि एव तेषां समाम्नानात् (गुणानि*) समाम्नातानि स्युः, न किञ्चिदतिरिक्तं प्रयोजनम्; वचनात् केवलं गुरु शास्त्रं सम्पद्यते, तन्मा भूत् इत्यर्थः॥

"अथ उत कर्मभिः ऋषिः देवता स्तौति—वृत्रहा, पुरन्दरः" —इति। स वृत्रहा, शतक्रतुः, पुरन्दरः, गोत्रभिद्, वज्रबाहुः इति। "तानि अपि एके समामनन्ति" तानि अपि एके कर्मनामधेयानि समामनन्ति। को विशेषः पूर्वेभ्यः समाम्नातृभ्यः? विधिदर्शनात् पूर्वेण हविश्चोदयति(इति†)वचनात् स्तुतिदर्शनादिकर्मभिर्ऋषिर्देवताः स्तौतीति वचनात् "भूयांसि तु समाम्नानात्" इति स एव दोषः॥

"व्यञ्जनमात्रं तु तत्, तस्याभिधानस्य भवति"। वृत्रहा पुरन्दर इति यदेवमादि गुणपदम्, 'तत्' तस्यैवेन्द्रादेः संविज्ञानपदस्य 'व्यञ्जनमात्रं' विशेषणमात्रं भवति; न पृथक् प्रधानम्, केवलस्य सम्बन्धात् स्तुत्या। यथालोके—"ब्राह्मणाय बुभुक्षिताय ओदनं देहि, स्नाताय अनुलेपनम्, पिपासते पानीयम्—इति"। यो बुभुक्षितः, तस्मै इति यथा तु बुभुक्षितशब्दो विशेषणम्, केवलस्य बुभुक्षितशब्दस्य विशेषतः क्वचिदनवस्थानात्। एवं वृत्रहा पुरन्दर इत्येवमादीनां विशेष्य मप्राप्यानवस्थानाद् व्यञ्जनमात्रता; न स्वप्रधानता। तस्मान्नैतान्यहं समामने॥ १० (१३)॥

इति निरुक्तभाष्यार्थोपनिबद्धौ द्वादशस्य (सप्तमस्य)

तृतीयः पादः समाप्तः॥ ७. ३.

---

* नैषोंऽशः ग-घ-पुस्तकयोरन्यत्र परं तत्र तत्राप्यस्यष्टाक्षर एव।

† नैतत्पद मस्ति क-पुस्तके।

॥ चतुर्थः पादः ॥

अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्माद्ग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयतेऽङ्गन्नयति सन्नममानोऽक्रोपनो भवतीति स्थौलाष्ठीविर्न क्रोपयति न स्नेहयति चिभ्य आख्यातेभ्यो जायत इति शाकपूणिरितादक्तादृग्धादा नीतात्स खल्वेतेरकार मादत्ते गकार मनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवति ॥ १ (१४) ॥

"अथातोऽनुक्रमिष्यामः"। सामान्यतः परिख्यातोऽग्न्यादिर्देवपत्न्तो देवतापदसमाम्नायः*, विशेषत इदानीं प्रतिपद मनु व्याख्यास्यते, तदर्थ मधिकारवचनम्,—'अथ' इति।

'अतः'—इति आनन्तर्ये। सामान्यात् पारिभाषिकाद् व्याख्यानादनन्तरात् ('अनु') आनुपूर्वेण यथासमाम्नातं 'क्रमिष्यामः' कथयिष्यामो वर्णयिष्यामो व्याख्यायेति वाक्यशेषः। सा च पुनर्व्याख्या
(१) (२) (३) (४) (५) (६)
अभिधानाभिधेयाभिधानव्युत्पत्तिप्राधान्यस्तुत्युदाहरणतन्निर्वचनविचा-
(७) (८)
रोपपत्त्यवधारणक्रमलक्षणा। तद्यथा,—(१)"अग्निः"—इत्यभिधानम्, (२)अयं पार्थिवः इत्यभिधेयम्, (३)"अग्रणीर्भवति"—इत्यभिधान-

---

* पु० १८५१० "अथातो दैवतम्"—इति; १८६ ४०"१" टीप्पनी च द्रष्टव्या।

व्युत्पत्तिः, (४)"अग्नि मीळे"—इति प्राधान्यस्तुत्युदाहरणम्, (५)अग्नि मीळे="अग्निं याचामि" इति तन्निर्वचनम्, (६)"स न मन्येताय मेव अग्निः"—इति विचारः, (७)"यस्तु सूक्तं भजते यस्मै हविर्निरूप्यते"—इत्युपपत्तिः, (८)"अय मेव सोऽग्निः"—इत्यवधारणम्*। एवम्प्रकारया व्याख्यया प्रतिपद मनुक्रमिष्यामः॥

तत्रैतद् भवति कोऽय मग्निः? इति। आत्मा—इत्यात्मविदः; "एकं सद् विप्रा बहुधा वदन्ति (ऋ० स० २,३, २२, ६)"—इति मन्त्रदर्शनात्†। अविवक्षितस्थानविशेषो निर्ज्ञातैतद्भिधानो देवताविशेषो लोकवेदप्रसिद्धः कर्माङ्ग मिति याज्ञिकाः‡। विवक्षितस्थानविशिष्टकर्मा मध्यमोत्तमाभ्यां ज्योतिर्भ्यां मन्यः पार्थिवोऽय मग्निरिति नैरुक्तसमयः§। चिताभ्युपगमात्तत्सम्पिपादयिषयेद मारभ्यते।

"अग्निः पृथिवीस्थानः तं प्रथमं व्याख्यास्यामः"—इति। पृथिव्येवास्य विशेषतः स्थानम्; न अन्तरिक्षम्, न द्यौः इति पृथिवीस्थानः; तत्र कर्माधिकारात् तस्य। तिष्ठत्यस्मिन् इति स्थानम्। यस्मात् पृथिवी अस्य स्थानम्, तस्मात् सन्निकर्षाल्लोकानुक्रमाच्च न ह्यसति कारणे प्रथमातिक्रमो न्याय्य इति त मेव प्रथमं व्याख्यास्यामः॥

---

* सर्वत्रैतदनुपद मेव वक्तु मारभते पञ्चमखण्डान्तं यावत्।

† पुरस्तात् २१२ पृ० "एक आत्मा"—इत्यादिकं तद्व्याख्यानञ्च द्रष्टव्यम्।

‡ पुरस्तात् २२० पृ० "अपि वा पृथगेव स्युः"—इत्यादिकं तद्व्याख्यानञ्च द्रष्टव्यम्।

§ पुरस्तात् २२० पृ० "तिस्र एव देवताः"—इत्यादिकं तद्व्याख्यानञ्च द्रष्टव्यम्।

"अग्निः कस्मात्"। देवताभिधाने देवता आत्मनः परोक्षीकृत्य परोक्षीकृतं तत्व मर्पितम्, परोक्षप्रिया इव हि देवाः प्रत्यक्षविषय इति हि विज्ञायते। तन्निर्वचनादागमप्रामाणिकं देवतात्माह्य मनुभवतीति अवेत्य तन्निर्विवक्षया "अग्निः कस्मात्?" इत्युपोद्घात्य "अग्रणीः भवति"—इत्येवमादिना अग्निशब्दं निराह। सर्वत्रैवं देवतापदे उपोद्घातोपन्यासौ द्रष्टव्यौ। आत्मविद्यपदे तु सर्वं भभिधान मात्मार्थ मेवेति सर्वावस्य मात्मानं सर्वाभिधानव्युत्पत्तितो निरूच्य याथात्म्यतः परिज्ञाय सर्वात्मन आत्मनः सर्वावस्यं विभूतिताद्ग्राह्य मनुभवतीति सर्वपदव्युत्पत्तिप्रयोजनम्। स्मर्यते हि,—"शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति"—इति * ॥

"अग्रणीः भवति"—इति। अग्निशब्दं विगृह्य वाक्यीकृत्य कृतवाक्यपदवर्णनिष्कर्षणसमुदायोपजनितस्य अग्निशब्दस्य अग्रशब्दात् गकार मुपलभ्य अग्रशब्दं कर्माभिधायिनं पूर्वपदत्वेन व्यवस्थाप्य नयतिं च पर मुत्तरपदस्थं कर्त्तव्यार्थात्मने† व्यवस्थाप्य अग्निशब्दं निराह,—अथ कोऽर्थः? इति। सर्वेष्वर्थेष्वसावात्मान मग्रं नयति, सर्वत्र तथोपकरोति यथा अग्रं सम्पद्यत इत्यर्थः। अग्रशब्दः प्रधानवाची, स एव वा अग्रं नयति। सैनां वा अग्रे नयति सैनापत्ये-

---

* अत्रार्थे श्रुतिमानयाह पथ्यशायां पतञ्जलिः;—"सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्यं सुषिरा इव (ऋ० सं० ६, ५, ७, १)। सुदेवो असि वरुण! सत्यदेवोऽसि, यस्य ते सप्तसिन्धवः सप्तविभक्तयः, अनुक्षरन्ति काकुदं तालु। काकुर्जिह्वा सा अस्मिन्नुद्यते इति काकुदम्। सूर्यं सुषिरा इव। तद्यथा शोभना मूर्मिं सुषिरा मग्निरन्नः प्रविश्य दहति, एवं सप्तसिन्धवः सप्तविभक्तयः ताख्यनुक्षरन्ति, तेनासि सत्यदेवः। सत्यदेवाः स्यामेत्यध्येयं व्याकरणम्"—इति।

† "कर्त्तव्यात्मनि च" ग, घ।

ऽवस्थित इत्येके; विज्ञायते हि,—"अग्निर्वै देवानां सेनानीः" इति * ॥

अथ वा "अयं यज्ञेषु प्रणीयते" प्रथमं यज्ञेषु प्रणीयते; न तावत् किञ्चिदप्यन्यत् क्रियते यावदयं न प्रणीयत इति, ततोऽस्मिन् व्रत मुपेत्यान्यानि कर्माणि क्रियन्त इति † ॥

अथ वा "अङ्गं नयति सन्नममानः" यत्रायं सन्नमयति साधनत्वेन वैदिके वा लौकिके वार्थे, तत्र सन्नममान एवात्मानं प्रधानीकृत्य सर्वं मन्यदात्मनोऽङ्गतां नयति गुणीकरोतीत्यर्थः। अथ वा "अङ्गं नयति सन्नमानः" तृणे वा काष्ठे वा यत्र सन्नमति आश्रयति, तत् आत्मनोऽङ्गतां नयति, आत्मसात् करोतीत्यर्थः ॥

"अक्नोपनो भवति इति स्थौलाष्ठीविः"। स्थूलाष्ठीवतः पुत्रः स्थौलाष्ठीविः आचार्यः स एवं मन्यते,—अयं अक्नोपनो यस्माद् भवतीति तस्मादग्निरिति। किं पुनरक्नोपनः इति? अत आह,—"न क्नोपयति"। एवमपि न गृह्यते क्नोपयतेरप्रसिद्धार्थत्वात्। अतः पुनर्ब्रवीति प्रसिद्धेनार्थेन,—"न स्नेहयति विरूक्षीकरोतीत्यर्थः; स हि तस्य स्वभावः ॥

"त्रिभ्यः आख्यातेभ्यः जायते इति शाकपूणिः"। त्रयाणां माख्यातानां अभिधेयाः क्रिया अत्र लक्ष्यन्ते, ता उपादाय हेतुत्वेनाग्निशब्द आत्मानं लभते। तद्यथा,—"इतात्", 'इण गतौ

---

* अत एव ऋक्संहितायाम्,—"सेनानीर्नः सहुरे हूत एधि" इति ८, १, १९,१।

† "ते ऽग्ये ऽग्निनाग्नि मयजन्त"—इति ऐ० ब्रा० १, २, ५। "अग्नये प्रणीयमाना यानुब्रूहि"—इत्यादि च द्रष्टव्यम्। ऐ० ब्रा० १, ५, १।

(अदा० प०)'—इत्यस्मादित्यर्थः। "अक्तात्, दग्धाद् वा" अनक्तेर्वा दहतेर्वा विकल्प एतयोः। ततो "नीतात्" इति, 'णीञ् प्रापणे (भ्वा० प०)'—इत्येतस्मात्। धातवः केवलं निर्दिष्टाः। किं कुत आदत्ते? इत्यत आह,—"सः खलु" शाकपूणिः "एतेः" धातोः "अकारम् आदत्ते"। नन्वेतेरकार एव नास्ति, अतः किमादत्ते? सत्यं नास्ति; वर्णसामान्येन तदिकार मादाय इणोऽर्थदर्शनात् अग्नौ शब्दार्थसम्बन्धनित्यत्वाद्, अर्थे च गुणभूतत्वाच्छब्दस्य, ततः तं व्यापादयत्यकारत्वेन। अथ वा रूपानेकत्वादिणो यथावस्थितस्याकारो भवति, तथा रूप मवस्थाप्य ततोऽकार मादत्ते; दर्शितं चैतत्—"एतेः कारितं च यकारादिं चान्तकरणम्"—इत्यत्र *; भवति चास्य एन्ते रूपम् 'आययति'—इति †, अत्र अकारः, ततः आदत्ते। "गकारम्, अनक्तेः वा दहतेः वा" कृतकुत्वजश्त्वयोर्विकल्पेन। "नीः परः" एषः हस्वः। एति च व्यनक्ति च रूपाणि, अथ वा एति च दहति च नयति च हवींषि देवेभ्यः इति अग्निः साधीयस्तरः। एता एतद्धातुवाच्याः क्रियाः एष करोति इति "अग्निः"॥

"तस्य" एतल्लक्षितलक्ष्यप्रधानस्तुतिसम्बन्ध मभिधान मुपलक्ष्य देवतापदसमाम्नाये समाम्नात मग्निरिति ‡, तस्य "अग्नि मीळे"—इत्येतत्प्रमुखा अग्निकर्मलिङ्गलिङ्गिताः सर्वा आग्नेय्य ऋचः उदाहरणम्; न पुनरसति कारणे मुख्यातिक्रमो न्याय्य इति ऋग्वेदप्रथमा मिमा मृच मुदाजहार "तस्य एषा भवति"—इति,—॥ १ (१४)॥

---

* १भा० ८९४ पृ० १अ० ४पा० १ख०; तद्व्याख्यानञ्च ९२४ पृ० द्रष्टव्यम्।

† "णी गमिरबोधने"—इति पा०। इह तु बोधनार्थ एव।

‡ १भा० ४५९ पृ० ५अ० १ख (१)।

अग्निं मीळे* पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्। अग्निं मीळे ऽग्निं याचामीलिरध्येषणाकर्मा पूजाकर्मा वा पुरोहितो व्याख्यातो यज्ञश्च† देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता होतारं ह्वातारं जुहोतेर्होतेत्यौर्णवाभो रत्नधातमं रमणीयानां धनानान्दातृतमन्तस्यैषापरा भवति॥ २ (१५)॥

"अग्निं मीळे (ऋ०सं०१,१,१,१)"—इति। मधुच्छन्दस आर्षम्। गायत्री। आग्नेये विनियोगः। यः अग्निः देवपुरोहितः पाकयज्ञे, अस्माकं यज्ञे यश्च ऋत्विक्, होता यज्ञस्य, रत्नधातमश्च दातृतमो रत्नानाम्, त महं रत्नानि याचे इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"इडिः" धातुः "अध्येषणाकर्मा" याच्ञाकर्मेह; अन्यत्र "पूजाकर्मा वा" अपि‡। "पुरोहितः व्याख्यातः", "पुर एनं दधति"—इति§। "यज्ञः च" व्याख्यातः, "प्रख्यातं यजतिकर्मा"—इति‖। "देवः", "दानाद् वा" ददाति ह्यसौ ऐश्वर्याणि।

---

* "अग्निं मीळे"—इति क, ख, ग।

† "यज्ञस्य" क, ख, ग।

‡ "पूजाकर्मा वा"—इति वा-पदश्रवणात् अत्रापि पक्षे पूजार्था याच्ञासम्मत एवेत्यस्माकम्, सायणभाष्येऽप्येव मेव।

§ १भा० १०१५० १अ० ३पा० १ख०।

‖ १भा० ३३७ पृ० १अ० ४पा० १ख०।

"दीपनाद् वा" दीपयति ह्यसौ तेजोमयत्वात्। "द्योतनाद् वा" धात्वन्यत्व मर्थैकत्वम्। "द्युस्थानो भवति—इति वा" पक्षे अर्थवत्त्वं निर्वचनस्य। अथ वा अग्नीन्द्रावपि द्युस्थानौ; सामान्यं हि द्यौः स्थानं देवतानाम्*, तयोस्तु कर्माधिकारस्थाने विशिष्टे पृथिव्यन्तरिक्षे। "होतारं=ह्वातारम्" देवानाम्†। "और्णवाभः" तु "जुहोतेः" 'ऊ दानादानयोः (जु०प०)'—इत्यस्य मन्यते "होता इति"। "रत्न-धातमम्=रमणीयानां धनानां दाढतमम्"॥

ततः "तस्य" एव अग्नेः "एषा अपरा" ऋक् "भवति"। समानसंहितत्वादपरेति वा द्वितीयेत्यर्थः। सा पुनः किमर्थम्? इति। अमुना प्रकारेण सर्वा एतस्या मुदाहरण मेतत्कर्मयुक्ता ऋच उपेक्ष्या इत्युपप्रदर्शनार्थम्॥ २ (१५)॥

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति। अग्निर्यः पूर्वैर्ऋषिभिरीलितव्यो (वन्दित-व्यो‡) ऽस्माभिश्च नवतरैः स देवानिहावहत्विति, स न मन्येताय मेवाग्निरित्यृग्यते उत्तरे ज्योतिषी अग्नी उच्येते ततो नु मध्यमः॥ ३ (१६)॥

---

* "देवा वा असुरैर्विजिग्याना ऊर्द्धाः स्वर्गं लोक मायन्"—इत्यादि (ऐ०ब्रा० १, ४, ४), "परो वा असाल्लोकात् स्वर्गो लोकः"—इत्यादि (ऐ० ब्रा० १, ४, ४) च द्रष्टव्यम्।

† "अग्निर्वै देवानां होता, तस्यैतद्धोत्रदनं यदुत्तरवेदी नाभिः"—इति ऐ० ब्रा० १, ५, १। "अग्नेश्च होत्रत्वं होमाधिकरणत्वेन द्रष्टव्यम्"—इति सा० भा०।

‡ नैतत्पदं दृश्यते क-ख-ग-पुस्तकेषु।

"अग्निः पूर्वेभिः (ऋ०सं०१,१,१,२)"—इति। पूर्वयैव समानार्ष-विनियोगच्छन्दस्का। तदृक्त मुत्तरत्रापेक्ष्य यदृक्त मध्याजहार भाष्यकारो यत्तदोर्नित्यसम्बन्ध इति दर्शयन्। "अग्निः यः" 'पूर्वेभिः' "पूर्वैः" चिरन्तनैः 'ऋषिभिः' "ईडितव्यः" ईडनं पूजन महति, "अस्माभिश्च" "नवतरैः" ईडितव्य इति वर्त्तते। स किं करोति? इत्याकाङ्क्षिते निराकाङ्क्षं क्रियते,—"सः देवान्" "इह" एतस्मिन् कर्मणि अस्माकम् "आ वहतु" इति लोटा निराह भाष्यकारः आशिष माकाङ्क्षिता मपेक्ष्य। ऋच्येकपदनिरुक्तम्॥

सङ्कीर्णत्वादन्यभिधानस्य अतःपरं विचारः;—"स न मन्येन" —इत्येवमादिना आक्षिप्य विचारः। ननु नित्ये स्वार्थाभिधेयसम्बन्धे अभिधानानामर्थान्तरवृत्तितैव नास्ति, कुतः सङ्करः? इति। अथा-स्त्यर्थान्तरवृत्तिता। जहत्स्वार्थ मर्थान्तर मुपसङ्क्रामन्ननित्यतां सम्ब-न्धस्य द्योतयति। नैव जहत्स्वार्थ मभिधान मभिधेयान्तरे वर्त्तते। किन्तर्हि? द्वे ह्यभिधानस्य शक्ती; गौणी मुख्या च। तयोर्गौणी गुणसाम्यात्; यस्मात् कस्माच्चित् गुणात् सर्वत्र वर्त्तते, तस्मात्तथाविध एव सम्बन्धः, सर्वार्थो नित्यः समर्थप्रकरणोपपदपरतन्त्रः। मुख्यत्वे विनियोगेन लोकवेदप्रसिद्धा स्व एवार्थे वर्त्तते। तदेव मसङ्करेऽपि शब्दानां मुख्यगौणार्थवर्त्तिनां सङ्कर इवामेधसां प्रतिभाति *॥

क्व कस्य शब्दस्य गौणी शक्तिः? क्व कस्य मुख्या? इति तत्प्रवि-

---

* वृत्तिर्द्विधा। जहत्स्वार्था, अजहत्स्वार्था च। अवयवार्थनिरपेक्षत्वे सति समु-दायार्थबोधिकात्वं जहत्स्वार्थात्वम्। अवयवार्थसंवलितसमुदायार्थबोधिकात्व मज-हत्स्वार्थात्वम्। रथन्तरं साम, शुश्रूषा सेवा—इति पूर्वस्योदाहरणम्। राजपुरुष-इत्यादि परस्येति। विस्तरस्तु मञ्जूषादौ द्रष्टव्यः।

वेकार्थ मिद मुपोद्घन्ति चोदकरूपेण "स न मन्येत" इति। 'सः' शिष्यः, 'न मन्येत' न जानीयात् सम्यगेतदभिहितम् "अथ मेवाग्निः" पृथिवीस्थानः "इति"। कस्मात् पुनर्न मन्येत? इतः,—यस्मात् "अपि एते उत्तरे ज्योतिषी" मध्यमश्च उत्तमश्च "अग्नी उच्यते"*। कथम्? इत्यत आह,— एतत् तावत् पार्थिवं ज्योतिः, आवाहनक्रियायोगात् "अग्नि मीडे"—इत्येतस्यां च यथा भवतोक्तं तथैवोच्यते, "ततः तु" वय मपि यथा "मध्यमः" अग्निशब्देनोच्यते तत्कर्मयोगाच्च स एवाग्निः, तथेमा मृच मुदाहरिष्यामः,—॥ २(१६)॥

अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम्। घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः॥ अभिनमन्त समनस इव योषाः समनं समननाद्वा सम्माननाद्वा कल्याण्यः स्मयमानासो अग्नि मित्यौपमिकं घृतस्य धारा उदकस्य धाराः

* एवमादिषु स्थानेषु मध्यमशब्देन वायुरिन्द्रो वा ग्रहणीय इति साधनस्य। तथा हि,—"मध्यमस्थानस्थो वायुरिन्द्रो वा * * * वैद्युतोऽग्निर्हि मध्यमसकाशाज्जायते"—इति ऋ० सं० १, ४. २५, ६. सा० भा०। अस्मान्नते लिङ्ग वैद्युतोऽग्निरेव मध्यम इति बोध्यः। तथा च "उत्तरे ज्योतिषी" वैद्युताग्निः सूर्यश्च। अतएव निघण्टौ मध्यमस्थानदेवतानामसु (५, ४, २२) "अग्निः"—इति, उत्तमस्थानदेवतासु (५, ६, ८) "सूर्यः"—इति च दृश्यते. अग्निसूर्ययोरभेदः। तथाहि,—अग्निर्वै स्वानरः प्राचाबयत्, तस्य यद्रेतसः प्रथम मुद्दीयत, तदसावादित्योऽभवत्"—इति ऐ० ब्रा० २, २, १०। "सोऽग्निर्दिवि मूर्ध्वं उदश्रयत। सः स्वर्गस्य लोकस्य द्वार मरक्षात्, अग्निर्वै स्वर्गस्य लोकस्याधिपतिः"—इति च ऐ० ब्रा० २, ४, ४। अग्नीन्द्रसूर्याणां तिसृणा मेव देवतानां ज्योतिःस्वरूपत्वं च श्रूयते—"अग्निर्ज्योतिः", "इन्द्रो ज्योतिः", "सूर्यो ज्योतिः"—इति च ऐ० ब्रा० १, ४, ७। "अग्निमयीः पुरः, त्रिपुरं पर्यास्मन्"—इति, "अग्निमयः पुरो दीप्यमाना भ्राजमाना अतिष्ठत् (ऐ० ब्रा० २, १, १)"—इति चाग्नेस्त्रिलोकस्थत्वं बोध्यते।

समिधो नसन्त नसतिराप्नोतिकर्मा वा नमतिकर्मा वा। ता जुषाणो हर्यति जातवेदाः। हर्यतिः प्रेप्साकर्मा विहर्यतीति *। समुद्रादूर्मिर्मधुमाँ उदारदित्यादित्य मुक्तं मन्यन्ते समुद्राद्घोषोऽङ्ग उदेतीति च ब्राह्मण मथापि ब्राह्मणं भवत्यग्निः सर्वा देवता इति तस्योत्तरा-भूयसे निर्वचनाय ॥ ४ (१७) ॥

"अभि प्रवन्त" इति†। वामदेवस्यार्षम्। सप्तमेऽहनि दशरात्रस्य आज्यशस्त्रे विनियोगः। 'अभिप्रवन्त' ("अभि नमन्त") आभिमुख्येन नमन्ति प्रह्वीभवन्ति। 'घृतस्य' "उदकस्य" 'धाराः'। क मभि प्रह्वीभवन्ति? मध्यमम् 'अग्निम्'। कथम्? इति,— 'समना इव योषाः' ("समनसः") समानमनसः। एकस्मिन् भर्त्तरि यासां मनांसि वर्त्तन्ते, ताः समनसः। ता यथा 'कल्याणः' रूपयौवनादिगुणसम्पन्नाः, 'स्पृयमानाः' स्पृयमानाः ईषद्दुसन्त्यः हर्षमुपजनयन्त्यो भर्त्तुस्तं प्रति परिष्वजनाय अभिनमेयुः, तथा मध्यमस्थान मग्निं घृतस्योदकस्य धाराः 'समिधः' समिन्धयन्त्यः 'नसन्त' प्राप्नुवन्तीत्यर्थः। ताश्च ताश्च पुनः सः 'जातवेदाः' मध्यमस्थानो वैद्युतोऽग्निः, 'जुषाणः' प्रीयमाणः 'हर्यति' पुनःपुनः प्रेप्सति, अभिकामयते ॥

एव मेतस्मिन् मन्त्रे युगपद्विधानात्, पार्थिवे घृताहुतिहवन-

---

* "प्रेप्साकर्मेति हर्यति" क, ख, ग।

† ऋ० सं० २, ८, ११, २। "अग्निस्तुर्याव्रगोधृनाना मन्यतमो देवता"—इति।

स्रोपमानोपमेयवैधर्म्याच्च युगपत्सम्भवाच्च उदकस्य धारणं वैद्युतः; तत्रोपमानोपमेयसामञ्जस्याच्च सामर्थ्यात् प्रसिद्धिं सुपरुन्ध्य घृतधारा-शब्द उदकधारावचनः सम्पद्यन्ते; पठितं चैतदेव सामर्थ्यमपेक्ष्योदक-नामसु "घृतम्", "मधु"—इति*। एवञ्च योऽयमग्निशब्दोऽत्र सामर्थ्यात् मध्यमं ज्योतिराह, तस्मात् "सुष्ठु स न मन्येत, अथ मेवाग्निः पृथिवीस्थानः"—इति (३८४पृ० १४पं०)॥

"समनं समननाद्वा, सम्माननाद्वा"—इति। पूर्वम् अनितेः (भू० प०) प्राणनार्थस्य, उत्तरं मनेतेः (त० आ०)। छन्दस्य-न्निर्वचनम्॥

अथ खलु यथोक्तमपि ज्योतिर्भवत्यग्निस्तथोदाहरिष्यामः। —"समुद्रादूर्मिः—इति†, आदित्यम् उक्तं मन्यन्ते"। पूर्वयैव समानार्षविनियोगा। नानादेवताभिवादस्त्वस्यां देवतानुक्रमण्यां शौनकेनोक्तः‡, इह पुनः सौरीति कृत्वोदाहृता भाष्यकारेण, (सूक्तं सकलञ्च§)। 'समुद्रात्' उदकसङ्घातात् 'ऊर्मिः' क्षादकः सर्वस्य

---

* १ मा० ९९पृ० १ अ० १२ ख० (१०), (११)।

† "समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना समममृतत्व मानट्। घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानां मनसस्य नाभिः॥"—इति ऋ० सं० ४, ८, १०, १।

‡ तथा चानुक्रमणी,—"समुद्रादूर्मिरेकादशाग्नेयं जगत्यन्तं सौर्यं वापं वा गर्यं वा घृतस्तुतिर्वेति"—इति।

§ ख-ग-पुस्तकयोर्नास्त्येष पाठः, अपपाठश्चैष इति गम्यते; यतो हि ऋक्सं-हितायां सूक्तञ्चैतत् एकादशर्चम् (४म० ५अ० १२सू०) तच्च "अभिप्रवन्त (३८९पृ०)" —इत्यष्टमी, तस्या मध्यमदेवत्वं मुररीकृत मेवेति।

प्रकाशेन, 'मधुमान्' उदकवान्, 'उदारत्' उदतीतरत्, उत्तरयति वा; उदेति अहन्यहनि प्रथमं वास्य जन्माभिप्रेत्य। स पुनर्जातः सन् 'अमृतत्वम्' अमृतभावम् 'अंशुना' चन्द्रमसा 'उप-सम्-आनट्' उपसंव्याप्नोति। "सोऽस्यान्नं तेन न म्रियते य मचिति मचितयः पिबन्ति"—इत्युक्तम्*। कथ ममृतत्वं तेन उपसमानट्? इति। 'घृतस्य' उदकस्य हविषो वा 'यत्' 'नाम' नमनं 'गुह्यं' रहस्य मविज्ञानं केन चिदपि अत्र 'अस्ति' विद्यते चन्द्रमसि, तत्र 'देवानां' रश्मीनां 'जिह्वा' तदमृतं नित्य मास्वादयन्ति; देवास्तेन न म्रियन्ते। तेषाम् 'अमृतस्य' अमरणत्वस्य 'नाभिः' नहनं स हेतुरित्यर्थः॥

अथ कुतः सूर्योऽय मिति विशेषतोऽवधियते; न चैतस्मिन्नपि मन्त्रेऽग्निशब्दोऽस्ति†, यः सत्यप्यादित्यदेवत्वेऽस्य मन्त्रस्याग्नित्व मादित्यस्य प्रख्यापयेत्; घृतस्योच्च एता इति च विज्ञायते; तस्मादसमर्थ मिद मुदाहरणम्? न असमर्थम्। कस्मात्? सूक्तेऽग्निलिङ्ग मेकेषां शाखिना मस्ति;—"इमं स्तनम्"-इत्यत्र "अपां प्रपीन मग्ने"—इति‡। निविच्चास्मिन् सूक्ते धीयते*; सा चाग्निलिङ्गा। आदित्यश्चाय मनेन

---

* पुरस्तात् ५७६० ५अ० १पा० १ख०।

† मास्वस्मिन् मन्त्रे, सूक्ते लक्षिन्नेवाद्या ऋचि अत्रैव 'अग्निम्'—इति पदम्, ततोऽस्य सूक्तस्य सर्वस्यैवाग्नेयत्वं सुगम मेवेत्यस्माकम्। अस्याश्च ऋचि 'अंशुना' इति चन्द्रमसा संस्तविकलदर्शनादादित्यदेवत्वञ्च स्फुट मिति च।

‡ य० वा० सं० १७अ० चषोदश (८७—९९) ऋचः घृतस्तुतौ विनियुज्यन्ते। तत्र "इमं स्तनमूर्जस्वन्तमधयापां प्रपीन मग्ने"—इति प्रथमा, "समुद्रादूर्मिमधुमां (ऋ० सं० ४, ५, १२, १)"—इति च तृतीया। एवञ्च यजुषि इमं स्तन मित्यृचि अग्निश्रवणात्, तत्पूर्वीयतृतीयाया अप्येतस्या अग्निदेवत्वं सुगम मिति भावः।

* "तं चित्त्वा निविदिर्ग्यवेदयन् यदु चित्त्वा निविदिर्ग्यवेदयंस्तन्निविदां निवित्त्वम्"—इत्यादौतरेयकं द्रष्टव्यम्। ऐ० आ० ३, १, ९—११।

मन्त्रेणोच्यत इति स्फुट मस्यैव मन्त्रस्य "ब्राह्मणम्",—"समुद्राद्धे-षोऽह्न उदेति"—"इति च" *; न च पार्थिवः समुद्रात् उदेति, विरोधात् तस्य उदकेन; तस्मादादित्योऽत्राग्निरभिप्रेत—इति नाव-मर्थ मुदाहरणम्। "अथ अपि ब्राह्मणं भवति,—'अग्निः सर्वा देव-ताः'—इति"। अथ खलु अय मपरः सङ्करोऽग्निशब्दस्य ब्राह्मणं भव-ति,—"अग्निः सर्वा देवताः"—इति †॥

"तस्य" च ब्राह्मणस्य "उत्तरा" ऋक् "भूयसे" बहुतराय "निर्वचनाय",——॥ ४ (१७)॥

इन्द्रं मित्रं वरुण मग्नि माहुरथो दिव्यः स सुपर्णो गुरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरि-श्वान माहुः॥ इम मेवाग्निं महान्त मात्मान‡ मेक मात्मानं बहुधा मेधाविनो वदन्तीन्द्रं मित्रं वरुण मग्निं दिव्यं च गरुत्मन्तं दिव्यो दिविजो गरुत्मान् गरणवान् गुर्वात्मा महात्मेति वा यस्तु ऋक्षं भजते यस्मै हविर्नि-रुप्यतेऽय मेव सोऽग्निर्निपात मेवैते उत्तरे ज्योतिषो एतेन नामधेयेन भजेते॥ ५ (१८)॥

॥ इति सप्तमाध्यायस्य चतुर्थः पादः॥ ७.४.

---

* "अङ्गो वा एष प्रातरुदेत्यपः सायं प्रविशति"—इति ऐ० ब्रा० ४, २, १।

† "अग्निः सर्वा देवताः, सोमः सर्वा देवताः; स यदग्नियोमीयं पशु मालभते सर्वाभ्य एव देवताभ्यो यजमान आत्मानं निष्क्रीणीते"—इति ऐ० ब्रा० २, १, २।

‡ "महान्तं चात्मानं" क. ग।

"इन्द्रं मित्रम्"-इति *। अस्यवामीयैषा †। 'इन्द्रम्, मित्रम्, वरुणम्'—इत्येतैरभिधानैः 'अग्निम् आहुः' तत्त्वविदः। 'अथो' अपि च योऽयं 'दिव्यः' ("दिविजः") दिवि जायते, 'सुपर्णः' सुपतनः, 'गरुत्मान्' "गरणवान्", स्तुतिभिः तद्वान्, रसानां वा गरिता आदित्यः; अथ मपि 'सः' एवाग्निरित्याहुः ‡। किं बहुना "इम मेवाग्निम्" 'एकं' "महान्तम्" "आत्मानम्" अनन्यत्वेन पश्यन्तः 'विप्राः' "मेधाविनः" आत्मविदः 'बहुधा वदन्ति'—'अग्निम्, यमम्, मातरिश्वानम्' इति §॥

एवमादीश्चाभिधानैरेतस्यैव सा विसृष्टिः; एष ऊ ह्येव सर्वे देवाः इति च विज्ञायते। तस्माद् युक्तं यच्च मन्येताथ मेवाग्निरिति॥

अत्र प्रतिसमाधानम्।—सत्य मेतत् सर्व एतेऽग्निशब्देन स्तूयन्ते; न तु प्रधानतः; किन्तर्हि? गुणतः स्तूयन्ते। यतो ब्रवीति,—"यस्तु सूक्तं भजते, यस्मै हविः निरूप्यते, अयम् एव सः अग्निः"। तुशब्दः पूर्वपक्षव्यावर्त्तकः, परमतव्युदासार्थः। यः सूक्तं भजते, प्रधानतः

---

* ऋ० सं० १, ३, २२, ९; १, २२, ८, ४९; अ० सं० २९, ८।

† "अस्य वामस्य"—इत्यादिकं द्विपञ्चाशदृगात्मकं सूक्तं मस्यवामीय मित्युच्यते। "सूक्तं जन्मास्यवामीयं क्षिप्रं मुच्येत किल्बिषात्"—इति ऋग्वि० १, २९।

‡ य० वा० सं० १२, ४. "सुपर्णोसि गरुत्मान्"—इत्यस्य महीधरभाष्यं व्याख्यानञ्च द्रष्टव्यम्।

§ "अमुमादित्य मैश्वर्य्यविशिष्ट मिन्द्र माहुः। ***। अमुमेवादित्य मेक मेव वस्तुतः सन्तं विप्रा मेधाविनो देवतातत्त्वविदो बहुधा वदन्ति। ***। सूर्यस्य ब्रह्मणोऽनन्यत्वेन सर्वात्म्य मुक्तं भवति। अत्र ये केचित् 'अग्निः सर्वा देवताः (ऐ० ब्रा० २, १, ३)"—इत्यादिश्रुतितोऽस्य मेवाग्निरूपत्वे अपि ज्योतिषो इति मन्त्राग्नेरेव सर्वात्म्यप्रतिपादकोऽयं मन्त्र इति वदन्ति, तत्रते प्रथमोऽग्निशब्द उद्देश्यः, त मग्नि मुद्दिश्येन्द्रादयात्मकत्वकथनम्।"—इति सा० भा०।

स्तुत्यत्वेनेत्यर्थः; यस्मै च हविर्निरूप्यते, चोदनासामर्थ्यात्—"आग्नेय मष्टाकपालं निर्वपेत्" इति। 'अय मेव सोऽग्निः' पार्थिवः; अग्निशब्दस्य विशेषतोऽत्र लोके वेदे च प्रसिद्धेः;—'अग्निं मानय—अग्निं प्रणय' इति, एत मेव हि लोकः प्रतिपद्यते; न मध्यमं नाणुत्तमम्। न च प्रसिद्धिबाधो न्याय्यः, शास्त्रचोदिता अपि खदिर-पलाशादयो लोकप्रसिद्धित एव प्रतीयन्ते*। तस्मादग्निशब्देन पार्थिवस्य ज्योतिषो मुख्यः सम्बन्धः; गोण इतरयोर्मध्यमोत्तमयोः। यथा अग्निशब्देन मध्यमोत्तमयोः, न तथा मध्यमोत्तमाभ्यां विद्युत्सूर्यशब्दाभ्यां लोकप्रसिद्धा मुख्यः सम्बन्धः। एवञ्चेत् सुष्ठूक्तम्,—"यस्तु सूक्तं भजते यस्मै हविर्निरूप्यते, अय मेव सोऽग्निः" इति। एतदेव चात्र विचारे प्रयोजनम्,—आग्नेयेषु सूक्तेषु हविःसम्प्रदानेषु स्तुत्यत्वेन भोक्तृत्वेन चैत मेवोपासीतेति॥

अथ पुनर्योऽयं मध्यमोत्तमयोर्ज्योतिषोरग्निप्रवादः, स कथम्? इति,—"निपातम् एव एते उत्तरे ज्योतिषी, एतेन नामधेयेन भजेते"। निपातो नाम अप्राधान्यम्, भक्तिरित्यर्थः॥ ५ (१८)॥

इति निरुक्तटीकायां द्वादशाध्यायस्य (सप्तमाध्यायस्य) चतुर्थः पादः† ॥ ७. ४.

---

* तथा चैतरेयकम्;—"खादिरं यूपं कुर्वीत स्वर्गकामः" इत्यादि, "बैल्वं यूपं कुर्वीतान्नाद्यकामः"—इति, "पुष्टिकामो वै समां समां वै बिल्वो रटभीतः"—इत्यादि, "पालाशं यूपं कुर्वीत तेजस्कामो ब्रह्मवर्चसकामस्तेजो वै ब्रह्मवर्चसं वनस्पतीनां पलाशस्तेजस्वी ब्रह्मवर्चसी भवति"—इत्यादि। २, १, १।

† रौथ्दृष्टप्रामाणिकपुस्तकेषु नेह खण्डसमाप्तिः; तन्मते तु षट्पादात्मक एव सप्तमाध्यायः। अस्मद्दृष्टेषु तु पादान्वितसर्वमूलपुस्तकेषु सर्वदृष्टिपुस्तकेषु च सप्तपादात्मक एवाय मध्याय इति भेदः।

॥ पञ्चमः पादः ॥

**जातवेदाः कस्माज्जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो * जातवेदस्त्व मिति ब्राह्मणं तस्मात् सर्वान्तून् पशवोऽग्नि मभिसंपर्यन्तीति च तस्यैषा भवति ॥ १(१९) ॥**

"जातवेदाः"—इति† वक्तव्यम्। स पुनरेष माहाभाग्यात् कर्मपृथक्त्वादग्निरेव? अथ वा पृथगभिधानस्तुत्यन्तरसम्बन्धाद् देवतान्तरम्। "जातवेदाः कस्मात्"? स हि "जातानि वेद"; न हि तदस्ति जात मस्मिंल्लोके यदसौ न वेद सर्वज्ञ इत्यर्थः। "जातानि वा एनं विदुः" स एव धातुः, कारकान्यत्वं केवलम्। "जाते जाते विद्यत इति वा" विदेः सत्तार्थस्याधिकरणे कारके; न तदस्ति जातं यत्रासौ नास्ति। "जातवित्तो वा जातधनः" जातशब्दः पूर्वपदम्, वित्तशब्द उत्तरपदम्; जात मस्य वित्त मिति जातवेदाः। "जातविद्यो वा जातप्रज्ञानः" जातशब्द एव पूर्वपदम्, विदेर्ज्ञानार्थस्योत्तरपदत्वम्; निसर्गत एवास्य जातं प्रज्ञान मित्यर्थः। "ब्राह्मणम्" अपि च भवति, जनेर्विदेश्च जातवेदा इति,— "यत्तज्जातः पशूनविन्दत—इति"। 'यत्' असौ 'तत्' तदा 'जातः' जातमात्र एव निसर्गतः 'पशून्' 'अविन्दत' अलभत, "तज्जातवेदसो जातवेदस्त्वम्—इति" विज्ञायते। यतश्चैतदेवम्, "तस्मात्" अद्यत्वेऽपि स्वाभाव्य

* "पशूनविन्दत तज्जातवेदसो"—इति क,ख,ग।

† १भा० ५ अ० १ख०(१); ४९०१०(१)।

मस्माक मिति मन्यमानाः "पशवः" "सर्वान् ऋतून्" प्रति, अपि चौष्णे, "अग्निम् अभिसर्पन्ति" * ॥

"तस्य" जातवेदसः स्तुत्युदाहरणम् "एषा" ऋक् भवति—॥ १ (१९) ॥

(जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥ जातवेदस इति जातवेदस्यां वैवज्ञातवेदसेऽर्चाय सुनवाम सोम मिति प्रसवायाभिषवाय सोमं राजान मसृत मरातीयतो यज्ञार्थं मनिस्मो निदहाति निश्चयेन दहति भस्मीकरोति सोमो दददित्यर्थः। स नः पर्षदति दुर्गाणि विश्वानि दुर्गमानि स्थानानि नावेव सिन्धुं नावा सिन्धुं सिन्धुं नावा नदीं जलदुर्गां महाकुलां तारयति दुरितात्यग्निरिति दुरितानि तारयति तस्यैषा परा भवति॥ २॥ †)

प्र नूनं जातवेदस मश्वं हिनोत वाजिनं। इदं नो बर्हिरासदे॥ प्रहिणुत जातवेदसं कर्मभिः समश्नु-

---

* "जातवेदस्यं शंसति। * * *। सोऽब्रवीज्ज्ञाता वै प्रजा अनेनाविद मिति, यदब्रवीज्ज्ञाता वै प्रजा अनेनाविद मिति, तज्ज्ञातवेदस मभवत्, तज्ज्ञातवेदसो जातवेदस्त्वम्"—इति ऐ० ब्रा० ३, ३, १२।

† इत्तिक्रता लक्ष खण्डस्य नेह व्याख्यानं कृतम्, नाप्यसौ दृश्यते दृह ङ-च-पुस्तकयोः; चयोदशे लध्याये चतुर्थपादे (५ ख०) विद्यत एव सर्वपुस्तकेषु, तत्रैवास्य व्याख्यानञ्च द्रष्टव्यं भविष्यति परं तत्राप्यस्ति पाठभेदः।

वान मपि वोपमार्थे स्यादश्व मिव जातवेदस मितीदं नो बर्हिरासीदित्विति तदेतदेक मेव* जातवेदसं गायचं तृचं दशतयीषु विद्यते यत्तु किञ्चिदाग्नेयं तज्जातवेद-सानां स्थाने युज्यते,स न मन्येताय मेवाग्निरित्यप्येते उत्तरे ज्योतिषी जातवेदसी† उच्येते ततो नु मध्यमः। अभि प्रवन्त समनेव योषा इति तत्पुरस्ताद्याख्यात मथासावादित्य उदु त्यज्जातवेदस मिति तदुपरिष्टा-द्याख्यास्यामो यस्तु सूक्तं भजते यस्मै हविर्निरुप्यतेऽय मेव सोऽग्निर्जातवेदा निपात मेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते ॥ ३ (२०) ॥

॥ इति सप्तमाध्यायस्य पञ्चमः पादः ॥ ७.५.

"प्रनूनं जातवेदसम्"—इति ‡। श्येनस्याग्निपुच्छस्यार्षम्। गायचौ। हे स्तोतारो यूय मुच्यध्वे। ('प्र हिनोत') "प्र हिणुत" प्रेरयत स्तुतिभिरेतं 'जातवेदसम्', 'अश्वम्' "कर्मभिः" सर्व मेतत् जगत् "अश्नुवानम्" व्यापयन्तम्, 'वाजिनम्' वेजनवन्तं चञ्चल मर्चिभिः, अथ वा "अश्व मिव" इति लुप्तोपमम्,रूढेर्बलीयस्त्वात्§, 'वाजिनं'

---

* "तदेतदेक मिव" क, ग; "तदेक मेव" च,—दृश्यभावेव दृश्यिविरुद्धौ।

† "जातवेदसा" क, ख, ग।

‡ ऋ० सं० ८,८,४९,१। "जातवेदोगुणकोऽग्निर्देवता"—इति तच सा० भा०।

§ "तस्मादश्वः समभवत्"—एतत्प्रभृति द्रष्टव्यम्। ऐ० ब्रा० २,१,११। "देवा वै हतौजसेनाङ्गा स्वर्गं लोक मायन्"—इत्यादि "तस्मादेतदश्वदाक्ष्यं भवति"—इत्यन्तं चापाख्यानं द्रष्टव्यम्। ऐ० ब्रा० ५,१,१।

वेजनवन्तं ज्वलनस्वभावं शीघ्रम्। किं मिति प्रहिणुत? इति। इतः,—आसत्तुम् इति क्रत्यार्थे केनवा*—"दृदं नो ब्रर्हिरासदे"। "इदम्" अस्मत्कर्म, बर्हिषोपलक्षितं बर्हिः। कथं नामास्मदभिमतार्थसिध्यर्थं माभिमुख्येन सीदेदित्येव मर्थं प्रहिणुतेति॥

इदानी मुत्सर्गं दर्शयति प्रयोजनार्थम्,—"तदेतदेक मेव जातवेदस्यं गायत्रं ऋचम्"†—इत्यादि। तदिति दशतयीव्यवस्थानुस्मृतये परोक्ष-निर्देशः, एतदिति प्रत्यक्षेण प्रनून मित्येतया सन्निधीकृत्योपदिशति, गायत्र मिति छन्दोनिर्देशो विवक्षितप्रयोजनार्थः, ऋच मिति एतत्सूक्तस्य सङ्ख्यानिर्देशः‡, दशतयीषु सर्वास्वपीति निर्द्धारणे सप्तमी, 'विद्यते' अस्ति§। ततः किं यद्येतदेवैकं जातवेदस्यं गायत्रं ऋचं दशतयीषु विद्यते? शृणु,—बह्वृभिरेतैर्गायत्रच्छन्दोयुक्तैर्जातवेदस्यैर्मन्त्रैरधियज्ञे प्रयोजन मस्ति, न चैते बहवः सन्ति सर्वास्वपि दशतयीष्वेतदेवैकं ऋचं मुक्त्वा। तत्र किं कर्त्तव्यम्? इति,—"यत्तु किञ्चिदाग्नेयम्" मन्त्रजातम् गायत्रे एव छन्दसि अजातवेदोलिङ्ग मपि, "तत्" "जातवेदसानाम्" मन्त्राणां "स्थाने" विनि-"युज्यते" शास्त्रेण। तेन किं स्थितं भवति?

---

* "क्रत्यार्थे तवै-केन्-केन्य-त्वनः"—इति पा० ३, ४, १४।

† "ऋचि चेतरपदादिलोपश्छन्दसि"—इति पा० ६, १, १४. का० वा०।

‡ प्रनून मिति सूक्तस्य १०म० १२च० ऋचं सप्तर्चिकम्। तत्र "प्रनूनं जातवेदसम्"—इति प्रथमा, "अस्य प्रजातवेदसो"—इति द्वितीया, "या ऋचो जातवेदसो"—इति तृतीया।

§ गायत्रं ऋचं सूक्तं त्वेक मेव जातवेदस्य मिति निर्द्धारणम्, "जातवेदसे सुनवाम (ऋ० सं० १, ७, ७ १)"—इति तु त्रैष्टुभ मैन्द्रम्; एव मन्यत्रापि बोध्यम्।

अग्निरेव जातवेदा इति*, कर्मपृथक्त्वात् माहाभाग्याद्वा इति; इतरथा हि प्रयोगवैकल्यं स्यात्, न चान्यदेव मन्यस्य स्थाने प्रयुज्यते। यथा चाय मनर्थान्तर मग्निर्जातवेदा एतस्माद् विधिलिङ्गात्, तथा वैश्वानरप्रभृतयोऽपीत्युपेक्ष्यम्† ॥

"स न मन्येत"—इति पूर्ववद् विचारः‡; केवलम् "अभि प्रवन्त"—इत्यचाग्निपदविचारे अग्निशब्दो विशेष्य आसीत्, जातवेदः-शब्दोऽस्य गुणपद मिति; इह तु जातवेदः-शब्दविचारे पुनः "अभि प्रवन्त"—इत्यस्मिन्नेवोपात्ते मन्त्रे गुणपद मग्निशब्दो जातवेदः-शब्द-स्येत्येतावदुपेक्ष्यम्§॥

यथा तु पूर्वस्मिन् "समुद्रादूर्मिः"—इति आदित्यस्याग्निलो-पपत्तावुदाहरणम्, तथेह—"अथ अमौ आदित्यः,—'उदु त्यं जात-वेदसम् (ऋ० स० १, ४, ६, १)'—इति" जातवेदस्त्वोपपत्तौ। तदेतत् प्रतिपद मुदाहरणम् "उपरिष्टाद् व्याख्यास्यामः"—"जात-वेदसं सूर्य मुदवहन्तीति तु विशेषणविशेष्यसामानाधिकरण्यैकवाक्य-प्रसिद्धा स्वनिगमसिद्ध मस्मिन् मन्त्रे जातवेदाः सूर्यः"—इति‖। तस्मात् सुष्ठूक्तं यत् "स न मन्येत अयम् एव अग्निः" जातवेदाः इति¶ ॥

---

* "आ जातं जातवेदसीति जात इतरो जातवेदा इतरः" इति ऐ० ब्रा० १,३,५।
† "अग्निर्वा एष वैश्वानरः"—इति ऐ० ब्रा० ८,५,१।
‡ पुरस्तात् ३८४ पृ० १४ पं०; ३८६ पृ० १पं०।
§ पुरस्तात् ३८६ पृ० ६ पं०।
‖ इहैवोपरिष्टाद् १२ अ० २पा० १५ ख०।
¶ पुरस्तात् ३९५ पृ० ४ पं० द्रष्टव्यम्।

"यः तु सूक्तं भजते, यस्मै हविः निरुप्यते, अयम् एव सः अग्निः जातवेदाः"—इति। "यस्तु सूक्तं भजते, यस्मै हविर्निरुप्यतेऽय मेव सऽग्निर्जातवेदाः"—इति पूर्ववत् प्रसिद्धिरेव विशेषहेतुः। यद्यपि मन्त्रदर्शन मविशिष्टं त्रयाणा मपि ज्योतिषां जातवेदस्त्वे, तथापि पार्थिवोऽग्निरितरयोः प्रसिद्ध्या विशेष्यते; जातवेदस्त्वं हि यथा प्रसिद्ध मस्मिन्नग्नौ, न तथा वैद्युते, नापि सूर्ये इति। "निपात मेवैते उत्तरे ज्योतिषी", ("एतेन") जातवेदा इत्यनेत "नाम-धेयेन भजेते" इति। व्याख्यातम्* ॥ २ (२०) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य) पञ्चमः पादः ॥ ७. ५.

---

॥ षष्ठः पादः ॥

**वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयन्तीति वापि वा विश्वानर एव स्यात्प्रत्यृतः† सर्वाणि भूतानि तस्य वैश्वानरस्यैषा भवति ॥ १ (२१) ॥**

"वैश्वानरः"—इति वक्तव्यम्‡, तदर्थं मुपोद्घात्ति—"वैश्वानरः कस्मात्?" "विश्वान् नरान्" इतो लोकात् अमुं लोकं "नयति", हेतुकर्तृत्वेन सर्वासु प्रवृत्तिषु अय मेव नरान् नयति। यथा पञ्चाग्नि-विद्याया मुच्यते—"अपि वा यति तस्मिंत्सर्वाः प्रवृत्तयः फलवत्यो

---

* पुरस्तात् ३९१ पृ० १५ पं० द्रष्टव्यम्।

† "स्यात्प्रत्यृचः" ख, म।

‡ १ भा० ४५९ पृ० ५ ख० १ स्व० (२); ४३० पृ० (३)।

नराणां भवन्तीति हेतुकर्त्तृत्वेन सर्वासु प्रवृत्तिष्वय मेव नरान् नयति प्रवर्त्तयतीति वैश्वानरः" *। अथ वा "विश्वे एनं नराः नयन्ति इति वा", कर्मकारकम्; स नीयमानः तासुतासु क्रियास्वङ्गभावं नरैः कर्म सम्पद्यते। "अपि वा" "विश्वानरः एव" कश्चित् "स्यात्"। स पुनः कस्मात्? "प्रत्यृतः सर्वाणि भूतानि" विश्वानि ह्यसौ भूतानि 'प्रति ऋतः' प्रविष्ट इत्यर्थः। "तस्य" विश्वानरस्य अपत्यं "वैश्वानरः"॥

"तस्य" वैश्वानरस्य "एषा" प्राधान्यस्तुतिर्ऋक् "भवति"—॥ १ (२१) ॥

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनाना † मभिश्रीः। इतो जातो विश्व मिदं वि चष्टे वैश्वानरो यतते सूर्येण॥ इतो जातः सर्व मिद मभिविपश्यति वैश्वानरः संयतते सूर्येण राजा यः सर्वेषां भूताना मभिश्रयणीयस्तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्यामेति तत्को वैश्वानरो मध्यम इत्याचार्या वर्षकर्मणा ह्येनं स्तौति॥ २ (२२)॥

"वैश्वानरस्य सुमतौ"—इति ‡। कुत्सस्यार्षम्। पृष्ठ्याभिन्नवयोश्चतुर्थपञ्चमयोरङ्गोराग्निमारुतस्य प्रतिपत्। 'इतः' पृथिवीलोकात् ओषधिवनस्पतिभ्यः यः 'जातः', 'विश्वम् इदं वि चष्टे'

---

* "वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्"—इत्यादि कठोपनिषदि १; ७।

† "भुवनाना" च। चरणद्वयमेवैतत्।

‡ ऋ० सं० १, ७, ९, १। १भा० ४९० ४० (२)।

"सर्वं मिद मभिपश्यति"। यश्चाभिद्रष्टव्य उपकारकत्वेन, दर्शयति वा प्रकाशकत्वेन। यश्च ('यतते') "सं यतते" 'सूर्येण' सङ्गच्छते स्वेन भासा। 'राजा' च "यः" ('भुवनानां') "सर्वेषां भूतानाम्" ('अभिश्रीः' "अभिश्रयणीयः") आश्रयणीयः। "तस्य वयम्" एवङ्गुणयुक्तस्य 'वैश्वानरस्य' नित्यं ('सुमतौ') "कल्याणां मतौ" उपकारप्रवृत्ताया मात्मनो यथाभिमतार्थसाधिकायाम् 'स्याम'।—इत्येतत् आशास्महे। लोकेऽपि हि स्तूयत एव पूर्वम्, पश्चात् प्रार्थयत इत्याचार्यः पश्यन् मन्त्रेष्वयय मेव न्याय इत्युपदर्शनार्थं पदानां क्रमं बिभेद; कल्याणां मतौ स्यामेत्याशिषा च समापयाञ्चक्रे॥

अनेकतिङि चैतस्मिन् मन्त्रे प्रतितिङ् वाक्यभेदे प्राप्ते यत्तदोरध्याहारेण "राजा यः सर्वेषां भूताना मभिश्रयणीयः, तस्य वयं वैश्वानरस्य कल्याणां मतौ स्याम"—इत्येकवाक्यतया सामर्थ्य मुद्भावयाञ्चकार। एकोऽत्रार्थपतिर्वैश्वानरः, यतः कल्याणी आशास्यते मतिः, त मेभिः शब्दैरभिष्टौति, सन्तिष्ठते स्तुतिरिति। अय मेकवाक्यतान्यायः प्रायशो मन्त्रेषु, क्वचित् पुनः प्रत्याख्यात मर्थ मपेक्ष्य एकस्मिन्नपि मन्त्रे वाक्यभेदो भवत्येव। तद्यथा,—"ऋचां लः पोषम् (ऋ० स० ८,२,२४,६,)" इत्यत्र * प्रतिपादं वाक्यसमाप्तिः। अन्येषा मपि च मन्त्राणा माकाङ्क्षितार्थिनां परस्पर मेकवाक्यता भवति, तदपि चोपप्रदर्शयिष्यति—"येना पावक चक्षसा (ऋ० स० १,४,८,१)"—इत्यत्र †॥

---

* १भा० ६६ पृ० १ऋ० ३पा० ३ख० द्रष्टव्यम्।

† तथाहि,—"तत्ते वयं सुम इति वाक्यशेषोऽपि वोत्तरस्या मन्वयः वेन बोधि" —इति १२ ऋ० ३पा० १ख०।

"तत् को वैश्वानरः"—इति। अतः प्रभृति विचारः। तदिति वाक्योपादाने। कोऽयं वैश्वानरः? इति। कुतः संशयः? आगम-विप्रतिपत्तेः; विश्वानरविद्यायां तावत् 'आत्मा'-इत्यात्मविदः; इन्द्रा-दित्यवाय्वाकाशोदकपृथिव्यादयश्च पृथक् पृथगेव वैश्वानरत्वेन विज्ञा-यन्ते। अपि च "मध्यमः" वैश्वानरः इति नैरुक्ताः केचित् "आचार्याः" मन्यन्ते। कस्मात्? "वर्षकर्मणा ह्येनं स्तौति" मन्त्रदृक्। हि शब्दो हेत्वर्थः, वर्षकर्मणैनं वैश्वानरं यस्मान्मन्त्रदृक् स्तौति॥ २ (२२)॥

**प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते। वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शम्बरं भेत्॥ प्रब्रवीमि तन्महित्वं* माहाभाग्यं वृषभस्य वर्षितु रपां यं पूरवः पूरयितव्या मनुष्या वृत्रहणं मेघ-हनं सचन्ते सेवन्ते वर्षकामा दस्युर्दस्यतेः क्षयार्था-दुपदस्यन्त्यस्मिन्नसा उपदासयति कर्माणि त मग्नि-र्वैश्वानरो घ्नन्नवाधूनोदपः काष्ठा अभिनच्छम्बरं मेघ मयासावादित्य इति पूर्वे याज्ञिकाः॥ ३ †॥**

कथम्? इति। अत आह;—"प्र नू महित्वम्" इति‡। नोधस आर्षम्। त्रिष्टुप्। वैश्वानरोऽग्निर्देवता। ('प्र वोचम्')

---

* "तन्महत्त्वं" ख, ग, च; परं टप्पनिविरुद्धः।

† नाच खण्डसमाप्तिः ङ-च-पुस्तकयोः।

‡ ऋ० सं० १, ४, २५, १। "ऋचेदं चिन्तनीयम्"—इत्यादिकं सायणीयञ्च भाष्य मत्र द्रष्टव्यम्।

"प्रब्रवीमि" अहम्। 'महिलम्' "माहाभाग्यम्", स्तुत्या। कस्य? 'वृषभस्य' "वर्षितुरपाम्"। 'यम्' अन्येऽपि 'पूरवः' "पूरयितव्याः मनुष्याः" कामैः, 'वृत्रहणम्' "मेघहनम्", 'सचन्ते' "सेवन्ते" "वर्षकामाः" स्तुतिभिः। तन्माहाभाग्यं प्रब्रवीमि;—यदसौ वर्षिता 'वैश्वानरः' 'अग्निः', 'दस्युं' दासयितारं रसानाम्; शुष्यन्ति हि तदनुद्गमे शस्यानि, कर्मणां वोपदासयितार मनावृष्टिद्वारेण, तं दस्युम्, 'शम्बरम्' "मेघम्" उदकवन्त मुदकपूर्णम्, 'जघन्वान्' हतवान्,—('अव भेत्') "अवाभिनत्" व्यदारयत्,—विदार्य च 'अधूनोत्' वर्षभावेनाकम्पयत् अचारयत् 'काष्ठाः' अपः। यः, तस्याहं वर्षप्राप्त्यर्थं प्रावोचं माहाभाग्यम्; स वर्षलक्षाक मित्यभिप्रायः॥

एव मेतस्मिन् मन्त्रे वैश्वानरस्य वर्षकर्मणैकवाक्यतासम्बन्धात् नान्यो मध्यमाद् वैश्वानर इत्याचार्या मन्यन्ते। स्थितं तावदेवम्*॥

"असौ आदित्यः,— इति पूर्वे याज्ञिकाः"। असाविति कर्मात्मनैन मुपदिशन् ब्रवीति, माभूद् गौणः कश्चित् प्रत्यय इति। विधिमन्त्रार्थवादेभ्यो† यज्ञमतत्र मुन्नीयैनं यज्ञं प्रयोगतः प्रथमं ये चक्रुः, ते 'पूर्वे याज्ञिकाः' साक्षात्कृतधर्माण ऋषयः। त एन मेव माहुः—'असौ आदित्यः इति'। कया पुनरुपपत्त्या त एव माहुः? इति। विध्यनुकरणप्रसिद्ध्या॥ ३॥

---

* मध्यम एवाग्निर्वैश्वानरः। अयं प्रथमपक्षः। मध्यमाग्निश्च विद्युदिति नैरुक्ताचार्यसम्मतः। सायणमते तु मध्यमशब्देनेह वायोरिन्द्रस्य वा ग्रहणम्। ऋ० सं० १, ४, २५, १. भा० ३०।

† विध्यादिलक्षणं तु मीमांसापरिभाषादिषु स्फुटम्।

एषांलोकानां * रोहेण सवनानां रोह आम्नातो रोहात्प्रत्यवरोहश्चिकीर्षितस्तां मनुक्रमिं होताग्निमारुते शस्त्रे वैश्वानरीयेण सूक्तेन प्रतिपद्यते सोऽपि न स्तोचिय मादृियेताग्नेयो हि भवति तत आगच्छति मध्यस्थाना देवता रुद्रश्च मरुतश्च ततोऽग्नि मिहस्थान मचैव स्तोचियं शंसति ॥ ४ † ॥

कथम् ? इति। यतः तन्मत माह;—"एषां लोकानां रोहेण सवनानां रोह आम्नातः"। य एव हि लोकाना मारोहणानुक्रमः, पृथिवी—अन्तरिक्षम्—द्यौः इति, सएव सवनाना मपि क्रमः, प्रातः-सवनम्—माध्यन्दिनम्—तृतीयसवनम् इति। ततः किम् ? कस्मिं-श्चित् कर्मणि रोहप्रातिलोम्येन "रोहात् प्रत्यवरोहः" "चिकीर्षितः" कर्त्तुमीप्सितः, तदुपव्याचष्टे। स एव होता प्रातःसवनं पृथिवी-लोकभक्ति शंसति, संसृतत्वात् ; ततो माध्यन्दिन मन्तरिक्षलोकभक्ति शंसति संसृतत्वात् ; ततस्तृतीयसवनं द्युलोकभक्ति शंसति, संसृत-त्वात्। प्रतिभक्तिसंसृतत्वच्च शंसन्—स पृथिवीलोकात् अन्तरिक्षलोक मारूढो भवति, अन्तरिक्षलोकाद् द्युलोकम् ; स च द्युलोक मारो-हन् द्युलोकभक्ति तृतीयसवनं शंसति, तदपि शंसन् द्युलोक मारूढो भवति। सः अग्निष्टोमसाम्नि यज्ञायज्ञिये ‡ यत् शस्त्रम् आग्नि-

* "एषां लोकानां" ख, च। † नाचापि खण्डसामाग्निः ङ-च-पुस्तकयोः।

‡ "यज्ञायज्ञा वो अग्नये (सा० ऋ० आ० १प्र० १च०४, १)"—इत्यस्या ऋचुत्पन्नं गेयगाने पठितं चतुर्थं साम (१प्र० २अ० २५सा०) यज्ञयज्ञिय मित्युच्यते। आर्षेय-ब्राह्मणं तच नियामकम्। अग्निष्टोमसंस्कारके व्यवहार्यत्वात् तदेव अग्निष्टोमसामेति व्यपदिश्यते।

मारुतं* तत्प्रत्यवरोहानुकृतिं चिकीर्षन्नृक्थं "वैश्वानरीयेण सूक्तेन" "प्रतिपद्यते" प्रारभते। तद्यथा—"वैश्वानरायं पृथुपाजसे (ऋ० स० ३, १, ३. सू०)" इति† प्रतिपत्। "सोऽपि न स्तोत्रियम् आद्रियेत; आग्नेयो हि भवति"। प्रत्यवरोहे कर्त्तव्ये स च पुनराग्नेयोऽयं स्तोत्रियः, अग्निश्च पृथिवीस्थानः; तद्यदि न माद्रियेत, न प्रत्यवरोहानुकृतिप्रारम्भः कृतः स्याद्। अन्येषु शस्त्रेषु च युक्तं यदूर्द्ध्वं मारुत्यमाणः स्तोत्रियेण प्रतिपद्यते, इह पुनरवरुत्यमाणो द्युस्थानाधिदेवताः शंसमानः क्रमेण वैश्वानरीयेण सूक्तेन प्रतिपद्यत इति, तेन ज्ञायते आदित्यो वैश्वानर इति॥

अपि च सुतरां प्रत्यवरोहानुकरण मेतदिति गम्यते, येन "तत आगच्छति मध्यमस्थाना देवताः—रुद्रश्च मरुतश्च"। 'ततः' वैश्वानरीयात् सूक्तात् प्रत्यवरोहानुकरणाभिप्रायेण शस्त्रात् प्रत्यवरुह्य मध्यस्थाना देवता आगच्छति मध्यस्थानेऽभिशंसितुम्। कतमाः? रुद्रश्च मरुतश्च‡। तद्यथा—"आ ते पितर्मरुतां सुम्न मेत (ऋ० स० २, ४, ११. सू०)" इति§। ततोऽपि मध्यस्थानात् पृथिवी

---

* आग्निमारुतं नाम अग्निमरुद्देवताकम्, ग्रन्थान्तप्रगीतलक्षणं ज्ञेयम्।

† अस्य सूक्तस्य जगतीच्छन्दः, वैश्वानरोऽग्निर्देवता, अग्निष्टोम आग्निमारुते शस्त्रे विनियोगः। आ० सू० ५. १०. द्रष्टव्यम्।

‡ रुद्रस्य च मरुतां पितृत्वम् "इदं पित्रे मरुताम् (ऋ०स० १, ८, १, १)"—इत्यृचो व्याख्यानावसरे व्याख्याधिकारेणावदत् सायणः।

§ "आ ते पितर्मरुतां * * * इति निगः"—इति आ० सू० ३. ८। अचाद शैनकः।—"चतुर्दशी मुपोष्यैकां क्षण्णस्य जुह्वाचरम्। आवेसूक्तेन रौद्रेण प्रत्यृचं वाग्यतः शुचिः। पूर्वं माध्याह्नतिर्ऊत्वाथोपस्थाय च शङ्करम्। हविःशेषेण वर्त्तेतैकान्तर मतन्द्रितः। पूर्णमासे जयेन्मृत्युं रोगैश्च परिमुच्यते।"—इति ऋग्वि० १।१०।

स्थानं प्रत्यवरुह्य अत्रैव तं स्तोचियं शंसति,—"यज्ञायज्ञा वो अग्नये (ऋ० सं० ६, ४,५. सू०)" इति* । तदेव मेतस्माद् विध्यनुकरणात् पश्याम आदित्यो वैश्वानर इति ॥ ४ ॥

**अथापि वैश्वानरीयो द्वादशकपालो भवत्येतस्य हि द्वादशविधं कर्माथापि ब्राह्मणं भवत्यसौ वा आदित्योऽग्निर्वैश्वानर इत्यथापि नित्यसौर्यवैश्वानरो भवत्या यो द्यां भात्या पृथिवी मित्येष हि द्यावापृथिव्यावाभासयत्यथापि छान्दोमिकं सूक्तं सौर्यवैश्वानरं भवति दिवि पृष्टो † अरोचतेत्येष हि दिवि पृष्टो‡ अरोचतेत्यथापि हविष्यान्तीयं सूक्तं सौर्यवैश्वानरं भवति ॥ ५ § ॥**

"अथापि वैश्वानरीयो द्वादशकपालो भवति" । देवतागुणसामान्येन हि अधियज्ञेषु गुणविधयः कल्प्यन्ते, वैश्वानरीयस्य सर्वत्र द्वादशकपालः । "एतस्य हि" "द्वादशविधं" द्वादशमासप्रविभागलक्षणं "कर्म" । तेनैतस्मादपि देवतागुणकपालविध्यनुकरणात् पश्याम आदित्यो वैश्वानर इति ॥

---

* आग्निमारुते यज्ञायज्ञा व इत्ययं स्तोचियप्रगाथः । ऋ० सू०५.१९. द्रष्टव्यम् ।

†, ‡ "पृष्ठो" ग ।

§ नाऽपि खण्डसमाप्तिः ङ-च-पुस्तकयोः ।

"अथापि निवित् सौर्यवैश्वानरौ भवति"। निविदित्याकृति-विशिष्टो मन्त्रः, शस्त्रमध्यपाती*। स तथा भवति यथा सूर्यो वैश्वानर इति न पार्थिवो न मध्यम इति। कथम्? इति। भवति हि तच्चैतत् पदम्,—"आ यो द्यां भात्यापृथिवीम्" इति। न च पुनरादित्यादन्योऽवभासयते द्यावापृथिव्यौ; यत उच्यते,—"एष हि द्यावापृथिव्यावाभासयति" ॥

---

* "निवित्"—इति निघण्टौ वाङ्नामसु १भा० ७४ पृ० (१२)। "नितरां वेदयति ज्ञापयति स्व मभिधेयम्"—इति देवराजः १भा० ८२ पृ० (१२)। "तान् पूर्वया निविदा हुमहे (ऋ० सं० १,६,१५,२)"—इत्यत्र 'तान्' विश्वेदेवान्, 'पूर्वया' पूर्वकालीनया नित्यया, निविदा वेदात्मिकया वाचा। निविदिति वाङ्नाम। यद्वा 'निविदा' "विश्वेदेवाः सोमस्य मत्सन्"—इत्यादिकया वैश्वदेवा वयं 'हुमहे' आह्वयामः"—इति, "स पूर्वया निविदा (ऋ० सं० १, ७, ३, २)"—इत्यत्र "'सः' अग्निः, 'पूर्वया' प्रथमया "अग्निर्देवेड"—इत्यादिकया 'निविदा',—इति च, "'निविदं' प्रसिद्धां स्तुतिम् (ऋ० सं० १, ४,१८, ६; १०, ९"—इति च, "निविदः पूर्व्याः (ऋ० सं० १, ७, २५, १)"—इत्यत्र "'पूर्व्याः' चिरन्तनीः 'निविदः' वाङ्नामैतत्, शस्त्रलक्षणवाचः"—इति च, "निविदो भगन्त (ऋ० २,५, २९,१२)"—इत्यत्र "मरुत्वतीयशस्त्रे प्रयुज्यमानानि मरुत्स्तोत्रो मरुद्गण इत्यादीनीन्द्रस्तुतिप्रतिपादकानि कानि चित् पदानि निविच्छब्देनोच्यन्ते"—इति च, "के चिन्निविदो मनामहे (ऋ० सं० ५,१,१०,५)"—इत्यत्र "'केचित्' बहूचाः 'मनामहे' अग्न्यादीन् स्तुवन्तो 'निविदः' शंसन्ति"—इति च सायणव्याख्यानानि। "शस्त्रं वा आहावः शस्त्रं निवित् * * * द्वादशपदा वा एषां निविद् (ऐ० ब्रा० २, ५, १)"—इत्यादि, "यद् वित्ता निविद्भिर्न्येवेदयंस्तन्निविदां निवित्त्वम् (ऐ० ब्रा० ३, १, ९)"—इति, "गर्भो वा एत उक्थानां यन्निविदः (ऐ० ब्रा० ३, १,१०)"—इत्यादि, "सौर्या वा एता देवता यन्निविदः (ऐ० ब्रा० ३, १, ११)" —इत्यादिकञ्च द्रष्टव्यम्। इहैव च पुनः सप्तमपादस्य द्वितीयखण्डे व्याकरिष्यत्यथ मेव टीकाकारः।

"अथापि छान्दोमिकं सूक्तं सौर्यवैश्वानरं भवति"। कतमत्? "दिवि पृष्टो अरोचत—इति"*। न च पुनरादित्यादन्यो दिवि पृष्टो रोचते; यत उच्यते,—एष हि "दिवि पृष्टो अरोचत"। 'दिवि पृष्टः' द्युलोके स्पृष्टः अवस्थित इत्यर्थः, 'अरोचत' रोचते दीप्यते। कोऽसौ? इति। 'अग्निर्वैश्वानरः', 'बृहन्' महान् इत्यर्थः। स रोचमानः किं करोति? 'ज्योतिषा' स्वेन 'बाधते' 'तमः' नाशयत इत्यर्थः॥

"अथापि हविष्यान्तीयं सूक्तं† सौर्यवैश्वानरं भवति‡"। कथम्? इति। भवति हि तत्र मन्त्रः—सूर्यो वैश्वानर इति समर्थः। तद्यथा,—"विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुं मह्ना मकृण्वन् (ऋ० सं० ८, ४, १२, २)"—इति§। वैश्वानरं केतुं कर्त्तारं मह्ना मकृण्वन्निति। नैव तावदादित्यादन्यस्याङ्गं कर्त्तृत्वमुपपद्यते पार्थिवे मध्यमे वा; आदित्य एव ह्युदयास्तमयाभ्यां महानि करोति। तेन वयमेतैर्हेतुभिः पश्यामः सूर्यो वैश्वानर इति॥ ॥ ५ ॥

---

* "दिवि पृष्टो अरोचताग्निर्वैश्वानरो बृहन्। क्षया दधान ओजसा चनोहितो ज्योतिषा बाधते तमः॥"—इति य० वा० सं० ३३, ९१। ऋ० सं० १, ७, ९, १०.—५ १, ७, १. ऋचौ च द्रष्टव्ये।

† ऋग्वेदेदशममण्डले सप्तमे हविष्यान्तमित्येकोनविंशत्यृचं चतुर्थं सूक्तम्। एतच्च यूढस्य दशरात्रस्य पञ्चमेऽहनि आग्निमारुते शस्त्रे निविदानं भवति। आ० सू० ८, ८. द्रष्टव्यम्।

‡ "सूर्यो वैश्वानरगुणकोऽग्निश्च समुदितो देवता। तथाचानुक्रान्तम्, * * * सौर्यवैश्वानरीय मिति"—इति सा०।

§ हविष्यान्तीये तस्मिन् सूक्ते द्वादश्या ऋचः पूर्वोऽर्द्ध एषः।

‖ आदित्य एव वैश्वानर इति पूर्वयाज्ञिकसम्मतः। अयं द्वितीयपक्षः। "तदेतन्मतद्वय मप्यनुपपन्नम"—इत्याह सायणः। ऋ० सं० १, ४, २५, ९. भा० द्र०।

अथ मेवाग्निर्वैश्वानर इति शाकपूणिर्विश्वानरावेते* उत्तरे ज्योतिषी वैश्वानरोऽयं यत्ताभ्यां जायते कथन्त्वय† मेताभ्यां जायत इति यच्च वैद्युतः शरण मभिहन्ति यावदनुपात्तो‡ भवति मध्यमधर्मैव तावद्भव-त्युदकेन्धनः शरीरोपशमन उपादीयमान एवायं सम्प-द्यत उदकोपशमनः शरीरदीप्तिः ॥ ६ ९ ॥

"अयम् एव अग्निः वैश्वानरः, इति शाकपूणिः"। न मध्यमो न सूर्यः; किं तर्हि? अय मेव पार्थिवः अग्निः §। केन हेतुना? तद्धितोत्पत्तिसामर्थ्यात्¶। कथम्? इति। "विश्वानरावेते उत्तरे ज्योतिषी"। तदुक्तम्,—"अपि वा विश्वानर एव कश्चित् स्यात्, तस्यापत्यं वैश्वानरः" इति। तदिद मुपपद्यते,—"वश्वानरः अयम् यत् ताभ्यां जायते"। तस्मात् तद्धितेन व्यपदेशेन पार्थिवोऽग्नि-र्वैश्वानर इति॥

---

* "विश्वानरावित्यपेते" ङ,च।

† "कथन्वय" क, ख, ग।

‡ "यावदनुपात्तो" क,ख,ग।

§ नाचापि खण्डसमाग्निः ङ-च-पुस्तकयोः।

¶ "नरे संज्ञायाम्" इति (पा० सू० ६, ३, १२९) सिद्धति विश्वानरः। स च मध्यमः (विद्युत्) इति आचार्यसम्मतः, सूर्यइति याज्ञिकसम्मतः। तदुत्पन्नत्वेन पार्थिवोऽग्निः वैश्वानर इति शाकपूणिर्वदति। द्वतीयपक्षोऽयम्।

¶ पार्थिवस्याग्नेरेव वैश्वानरत्वे इह षट् हेतवो वक्तव्याः; तत्राद्य माद्यः।

"कथन्त्वय मेताभ्यां जायते"। यत उच्यते,—"यत्र वैद्युतः" अग्निः, "शरणम् अभिहन्ति"। आश्रय मात्मनो दारु, उदकम्, अन्यद्वा 'अभिहन्ति' निहन्ति, अभिगच्छति प्राप्नोतीत्यर्थः। किं तत्र तत् दीप्यते, स च पुनः "यावदनुपात्तो भवति" मनुष्यैरस्पृष्टो भवत्यपरिग्रहीतो वा। किं तावत्? "मध्यमधर्मैव तावत् भवति"। कः पुनर्मध्यमस्य धर्मः? यदसौ "उदकेन्धनः शरीरोपशमनः" उदकेनेन्धते दीप्यते रसस्वभावकेन शरीरेण काष्ठेनान्येन वाप्रतिहतमूर्त्तिस्वभावकेन पार्थिवधातुबहुलेनोपशाम्यति; स मध्यमस्य धर्मः। तदेतत् स्थानजात्यादिकृतं स्वाभाव्य महेतुकं ज्योतिषो न भवति प्रथमस्य धर्मः। स च पुनः "उपादीयमानः एव" "अथम्" पार्थिवोऽग्निः "सम्पद्यते"। कथम्? उपात्तो हि मनुष्यैः स्वजातिधर्मं हित्वा पार्थिवधर्मं प्रतिपद्यते। कथम्? इति। "उदकोपशमनः शरीरदीप्तिः"। विपर्यस्तधर्मा मध्यमेन सम्पद्यते। एवन्तावन्मध्यमादयं विश्वानरात् स जायते, तेनायं तदपत्य मिति भवति हि तद्धितार्थापपत्त्या वैश्वानरः* ॥ ६ ॥

**अथादित्यादुदीचिप्रथमसमावृत्त आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे यच्च शुष्कगोमय मसंस्पर्शयन्† धारयति तत्प्रदीप्यते सोऽय मेव सम्पद्यते तथाप्याह‡। वैश्वानरो यतते सूर्येणेति। न च पुनरात्म-**

* "वैद्युतोऽग्निर्हि मध्यमसकाशाज्जायते। अशनिपतनानन्तर मय मेव पार्थिवोऽग्निः सम्पद्यते"—इति सायणः। ऋ० सं० १, ४, २५, ९. भा० ६०।

† "मसंस्पर्शं" ख, ग।

‡ "अथाप्याह" ङ, च; इतिपुस्तकयोश्च।

**नात्मा* संयततेऽन्येनैवान्यः संयतत इत इम मादधात्यमुतोऽमुष्य रश्मयः प्रादुर्भवन्तीतोऽस्यार्चिषस्तयोर्भासोः संसङ्गं दृष्ट्वैव मवक्षत्† ॥ ७‡ ॥**

अथ पुनरादित्यात् कथं जायते? आह;—"अथादित्यादुदीचिप्रथमसमावृत्त आदित्ये"—इत्येवमादि। 'अथ' शब्दः आनन्तर्ये; प्रकृतादर्थादर्थान्तर मधिकरोति। उदीचीं दिशं प्रति प्रथमसमावृत्तः आदित्यः, तस्मिन् 'उदीचिप्रथमसमावृत्ते' उदगयनादौ इत्यर्थः। कथम्? इति। "कंसं वा मणिं वा परिमृज्य" य मादित्यमणि मित्याचक्षते। "प्रतिस्खरे" प्रत्युपतापे। "यत्र शुष्कगोमयम् असंस्पर्शयन् धारयति, तत् प्रदीप्यते", "सोऽय मेव सम्पद्यते" यः शुष्कगोमयेऽग्निर्जायते। स एव मादित्यादपि कंसाद्वा मणेर्वा जायते, असावपि च वैश्वानर इत्युच्यते, तदपत्यापेक्षयाप्यस्य वैश्वानरत्व मुपपद्यते। अथाप्याह, तद्धितविग्रहव्यपदेशात् तावदेव मुपपद्यते—अन्य आदित्यात् तावद्वैश्वानरः§॥

"अथापि" अथ मपरो व्यपदेश एकवाक्ये विभक्त्यन्तरकृतः सूर्यवैश्वानरयोर्भेदं गमयति॥। तद्यथा—"वैश्वानरो यतते सूर्येण"

---

* "पुनरात्मनात्मानं" ङ, च।

† 'मवक्षत्' क, ङ, च।

‡ नाचापि खण्डसमाप्तिर्दृश्यते ङ-च-पुस्तकयोः।

§ "आदित्यसकाशादपि धर्मकाले सूर्यकान्तादिमणिष्वग्नेरुत्पत्तिः प्रसिद्धा" —इति ऋ० स० १, ४, २५, ९. सा० भा० द्र०।

॥ पार्थिवस्याग्नेरेव वैश्वानरत्वे षट् हेतवो वक्तव्याः, नचार्थं द्वितीयः।

इति* मन्त्रदृगाह। प्रथमान्तस्य वैश्वानरशब्दस्य द्वितीयान्तेन सूर्य-शब्देन विभक्तिभेदाद् विशेषणविशेष्यभावेन सामानाधिकरण्यं नास्ति। एतदेवासामानाधिकरण्यमपेक्ष्य अनेकत्वं वैश्वानर-सूर्यशब्दयो-र्ब्रवीति,—"न च पुनरात्मनात्मा संयतते"। किं तर्हि? "अन्येने-वान्यः" "संयतते" सङ्गच्छते; यथा देवदत्तो यज्ञदत्तेन। तत् कथ मयं संयतते सूर्येण? इति। यत आह,—"इत इमं मादधाति"। इतो लोकादोषधीभ्यः अग्न्यादिभ्यो वनस्पतिभ्यो वा मथित्वा प्रत्य-क्षत एव इमं मादधाति अभ्यादधातीत्यनेः। 'अमुतः' मण्डलात् कर्मात्मनः "अमुष्य" च आदित्यमण्डलाधिष्ठातुः स्वभूताः "रश्मयः" "प्रादुर्भवन्ति"। "इतः" तेजःपिण्डाद् "अस्य" तदधिष्ठातुः "अर्चिषः" प्रादुर्भवन्तीति वर्त्तते। "तयोः भासोः संसङ्गं दृष्ट्वैव मवत्त" मन्त्रदृक् "वैश्वानरो यतते सूर्येण—इति† ॥ ७ ॥

**अथ यान्येतान्यौत्तमिकानि‡ सूक्तानि भागानि वा सावित्राणि वा (सौर्य्याणि वा§) पौष्णानि वा वैष्णवानि वा (वैश्वदेवानि वा॥) तेषु वैश्वानरीयाः**

---

* ऋ० सं० १, १५, ५ सू० वैश्वानरीयनिविदानम्, तत्र या प्रथमा, तस्याश्चतुर्थ-पादोऽयम्। "निविदानं निविदा ह्येव खलु मतिश्चलं भवति"—इत्यादि ऐ० ब्रा० ६, १, ११।

† "वैश्वानरोऽग्निः * * * प्रातरुद्यता सूर्येण च यतते। संयतते सङ्गच्छते। उद्यन्तं वा आदित्य मग्निरनु समारोहतीति तैत्तिरीयकम्। यद्वा पार्थिवस्याग्नेः तेजांस्युद्गच्छन्ति, सूर्यकिरणाश्चाधोमुखं प्रसरन्ति, तयोः सङ्गमनं दृष्ट्वा वैश्वानरो यतते सूर्येणेत्यृषिर्ब्रूते।"—इति तत्रैव सा० भा०।

‡ "यान्येतान्यौत्तमकानि" क, ख, म।

§, ॥ "न स्त इमे क-ख-ग-पुस्तकेषु, नापि वृत्तिपुस्तकयोः।

प्रवादा अभविष्यन्नादित्यकर्मणा चैन मस्तोष्यन्नित्यु-देषोत्यस्त मेषीति विपर्येषीत्याग्नेयेष्वेव हि सूक्तेषु वैश्वानरीयाः प्रवादा भवन्त्यग्निकर्मणा चैनं स्तौतीति दहसीति वहसीति पचसीति* यथो एतद्दर्षकर्मणा ह्येनं स्तौतीत्यस्मिन्नप्येतदुपपद्यते ॥ ८ † ॥

"अथ"—इति अधिकारान्तरे। यदि सूर्यो वैश्वानरोऽभविष्यत्, ततो ननु "यान्येतानि" "औत्तमिकानि सूक्तानि" उत्तमस्थानदेवताविशेषस्तुत्यर्थानि। तद्यथा—"भागानि ‡ वा सावित्राणि § वा पौष्णानि ‖ वा वैष्णवानि ¶ वा"। गुणपदत्व मभ्युपेत्य वैश्वानरशब्दस्य ब्रवीति। "तेषु" सूक्तेषु "वैश्वानरीयाः प्रवादाः" भगादीनां विशेषणत्वेन "अभविष्यन्"; हे भग वैश्वानर! हे सवितः वैश्वानर! इत्येवमादयः**। "आदित्यकर्मणा च एन मस्तोष्यन्"††।

---

* "वहसीति पचसीति दहसीति" एवं पाठक्रमो ङ-च-पुस्तकयोः, इत्तौ च।

† नाचापि खण्डसमाप्तिः ङ-च-पुस्तकयोः।

‡ ऋ० सं० १, २४, ५; ७, ३८, १; ८, ५१, २—१. सप्त ऋचो भगदेवताकाः।

§ ऋ० सं० २, ३८; ४, ५३; ५४; ५ ८१; १, ७१; ७, ४५; १०, १४९. इति सप्त सूक्तानि, १, २२, ५—८; १, २४, २—४; १, २५, १—११; ३, १, १०—१३; ७, ३८, १—९; १०, १३९, १—३. इति चतुर्दश ऋचश्च सवितुः।

‖ ऋ० सं० १, ४२; १३८; १, ५७; ५८. इति चत्वारि सूक्तानि, १, २२, १३—५१५; ३, ११, ७—९; १, ४८, १९—१७; ५३—५९; १०, १७, ३—१; ८, ४, १५—१८; २, ४०, २—१. इति षड्विंशत्यृचश्च पूष्णः।

¶ ऋ० सं० १, १५४; १५५; ७, १००. इति त्रीणि सूक्तानि, १, २२, १७—११; १५५, ४—१; ७, ९९, १—३; ८; ५, ३, ३; १, २२, १९. इति चतुर्दश ऋचश्च विष्णोः।

** पार्थिवस्याग्नेर्वैश्वानरत्वेऽयं स्तुतौ हेतुः।

†† आदित्यकर्म च पुरस्ताद्गतम् ७, २, ४. २९० पृ०।

एवं वैश्वानरीयेषु सूक्तेषु वैश्वानर मस्तोष्यन् मन्त्रदृशः। कथम्? इति। "उदेषीत्यस्त मेषीति विपर्येषीति"। इतिकरण एवंशब्दार्थे; एव मुदेषि त्वं वैश्वानर!—एव मस्त मेषि—एवं विपर्येषि इति*। न च पुनरेतदुभय मप्यस्ति;—न हि वैश्वानरीयाः प्रवादा औत्तमिकेषु सूक्तेषु सन्ति, नाप्यादित्यकर्मणा वैश्वानरं स्तुवन्ति मन्त्रदृशः। तस्मान्नैष सूर्यो वैश्वानर इति॥

किञ्चाय मपरो विशेषहेतुरग्नैर्वैश्वानर इति—"आग्नेयेष्वेव हि सूक्तेषु वैश्वानरीयाः प्रवादाः भवन्ति" अग्निविशेषणत्वेन।—"वैश्वानर ऋत आ जात मग्निम् (ऋ० मं० ४, ५, ९, १)"—इत्येवमादयः† ॥

"अग्निकर्मणा च" "एनं" वैश्वानरं प्रायेण "स्तौतीति" "वहसीति‡ पचसीति, दहसीति"। एवं वैश्वानर! वहसि हवींषि, पचसि पक्तव्यानि, दहसि दग्धव्यानि§ ॥

तस्मादग्निरेव वैश्वानर इति स्थितम्॥

तदेते षट् हेतवः;— तद्धितेन विग्रहव्यपदेशात्(१), एकवाक्ये विभक्त्यन्तरव्यपदेशात्(२), औत्तमिकेषु सूक्तेषु अप्रवादात्(३), आदित्यकर्मणा असंस्तवात्(४), आग्नेयेषु सूक्तेषु प्रवादात्(५), अग्निकर्मणा च संस्तवात्(६) इति¶ ॥

---

* पार्थिवस्याग्नेर्वैश्वानरलेाकं हेतुश्चतुर्थः।

† पार्थिवस्याग्नेर्वैश्वानरलेाकश्च हेतुः पञ्चमः।

‡ अग्निकर्म चोक्तं पुरस्तात् ३४४ पृ० ७, २, १ ख०।

§ पार्थिवस्याग्नेर्वैश्वानरलेाकं हेतुः षष्ठः।

‖ एवञ्च तृतीयपक्षोऽय मेव सिद्धान्तः।

¶ (१) ४०८ पृ० १२ पं०। (२) ४१० पृ० १७ पं०। (३) ४१२ पृ० ११ पं०। (४) ४१२ पृ० ४ पं०। (५) ४१२ पृ० १० पं०। (६) ४१२ पृ० १२ पं०।

तत्पुनरेतदग्नैर्वैश्वानरत्वं स्थित मध्यस्थित मिव परपक्षहेतुश्च-निराकृतेषु; अतः तन्निराकरणाय प्रस्तौति। "यथो एतत्"—इति। यत् पुनरेतदुक्तं वर्षकर्मणा यस्मात् स्तौति, तस्मान्मध्यम इति*। "अस्मिन्नपि" पार्थिवेऽग्नौ "एतदुपपद्यते" वर्षकर्म ॥ ८ ॥

समान मेतदुदकमुच्चैत्यव चाहभिः। भूमिं पर्जन्या जिन्वन्ति दिवञ्जिन्वन्त्यग्नयः॥ इति सा निगद व्याख्याता॥ ९ (२३)॥

॥ इति सप्तमाध्यायस्य षष्ठः पादः ॥ ७. ६.

कथम्? इत्यत आह—"समान मेतत्" इति†। 'समानम्' एक मेवेदम् 'उदकम्' उदकत्वेनाविशिष्टम्, "उच्चैत्यव चाहभिः"। 'उत् एति च, ऊर्ध्वं चैति, अहोभिर्निमित्तभूतैः पुनश्चाहोभिरेव अवाङ्केति; दक्षिणोत्तरायणयोर्व्यावृत्तिभिः प्रतिसंवत्सर महान्यभिप्रेतानि। तदे-तदेकमेवोदकं पर्यायेणोत्तरायणदक्षिणायनयोः जगद्याचासिद्धये तदु-देति चावैति च वर्षकर्मभावेन। कथम्? इत्यत आह— अवाङ् तावदेति; 'भूमिं' 'पर्जन्याः' प्राजयितारो रसानां माध्यमिका देवगणा वर्षा ममुतो मुञ्चन्तो 'भूमिं' 'जिन्वन्ति' तर्पयन्ति ओषध्युत्पत्तये। एवं तावदवाङ्केति। अथ पुनरूर्ध्वं कथ मेति? इत्यत आह;—"दिवं जिन्वन्त्यग्नयः"। यथैवामुतो वर्षेणेमा पर्जन्या जिन्वन्ति, तथै-वाऋतिप्रभवेन वर्षेण दिवं जिन्वन्त्यग्नयः; आऋतयो ह्यग्नौ प्रक्षिप्ताः

---

* पु० ९ पा० २ ऋ० ७९९ पृ० १४ पं०, ४०१पृ० ९पं०।

† ऋ० सं० १. ३, २६, ५। एषा तु पुरस्तादप्येकवोदाहृता परं न तस्या तत्र व्याख्या कृता। पु० ९, ४, ८.—२३९ पृ० ९ पं०।

तेन दग्धास्ता स्वार्चिभिः कृत्वोदकभाव मापाद्य परमं सूक्ष्मं देवोपभोगयोग्यं द्यां प्रति वर्षभावेनोन्नीयन्ते तल्लोकनिवासिनां हृप्तये, ततस्तदह पुनर्वर्षं प्रकल्पयन्ति। तदुक्तम्—"अमुष्य लोकस्य का गतिरिति, अयं लोक इति होवाच"—इति‡।

एवञ्च सुतरा मथ मपि च वर्षवान्; आकृतिमूलत्वात् सर्वस्य वर्षस्य। स्मर्यते च—"अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्य मुपतिष्ठते" इति*। तच्च यदभूद् वर्षकर्मभावान्मध्यम इति, तदेतदवैशेषिकं मध्यमस्य वैश्वानरत्वेन लक्षणम्॥

अपि चाय मपरो मन्त्रः, यस्मिन्नग्निरादित्यो वर्षकर्मणा स्तूयते। तस्मात् सुतरा मनैकान्तो वर्षकर्माभिष्टवो मध्यमस्येत्यत आह—"कृष्णं नियानम्" इति†॥ ८ (२३)॥

॥ इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य) षष्ठः पादः॥ ७.६.

---

॥ सप्तमः पादः॥

**कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिव मुत्पतन्ति। त आ ववृत्रन्त्सदनादृतस्यादिद् घृतेन पृथिवी व्युद्यते॥ कृष्णं निरयणं रात्रिरादित्यस्य हरयः**

---

‡ छा० आ० १प्र० ५ख०।

* म० सं० १अ० ७९ श्लो०।

† अग्निमण्डले एव मन्त्रं दर्शयिष्यत्याचार्यः।

सुपर्णा हरणा आदित्यरश्मयस्ते यदामुतोऽर्वाच्चः पर्यावर्त्तन्ते सहस्थानादुदकस्यादित्यादथ घृतेनोदकेन पृथिवी व्युद्यते घृत मित्युदकनाम जिघर्त्तेः सिञ्चतिकर्म्मणोऽथापि ब्राह्मणं भवत्यग्निर्वा इतो वृष्टिं समीरयति धामच्छद्दिवि भूत्वा वर्षति* मरुतः सृष्टां वृष्टिं नयन्ति यदासावादित्योऽग्निं रश्मिभिः† पर्यावर्त्तते ऽथ वर्षतीति यथो एतद्रोहात्प्रत्यवरोहश्चिकीर्षित इत्याम्नायवचनादेतद्भवति यथो एतत्—॥ १ ‡॥

"कृष्णं नियानम्",–इति§। दीर्घतमस आर्षम्। त्रिष्टुप्। वृष्टिकामस्य कारीर्यां मरुद्भ्यो धामच्छदे अष्टाकपालम्, तस्य पुरोऽनुवाक्या; तस्यां मैत्रायणीयके अग्निरय मादित्यीकृत्य स्तूयते इति प्रकरणाद्ध्यवसीयते। 'कृष्णम्'। किं पुनस्तत् कृष्णम्? ('नियानं') "निरयणं" निर्गतिः; निर्गच्छन्त्येतदिति 'नियानं' वर्त्म, पन्थाः। तच्च पुनरेतद् "रात्रिः आदित्यस्य"; द्वे ह्यस्यायने शुक्लं चोत्तरम्, कृष्णं च दक्षिणम्; सा हि दैवी रात्रिरभिप्रेता। ततो ब्रवीति रात्रिरादित्यस्य ज्योतिषः। स एष भगवानादित्यो यदा जगदनुग्रहाय गर्भ मुदक मात्मन्याधित्सुरुत्तरायणं प्रतिपद्यते, तदैते

---

* "धामच्छदिव खलु वै भूत्वा वर्षति" ङ, च।

† "यदा खलु वा असावादित्यो न्यङ् रश्मिभिः" ङ, च।

‡ नास्ति खण्डसमाप्तिः ङ-च-पुस्तकयोः।

§ ऋ० सं० १, ६, १२, १। वर्षकामेष्ट्यां तिस्रः पिण्डीया हेतव्याः। तत्र कृष्णं नियान मिति तृतीयस्यानुवाक्या। आ० सू० १, १२।

'हरयः' रस-"हरणाः", 'सुपर्णाः' तस्य "रश्मयः" सर्वस्मादस्मा-ल्लोकात् 'अपो वसानाः' आत्मन्याच्छादयन्तः आददानाः 'दिवं' द्योतनवन्तम् एत मादित्यं प्रति 'उत्पतन्ति', तदुदकम् निधित्स-मानाः तस्मिन् गर्भत्वेन स एष आदित्य उत्तरायणं मासैः षड्भिः आहितोदकगर्भः सम्पद्यते। स एकः * परिषिक्तोदकगर्भो दक्षिणं वर्त्म प्रतिपद्यमानो नभस्यात् मासात् प्रभृति प्रस्रयते। तदिद मुच्यते ;— "त आ वहन्त्सदनादृतस्य" इति। 'ते' रश्मयः "यदा" "अमुतः" अमुष्माद् आदित्यात् 'ऋतस्य' उदकस्य 'सदनात्' सहस्थानात् 'आ वहन्' यदा "पर्यावर्त्तन्ते", ('आत्') "अथ" तदा वृत्ति-समनन्तर मेव 'घृतेन' "उदकेन" 'पृथिवीं' 'व्युद्यते' विविध मुद्यते। "घृतम् इति उदकनाम†" 'पृथिवी व्युद्यत इति सामर्थ्यात्। तत् पुनः "जिघर्त्तेः सिञ्चतिकर्मणः"‡ ॥

एव मेतस्मिन् मन्त्रे मन्त्ररूपादादित्यः, प्रकरणादग्निः, उभय-थाप्यन्यो मध्यमात् वर्षकर्मणः कर्त्ता§ ॥

"अथापि ब्राह्मणम्" एतस्मिन् प्रकरणे यस्मिन्नयं मन्त्रो विनि-युज्यते ; "अग्निर्वा इतो वृष्टिं समीरयति"-इत्येवमादि‖। अग्निः इतो लोकाद् वृष्टिं समन्तत ईरयति। धूमभूता आप ओषधि-

---

* "स एव" ख-पाठः।

† १भा० १च० १९ख० ९९, १०१ पृ० (१०)।

‡ "घृ चरणदीप्त्योः" धा० जु० १४।

§ इत्यत्र अग्नेर्वर्षहेतुत्वाद् वर्षकर्मत्व मप्यव्याहतम्, ततश्च वर्षकर्मणापि स्रोतो वैश्वानरोऽग्निरेवेति उदाहृतमन्त्रलिङ्गाल्लभ्यत एव।

‖ छा० ब्रा० ७प्र० "स होवाच किं मेऽन्नं भविष्यतीति"—इत्यादि १—१० ख०।

वनस्पतिभ्यो विनिवर्त्यमानाः आहुतिभूताश्चामुं लोकं माविशन्ति। अग्नेर्वै धूमो जायते, धूमादभ्रम्, अभ्राद् वृष्टिरिति ह विज्ञायते। ताः पुनरग्निस्थानाभिसम्पत्तिप्रनाडिकया धामच्छदादित्यो भूत्वा धान्नां छादयिता रश्मिभिर्मेघरूपैर्मध्यमस्थान मापादयति। एवं तेन सृष्टां वृष्टिं मध्यस्थानान्मरुतो वायवो मेघोदराणि विदार्य तेभ्यो विक्षिपन्तो वृष्टि मिमं लोकं नयन्ति प्रापयन्तीत्यर्थः* ॥

अथापर मपि ब्राह्मणं भवति—"यदासावादित्योऽग्निं रश्मिभिः" इत्येवमादि†। तदेव मेतद् वर्षकर्म समानं सर्वेषाम्‡ इत्यहेतुर्मध्यमस्य वैश्वानरत्वे भवति§ ॥

"यथो एतत्" यत् पुनरेतदुक्तं याज्ञिकपक्षे—"रोहात् प्रत्यवरोहश्चिकीर्षितः इति"॥। अकारण मेतत् सूर्यस्य वैश्वानरत्वे। कस्मात्? "आम्नायवचनात् एतत्" एवं "भवति", रोहात् प्रत्यवरोह इत्यर्थवादमात्र मेव ॥

"यथो एतत्" यदपि चोक्तम्—॥ १ ॥

## वैश्वानरीयो द्वादशकपालो भवतीत्यनिर्वचनं कपालानि भवन्त्यस्ति हि सौर्य एककपालः पञ्चकपा-

---

* इत्यं खलु अग्नेर्वर्षकर्मत्वे ब्राह्मण मपि मानं प्रदर्शितम्।

† एतेन हि ब्राह्मणेन आदित्यस्यापि वर्षकर्मत्वं स्फुटम्।

‡ तथा च 'सर्वेषां' अग्निवाय्वादित्यानां 'वर्षकर्म' 'समानम्' एकरूप मेवेति।

§ एवञ्च वैश्वानरस्य मध्यमत्वे वर्षकर्मणा स्तुत इति य उक्तो हेतुः (१९९४० १७०), स खण्डित इत्यपास्त माचार्यमतम्।

॥ पु० पा० ४७० ४०१० २पं०।

स्य यथो एतद् ब्राह्मणं भवतीति बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति पृथिवी वैश्वानरः संवत्सरो वैश्वानरो ब्राह्मणो वैश्वानर इति यथो एतन्निवित्सौर्य-वैश्वानरो भवतीत्यस्यैव सा भवति यो विड्भो मानुषीभ्यो दीदेदित्येष हि विड्भ्यो मानुषीभ्यो दीप्यते* यथो एतच्छान्दोमिकं सूक्तं सौर्यवैश्वानरं भवतीत्यस्यैव तद्भवति जमदग्निभिराहुत† इति जमदग्नयः प्रजमिताग्नयो वा प्रज्वलिताग्नयो वा तैरभिहुतो‡ भवति, यथोएतद्धविष्यान्तीयं सूक्तं सौर्यवैश्वानरं भवतीत्यस्यैव तद् भवति ॥ २(२४) ॥

"वैश्वानरीयो द्वादशकपालो भवति"§—इति। एतदप्यकारणं सूर्यस्य वैश्वानरत्वे। कस्मात्? व्यभिचारात्; व्यभिचार्येतदित्यत आह;—"अस्ति हि सौर्य एककपालः पञ्चकपालश्च"। यदि हि देवतागुणाभिप्राय मभविष्यत् द्वादशविध मस्य कर्म, तस्माद् द्वादशकपाल इति। नन्वेवं सति सौर्योऽपि द्वादशकपाल एवाभविष्यत्; अभिधानमात्रं भिद्यते न कर्मेति, न च भवति सौर्यो द्वादशकपाल इति। तस्मादहेतुः कपालानि ॥

---

* "दीदयति" क, ख, ग।
† "जमदग्निभिराऽऽहुत" क।
‡ "तैराहुतो" क, ख, ग।
§ पु० ९पा० ५ख० ४०५५० ४पं०।

"यथो एतत्" यदप्युक्तम्—"ब्राह्मणं (सौर्यवैश्वानरप्रवादः) भवतीति"*। एतदप्यकारणम्। कस्मात्? "बज्रभक्तिवादीनि हि ब्राह्मणानि भवन्ति"। यस्माद् बज्रभक्तिवादीनि ब्राह्मणानि भवन्ति। भक्तिर्नाम गुणकल्पना; येन केन चिद् गुणेन ब्राह्मणं सर्वं सर्वथा ब्रवीति, तच्च तत्त्व मन्वेष्य मेव भवति। तद्यथा। "पृथिवी, वैश्वानरः"—इत्येवमादि किमपि ब्राह्मणेन बज्र वैश्वानरशब्देनोच्यते भक्त्या† ॥

"यथो एतत्"—"निवित् सौर्यवैश्वानरी भवतीति"‡। "अग्नेरेव" अग्नेः "सा भवति"। कथम्? इति। तस्माद्धे पदं भवति§? "यो विड्भ्यो मानुषीभ्यो दीदेदिति"। ततः किम्? "एष हि विड्भ्यो मानुषीभ्यो दीप्यते"। "अग्निर्वैश्वानरः सोमस्य मत्सत्। विश्वेषां देवानां समित्। अजस्रं दैव्यं ज्योतिः। यो विड्भ्यो मानुषीभ्यो दीदेत्। द्युषु पूर्वासु दिद्युतानः। अजर उषसा मनीके। आ यो द्यां भात्या पृथिवीम्। और्व मन्तरिक्षम्। ज्योतिषा यज्ञाय शर्म यंसत्। अग्निर्वैश्वानर इह अवदिह सोमस्य मत्सत्। प्रेमां देवो देवहूति मवतु देव्या धिया। प्रेदं ब्रह्म प्रेदं क्षत्रम्॥। प्रेमं सुक्षत्रं

---

* पु० ६पा० ५ख० ४०५पृ० ५पं०। एतच्च तच्च इत्थो व्याख्यात मेवास्ति।

† "स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते"—इत्यादि प्रश्नोपनिषदि द्र०।

‡ पु० ६पा० ५ख० ४०५पृ० ६पं०।

§ "तस्यां पदं भवति" ख।

॥ "सौर्या वा एता देवता यन्निविदस्यद् यत् पुरस्तादुक्थानां प्रातः सवने धीयन्ते मध्यतो मध्यन्दिनेऽन्तस्तृतीयसवने * * * तस्मात् पच्छो निविदः श्रस्यन्ते * * * तस्मान्न निविदः पद मतौयान्न निविदः पदे विपरिहरेद् * * * न निविदः पदे समस्येद् * * * प्रेदं ब्रह्म प्रेदं क्षत्र मित्येत एव समस्येत् * * *।"—इति ऐ० ब्रा० ३, १, ११।

यजमान मवतु। चित्रश्चित्राभिरूतिभिः। अवद् ब्रह्माण्यमागमत्"—इतीयं निवित् आग्निमारुते शस्यते। "निवित् पुरोरुचः प्रेषा विश्वामित्रस्य सर्वशः।"—इति सर्वा विश्वामित्रस्यार्षम्। "अग्निर्वैश्वानरः सोमस्य मत्सत्" इत्यनुवाकः। तत्रश्च "प्रेमां देवो देवहूतिं मवतु"। 'प्र' प्रकर्षेण 'इमाम्' अग्निः वैश्वानरो 'देवः' 'देवहूतिं' देवाना मस्माक माह्वानम् 'अवतु' रक्षतु। यः 'विश्वेषां देवानां' 'समित्' समिन्धनः, स इदं करोतु। यश्च 'अजस्रं' नित्यं 'ज्योतिः'। यश्च 'विड्भ्यः' मानुषीभ्यः 'दीदेत्' देदीप्यते। यश्च 'द्युषु पूर्वासु' पूर्वेष्वहःसु 'दिद्युतानः' दीप्यमान एवासीत्। यश्चासौ 'अजरः' जराविमुक्तः 'उषसा मनीके' अग्निहोत्रादिषु द्योतते। 'यः' च 'आ' ('भाति') भासयति 'द्यां' सूर्यात्मना, 'आ' भासयति च 'पृथिवीम्' अग्न्यात्मना, 'आ' भासयति 'उरु' च 'अन्तरिक्षं' मध्यमात्मना। एवं त्रिभिर्ज्योतिर्भिः यश्च 'ज्योतिषा' 'यज्ञाय' 'शर्म' सुखं ('यंसत्') यच्छति, ददाति। सः 'अग्निः' वैश्वानरः 'इह' 'अवत्' शृणोतु अस्माकं स्तुतीः। 'इह' च कर्मणि 'सोमस्य' 'मत्सत्' हृष्यतु। किञ्च; 'प्रावत्विमां देवो देवहूतिं' 'देव्या धिया' देवानां या दात्री धीः प्रज्ञा, तया 'अवतु' रक्षतु। 'प्रेदं ब्रह्म, प्रेदं क्षत्रम्' ब्रह्म प्रावत्विदम्। 'प्रेमं सुन्वन्तम्' अभिषुण्वन्तं 'यजमानं प्रावतु'। 'चित्रः' चायनीयः पूज्यो वैश्वानरः, 'चित्राभिः ऊतिभिः' शोभनाभिः गतिभिः प्रीतिभिर्वा। ('अवत्') शृणोतु इमानि 'ब्रह्माणि' अस्माकं नित्यं च अस्मान् प्रति 'आगमत्' प्रत्यागच्छतु 'अवसा' पालनाभिप्रायेण मनसा कर्मसु। इत्येतदाशास्महे॥

"यथोएतत्" यत् पुनरेतदुक्तम्—"छान्दोमिकम्" छन्दोमयज्ञेषु दाशराचिकेषु * यत् "सूक्तं", तत् "सौर्यवैश्वानरम्"—इति†, तदपि "अग्नेरेव" अग्नेः "भवति"। कथम्? इति। तच्च हि "एतद्" विग्रिष्टं पार्थिवाग्नेर्वाचकं लिङ्गं "भवति"—"जमदग्निभिराऋतः—इति"; जमदग्नयो ह्येनम् आऋतिभिर्भृङ्कृति; नादित्यम्, अभिधानात् असम्भवाच्च। तस्मादपि यद्वैश्वानरलिङ्गं तदप्येतस्य पार्थिवस्याग्नेर्यज्ञकं भवति। "वृषा पावक दीदिहि"। 'वृषा' वर्षिता, हे वैश्वानर! 'पावक!' 'द्युमत्' दीप्तिमत्, यस्त्वं जमदग्निभिराऋतः, "अभिऋतः", स त्वं मत्साकं कर्मसु नित्यं 'दीदिहि' दीप्यस्व। इत्येतदाशास्महे। "जमदग्नयः" नित्यं "प्रजमिताग्नयः" प्रभूताग्नयः। "प्रज्वलिताग्नयो वा"‡॥

"यथो एतत्" यदप्युक्तम्—"हविष्मान्नीयं सूक्तं सौर्यवैश्वानरं भवति इति§", "तद्"अपि "अग्नेरेव" "भवति"। कथम्? इति। यतस्तस्य सूक्तस्य या प्रथमा ऋक्, सा यथा आग्नेयी भवति; न सौरी, तथा निराह‖—(इदं माग्नेयं सूक्तम्; न सौर्यमित्युपप्रदर्शनार्थम्) ॥ ९ (२४)॥

---

* गायत्र्यादिभिश्छन्दोभिर्मीयन्ते इति छन्दोमास्तुवृदादयः स्तोमाः, तैर्निर्वृत्ता यज्ञाश्छन्दोमयज्ञाः सामवेदीयताण्ड्यब्राह्मणविहिता गवामयनादिकाः, ते हि संवत्सरसाध्या अपि चतुरात्रिभविकैः षट्पृष्ठैश्चाहोभिर्निष्पद्यन्त इति दाशराचिका ऋषयश्चक्रे, तेष्वित्यर्थः।

† पु० ६पा० ५ख० ४०५पृ० ८पं०।

‡ १भा० १५८पृ० १ख० १८७ख० (१) "जमत्"।

§ पु० ६पा० ५ख० ४०५पृ० १०पं०।

‖ इत उत्तरस्मिन्नेव खण्डे।

हविष्यान्तं मजरं स्वर्विदं दिविस्पृश्याहुतं जुष्टं मग्नौ। तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधयापप्रथन्त॥ हविर्यत्पानीय मजरं सूर्यविदं दिविस्पृश्यभिहुतं* जुष्टं मग्नौ तस्य भरणाय च भावनाय च धारणाय चैतेभ्यः सर्वेभ्यः कर्मभ्य इम† मग्नि मन्ने नापप्रथन्तेत्यथाप्याह ‡॥ ३ (२५)॥

"हविष्यान्तम्"—इति §। सूक्त मेतत् मूर्द्धन्वत आङ्गिरसस्यार्षम्, वामदेवस्य वा। व्यूढस्य दशरात्रस्य पञ्चमेऽहन्याग्निमारुतस्य प्रतिपत्। 'हविः' कतमत्? "यत्" एतत् "पान्तम्" पानार्हं पानयोग्यं च देवानां च पुरोडाशादिनिर्दग्धस्थूलभाव मग्निना क्रियते। 'अजरम्' जरा विपरिणामः, यतः परं विपरिणामो नास्ति कश्चित्, तत्प्रविवेक मापादित मग्निना। यदेतत् 'स्वर्विदं' स्वः आदित्यः, तं वेत्ति यथासौ वेदितव्य इति; तदर्थं वा वेत्ति हविः, स खर्विदय मग्निः; न सूर्यः। भाष्यकारोऽपि व्यपदेशेन निराह—"सूर्यविदं" इति। 'दिविस्पृग्नि' द्या मसौ स्पृशत्यहन्यहनि हविरुपनयन्नादित्यम्। 'आहुतम्' "अभिहुतं" विसृष्टम्। 'जुष्टम्' प्रियं देवानाम्। 'तस्य' हविषो 'भर्मणे' "भरणाय" सम्भरणाय बहुलीकरणाय; अपि नाम अथ मग्निरित्येतद् बहु कुर्यादित्येव मर्थम्। "भावनाय च" विभू-

* "दिविस्पृश्याहुतं" क, ख, ग।
† "कर्मभ्यो देवा इम" ङ, च।
‡ "मन्नेनापप्रथन्त। अथाप्याह" ङ, च।
§ ऋ० सं० ८, ४, ११, १०—१०, ७, ४, १।

वियुक्त्युपजायेतेत्येव मर्थं मपि एतत् कथं नाम देवताद्दन्द्रियमर्थं कुर्यादिति 'धर्मणे' "धारणाय" अविच्छेदनाय। कथं नामैतत् देवताभ्यो नित्यं प्रापयेदिति। "एतेभ्यः" "कर्मभ्यः" अर्थाय "इमम्" एव "अग्निं" पृथिवीस्थानं साधयते। 'स्वधया' "अन्नेन" हविषा, आज्येन पुरोडाशेन च। यदुक्तं निगमे घृतं वापां पुरुषं चौषधीनामिति। तदेतत् 'अपप्रथन्त' देवाः अवर्द्धयन्नित्यर्थः॥

एव मेतस्मिन् सूक्ते प्रथमे मन्त्रे यदेतदग्निलिङ्गं मस्मृष्टं वैश्वानरशब्देन, तदशंसय मग्निवाचि। तत्पुनरेतत्सूक्तं 'हविष्यान्तीयम्' प्रागेवाग्नेयं करोति, प्राथम्यात्; प्रथमं लोके यो हि श्रूयते, स स्वेनाभिधानेनाव्यभिचारिणोपक्रम्यते स्तोतुम्, ततोऽन्यैर्भाकैः स्तूयते, त्वं राजा त्व मिन्द्र इत्येवमादिभिः। तथैवं कृत्वा अस्मिन् सूक्ते यो वैश्वानरशब्दः उत्तरत्र स तस्यैवाग्नेः पृथिवीस्थानस्य व्यञ्जनमात्रं भवति। तथा चाय मेव पृथिवीस्थानोऽग्निर्वैश्वानरः; न मध्यमः*॥

तथेम मपरं मन्त्रं स्वपत्नोद्दिभावयिषया अन्यस्मात् सूक्तात् भिन्नज्योतिर्लक्षण मानीय मध्यमोत्तमयोर्ज्योतिषोरन्यत्वव्यपदेशवतो वैश्वानरस्य निर्णिनिषन् प्रकरोति "अयाय्याह्व"—इति॥ ३ (२५)॥

**अपा मुपस्थे महिषा अगृभ्णत विशो राजान मुप तस्थुरृग्मियम्। आ दूतो अग्नि मभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः॥ अपा मुपस्थ उपस्थाने**

---

* एवञ्च "असौ आदित्यः"—इत्यादि (४०१३० १पं०—४०७३०) वर्णितं याज्ञिकमत मध्यपास्तम्।

महत्यन्तरिक्षलोक आसीना महान्त इति वाग्वै ऋत माध्यमिका* देवगणा विश इव राजान मुपतस्थुर्ऋग्मिय मृग्मन्त मिति वार्चनीय मिति वा-(पूजनीय मिति वा †)-हरद्यं दूतो देवानां विवस्वत आदित्या-द्विवस्वान्विवासनवान् प्रेरितवतः परागताद्वास्याग्नेर्वै-श्वानरस्य मातरिश्वान माहर्त्तार माह मातरिश्वा वायुर्मातर्यन्तरिक्षे श्वसिति मातर्याश्वनितीति वायैन मेताभ्यां सर्वाणि स्थानान्यभ्यापादं स्तौति॥ ४ (२६)॥

"अपा मुपस्थे"—इति‡। भरद्वाजस्यार्षम्। प्रातरनुवाकाश्विनयोः शस्यते। 'अपाम्' 'उपस्थे' "उपस्थाने" यत्रोपगम्य तिष्ठन्त्यापः सोऽपा मुपस्थः, अन्तरिक्षलोकः§, तस्मिन्नपामुपस्थे। "महति" विस्तीर्णे। यन्नाः 'महिषाः' "माध्यमिका देवगणाः"। अथवा 'महिषाः' तएव "महान्तः"। किं मकुर्वन्? 'अगृभ्णन्' "अगृह्णन्"। गृहीत्वा च ('विशः') "विश इव" मनुष्या इव 'राजानम्' परिवार्य 'उपतस्थुः'। 'ऋग्मियम्' ऋग्भिः स्तुतिभिः तदर्हम्, "अर्चनीयम्" अर्चनार्हं वा। कतमम्? इति। "यम्" 'आ अभरत्' "आहरत्"। 'दूतः' देवानां 'मातरिश्वा' "वायुः", 'अग्निं' वैश्वानरम्, कुतः?

* "माध्यमका" क, ख, ग।

† न विद्यत एतत् क-ख-ग-पुस्तकेषु।

‡ ऋ० सं० ४, ५, १०, ४।

§ अतएवाह मनुः—"मध्ये योम दिशस्त्वष्टावपां स्थानञ्च शाश्वतम्"—इति (१, २१)। इह कुल्लूकभट्टेन "समुद्राख्यमपां स्थानम्"—इति व्याख्यानन्तु नास्मन्मनोरथम्; "सरितः सागरान्"—इति (२४श्लो०) समुद्रोत्पत्तेर्वक्ष्यमाणत्वादिति।

'परावतः' ("प्रेरितवतः") प्रकर्षेण ईरितवतः, प्रेरिततरात्; "परागताद्वा" दूरतराद् 'विवस्वतः' आदित्यात्, विवासनक्रियया तमसां तद्वतस्तं पर्यगच्छन् अन्तरिक्षे लोके गृहीत्वा चोपनस्थुः विश्व इव राजानं मातरिश्वा वायुः। स हि "मातरि अन्तरिक्षे" अप्रतिबध्यमानशक्तिः "श्वसिति" गच्छति। अथ वा "मातरि" "आश्वसिति" गच्छति॥

एव मेतस्मिन् मन्त्रे यत आह्रियते, येन चाह्रियते, यस्माह्रियते, सर्वे ते पृथग् व्यपदिष्टाः। अत्र विवस्वत आह्रियते मातरिश्वना वैश्वानर इति। तस्मादेतयोर्विवस्वन्मातरिश्वनोः सन्निधानव्यपदेशे सति साक्षाद् वैश्वानरशब्देन पार्थिव उक्त इति व्यवतिष्ठते पार्थिवो वैश्वानर इति॥

अथ पुनर्यदङ्गीकृत्य सूर्यादिसम्बन्धि विशेषलिङ्गं हविष्यान्नीयस्य सौर्यवैश्वानरत्व मुक्तम्—"विश्वेभ्यो अग्निं भुवनाय देवा वैश्वानरं केतु मह्नां महिष्ठम्"—इति, नान्यः सूर्यादह्नां कर्त्ता, तस्मात् सूर्योऽत्र वैश्वानर इति*। अत्र ब्रूमः—पार्थिव एवाग्निः सूक्ते प्रथमायां ऋचि प्रकृत्योक्तरास्वृचु एतस्मिन् सूक्ते प्रकृतिभूता स्तूयते, महत आत्मनो माहाभाग्यात्। अपि तर्हि सत्वान्यश्वप्रभृतीनि प्रकृतिभूमभिः स्तूयन्ते†,—किं मङ्ग पुनर्देवताः; तासा मपि च विशेषतोऽग्निः;

---

* प्रदर्शितं पुरस्ताच्चैतत् हविष्यान्नीयं सूक्त मिति याज्ञिकपक्षसमर्थनाय। पु० ६पा० ५ख० ४०५पृ० १०पं०।

† तथा हि उक्तं पुरस्तात्;—"अपि स्तूदेवता देवतावत् स्तूयन्ते"—इत्येवमादि ३०७पृ० ४पं०। वक्ष्यति च नवमारम्भे—"अथ यानि इष्टियायतनानि सन्ति स्तुतिं लभन्ते"—इत्यादि।

यस्य सर्वदेवतात्माभिवादः साक्षाद् "अग्निः सर्वा देवताः (ऐ० ब्रा० २,१,२)", "इन्द्रं मित्रं वरुणमग्निम् (ऋ० सं० २,३,२२,६)" —इति*। तदेतदेतस्मिन्नेव सूक्ते स्फुटतर मुपदिश्यते। यथा पार्थिव एवाय मग्निः तेन तेन देवता विशेषेण देवतात्मना तत्स्थान मापन्न स्तूयत इति तदर्थ मिद माह॥

"अथैन मेताभ्यां† सर्वाणि स्थानान्यभ्यापादं स्तौति" एताभ्यां ये एते वक्ष्यमाणे, सर्वाणि स्थानानि पृथिव्यन्तरिक्षद्युलक्षणानि अभ्यापाद्य अभ्यापाद्य इत्यभ्यापादं स्तौति मन्त्रदृक्—॥ ४ (२६)॥

मूर्द्धा भुवो भवति नक्त मग्निस्ततः सूर्यो जायते प्रातरुद्यन्। माया मू तु यज्ञियाना मेता मपो यत्तू र्णिश्वरति प्रजानन्॥ मूर्द्धा मूर्त्त मस्मिन्धीयते मूर्द्धा यः सर्वेषां भूतानां भवति नक्त मग्निस्ततः सूर्यो जायते प्रातरुद्यन्त्स एव प्रज्ञां त्वेतां मन्यन्ते यज्ञियानान्देवानां यज्ञसम्पादिना मपो यत्कर्म चरति प्रजानन्त्सर्वाणि स्थानान्यनुसञ्चरते‡ त्वरमाणस्तस्यो त्तरा भूयसे निर्वचनाय॥ ५ (२७)॥

"मूर्द्धा भुवो भवति"—इति §। "मूर्द्धा", मूर्त्त मस्मिन्" सर्वं

---

* पु० ७, ४, ४—५ खण्डयोः। १८७ २९२ पृ०।

† इत उत्तरयोः खण्डयोः वक्ष्यमाणाभ्या मिति यावत्।

‡ "स्थानान्यनुसञ्चरति" क, ङ, च।

§ ऋ० सं० ८, ४, ११, १। इयन्तु तस्मिन्नेव हविष्यान्नीये (४०५ पृ०१०पं०) षष्ठी।

सत्त्वजात मुपनिबद्धं "धीयते"; यथा हि शिरसो वियोगे तद्गतोऽवश्यं भावि मरणम्, एव मग्निवियोगेऽप्यवश्यं म्रियन्ते भूतानि इत्यतः* प्रधानम् 'अग्निः', 'मूर्द्धा' 'भुवः' भूलोकस्य भवति। विशेषतस्तु 'नक्तम्' रात्रौ तत्प्रतत्वादालोकस्य, भूतानां चान्नपक्तेस्तत्कृतत्वात्। तत् किं मय मन्योऽग्निरन्यः सूर्य इति? न इत्युच्यते;—"ततः सूर्यो जायते प्रातरुद्यन्" रात्रावग्निरूपेण लोकस्योपकारं कृत्वा 'ततः' अनन्तर मेव प्रभातायां रात्र्या माङ्गिकैरुपकारैरुपकरिष्यन् लोकस्य 'सूर्यो' भूत्वा 'जायते' 'प्रातरुद्यन्' "स एव" अय मग्निः। तस्य इयं 'माया'। क एनां जानाति? मायां "वेतां" 'यज्ञियानां' "देवानाम्, यज्ञसम्पादिनाम्" स तत्त्वविदो मन्यन्ते। तत् किम्? इति। 'अपः' 'यत्' "कर्म" स्वाधिकारप्रयुक्तम्, आत्माधिकारप्रयुक्तम्, आदित्यात्मना अग्न्यात्मना च कर्त्तव्यम् 'प्रजानन्' प्रकर्षेण जानन् "सर्वाणि स्थानानि अनुसञ्चरते", 'तूर्णिः' "त्वरमाणः" कर्मकाल मपरिहापयन्नित्यभिप्रायः॥

"तस्योत्तरा भूयसे निर्वचनाय"। यथा चैतदेवं तथेय मपरा ऋक् भूयस्त्वर मेत मेवार्थं वक्ति। किं पूर्वया नोक्तं यदनया भूयस्त्वं निरुच्यते? इति। स्थानद्वय मभिसम्पन्नः पूर्वया स्तुतः,—मूर्द्धा भुवो भवत्यग्निर्नक्तं ततः सूर्यात्मना प्रातरसावुदेति; अथ पुनरुत्तरया† स्थानत्रय मभिसम्पन्नः स्फुटतरं स्तूयते,—इत्येतद् भूयस्त्वम्॥५(२७)॥

---

* "एव मग्निवियोगेऽप्यवश्यभावी विनाश इत्यतः" ख०।

† उत्तरयेत्यस्य दृष्टैवेत उत्तरं प्रदर्श्यमानयेत्यर्थः; स्तुते लिंग "मूर्द्धा भुवो"—इत्यत्रो नाव्यहितपरा, अपि तु चतुरिवेति शेषम्; वस्तुतस्त्वाग्नेरिताया मप्युत्तरत्व-व्यवहारो न दोषावहः।

स्तोमेन हि दिवि देवासो अग्निमजीजनन्छक्तिभी रोदसिप्रां। त मू अक्रण्वन्त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः॥ स्तोमेन हि यं* दिवि देवा† अग्निमजनयन्छक्तिभिः कर्मभिर्द्यावापृथिव्योः‡ पूरणं§ त मकृण्वन्त्रेधाभावाय पृथिव्या मन्तरिक्षे दिवीति शाकपूणिर्यदस्य दिवि तृतीयं तदसावादित्य इति हि ब्राह्मणं॥ तदभीक्ष्य स्तौत्यथैन मेतयादित्यीक्ष्य स्तौति॥ ६(२८)॥

"स्तोमेन हि"—इति¶। 'स्तोमेन' स्तुतिभिः, 'शक्तिभिः' "कर्मभिः" अग्निहोत्रादिभिः। 'दिवि' द्युलोके। एतम् 'अग्निम्' आदित्यात्मना। 'रोदस्योः' "द्यावापृथिव्योः" ('प्रां') "पूरणं" ('देवासः') "देवाः" 'अजीजनन्' अजनयन् यजमानाः; ते हि हविषां दातारः श्रद्धया। "एष नोदियाद् यद्येता मग्रा वाजतिं न जुह्वयादिति आज्ञतिभिरेवैनं जनयन्ति"—इति। 'तम् अक्रण्वन्' त मेवाग्निं कृतवन्तः। 'त्रेधा भुवे कम्'। क मित्यनर्थको निपातः। "त्रेधाभावाय", "पृथिव्याम्, अन्तरिक्षे, दिवि" च। 'सः' एव मवस्थितो

---

* "स्तोमेन यं हि" ङ, च।

† "दिवि देवासो" ङ, च।

‡ "मजनयन् कर्मभिर्द्यावापृथिव्योः" क, ख, ग।

§ "०पृथिव्यारापूरणं" ङ, च।

॥ "इति ब्राह्मणम्" क, ख, ग।

¶ ऋ० सं० ८, ४, ११, ५। इयं खलु तस्मिन्नेव हविष्यान्तीये सूक्ते दशमी।

जगद्याचामिद्धये सर्वावस्थः 'ओषधीः पचति' ('विश्वरूपाः') सर्वरूपा इति॥

प्रकृतस्यैव शाकपूणेः पुनर्ग्रहणं स्वपक्षानुस्मृतये*। सङ्करो ह्यस्मिन् सूक्ते आत्मविन्नैरुक्तयाज्ञिकाना मिति।

ब्राह्मण मपि चैत मेवार्थं ब्रवीत्यथ मेवाग्निरादित्यो भवतीति,—"यदस्य दिवि हतीयं तदसावादित्य इति ब्राह्मणम्"†। 'अथ'—इति व्यवदेशात् पार्थिवस्याग्नेः प्राधान्यं दर्शयति। उभाभ्यां पक्षाभ्यां व्यावृत्य स्वपक्षसाधन मुक्ता देवतासतत्व मालम्ब्य निरूच्यते। एक मेवेदं ज्योतिः, ज्योतिष्ट्वाविशेषात्। तत्पुनरेतज्जगद्याचासिद्धये त्रिधा विभक्तं पृथिव्या मन्तरिक्षे दिवि च विभक्ताभिधानं सम्पद्यते; अग्निर्विद्युदादित्य इति।

तत्रैवं सति ज्योतिषो दिवि हतीय मादित्याख्य मस्मिन् सूक्ते पूर्वासृक्षु "हविष्यान्तम्"—इत्येवमाद्यासु‡ अग्नीकृत्य मन्त्रदृक् स्तौति; "अथैन मेतया पुनरादित्यीकृत्य स्तौति"—॥ ६ (२८)॥

यद्देवेन मदधुर्यज्ञियासो दिवि देवाः सूर्यं मादितेयम्। यदा चरिष्णू मिथुना बभूता मादित्याप-

---

* "अथ मेवाग्निर्वैश्वानर इति शाकपूणिः (ऐपा० ऐख०)"—इत्यतः प्रकृतः। वस्तुतोऽत्र "त्रेधाभावाय"—इत्यस्यैव व्याख्यानांशे शाकपूणिमतोपादान मभीष्टं न तु सर्वत्रेति शाकपूणेरुल्लेखः।

† "अग्निर्वैश्वानरः प्राच्यावयत् * * * अथ यत् हतीय मदीद्देदिव त आदित्या अभवन्"—इति ऐ० ब्रा० ३, ३, १०।

‡ "सोमेन हि"—इत्यन्तासु दशसु च इति शेषः।

प्रयन्भुवनानि विश्वा॥ यदैन* मदधुर्यज्ञियाः सर्वे दिवि देवाः सूर्यं (मादित्येय†) मदितेः पुत्रं यदा चरिष्णू मिथुनौ प्रादुरभूतां सर्वदा सहचारिणावुषा-श्चादित्यश्च मिथुनौ कस्मान्मिनोतिः अयतिकर्मा‡ थु इति नामकरणस्थकारो वा नयतिः परो§ वनिवा समाश्रितावन्योन्यं नयतो वनुतो वा मनुष्यमिथुना-वप्येतस्मादेव मेथन्तावन्योन्यं वनुत इति वायैन मेत-यामीक्षत्य स्तौति॥ ७ (२९)॥

"यदैन मदधुर्यज्ञियासः"—इति॥। "यदैनम्" 'सूर्यम्' 'आदित्येयम्' "अदितेः पुत्रम्" 'दिवि अदधुः' द्युलोके स्थापितवन्तः, 'देवाः' 'यज्ञियासः' यज्ञसम्पादिनः; यजमानाः याज्ञेन कर्मणा सर्वस्याप्यापूर्वकृतत्वाज्जगद्विरचनाप्रपञ्चस्य। रश्मयो वा देवाः सौर्या यदैन मुन्नीतवन्तः। 'यदा' चैतौ 'चरिष्णू' "सर्वदा सहचरणशीलौ" "मिथुनौ" "प्रादुः" 'अभूताम्' "उषाश्चादित्यश्च"। 'आत्' अथ तदा 'प्रापश्यत्' प्रकर्षेणापश्यत् 'भुवनानि' भूतानि, 'विश्वा' विश्वानि सर्वाणि॥

"मिथुनौ कस्मात्?" "मिनोतिः" तावदत्र "अयतिकर्मा"

---

* "यदेन" क, क-नामदत्तौ च।

† न दृश्यत एतत् क-ख-ग-पुस्तकेषु।

‡ "०मिनोति अयतिकर्मा" क, ख, ग।

§ "नयतिपरो" क, ख।

॥ ऋ० सं० ८, ४, १२, १। एषा ऋविष्यान्नीये सप्तिसूत्रे एव सूक्ते एकादशी।

मिथुनशब्दे पूर्वपदं 'मि'—इति। "थु"—इति नामकरणः" प्रत्ययः; "थकारो वा" नामकरणो विकल्पेन। "नयतिः परः" उत्तरपदे; "वनिर्वा" विकल्पेन। यदा तावत् 'थु'—इति नामकरणो नयतिश्च परः, तदा धातोः पूर्वत्वात् प्रत्ययस्य च परत्वात् 'मि-न-थुः'—इति प्राप्ते रूढेर्बलीयस्त्वात् मध्यान्तविपर्ययेण मिथुनाविति युक्तम्। अथ पुनर्यदा थकारो नामकरणः, तदा वनिरुत्तरः, तदा वकारस्य सम्प्रसारणम्, सम्प्रसारणपरपूर्वत्वं मध्यान्तविपर्ययः। थकारे च यः स्वरः, तस्य लोपः, थकारस्य उकार मुपसङ्क्रमेत। एवं मिथुनाविति मिथ्यति। अथ कोऽर्थः? "समाश्रितौ" "अन्योऽन्यं" प्रति आत्मानं "नयतः", कालं वा समाश्रितौ भवतः परस्परं सम्भक्तौ। "मनुष्य-मिथुनौ अपि एतस्मात् एव"। अथ वा मेथतेर्मनुष्यमिथुनौ स्याताम्; तौ हि कर्माथं "मेथन्तौ" इव परस्परेण कालं नयतः॥

"अथ" पुनः "एतम्" आदित्यम् "एतया" उत्तरर्चा* एतस्मिन्नेव सूक्ते होतृत्वेन "स्तौति"; होतृत्वं ह्यग्नेः कर्मा न सूर्यस्य। तस्मादिद मग्निवैश्वानरीयं सूक्तम्॥ ७ (२८)॥

यच्चा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद। आ शेकुरित्सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत्॥ यच्च विवदेते दैव्यौ होतारावयश्चाग्नि-रसौ च मध्यमः कतरो नौ यज्ञे भूयो वेदेत्याशंकुवन्ति

---

* हविष्यान्तीयसप्तदश्या; इह त्वनन्तरपठितयेति।

† तदुक्तं पुरस्तात् "वचनञ्च हविषाम्" इत्यादि २४४८० ६ पं०।

**तत्सहमदनं समानख्याना ऋत्विजस्तेषां यज्ञं स मश्नुवानानां को न इदं विवक्ष्यतीति तस्योत्तरा भूयसे निर्वचनाय ॥ ८(३०) ॥**

"यत्रा वदेते"—इति*। 'यत्र' यस्मिन् कर्मणि 'वि वदेते' वेरुपसर्गस्यापकृष्य यत्र क्रियापदेन सामर्थ्यं तत्रानयनम्। कौ पुनस्तौ विवदेते? 'अवरः परश्च' "द्यौ होतारौ"—"अयं च अग्निः" पार्थिवः "असौ च मध्यमः" वायुः। कयं विवदेते? 'यज्ञन्योः' यज्ञनेत्र्योः। उभावप्यावां यज्ञस्य नेतारौ, तत् कतरः ('नौ') आवयोः "यज्ञे" "भूयः" बत्रु 'वेद' इति। तत्र य एते 'सखायः' "समानख्याना ऋत्विजः" यज्ञे विनियुक्ताः 'नक्षन्त' स मश्नुवते 'यज्ञम्', त एवं 'सधमादम्' सहमादम् "सहमदनम्" सहर्षम् उपश्रुत्य अनयोः 'आशेकुः' "आशक्नुवन्ति"। अथाशक्नुवन्तश्च किं ब्रूयुः? 'क इदं विवोचत्' "को न इदं विवक्ष्यतीति" कतर एतयोर्यज्ञे वेद? इति; उभावप्येतौ यज्ञे भूयोविदावित्यभिप्रायः॥

यथाग्निप्रधानमेतत् सूक्तं† होत्रकर्मणोऽग्निसम्बद्धत्वात् विशेषलिङ्गेन न सूर्यप्रधानम्, तथा इयमपरा ऋक्‡ "भूयसे निर्वचनाय" बत्रुतराय निरुच्यवचनाय। पूर्वस्याः को विशेषः? अस्यां

---

* ऋ० सं० ८, ४, १२, २। हविष्यान्नीये त्रिर्यं सप्तदशी।

† हविष्यान्नीयम् (ऋ० सं० १०, ७, ४)।

‡ इत उत्तर एव वक्ष्यमाणाः हविष्यान्नीये तूनविंशी (अन्त्या)।

हि विभज्य वायोः केवलोऽग्निरेव स्तूयते; पूर्वस्या सुभावपि भूयोविद्याविवृत्युक्तम् ॥ ८ (३०) ॥

यावन्माच मुषसो न प्रतीकं सुपर्ण्योऽ वसते मातरिश्वः। तावद्दधात्युप यज्ञ मायन् ब्राह्मणो होतुरवरो निषीदन् ॥ यावन्माच मुषसः प्रत्यक्तं भवति प्रतिदर्शनमिति वास्त्युपमानस्य सम्प्रत्यर्थे प्रयोग इहैव* निधेहीति यथा सुपर्ण्यः सुपतना एता राचयो वसते मातरिश्वञ्ज्योतिर्वर्णस्य तावदुपदधाति यज्ञ मागच्छन् ब्राह्मणो होतास्याग्नेर्होतुरवरो निषीदन्होतृजपस्व मग्निवैश्वानरीयो भवति देव सवितरेतन्त्वा दृणतेऽग्निं होचाय सह पित्रा वैश्वानरेणेतीम मेवाग्निं सवितार माह सर्वस्य प्रसवितारं मध्यमं वोत्तमं वा पितरं यस्तु स्तुतं भजते यस्मै हविर्निरुप्यतेऽय मेव सोऽग्निर्वैश्वानरो निपात मेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेतेभजेते ॥ ९ (३१) ॥

॥ इति सप्तमाध्यायस्य सप्तमः पादः ७. ७. ॥

"यावन्माच मुषसो न प्रतीकम्"—इति†। अच 'न'कारः

* "दृहैव" क, ख, ग।

† ऋ० सं० ८, ४, १२, २। हविष्यान्नोये स्तुत्या (१९)।

सम्प्रत्यर्थ एव, उपमानासम्भवात्*। लोकेऽपि च "अस्ति उपमानस्य सम्प्रत्यर्थे प्रयोगः"—"इहेव निधेहीति यथा" इह सम्प्रति निधेहीत्यर्थः। मातरिश्वना कश्चित् पृष्टः दैव्यस्य होतुः अग्नेः यद् विज्ञानं तत् किं मर्त्यं ब्राह्मणो मनुष्यहोता यज्ञ मुपायन् बिभर्त्ति? इति। स तं प्रत्याह— हे 'मातरिश्वन्!' 'यावन्मात्रम्' 'उषसः' ('प्रतीकं') "प्रत्यक्तम्" प्रत्यञ्चितं प्रतिगतं प्रकाशस्य, "एताः" 'सुपर्णीः' "सुपतनाः" "राचयः" आत्मनि अनुप्रविष्टं ('वसते') छादयन्ति†, अभिभूय तमसो वर्त्तन्ते स्वय मेव। अथवा वसतिर्दर्शनार्थः‡। यावन्मात्र मुषसो रात्रिषु दृश्यन्ते, 'तावत्' इत्येव मपि स्वल्प मेव। एतावन्मात्र मयं स्वल्पविज्ञान उपायन् 'यज्ञं' 'ब्राह्मणः' होतृत्वे वृतो होतृषदने 'निषीदन्' 'दधाति' धारयति। दैव्यस्याग्नेः परस्य भूयोविदः, अवरः अन्योऽल्पविदिति अनुकरोत्यल्प मिति; मानुषो हि अग्न्यनुग्रहादेव अय मल्पविज्ञानोऽपि होता होत्रं करोति इति पार्थिवोऽग्निर्विशेषतोऽभिधूयते॥

तदेतदेवं ज्ञात्वा सूक्त मग्निप्रधानकर्मत्वात् वैश्वानरीयम्। येऽत्र वैश्वानरशब्दाः, ते पार्थिवाग्निं भजन्ते विशेषणत्वेन॥

"होतृजपस्त्वनग्निर्वैश्वानरीयो भवति"। एव मपि तु सति अयम् अनग्निः वैश्वानरः होतृजपः§। "देव सवित रेतं त्वा वृणतेऽग्निं होत्राय स ह पित्रा वैश्वानरेण—इति"। एव मेतं जपं

---

* १मा० ४४१० १अ० २पा० १ख० द्रष्टव्यम्।

† "वस आच्छादने"—इति अ० पं० १६।

‡ इह मानं मृग्यम्।

§ "हौतृजपं जपति"—इति ऐ० ब्रा० २, ५, ५।

वर्णयन्ति*। "दृमम् एव अग्निं सवितारम् आह" पार्थिवम्, "सर्वस्य प्रसवितारम्" यज्ञद्वारेण "मध्यमं वा उत्तमं वा" "पितरम्" अस्य वैश्वानर माह। स ह तेन वैश्वानरेण पित्रा। एवं द्वौ पितापुत्रावितिव्यपदेशात् पार्थिवादन्यो वैश्वानरः। स च पुनर्मध्यमो वोत्तमो वेत्येव मेव मय मनग्निर्वैश्वानरत्वेऽपि सति होत्रजपः॥

अत्रापि "यस्तु सूक्तं भजते, यस्मै हविर्निरूप्यतेऽथ मेव सोऽग्निर्वैश्वानरः"। किं कारणम्? अनग्निर्वैश्वानरत्वेऽपि सति होत्रजपस्याथ मेव पार्थिवोऽग्निर्वैश्वानर इत्यवध्रियते याज्ञिकपक्षे। आचार्यपक्षे च अथ मेवैको मन्त्रो व्यपदेशहेतुरग्निर्वैश्वानरत्वं ब्रवीति। सम्प्रति मन्त्रेणाग्नेर्व्यपदेशवता अग्निर्वैश्वानरत्ववाचिना "आ दूतो अग्नि मभरद् विवस्वतो वैश्वानरं मातरिश्वा परावतः†—इत्यनेन शाकपूणिपक्षेण स्वेनाव्यभिचारिणा समीभवति। तद्धितव्यपदेशाद्यस्तु पार्थिवस्य वैश्वानरत्वसाधका विशेषहेतवः षडव्यभिचारिणोऽतिरिच्यन्ते‡॥

एतस्माद् विशेषहेतुबाहुल्यात् अथ मेव पार्थिवोऽग्निर्वैश्वानरः सूक्तभाक् हविर्भाक् च॥

"निपात मेवैते उत्तरे ज्योतिषी" वैश्वानर इति "एतेन नामधेयेन भजेतेभजेते" इति। द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः॥

तदेव मेतस्मिन्§ 'वैश्वानर'-पदविचारप्रसङ्गे हविष्यान्नीयं सूक्तं

---

* "अग्निर्वै देवानां होता, तस्यैतदोहपदनं यदुत्तरवेदौ नाभिः"—इत्यादि ऐ० ब्रा० १, ५, २।

† "आ दूतो मभरद्मह्यं अग्निम् विभ्रद् राजानं मुषसं सुकेतुमग्निम्। आ दूतो——परावतः॥"—इति ऋ० सं० ४, ५, १०, ४।

‡ पुरस्तात् ४१३ पृ० ४१५ पं० द्र०।

§ "नावदेव मेतस्मिन्" ख०।

मुपचिप्य सूर्यो वैश्वानरः, अग्निर्वैश्वानरः इति एक मेवेदं ज्योतिः त्रिधा वर्त्तते इति मन्त्रस्य भावोपप्रदर्शनार्थ मुपवर्णितम्* ॥

ईदृशेषु शब्दार्थन्यायसङ्कटेषु मन्त्रार्थघटनेषु दुरवबोधेषु मतिमतां मतयो न प्रतिहन्यन्ते; वयन्त्वेतावद्यावबुध्यामह इति ॥ ९ (३१) ॥

॥ इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य) सप्तमः पादः ॥ ७, ७ ॥

इति ऋग्वर्थायां निरुक्तवृत्तौ

जम्बूमार्गाश्रमवासिनः आचार्यभगवद्दुर्गस्य कृतौ

द्वादशः† (सप्तमः) अध्यायः समाप्तः ॥ ७ ॥

---

* "अग्निर्वा एष वैश्वानरः" ऐ० ब्रा० ८, ५, १। "तदेतदृचाभ्युक्तम्,—विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम्। सहस्ररश्मिः शतधा वर्त्तमानः प्राणः प्रजानामुदयत्येष सूर्यः"—इति प्रश्नोपनिषदि १, ८। "अथ यद्यग्नि वैश्वानरं योऽयं मन्तः पुरुषे"—इत्यादि बृ० आ० उ० ५, ९। इत्यादयश्च श्रुतयो विचारणीयाः।

† १भा० १४९४० "॥" द्रष्टव्यम्।

(१ २ ३ ४ ५ ६
अथातइन्द्रोद्दिवःपरोक्षकृतास्तद्येनतिस्रएवदेवता-
७ ८ ९ १० ११
याकारचिन्तनमपुरुषविधास्तिस्रएवपूषात्वेतोऽथैतान्य-
१२ १३ १४ १५ १६ १७
थैतानिमन्त्राजगत्यथातोऽग्निमीडेऽग्निःपूर्वेभिरभिप्रव--
१८ १९ २० २१ २२ २३
न्तेन्द्रंमिचंजातवेदाःप्रनूनंवैश्वानरोवैश्वानरस्यप्रनूम-
२४ २५ २६ २७ २८
हित्वंकृष्णंनियानंहविष्कान्तमपामुपस्थेमूर्ड्डाभुवस्तोमे-
२९ ३१
नयदेदेनंयचावदेतेयावन्माच मेकचिंशत् ॥*)

॥ इति निरुक्ते (उत्तरषट्के) सप्तमोऽध्यायः ॥ ७ ॥

---

* ऋ० १४९ सू० "* *" द्रष्टव्यम्।

## ॥ अथ अष्टमाध्यायः ॥

तच्च,

### ॥ प्रथमः पादः ॥

**द्रविणोदाः कस्माद्धनं द्रविण मुच्यते यदेन मभिद्रवन्ति* बलं वा द्रविणं यदेनेनाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्यैषा भवति ॥ १ ॥**

'द्रविणोदाः'—इति† । एतद्देवतापदं निर्वाच्यम्, तदर्थं मुपोद्घातः—"द्रविणोदाः कस्मात् ?" इति। तच्च पूर्वपद मेव तावत् प्रथमं विगृह्य निराह—"धनं द्रविण मुच्यते" इति‡। तत् कस्मात् ? "यदेन मभिद्रवन्ति"। कर्मकारकम्। यस्मादेतत् आभिमुख्येन तदर्थिनोऽवश्यं§ द्रवन्ति। "बलं वा" द्रविणम्॥। करणकारके। "यदेनेनाभिद्रवन्ति" यस्मादनेन संयुक्ताः सन्तः परानभिद्रवन्ति। "तस्य" धनस्य बलस्य वा "दाता" यो भवति, स "द्रविणोदाः"॥

"तस्य" प्राधान्यस्तुतियुक्ता "एषा" ऋक् "भवति" (यां दृष्ट्वा देवतापदमाम्नाये एष समाम्नातः)—॥ १ ॥

---

* "यदेनदभिद्रवन्ति" ङ, च।

† १भा० ४९१ पृ०। ५च० २ख० (१)।

‡ १भा० १च० १०ख० (२५) २२२; २२८ पृ०।

§ "यस्मादेनदर्थिनोऽवश्यं" ख०।

॥ १भा० १च० ९ख० (२९) २ ५, २२१ पृ०।

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे। यज्ञेषु देव मीळते॥ द्रविणोदा यस्त्वं* द्रविणस इति द्रविणसादिन इति वा द्रविणसानिन इति वा द्रविणसस्तस्मात्पिबत्विति वा। यज्ञेषु देव मीलते। याचन्ति स्तुवन्ति वर्धयन्ति पूजयन्तीति वा तत्को द्रविणोदा इन्द्र इति क्रौष्टुकिः स बलधनयोर्हातृतमस्तस्य च सर्वा बलकृतिरोजसो जात मुत मन्य एन मिति चाहाथाप्यग्निं द्राविणोदस माहैष पुनरेतस्माज्जायते। यो अश्मनोरन्तरग्निञ्जजानेत्यपि निगमो भवत्यथाप्यृतुयाजेषु द्राविणोदसाः प्रवादा भवन्ति तेषां पुनः पाचस्येन्द्रपान मिति भवत्यथाप्येनं सोमपानेन स्तौत्यथाप्याह द्रविणोदाः पिबतु द्राविणोदस इति॥ २†॥

"द्रविणोदा द्रविणसः"—इति‡। मेधातिथेरार्षम्। 'द्रविणोदाः'—इत्येतस्य प्रथमैकवचनान्तस्य कर्तृत्वेन श्रुतस्य क्रियापदेन बहुवचनान्तेन 'ईळते'—इत्यनेन वचनभेदादसामर्थ्यमपेक्ष्य स्तोतृत्वे चासम्भवं द्रविणोदसो देवतात्वात् स्तुत्यत्वेन सामर्थ्यं मन्वीथ द्रविणोदसो यदुक्तमध्याहृत्य द्रविणोदसि अर्थपतावभिसम्बन्धात् स्तुतेरेक-

---

* "यस्त्वं" क, ख, ग।

† नाच द्वितीयखण्डसमाप्तिः ङ-च-पुस्तकयोः।

‡ ऋ० सं० ६, ७, ४, १।

वाक्यतायां सामर्थ्यं सुन्निनीषन् स्तुत्ये द्रविणोदसि द्रविणोदः-शब्दं कर्मत्वेन नमयाञ्चकार—"द्रविणोदा यः" देवः, "तं द्रविणोदसम्" इति॥

इदानीं 'द्रविणसः'—इत्यस्य 'ग्रावहस्तासः'—इत्यनेन ऋत्विग्विषयेणासन्दिग्धेन प्रथमाबहुवचनेन स्तुतिकर्तृत्वेन विशेषणविशेष्यभावेन सामानाधिकरण्ये सामर्थ्यं सुन्नीय तयार्थापत्तिसामर्थ्यादेकवाक्यतयाभिसम्बध्नाति।

यं द्रविणोदसं 'देवम्' 'अध्वरे' यज्ञे, अग्निष्टोमादौ 'यज्ञेषु' यजतिषु हविःसम्प्रदानेषु सवनेषु वा यागस्थानेषु 'द्रविणसः' ऋत्विजः; ते हि द्रविणं लप्स्यामह इति मोदन्ति कर्मणि, अथ वा "द्रविणसानिनः" धनस्य गवादेर्हविषो वा देवतार्थस्य संभक्तारः, 'ग्रावहस्तासः'—इत्यभिषवनाभिप्रायम्। य मेते द्रविणसो ग्रावहस्तास ऋत्विजः अध्वरेषु यज्ञेषु द्रविणोदसं देवम् 'ईडते' "याचन्ति स्तुवन्ति वर्धयन्ति पूजयन्तीति वा", स द्रविणोदा देवोऽस्मभ्यं* द्रविणानि ददातिति। एतदाशास्महे। आशिष मध्याहृत्य समाप्यते, य मीडते स इति, यत्तदोः परस्परापेक्षित्वात्। अथवैव मन्यथा निराकाङ्क्षतया परिसमाप्यते—"द्रविणसः तस्माद् पिबतिति"। द्रविणोदा इत्यतः प्रथमैकवचनादविपरिणतादेव द्रविणस इत्यस्य पञ्चम्येकवचनत्वेन सोमाभिधानत्वे सामर्थ्यं सुन्नीय पिबतित्याख्यात मध्याहृत्याचैव समापयाञ्चकार भाष्यकारः। एव मप्यस्ति सामर्थ्यं मित्यु-

---

* "देवोऽस्माकं" ख।

पप्रदर्शनार्थम्। तत् कथम्? इति। यं देवं द्रविणोदस मध्वरेषु यज्ञेषु ग्रावहस्ता ऋत्विज ईडते, स देवः द्रविणोदाः, द्रविणसो-ऽस्मात् सोमात् द्रविणसं भक्षयित्रादाय स्व मंशं पिबत्वित्येतदाशास्महे॥

"तत्को द्रविणोदाः?"—इत्येवमादिविचारः। तच्च तावत् "इन्द्र इति क्रौष्टुकिः" एव माचार्यो मन्यते। केन हेतुना? "सः बल-धनयोर्दातृतमः" अतिशयेन दाता इति। "तस्य च सर्वा बलकृतिः" अभिधानविग्रहे हि बलं द्रविण मित्युक्तम्, बलकृतिश्चेन्द्रस्य सर्वा *, तस्मादिन्द्रः। "ओजसो जात मुत मन्य एनम्—इति चाह" मन्त्रदृक्। अधिपतित्वकृत एवास्य बलेनाभिसम्बन्धः। तस्माद्युक्तं यत्तस्य दाता स्यात्। कथम? इति। यतो मन्त्र एव निर्वर्णयते।—

"अश्वादियाय"—इति †। 'यद् वदन्ति' यदा वदन्ति ('अश्वात्') अश्वनवतो मेघात् अयम् 'इन्द्रः' ('इयाय') आगच्छति 'इति'। तच्च सन्निधान मस्य प्रतीत्य तत्तावदहं न तथा 'मन्ये'। कथन्तर्हि? 'ओजसः जातम्' बलराशेः कुतश्चिदतिमहतो जातम्। अहम् 'एनम्' मन्ये यथाय मतिबलवान् लक्ष्यते। अपि वा 'मन्योः' क्रोधात् दीप्तेर्वा अयम् 'इयाय', ततो 'हर्म्येषु'. उदकाहरणाधिकारयुक्तेषु मेघबधकर्मसु 'तस्थौ' तिष्ठति। अथ वा किं जानीमः, कुतो-ऽप्यय मैश्वर्याज्जातः? इत्यतो ब्रुमः—'यतः' अयम् 'इन्द्रः' 'प्रजज्ञे'

---

* "या च का च बलकृतिरिन्द्रकर्मैव तत्"—इत्युक्तेः। पु० ६५२ पृ० ८पं०।

† "अश्वादियायेति यदुत्योजसो जात मुत मन्य एनम्। मन्योरियाय हर्म्येषु तस्थौ यतः प्रजज्ञ इन्द्रो वयुं वेद॥"—इति ऋ० सं० ८, ३, ४, ५।

इति। 'इन्द्रः' एव 'अस्य' स्वस्य जन्मनः तत्त्वं 'वेद', न कोऽप्यन्यो ज्ञास्यतीत्यभिप्रायः॥

अथाप्यय मपरो हेतुरिन्द्रस्य द्रविणोदस्त्वे—"अग्निं द्राविणो-दस माह" मन्त्रदृक्। स मन्त्रो मृग्यः*। के चित्तु "द्रविणोदाः पिबतु द्राविणोदसः"-इत्येव मन्यन्ते†। यस्मादयं द्राविणोदसो-ऽग्निः, स एव द्रविणोदा इति॥

कस्य च पुनरय मग्निरपत्यम्? इत्यत आह—"एष पुनः" अग्निः, "एतस्मात् जायते" इन्द्रात्। कुत एतत्? ऐन्द्रे हि निगमे श्रूयते—"यो अश्मनोरन्तरग्निं जजान" इति।

"यो हत्वाहि०"—इति‡। हतीयेऽहनि दशगात्रस्य निष्केवल्ये विनियोगः। गत्समदो ब्रवीति। ऐन्द्रं रूप माप्तितोऽसुरैर्हन्यमानः किं मा हथ, नाहं मिन्द्र इति। कस्तर्हि इन्द्रः? 'यः' 'हत्वा' 'अहिम्' मेघम् 'अरिणात्' 'सप्त सिन्धून्' स्यन्दना आकाशनदीः "एला च दृला च"—इत्येवमाद्याः§, 'यः' च 'गाः' अपः 'उदा-

---

* अस्मन्मते तु न क्वचं द्राविणोदसपदघटितमन्त्रोऽन्वेष्यः; अपि तु द्रविणोदा इन्द्र इति चेत् इन्द्राज्जातोऽग्निरिति यच्च श्रूयते एव मेव निगमो दर्शनीयः; दर्शनीयत्वनुपदञ्चाच तथैव "यो अश्मनो अन्तरग्नि जजान"—इति भाष्यकारः स्वय मेव।

† ऋ० सं० १, ८, १, ४। परं तत्र तु द्रविणोदस इति पाठः, "स द्रविणोदसो हवीरूपद्रविणस्य प्रदातुभ्य ऋत्विग्भ्यो हितः"—इति च तत्र सायणव्याख्या। यास्कोऽप्यत्रैवामुं द्विः स्मरिष्यति।

‡ "यो हत्वाहि मरिणात् सप्त सिन्धून् यो गा उदाजदपधा बलस्य। यो अश्मनोरन्तरग्निं जजान संवक् समत्सु स जनासु इन्द्रः॥"—इति ऋ० सं० १, ९, ७, ३।

§ "आद्या व दृला च—इत्येवमाद्याः" ख०। "सप्त गङ्गायमुनाद्या मुख्या नदीः"—इति सा० भा०। तत्र "इमं मे गङ्गे (ऋ० सं० ८, ७, ९, ५)"—इति मन्त्रे आम्नाताः।

जत्' उद्गमयत् 'अपधा' अपधानेन उद्घाटनेन 'बलस्य' मेघस्य गिराणां छिद्राणाम्, 'यः' च 'अग्मनोः' अग्नवत्योः* द्यावापृथिव्योः 'अन्तः' मध्ये 'अग्निं' 'जजान' जनयति, 'यः' च 'समत्सु' सङ्ग्रामेषु शत्रूणां 'संहर्ता' सञ्क्षेत्ता। ('जनासः') हे असुरजनाः! 'सः' 'इन्द्रः'; नाहमिन्द्र इति॥

"अथापि" अथ मपरो हेतुरिन्द्रस्य द्रविणोदस्त्वे। कतमः? इति। "ऋतुयाजेषु द्राविणोदसाः प्रवादाः भवन्ति"। ऋतवो यैर्मन्त्रैरिज्यन्ते, ते भवन्त्यृतुयाजाः, तेषु ऋतुयाजेषु 'द्राविणोदसाः' द्रविणोदः-शब्दयुक्ताः प्रवादा भवन्ति। ततः किम्? तेषा मृतुयाजानां यत् पात्रं येन ते क्रियन्ते तस्येन्द्रपान मिति मन्त्रे समाम्ना भवन्ति। तद्यथा—"अपाद्भोत्रादुत"—इति†। तथा—"होता यक्षद्देवं द्रविणोदस मपाद्भोत्रादपात्पोत्रादपान्नेष्टात्तुरीयं पात्र ममृक्त ममर्त्य मिन्द्रपानं देवो द्रविणोदा द्रविणसः स्वय मायूयात् स्वय मभिगूर्यात् स्वय मभिगूर्त्तया होत्रयर्त्तुभिः सोमस्य पिबत्वच्छावाक यज"—इति। होता यक्षद् देवं द्रविणोदा मित्यच्छावाकस्य सम्प्रैषो मैत्रावरुणो ब्रवीति। अध्वर्युणा ऋतुभिः प्रेष्येऽतिप्रेषितः 'होता' 'यक्षत्' यजतु। कम्? इति। 'देवं' 'द्रविणोदसम्'। स च

---

* "यस्य 'अग्मनोः' अश्नुते व्याप्नोत्यन्तरिक्ष मित्यग्मा मेघः, अत्यन्तमश्नुतेरुपधोर्भावयोः, 'अन्तः' मध्ये वैद्युत मग्निं 'जजान' उत्पादयामास"—इति सा० भा०।

† "अपाद्भोत्रादुत पोत्रादमत्तोत नेष्टात्तुषत् प्रयो हितम्। तुरीयं पात्र ममृक्त मर्त्यं द्रविणोदाः पिबन्तु द्रविणोदसः॥"—इति ऋ० सं० १,८,१, ४। अस्य च व्याख्यानं परस्तात् दर्शयिष्यति (४४९ पृ० ६ पं०)।

पुनर्द्रविणोदा देवः पूर्वम् 'अपात्' पीतवान् सोमं 'होत्रात्' सम्प्रदानात्। 'अपात्' च 'पोत्रात्' सम्प्रदानात्। 'अपात्' च 'नेष्ट्रात्' सम्प्रदानात्। अथ पुनरिदं 'तुरीयं' चतुर्थं सम्प्रदानम्, 'अमृक्तम्' अगृढम्, अपूर्णं मित्यर्थः* । 'अमर्त्यं' यत् पीत्वा न म्रियते ; अथवा अमनुष्ययोग्यम्, अमृक्तञ्च अनुपमृदित मन्यया देवतया अपरिभुक्तम्, 'इन्द्रपानम्' इन्द्रस्य पातुं योग्यम् । तदेतत् 'द्रविणोदाः' ('देवः') इन्द्रः अस्माभिः, प्रत्त मादरेण 'स्वय मायूयात्' स्वय मामिश्रीयात्, 'स्वय मभिगूर्यात्' स्वय मभ्युद्यच्छेत् । ततः 'स्वयं' 'पिबतु' ('ऋतुभिः') ऋतुना कालेन सह 'सोमस्य' 'अभिगूर्त्तया' अभिमतया 'होत्रया' स्तुत्या प्रदीयमानं स्व मंशम् । हे 'अच्छावाक!' त्व मप्येतदेवं ज्ञात्वा 'यज' ॥

एव मेतस्मिन् इन्द्रस्य द्रविणोदः-प्रवादवति प्रैषे पात्रस्य 'इन्द्रपानम्'—इति समाख्या†, तस्मादिन्द्रस्तेन पिबतीति गम्यते । एवञ्चेत् प्राप्त मिन्द्रो द्रविणोदा इति ॥

"अथाप्ययम्" अपरो हेतुरिन्द्रस्य द्रविणोदस्त्वे, यस्मादेन "सोमपानेन स्तौति" । ऋतुयाजेष्वेव । "होत्रात् सोमं द्रविणोदः पिब ऋतुभिः"—इति‡ । न ह्यन्य इन्द्रात् सोमपानेन स्तूयते, तदर्थवात् सोमसंस्कारस्य ; भवति हि सोमाप्यायने च तत्संस्कारप्रधानो मन्त्रः । तद्यथा—"अंशुरंशुष्टे देव सोमाप्यायता मिन्द्रा-

* "अमृक्तम् अगृढम् देवेभ्यः अदत्तम् पूर्णं मित्यर्थः" ख।

† "इन्द्रपानस्य इन्द्रेण पानस्य"—इति सा० भा० (ऋ० सं० १, ५४, ९ ; ९, ४४, १९ ; ७, ४७, १ ; ९, ९९, २ ; १२ ; १०, २०, ९) ।

‡ "मन्दस्व होत्रा०—०पिब ऋतुभिः ॥"—इति ऋ० सं० २, ७, १९, १ ।

यैकधनविदे[1]"-इति*। तस्माद् यत्र यत्र सोमपानस्तुतिः, तत्र तत्रेन्द्र इति स्थितो न्यायः। प्रसिद्धतरं ह्येतत्। यदर्थमेव हविः संस्क्रियते, तस्मा एव प्रदीयते॥

"अथाप्याह—'द्रविणोदाः पिबतु द्राविणोदसः'—इति" यस्य 'द्रविणोदसः' अग्निः अपत्यम्, स 'द्रविणोदाः' इन्द्रः 'पिबतु' (४४३५०) इति। "अर्धर्चोत्तात्"—इति†। तस्यैवाच्छावाक-प्रैषस्यैषा याज्या। 'अमत्त' हृष्टवान्। 'उत' अपि। अजुषत' अप्रीयत। 'प्रयः' अन्नम्, आत्मने हितं पथ्यम्‡। प्रैषस्तेनैव§ व्याख्यातः॥

समाम्नाः पूर्वपक्षहेतवः क्रोष्टुक्यभिमताः॥ २॥

**अथ मेवाग्निर्द्रविणोदा इति शाकपूणिराग्नेयेष्वेव हि सूक्तेषु द्राविणोदसाः प्रवादा भवन्ति। देवा अग्निं धारयन् द्रविणोदा मित्यपि निगमो भवति यथो एतत्स बलधनयोर्हातृतम इति सर्वासु देवतास्वैश्वर्यं विद्यते यथो एतदोजसो जात मुत मन्य एन मिति चाहेत्यथ मप्यग्निरोजसा बलेन मथ्यमानो जायते तस्मादेन माह सहसस्पुत्रं सहसः सूनुं सहसो यहुं**

---

* य० वा० सं० ५, ७। सोमवल्ल्या अवयवोऽनुरुच्यते। वौषा सर्वसङ्ग्रहार्थौ। हे सोम! 'देव!' 'ते' तव यन्मूरंमूः सर्वोऽप्यवयवः 'इन्द्राय' इन्द्रप्रीत्यर्थम् 'आप्यायताम्' वर्द्धताम्। इति चैतदर्थः।

† पृ० ४४४५० "†" टीप्पन्यां मन्त्रस्वरूपो द्रष्टव्यः।

‡ अमत्तेत्यादि व्याख्यानन्तु ख-पुस्तके 'नेष्टात् सम्प्रदानात्'—इत्यतः परं दृश्यते पुरस्तादेव (४४५५० ६पं०)।

§ चोनायत्तदितिमन्त्रव्याख्यानेनैवेत्यर्थः (४४४ पृ० ११पं०)।

यथो एतद्ग्निं द्राविणोदस माहेत्यृत्विजोऽच द्रविणोदस उच्यन्ते हविषो दातारस्ते चैनं जनयन्ति। ऋषीणां पुचो अधिराज एष इत्यपि निगमो भवति यथो एतत् तेषां पुनः पाचस्येन्द्रपान मिति भवतीति भक्तिमाचं तद्भवति यथा वायव्यानीति सर्वेषां सोमपाचाणां यथो एतत् सोमपानेनैनं स्तौतीत्यस्मिन्नप्येतदुपपद्यते। सोमं पिब मन्दसानो गणश्रिभिरित्यपि निगमो भवति यथो एतद्* द्रविणोदाः पिबतु द्राविणोदस इत्यस्यैवं तद्भवति॥ ३ (२)॥

किमस्तु एतैर्हेतुभिरिन्द्रो द्रविणोदा इति? नेत्युच्यते—"अय मेवाग्निर्द्रविणोदाः" इति। "ग्राकपूणिः" मन्यते। 'अय मेव' यस्य पृथिवीस्थाने समाम्नानम्†। अपि च यदि मध्यमोऽभविष्यत्, ततो यान्येतानि माध्यमिकानि ऐन्द्राणि वा पार्जन्यानि वा बार्हस्पत्यानि वा, तेषु द्राविणोदसाः प्रवादा अभविष्यन्, मध्यमस्य कर्मणा चैनं रसानुप्रदानादिना अस्तोष्यन्; न चतदुभय मस्ति। किं तर्हि? आग्नेयेष्वेव हि सूक्तेषु द्राविणोदसाः प्रवादाः भवन्ति"। 'हि'-ग्रब्दो हेत्वर्थः; यस्मादाग्नेयेष्वेव सूक्तेषु द्राविणोदसाः प्रवादाः विशेषणत्वेनाग्नेरेव भवन्ति, अग्निकर्मणा चैनं सूक्तेषु स्तौति नेन्द्रकर्मणा तस्मादय मेवाग्निर्द्रविणोदाः॥

---

* "गणश्रिभिरिति यथो एतद्"—इति क, ख, ग।

† १भा० ४५९ पृ० ५ऋ० १,(१)।

कथ मित्यत उपप्रदर्शयति—"देवा अग्निं धारयन् द्रविणोदाम्" —"इत्यपि निगमो भवति"। अप्यय मप्यन्ये बहव इत्यपि शब्दः। "स प्रत्नथा"—इति*। कुत्सस्येय मार्षम्। पितृयज्ञे स्विष्टकृत्पुरोऽनुवाक्या। यः अग्निः अपां 'मित्रं' तदुत्पत्तियोगात्। 'धिषणा' धिषणाः, याश्च वाचः 'साधन्' साधयिता तदधिदेवता योगात्। यच्च 'देवाः' 'अग्निं' 'धारयन्' धृतवन्तः पूर्वे, 'द्रविणोदां' द्रविणानां हविषां देवेभ्यो दातारं बोढारम्। 'सः' अग्निः 'प्रत्नथा'। 'था'-इत्युपमाने†। पुराण इव। 'सहसा' बलेन जायमानः, 'सद्यः' जातमात्रः सन् 'काव्यानि' पितृदेवतानि हवींषि 'बडधत्त'। 'वट्' —इति सत्यनाम‡। यथा अवितथेन न्यायेन धारयितव्यानि, दापयितव्यानि§ वा पितृभ्यः। तथैव सद्यो जातोऽपि धारयति वा ददाति वा 'विश्वा' विश्वानि सर्वाणि। एव मेतस्मिन्नधिकारे यं धृतवन्तो देवाः, सोऽस्माक मिदं नाम करोत्विति आग्निषैकवाक्यता। एव मय मेवाग्निः द्रविणोदा इति स्थितः पक्षः॥

स पुनरयं परपक्षहेतुध्वनिराकृतेषु अनवस्थित एव; अतस्तन्निराकरणाय "यथो एतत्"—इत्येवमाद्युच्यते। यत् पुनरेतदुक्तम्—

---

* "स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा। आपश्च मित्रं धिषणा च साधन् देवा अग्निं धारयन् द्रविणोदाम्॥"—इति ऋ० सं १, ७, ३, १।

† "प्रत्नपूर्वविश्वेमात्थाल् छन्दसि"—इति पा० ५, ३, १११ सू०। "तथेत्युपमाः" —इति निघ० ३, १३, (१९) १भा० ३२० पृ०। "था इति च"—इत्यादि च परस्तात् १भा० ३११ पृ० ७ पं०।

‡ १भा० ३१९ पृ० २ ऋ० ११ ख० (१)।

§ "दातव्यानि" ख।

"स बलधनयोर्दाढ्यतमः" इति*। अकारण मेतत् इन्द्रस्य द्रविणोदस्त्वे। कस्मात्? यस्मात् "सर्वासु देवतास्वैश्वर्यं विद्यते"; अत ऐश्वर्यात् सर्वा एव बलधनयोर्दाढ्यो भवन्ति। तस्माद्वैशेषिक मेतदिन्द्रस्य कारणं द्रविणोदस्त्वे॥

"यथो एतत्" यदप्युक्तम्, बलमिति मधिकृत्य,—"ओजसो जात सुत मन्य एनम्"—इति†। तदप्यवैशेषिक मिन्द्रस्य। कस्मात्? यस्माद् "अय मप्यग्निरोजसा बलेन मथ्यमानो जायते, तस्मादेनम् (अग्निम्) आह" मन्त्रदृक्। किमाह? "सहसस्पुत्रम्", "सहसः सूनुम्", "सहसो यज्ञम्"। द्रुन्नः सर्पिरासुतिरित्येवमादयः शेषाः॥

"द्रुन्नः सर्पिरासुतिः"—इति‡। ग्रत्समदस्यार्षम्। गायत्री। आग्नेयी। अग्नौ विनियोगः समिदाधाने। द्रु-अन्नः 'द्रुन्नः' द्रुमान्नः, 'सर्पिरासुतिः' च सर्पिरासवो यस्य, सर्पिर्वोदक मासूते य आहुति-द्वारेण। 'प्रत्नः' च पुराणः, 'होता' 'वरेण्यः' वरणीयः 'सहसः' बलस्य यः 'पुत्रः' यः 'अद्भुतः' महान् विचित्रो वा। स इदं नाम अस्माकं करोत्वित्याशीर्गत माख्यात मध्याहृत्य समाप्यते॥

"त्वं हि यद्यविष्ठ्य"—इति§। विरूपस्यार्षम्। आग्नेयी।

---

* पुरस्तात् ४४०पृ० ६पं०।

† पुरस्तात् ४४०पृ० ७पं०।

‡ "द्रुन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः। सहसस्पुत्रो अद्भुतः॥"—इति ऋ० सं० १, ५, १८, ६।

§ "त्वं हि यद् यविष्ठ्यः सहसः सूनवाहुत। ऋतावा यज्ञियो भुवः॥"—इति ऋ० सं० १, ५, १४, २।

गायत्री। सामिधेनीष्वाग्नेयेऽन्नाद्यकामकर्मणि याज्या। हे 'यविष्ठ्य' युवतम! 'सहसः' बलस्य 'सूनो' पुत्र! 'यत्' यस्मात् 'आऽउत' अभिऽउत, 'सत्यवा' सत्यवान्, उदकवान् वा, 'यज्ञियः' यज्ञसम्पादी 'भुवः' भवसि। तस्मात् त्वां वयमपि जुजुमः, स त्व मस्माकमग्येवं भवेत्येतदाशास्महे॥

"अग्ने वाजस्य गोमतः"—इति *। उष्णिक्। गोतमस्यार्षम्। आग्नेयी। दृष्टकोपधाने अग्नौ विनियोगः। हे भगवन्! 'अग्ने!' 'सहसो यहो' बलस्य पुत्र! 'जातवेदः!' यदेतद् वाजः अन्नम्, गोमत् गोभिः तद्वत्, त्वं तस्य 'ईशानः' ईश्वरः। अतो ब्रूमः—'अस्मे' अस्मासु 'धेहि' स्थापय। अनयापि कुरुष्वैतत् 'महिश्रवः' महदेतत् श्रवो गवादि। इत्येतदाशास्महे॥

"यथो एतत्" यत्पुनरेतदुक्तम्,—"अग्निं द्राविणोदसं माहे" इति†। नेदं मनेनाभिप्रायेण इन्द्रादयं द्रविणोदसो जायते, किन्तर्हि? "ऋत्विजः" "अत्र" एतस्मिन् "द्रविणोदसः" अग्नेः "उच्यन्ते"। ते पुनः कस्मात्? "हविषः दातारः"; देवानां हि हविर्द्रविणम्, तदेते ददत इति द्रविणोदस एते। ततः किम्? "ते च एनं जनयन्ति"। "निगमोऽपि" हि "भवति" ऋत्विजा मय मग्निः पुत्र इति। तद्यथा—"ऋषीणां पुत्रो अधिराज एषः"

---

* "अग्ने वाजस्य गोमतः ईशानः सहसो यहो। अस्मे धेहि जातवेदो महि श्रवः॥"—इति ऋ० सं० १, ५, १७, ४।

† पुरस्तात् ४४०१० ७पं०

—इति। "अग्नावग्निश्चरति प्रविष्टः"—इति *। अनेन निर्मथ्यो ऽग्निरभिहूयते। यः 'एषः' 'अधिराजः' अधिकदीप्तिः, 'अग्नौ' आहवनीये 'अग्निः' निर्मथ्यः 'प्रविष्टः' 'चरति' ज्वलन्, 'ऋषीणाम्' ऋत्विजां 'पुत्रः' तैर्मथितः, 'तस्मै विधेम' तं परिचरामहे वयम्, अनेन आज्येन 'हविषा'। किम्? इति—'मा देवानां यूयुयाम भागधेयम्' इति। प्राप्त मेतदभिहोमाख्यं 'भागधेयं' स्रुवेणाभिजुहोतीति। शास्त्रतोऽस्य अग्न्याख्यस्य देवस्य 'मा यूयुयाम' मा लोलुपामेत्यतो विधेम। अथ वा अस्मै अग्नये हविर्दद्मः। विधति दानकर्मापि भवति॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—"ऋतुयाजेषु द्राविणोदसाः प्रवादा भवन्ति, तेषां पुनः पाचस्येन्द्रपान मिति (समाख्या) भवति"—इति †। एतदप्यकारणम्। कस्माद्? यस्माद् "भक्तिमात्रं भवति तत्" गुणतः संवादः; दुर्बला हि समाख्या, यतः असामर्थ्यात् कुतश्चिद् गुणानुवादः,—"यथा वायव्यानीति" "सर्वेषां सोमपात्राणाम्" नानादेवतानां मपि सताम्॥

"यथो एतत्",—"सोमपानेन" एनं "स्तौतीति" ‡। इद मप्यकारणम्। कस्मात्? यस्मात् "अस्मिन्नप्येतदुपपद्यते" सोमपानम्।

---

* "अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः। तस्मै विधेम हविषा घृतेन मा देवानां यूयुयाम भागधेयम्॥"—इति तै० स०। अस्ति चैष मन्त्रो वाजसनेयकेऽपि पाठभेदेन। य० वा० स० ५, ४।

† पुरस्तात् ४४०पृ० ९पं०।

‡ पुरस्तात् ४४०पृ० ११पं०।

कथम्? इति—"सोमं पिब मन्दसानो गणश्रिभिः" इति। "अग्ने मरुद्भिः शुभयद्भिः"—इति*। हे भगवन्! 'अग्ने! 'वैश्वानर!' त्व मेभिः 'मरुद्भिः' मितरोचिभिः अर्चिभिः, 'शुभयद्भिः' भवन्तम् 'ऋक्वभिः' रसदर्तृभिः, 'गणश्रिभिः' गणश्रो भवन्त माश्रयद्भिः, 'पावकेभिः' पावयितृभिः, 'विश्वम् इन्वेभिः' सर्व मिद मागच्छद्भिः, यद् दग्धुम् 'आयुभिः' अयनशीलैः, 'प्रदिवा' चिरन्तनैः 'केतुना' प्रज्ञया कर्मणा वा 'सजूः' संयुक्तः, 'मन्दसानः' मोदमानः 'सोमं' 'पिब'। इत्येतदाशास्महे। अर्चिषोऽत्र मरुतः, ऋत्विजो वा मरुतः†; अन्यथा ह्यनुदाहरण मेवैष मन्त्रोऽग्नेः सोमपाने स्यात्, इतरैर्मरुद्भिः सम्बन्धात्॥

"यथो एतत्"—'द्रविणोदाः पिबतु द्राविणोदसः'—इति‡, अग्नेव तद् भवति"। यत् पुनरेतदुक्तम्, ऋतुयाजेषु 'द्रविणोदाः पिबतु द्राविणोदसः'—इति, 'अग्न एव' अग्नेः 'तद् भवति'; अग्नेरपि सोमभागित्वात् ऋतुयाजेषु। भवति हि तेषु "वनस्पते०——० द्रविणोदः पिब ऋतुभिः"—इति§। वनस्पति-शब्दसामानाधिकरण्यात् सोमपानार्थे सम्बोधने द्रविणोदसो विशेषणविशेष्यभावसाम-

---

* "अग्ने मरुद्भिः शुभयद्भिरृक्वभिः सोमं पिब मन्दसानो गणश्रिभिः। पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना सजूः॥"—इति ऋ० सं० ४, ३ १५, ८।

† "मरुतः"—इति ऋत्विङ्नामसु षष्ठं पदम् १भा० १५०, २५१ पृ०।

‡ पुरस्तात् ४४०पृ० ११पं०।

§ ऋ० सं० १, ८, १, ३। यच्च खल्वे 'द्रविणोदाः पिबतु द्रविणोदसः"—इति, तच्चैवेयं तत्पूर्वपठिता।

र्थात् नान्यो वनस्पतेर्द्रविणोदाः। वनस्पतिश्च पुनरग्नय एव; "वह देवत्रा दिधिषो हवींषि"—इति* हविर्वहनकर्मसंयोगात्, खिष्टकृद्विकारश्रुतेश्च वनस्पतेः। तस्मादग्निर्द्रविणोदा; नेन्द्रः॥

यत्पुनरेतदुक्तम्—इन्द्रार्थं सोमः संस्क्रियते, तस्मादिन्द्र एवास्य केवलः पाता; नान्य इति†। नैतदेवम्; सोमो ह्यन्यस्मै देवतायै मीयते, अन्यस्मै संस्क्रियते, अन्याभ्यश्च गृह्यते, हूयते च। तद्यथा। "अभि त्यं देवम्"—इति‡ सावित्र्या मीयते, "अंशुरंशुष्टे"—इति§ इन्द्राय संस्क्रियते, पुनरपि च मीयते‖ "इन्द्रायाभिमातिघ्ने"—इत्येवमादिभिः। नानादेवताभ्यो गृह्यते च मित्रावरुणाद्याभ्यः। तथा च हूयते। तदेवं विधिवशाद् विचित्रा सोमतन्त्रगतिः। तत्रैवं सत्यग्नय एव वक्तुं यत्र यत्र सोमः, तत्र तत्रेन्द्रः पाता इति। सम्भक्षे चाग्निरिन्द्रेण सह प्रत्यक्षं मैन्द्राग्ने गृहे "इन्द्राग्नी आगतम्"—इत्यत्र¶। भवति चाग्न्यर्थं मपि पृथक् ग्रहणं यजुषा सोमस्य "अग्नये त्वा रायस्पोषाय त्वा"—इति। तस्मादग्निरपि सोमस्य पाता स्याद्॥ ३(२)॥

**मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वोळ्हयस्वा वनस्पते। आयूया धृष्णो अभिगूर्या त्वं नेष्टात्सोमं**

---

* उपरिष्टादिमं मन्त्रं मन्त्रेवाध्याये प्रदर्शयिष्यत्यय मेवाचार्यः (२पा० ५ख०)।

† पुरस्तात् प्रदर्शितं "न ह्यन्य इन्द्रात्"—इत्यादि, "तस्मा एव प्रदीयते"—इत्यन्तं व्याख्यानं द्रष्टव्यम् (४४५ पृ० १९ पं०)।

‡ य० वा० सं० ४, २५। का० श्रौ० ७, ७, ९. द्रष्टव्यम्।

§ य० वा० सं० ५, ७। का० श्रौ० ८, १, २९. द्रष्टव्यम्।

‖ "पुनरपि चाप्यायते" ख।

¶ ऋ० सं० १, १, ११, १; य० वा० सं० ७, ३१। "ऐन्द्राग्नं गृह्णाति"—इति च का० श्रौ० ९, १२, १०। ऐन्द्राग्नश्च ग्रहविशेषः।

द्रविणोदः पिब ऋतुभिः॥ मेद्यन्तु ते वह्नयो वोढारो* यैर्यास्यरिष्यन् दृढीभवायूय† धृष्णो अभिगूर्य त्वं नेष्ट्रीयाद्विष्ण्याद्विष्ण्यो धिषण्यो धिषणाभवो धिषणा (वाग्‡)धिषेर्दधात्यर्थे धीसादिनीति वा धीसानिनीति वा वनस्पत इत्येन माहैष हि वनानां पाता वा पालयिता वा वनं वनोतेः पिबर्तुभिः§ कालैः॥ ४ (३)॥

॥ इत्यष्टमाध्यायस्य प्रथमः पादः॥ ८. १.

यथा इह ऋतुयागेषु—"मेद्यन्तु ते वह्नयः"—इति॥। यत्समदस्यार्षम्। जगती। ऋतव्या। "ञि मिदा स्नेहने (दि० प० १३७)", तस्य लोटि मेद्यन्तु इति भवति। हे भगवन्! 'वनस्पते!' 'द्रविणोदः' ('मेद्यन्तु') स्निह्यन्तु एते 'ते' तव 'वह्नयः' "वोढारः" अश्वाः 'यैर्यासि' 'यैर्नित्यं गच्छसि। 'अरिष्यन्' अहिंस्यमानः केन चिदपि। स त्वं मैरश्वैरागत्य अस्मद्यज्ञं 'वीलयस्व' दृढमात्मानं कुरुष्व, सोमं मत्समक्षं पातुम्। कथं चैनं पिब? 'आयूय' आभिमुख्येन मिश्रीकृत्याङ्गुल्या; स हि पानपात्राणां स्वभावो यदङ्गुल्या मन्थनम्। हे 'धृष्णो' शत्रूणां धर्षयितः! 'अभिगूर्य' अभ्युद्यम्य ततो ('नेष्ट्रीयात् धिषण्यात्') 'सोमं' नेष्ट्रा वषट्कृतं 'पिब' 'ऋतुभिः' कालैः सहेत्येतद् ब्रूमहे॥

---

* "वोल्हारो" क, ख, ग।

† "दृल्हीभवायूय" क, ख, ग।

‡ नास्येतत् पदम् ङ-च-पुस्तकयोः।

§ "पिपर्त्तुभिः" क, ख, ग।

॥ ऋ० सं० १, ८, १, २। इयमपि ऋतुयाजेष्वेव।

"धिष्णयः धिषण्यः"; "धिषणा वाक्*", तदर्थं ममौ साध्यते; तस्य पश्चादुपविष्टो होता शंसति। धिषणा कस्मात्? "धिषेः" धातोः "दधात्यर्थे" वर्त्तमानस्य; सा हि वाग्, अर्थं धारयति; शब्दार्थयोः सम्बन्धनित्यत्वात्†। अथ वा "धीसादिनीति वा, धीसानिनीति वा"। धीः प्रज्ञा, कर्म वा‡। सा एतस्यां सीदति; सनोति वा, सम्भजते दृयं वा; तयोः सीदति सनोति वा, सन्निमित्तत्वात्। एवं धीशब्दात् पूर्वपदम्, सदेः सनोतेर्वा उत्तर-पदम्, धिषणा-शब्दस्य विकल्पेन॥

"वनस्पते इति एनम् आह" द्रविणोदसम्, तस्मादग्निरित्यभि-प्रायः॥

अथ कथ मग्निर्वनस्पतिः? "एष हि वनानां पाता वा पालयिता वा"। 'हि'-शब्दो हेत्वर्थः। यस्मात् 'एषः' 'वनानां' वृक्षादीनाम् अन्तर्गतोऽपि, समर्थोऽपि दग्धुम्, न तानि दहति, तस्मात् अयं तेषां 'पाता' रक्षिता, 'पालयिता' वेति। केवलं धात्वन्यत्वम्, स एवार्थः§॥

अथ "वनं" कस्मात्? "वनोतेः" सम्भजनार्थस्य‖; तद्धि दार्वादि-प्रयोजनार्थं सेव्यते। 'पिब ऋतुभिः' "कालैः", सह इति वाक्यशेषः॥

---

* १भा० ७४ पृ०१ ऋ० ११ख० (४४)।

† "सिद्धे शब्दार्थसम्बन्धे"—इति पस्पशायां पतञ्जलिः।

‡ १भा० ३२४पृ० २ऋ० ८ख० (७)—१४३पृ० १ऋ० १ख० (२१)।

§ "षा रक्षणे"—इति अदा० प० ४९, "पाल रक्षणे"—इति चु० प० ७९।

‖ "वन, षण सम्भक्तौ"—इति भा० भ्वा० प० ४१२, ४१४।

एव मय मग्निर्द्रविणोदाः सूक्तभाग्घविर्भाक् च। निपात मेवैतत्, —मध्यमं ज्योतिः, उत्तमं च ज्योतिः, एतेन नामधेयेन भजेते इति*॥

एष देवतापदविचारन्यायः सर्वत्र देवतापदविचारार्थो यथा-सम्भव मुपादेयः प्रज्ञाविवृद्धये शिष्यस्येति॥ ४ (३)॥

इति ऋज्वर्थायां निरुक्तवृत्तौ त्रयोदशाध्यायस्य (अष्टमाध्यायस्य) प्रथमः पादः॥ ८,१.

---

॥ द्वितीय पादः॥

**अथात आप्रिय आप्रियः कस्मादाप्नोतेः प्रीणातेर्वाप्रीभिराप्रीणातीति च ब्राह्मणं तासा मिध्मः प्रथमागामी भवतीध्मः समिन्धनात् तस्यैषा भवति॥ १(४)॥**

"अथात आप्रियः"। 'आप्रियः' इध्मादीनि †। आप्रीषु निर्वक्तव्यानि तानि पुनरमूनि प्रैषिके आप्रीसूक्ते। पाठक्रमनियमाद् विवक्षितक्रमाणीति देवतापदसमाम्नायेऽपि गृह्यमाणत्वात् पाठक्रम-प्रयोजनस्य विवक्षितक्रमाण्येव तत्रैतद् भवति। इमान्यग्निजातवेदो-वैश्वानरप्रभृतीनि किं विवक्षितक्रमाणि उत युगपद्भिधानासम्भवात् अर्थत एषां क्रमः? इति॥

---

* द्रविणोदः-शब्देन पार्थिवोऽग्निरेव प्रधानतो बोध्यः सर्वत्र, वैद्युतः सौरश्च प्रकरणादिबलात् बोध्यः इति निष्कर्षार्थः।

† १भा० ४९१ ३० ५अ० १ख० (१)—(१३)।

तच्च विवक्षितक्रमाणीति के चित्। कथम्? इति। इह तावत् स्थानानि भूर्भुवःस्वरिति पाठानुपूर्व्यैव* नियतानीति तत्स्थानिना मण्ड्यादीनां स एव क्रमो गृह्यते, स गृह्यमाणो न न्याय्य उत्सृष्टु मिति। अपि च सति क्रमप्रयोजने अग्निः पृथिवीस्थानो यस्मात्, अतस्तं प्रथमं व्याख्यास्याम इति† हेतुवचन मुपपद्यते; उत्तरत्र च, "तासाम् इध्मः प्रथमागामी भवति"—इति‡, "तेषा मश्वः प्रथमागामी भवति"—इति§, "तेषां रथः प्रथमागामी भवति" —इति‖। तच्च तच्च प्रथमागामी भवतीति वचनं यथाप्रधान मभिधानं पूर्वं समाम्नात मित्यस्य न्यायस्योपप्रदर्शनार्थ मिति लक्ष्यते; इतरथा ह्यविवक्षितक्रमेषु प्रथमागामिवचन मकृत्वैव यत्किञ्चित् पद मुपादध्यात्। तदेतत् पृथिवीस्थाने सर्वत्र क्रमप्रयोजन मुच्यते।— पार्थिवस्य ज्योतिषो यथा 'अग्नि'-शब्देन प्रसिद्धतमः सम्बन्धः, न तथा 'जातवेदः'-शब्देन; यथा 'जातवेदः'-शब्देन, न तथा 'वैश्वानर'-शब्देन, यथा च 'वैश्वानर'-शब्देन, न तथा 'द्रविणोदः'-शब्देन। तान्येतानि¶ गुणविप्रकर्षात्, प्रसिद्धिविप्रकर्षाच्च अग्निशब्दात् विप्रकृष्यन्ते; इध्मादीनां तु व्यवधानेनाग्न्यभिधानत्व मित्यतितरां विप्रकर्षः; अश्वप्रभृतयस्तु स्थानमात्र मग्नेर्भजन्त इति इध्मप्रभृति-

---

* "मन्त्रानुपूर्व्यैव" ख०।
† पुरस्तात् ६७८पृ० १पं०।
‡ अत्रैव खण्डे उपरिष्टात् (४५८ पृ० १६ पं०)।
§ उपरिष्टात् ८अ० १पा० १ख०।
‖ उपरिष्टात् ८अ० २पा० १ख०।
¶ जातवेदाः, वैश्वानरः, द्रविणोदाः इति।

भ्योऽपि विप्रकृष्यन्ते। तेषा मपि च उदितप्रमाणवत्तयो* ऽस्मन्मकुनि-मण्डुका इति † प्रथमम ; अनुदितप्रमाणवत्तयस्तु‡ अन्नादयः § ते पश्चादादरेभ्यः ॥ । इत्येवं सर्वत्र क्रमप्रयोजन मुपेक्ष्यम्।

आकपूणिस्तु पृथिवीनामभ्य एवोपक्रम्य स्वय मेव सर्वत्र क्रमप्रयो-जन माह। तदुक्तं वार्त्तिककारेण—"क्रमप्रयोजनं नाम्नां आक-पूणेरुपलक्षितम्। प्रकल्पयेदन्यदपि न प्रज्ञा भवमादयेत्।"—इति॥

प्रकृत मिदानी मुपवर्ण्यते।—द्रुघ्नादीनां गुणाभिधानसामान्यं किञ्चिदस्ति, यतस्तेनाधिकारवचनम् "अथात आप्रियः"—इति। 'अथ'—इति विशेषाधिकारे। 'अतः'—इत्यानन्तर्ये। 'आप्रियः' वक्ष्यन्त इति ¶ वाक्यशेषः॥

इह कारणादभिधेये अभिधाननियमो नैरुक्तानाम्, तदर्थं सुपो-द्धृत्य "आप्रियः" कस्मात्? "आप्नोतेः प्रीणातेर्वा"—इति निराह। आप्रिय ऋचः, तत्सम्बन्धात् देवता अपि। तथाहि दर्शयति—"आप्रीभिराप्रीणाति", "इतीमा आप्रीदेवताः"—इति ** च। ऋच-स्तावत् आप्नुवन्ति प्रीणन्ति वा देवता इत्याप्रियः; अथ पुनर्देवता आप्यन्ते आप्रीयन्ते वा इत्याप्रियः॥

---

* "उदितप्राणवत्तयो" ख।
† १भा० ४९४ पृ० ५ अ० २ ख० (१), (२), (३)।
‡ "अनुदितप्राणवत्तयस्तु" ख।
§ १भा० ४९४ पृ० ५ अ० २ ख० (४)—(२८)।
‖ १भा० ४९५ पृ० ५ अ० २ ख० (२९)—(३९)।
¶ इत आरभ्याध्यायसमाप्तिं यावत्।
** अत्रैवाध्याये उपरिष्टात् (२ पा० ६ ख०)।

"तासाम् दध्नः प्रथमागामी भवति" प्रथम मागन्तु मस्य आग्नेयदेवतापदसमाम्नाये श्रील मिति प्रथमागामी। कस्मात्? एतत्पूर्वकत्वादिज्यायाः, अनित्यत्वाच्च तनूनपात्राराशंसयोरन्यतरस्य॥

"तस्य" दध्नः, समित्कलापस्य*, "एषा" प्राधान्यस्तुतिः "भवति"—॥ १ (४)॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः। आ च वह मित्रमहश्चिकित्वां त्वं दूतः कविरसि प्रचेताः॥ समिद्धो अद्य मनुष्यस्यमनुष्यस्य गृहे देवो देवान्यजसि जातवेद आ च वह मित्रमहश्चिकित्वांश्चेतनावाँस्त्वं दूतः कविरसि (प्रचेताः †) प्रकृष्टचेता यज्ञेध्म इति कात्यक्योऽग्निरिति शाकपूणिस्तनूनपादाज्यं भवति नपादित्यननन्तरायाः‡ प्रजाया नामधेयं निर्णतंतमा भवति गौरच तनूरुच्यते तता-अस्यां भोगास्तस्याः पयो जायते पयस आज्यं जायते अग्निरिति शाकपूणिरापोऽच तन्व उच्यन्ते तता अन्तरिक्षे ताभ्य ओषधिवनस्पतयो जायन्त ओषधिवनस्पतिभ्य एष जायते तस्यैषा भवति॥ २(५)॥

---

* "काष्ठं दार्विन्धनं लेध इध्म मेधः समित् स्त्रियाम्।"—इति अम० को० व०।

† नास्त्यतत् पदं क-ख-ग-पुस्तकेषु।

‡ "शाकपूणिस्तनूनपात्रपादित्यननन्तरायाः"—इत्येव क, ख, म।

"समिद्धो अद्य"—इति *। जमदग्नेरार्षम्। त्रैष्टुभम्। सूक्त मेवाहाग्नेयं यास्कः †। हे दूत! यस्त्वं 'समिद्धः' सन्दीप्तः, 'अद्य' एतस्मिन् विशिष्टे यजनीयेऽहनि, 'मनुषः' "मनुष्यस्यमनुष्यस्य" समानेऽहनि प्रवृत्तयागानां त्रैवर्णिकानाम् 'दुरोणे' यज्ञगृहे 'देवः' दाता हविषां हेतुकर्तृत्वेन, 'देवः' दीप्तो वा, द्योतनो वा, 'देवान्' दानादिगुणयुक्तान् एतान् हेतुकर्तृत्वेन यागेऽङ्गभाव मुपगच्छन् 'यजसि' हे 'जातवेदः!' जातवेदस आधार इति तदभिधानेन सम्बोध्यते; दृष्टा हि मन्त्रस्थेषु क्वोक्तमु तदभिधानप्राप्तिः; अथ वा जातवेदा अपि त्वदृतेऽनभिव्यक्तस्वशक्तिस्त्वदाधारत्वादशक्त एवायं यष्टुम्, तस्मात् जातवेदास्त्वदाधारो यजति यत्, तत् त्व मेव यजसीत्युच्यते। अस्माक मध्येतस्मिन्नहनि हे 'मित्रमहः' मित्राणां पूजयितः! नित्य मभ्युपेक्षमाणः उपकारवृत्तो ‡ यजमानानां 'चिकित्वान्' जानानः 'आ च वह' आहूय च, देवान् आहूय चैतान् यज; तथास्मिन् कर्मणि ज्वलन्नङ्गभाव मुपेहि, यथैतस्मिन् कर्मणि हविः प्रतिजिघृक्षन्तोऽङ्गभाव मीयुर्देवाः, अपि च नैतदतिचित्रम्; यदेव मस्माक मस्मिन् कर्मणि वर्त्तेथाः। किं कारणम्? यतो ब्रूमः—"त्वं दूतः कविरसि प्रचेताः"। अग्न्यावेशादग्निर्यदुपेक्ष्योच्यते,—'त्वम्' एव 'दूतः' सर्वयजमानानां त्वत्पूर्वकत्वाद् देवतायागस्य, 'कविः' क्रान्तदर्शनः—

---

* ऋ० सं० ८, ६, ८, १। अग्निचयनाङ्गभूते प्राजापत्ये पशौ सर्वेषां नित्य मिद मापोसूक्तम्। आ० ., २. द्रष्टव्यम्।

† यतो वक्ष्यत्यर्थं इतिक्रत्—"यास्कस्यापि चैतदेवाभिमतम्"—इत्यादि (४६१ पृ० ८ पं०)।

‡ "मभ्युपेक्षमाणोपकारप्रहणो" ख।

क्रान्तप्रकाशः सर्वत्र, 'प्रचेता.' प्रकृष्टप्रज्ञानः। यस्मात् स्वम् ऋत्विग्-जमानानां सायुज्ये हेतुः*, तस्य तव युक्त मस्माक माह्वय देवान् यष्टु मित्यतो ब्रूमहे—आह्वय चास्माकं देवान् यज च॥

"यज्ञेध्म इति कात्यक्यः"। कत्यकस्य पुत्रः कात्यक्य आचार्यः, स मन्यते,—योऽय मिध्म आधीयते प्रतिप्रणवं यज्ञे स एवाय मिति। नन्वेतस्मिन् मन्त्रे न तस्य लिङ्ग मस्ति? सत्यम्! नास्ति साक्षात्; प्रैषे तु "समिद्भ्यः प्रेष्या"—इति श्रूयते, युक्तं च यदर्थ मेव प्रेष्यते स एवेज्यते †। तस्मात् समिधा मेवेध्मभाव मुपगताना मग्निना सन्दीप्तानां समुदायापेक्ष मिदम्, व्यवहित मभिधान मा प्रीगतं समिद्धो अद्येति समिध एव चेमा इज्यन्त इति स्फुट मैष्टिके होत्रे समिधो यजेति प्रेषितो होता "समिधः समिधो अग्न आज्यस्य व्यन्तु"—इति वषट्करोति ‡। तस्माद् युक्तं यत् कात्यक्यो मन्यते यज्ञेध्म इति? §॥

अथ पुनरन्यः कथं मन्यतेऽत आह,—"अग्निरिति शाकपूणिः"। स पुनः कया उपपत्त्या अग्निं मन्यते? आरादुपकारित्वात्, प्रैषस्य सन्निपत्योपकारित्वाच्च॥। यजतावाप्रियां यदाग्नीरूपं तद्

---

* "साफल्ये हेतुः" ख।

† "यज्ञो वै देवेभ्य उदक्रामत्, तं प्रैषैः प्रैष मैच्छन्, यत् प्रैषैः प्रैष मैच्छन् तत् प्रैषाणां प्रैषत्वम्"—इति ऐ० ब्रा० १, १, ९।

‡ "यद्धि देवतायै हविर्गृहीतं स्यात्तां ध्यायेद् वषट्करिष्यन्त्याचारेव तद्देवतां प्रीणाति, प्रत्यक्षादेवतां यजति"—इति ऐ० ब्रा० १, १, ८।

§ "समिद्भिः"—इति व्याख्याने "हे इध्मकाष्ठ! त्वं 'समिद्भिः' अग्नेः समिन्धनं दीपन मसि"—इति महीधरः। य० वा० सं० १, ५।

॥ "तान्यङ्गानि द्विविधानि। सन्निपत्योपकारकाणि, आरादुपकारकाणीति च"—इत्यादि मी० प०।

बलवत्*। किञ्च पुनराप्रियो रूपम्? अन्यर्थता कथम्? इति गृणु। —"समिद्धो०——० देवान् यजसि जातवेदः। आ च वह मित्र महश्चिकित्वान् दूतः कविरसि प्रचेताः॥"—इति सर्वाण्येतानि अभिधानानि कर्माणि च अगौणान्यग्निपक्षे, गौणानीध्मपक्षे; "गौणमुख्ययोश्च मुख्ये कार्यसम्प्रत्ययः"—इति न्यायः†; तस्मादप्रच्युतस्वरूपाया आप्रियो यजतावुपकारबाहुल्यादाग्नेयत्वाच्च प्रयाजाना मग्निरेवाय मनया आप्रिया इज्यत इति शाकपूणिर्मन्यते‡॥

यास्कस्यापि चैतदेवाभिमतम्; "आग्नेया इति तु स्थितिः"—इति अधिकरणान्ते हि वक्ष्यति§। एवं तर्हि अग्निरित्येतदेव समाम्नातव्य मासीत, न इध्मः? इति। नैवम्। कस्मात्? समिद्धो अग्नेत्येतदस्या आप्रिया मग्नेर्लिङ्ग मस्ति, न लग्निशब्दः; अतोऽस्या-समाम्नानम्, पौनरुक्त्यदोषाच्च। तदिध्मशब्देऽपि समानम्? इति चेत्, तदपि ह्याप्रियां नास्तीति न, प्रैषिके समाम्नानात्, क्रियाविशेषत्वाच्च। आह्वय चास्माकं देवान् यज चेति स एषोऽग्निः समित्कलाप मिध्म मात्मत्वेनाभिसम्पन्नस्तदाख्यता मुपगतः तेनेध्माभिधानेनेज्यत इति

---

* "प्रैषैभिः प्रैषानाप्नोत्याप्रीभिराप्रीयन्नस्य। प्रयाजैरनुयाजान् वषट्कारैराऽऽप्नोतीः"—इति य० वा० स० १९, १९।

† "ज्ञोत् (पा० १, १, १५)"—सूत्रभाष्ये, परिभाषेन्दुशेखरे (१४) चैतद्व्याख्यानादिकं द्रष्टव्यम्।

‡ कथञ्च प्रयाजाना माग्नेयत्वं तदुच्यतेऽथाध्यायान्तिमे खण्डे।

§ उपरिष्टादिदमेवाध्यायेऽन्तिमे खण्डे। अधिकरणं च पश्चात्कविचारः। तदाहाधिकरणमालायां माधवः—"एकैकस्याधिकरणस्य विषयः, सन्देहः, सङ्गतिः, पूर्वपक्षः, सिद्धान्तश्चेति पञ्चावयवाः।"—इति।

इध्मशब्दः समाम्नातो नाग्निशब्द इति। सर्वत्र शाकपूणेरेव माप्रीप्रभृत्यर्थान्यभिधानानि *॥

शाकपूणिपक्षे मन्त्रयोजना—हे भगवन्! अग्ने! 'समिद्धः' यः त्वं सन्दीप्तः, 'अद्य' अस्मिन्नहनि, 'मनुषः' मनुष्यस्य 'दुरोणे' यज्ञगृहे 'देवः' दाता, दीपनः, द्योतनो वा, 'देवान्' दातॄन्, दीप्तान् वा 'यजसि' 'जातवेदः!' हविषा यजमानानां जातप्रज्ञान! स त्वं मत्साकमपि हे 'मित्रमहः' मित्राणा मुपकारप्रवृत्त! 'चिकित्वान्' जानानः स मधिकारम्, आहूय देवान् यज चेति। किम्? ब्रूमहे—यस्मात् त्वमेव 'दूतः' सर्वयजमानानां भवसि। 'कविः' क्रान्तदर्शनः, 'प्रचेताः' प्रवृद्धप्रज्ञान इति॥

"तनूनपात्"—इति †। निर्वक्तव्यम्। तत्पुनरेतत् "आज्यम्" इति कात्यक्यः, "अग्निरिति शाकपूणिः"। यथा तावदाज्यं तथा निरुच्यते—"नपात्—इति अननन्तरायाः प्रजाया नामधेयम्" या पितुरनन्तरा, पुत्राख्या सा भवति; अननन्तरा, पौत्राख्येत्यर्थः। किं कारणम्? सा हि "निर्णततमा भवति" कथम्? पुत्रस्तावत् पितुर्नीचैर्नतो भवति, ततोऽपि नीचैर्नततमः पौत्रः। तच्चैतस्मिन् पक्षे यः 'तनू'-शब्दः पूर्वपदं तननपाच्छब्दस्य, तेन "गौः" "उच्यते"। सा कस्मात्? "नताः अस्यां भोगाः" क्षीरदध्यादयः। ततः किम्?

---

* ऐतिहे "कुर्वा अस्य समिधा"—इत्यादेर्व्याख्यानारम्भे "द्वादशाग्नीदेवत्या उष्णिहो विषमपादा आग्नेय्योऽग्निना दृष्टा। अग्निः प्रजापतिरिव स्रूयते तेन प्राजापत्या अपि। 'ता आग्नेय्यः प्राजापत्या यदग्निरपश्यत् तेनाग्नेय्यो यत् प्रजापतिं मप्रीणात् तेन प्राजापत्याः' इति श्रुतेः"—इति मट्टोधरः।

† १मा० ४६१ पृ० ५ अ० २ ख० (२)।

"तस्याः पयो जायते" तस्या पुत्रः पयः; "पयसः आज्यं जायते" तस्मात् तस्याः पौत्रः। एवं गोः तन्वाख्यायाः नपात् आज्यम्। तस्मात् तनूनपात्* ॥

अग्निपक्षे "आपः" "अत्र" अस्मिन् अग्नेः तनूनपात्त्वेन "तन्वः" उच्यन्ते"। ताः कस्मात्? "ततः अन्तरिक्षे"। ततः किम्? "ताभ्यः ओषधिवनस्पतयो जायन्ते", "ओषधिवनस्पतिभ्यः" "एषः" अग्निः "जायते"। तस्मादयमपां पौत्रः† ॥

"तस्य" तनूनपातः—आज्यस्य अग्नेर्वा प्राधान्यस्तुतिः "एषा" "भवति"—॥ २ (५) ॥

तनूनपात् पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व। मन्मानि धीभिरुत यज्ञ मृन्धन् देववीं च कृणुह्यध्वरन्नः ॥ तनूनपात् पथ ऋतस्य यानान् यज्ञस्य यानान्मधुना समञ्जन्त्स्वदय कल्याणजिह्व मननानि च नो धीभिर्यज्ञं च समर्धय देवान् नो यज्ञं गमय नराशंसो यज्ञ इति काट्यक्यो नरा अस्मिन्नासीनाः शंस-

---

* "तनूनपातं यजति, प्राणो वै तनूनपात्; स हि तन्वः पाति, प्राणं नेव तत् प्रीणाति, प्राणं यजमाने दधाति।"—इति ऐ० ब्रा० २, १, ४।

† अत एवैष्टिके "तनूनपादसुरो"—इत्यस्य व्याख्याये माह महीधरः—"तनूनाम्=अपाम्, नपात्=पौत्रः"—इत्यादि। एवञ्च मध्यमस्थानसमाम्नातेन "अपान्नपात् (१भा० ४७५पृ० ५अ० ४ख० ११)"—इत्यनेनास्य न किं मपि पार्थक्यं मतं एवाच दशमे वक्ष्यति—"अपान्नपान्नप्त्रा व्याख्यातः"—इति। उ० १० अ० १पा० ५ख०।

न्त्यग्निरिति शाकपूणिर्नरैः प्रशस्यो भवति तस्यैषा भवति ॥ ३ (६)॥

"तनूनपात् पथ ऋतस्य"—इति*। हे 'तनूनपात्' आज्य! त्व मुच्यसे। एतान् 'पथः' मार्गान् सर्वान् 'ऋतस्य' यज्ञस्य 'यानान्' हवींषि, यज्ञे यान्युत्सर्पन्ति, तानि 'मध्वा' मधुरेण स्वादेन 'समञ्जन्' सम्यक्त्वयन् 'स्वदय' स्वादुता मापादय। हे सुजिह्व!; जिह्वया हि ते एतदेवं कुर्वन् 'मन्मानि' "मननानि" यानि च वयं मन्यामहे-ऽर्थवस्तूनि ध्रुवाणेतानि नः स्थुरिति, तानि स्वाभिः 'धीभिः' स्वैः कर्मभिः, अभिघारणालङ्करणोपस्तरणादिभिः † 'ऋन्धन्' संसाधयन् स्वगुणैरुपकुर्वन् 'समर्द्धय' सम्पादय। अपि चैवं कुर्वन्नेतं यज्ञं 'समर्द्धय' सम्पादय। या का चिदापदुत्पद्यते यज्ञस्य तं प्रायश्चित्तेनाङ्गभाव मुपगच्छन् "गमय" 'देवत्रा' "देवान्" प्रति, स्विष्ट मध्वर मस्माकं च कुरुष्वेत्यर्थः।—एतदाशास्महे त्वत्तः॥

"अग्निरिति शाकपूणिः"। हे भगवन्! 'अग्ने!' 'तनूनपात्' त्वम् एतान् 'पथः' 'ऋतस्य' यज्ञस्य 'यानान्' हवींषि, 'मध्वा' मधुरेण पाकजतेन रसेन 'समञ्जन्' समभिव्यञ्जयन् 'स्वदय' मृष्टीकुरु। हे 'सुजिह्वः' स्वर्चिः! अथ वा हे सुवाक्! एतान्येवं कुर्वन्नस्मदभि-

---

* "द्विराज्यस्योपसीर्षं वषा भवदाय द्विरपरिष्टादभिघारयति"—इति ऐ० ब्रा० १, २, ४। एवमादिकं द्रष्टव्यम्।

† ऋ० सं० ८, ६, ८, १। य० वा० सं० आश्वमेधिके द्वादशाग्नीषु द्वितीया (१९. १९)।

मतान्यर्थवस्तूनि नः संसाधयन् 'यज्ञम्' 'वर्धन्' समर्द्धयन् स्वसामर्थ्याच्च 'देवत्रा' देवप्रविष्टं कुरु।—इत्येतदाशास्महे वयं त्वत्त इति॥

"नराशंसः *, यज्ञः इति कात्थक्यः"। कस्मात्? "नराः अस्मिन् आसीनाः शंसन्ति"। नरशब्दः पूर्वपदम्, आसेर्निष्ठान्तस्य मध्यम्, शंसतेरुत्तरपदम्। अथ कोऽर्थः? 'नराः' मनुष्याः 'अस्मिन्' 'आसीनाः' उपविष्टाः 'शंसन्ति' इति नराशंसः। "अग्निरिति शाकपूणिः"। स कस्मात्? "नरैः" "प्रशस्तैः" स्तुत्यः "भवति"† ॥

"तस्य" नराशंसस्य "एषा भवति" प्राधान्यस्तुतिः—॥ ३(६)॥

**नराशंसस्य महिमानं मेषा मुप स्तोषाम यजतस्य यज्ञैः। ये सुक्रतवः शुचयो धियन्धाः स्वदन्ति देवा उभयानि हव्या॥ नराशंसस्य महिमान मेषा मुपस्तुमो यज्ञियस्य यज्ञैर्ये सुकर्माणः शुचयो धियं धारयितारः स्वदयन्तु देवा उभयानि हवींषि सोमं चेतराणि चेति वा तान्त्राणि चावापिकानि चेति वेल ईट्टेः स्तुतिकर्मण इन्धतेर्वा तस्यैषा भवति॥ ४ (७)॥**

"नराशंसस्य महिमानं मेषाम्"—इति‡। वर्त्तमान एव कर्मणि

---

* १ भा० ४६१ पृ० ५ अ० २ ख० (४)।

† "नराशंसं यजति। प्रजा वै नरो वाक् शंसः, प्रजा चैव तद् वाचं च प्रीणाति, प्रजां च वाचञ्च यजमाने दधाति।"—इति ऐ० ब्रा० २, १, ४। अस्मिंश्च नराशंस-नाराशंसयोर्भेदः नाराशंस-पदव्याख्यानन्तु नवमे (९) वक्ष्यति। १ भा० ४६४, ४६६ पृ० (६) द्रष्टव्यञ्च।

‡ ऋ० सं० ५,१,१,१। य० वा० सं० आश्वमेधिके द्वादशाग्रीषु तृतीया (२९,१७)

ब्रवीति। योऽय मेषा मभिमतफलदाता नराणां नराशंसो यज्ञः, द्रव्यदेवतात्यागात्मकः प्रयोगः, तस्य अधिष्ठाता ; तद्यागौ देवताविशेषे जगदुत्पत्त्यनुग्रहबीजम्। 'नराशंसस्य' वयम् ('उपस्तोषाम') "उपस्तुमः" उपगम्य चेतसा 'महिमानं' माहाभाग्यम् विभूतिं 'स्तुमः' अभिकीर्त्तयामः। 'यजतस्य' "यज्ञियस्य" यजनसम्पादयितुः, प्रयोक्तुरभिमतफलसम्पादयितुः 'यज्ञैः' कर्मभिः युक्ताः उपस्तुमः। तदेव मेतस्मिन्नुपस्थितमहिम्नि नराशंसे यज्ञे किं मयस्तु। —इत्याशास्महे। 'ये' 'सुक्रतवः' "सुकर्माणः" जगदनुग्रहप्रवृत्ताः 'शुचयः' निर्णिक्ततरपापाः 'धियं धाः' स्वाधिकारयुक्तानां कर्मणाम् अनु-वि-"धारयितारः", प्रज्ञानां वा। एवमादिगुणयुक्ताः 'देवाः' ते 'स्वदन्ति' "स्वदयन्तु" एतानि ('हव्या') "हवींषि" 'उभयानि'। यदि सौमिकः पशुः, ततः "सोमं च" "इतराणि" पशुपुरोडाशप्रधानाप्रभृतीनि ; अथ पृथक् सोमात्, ततः "तान्त्वाणि" प्रयाजाज्यभागस्विष्टकृत्प्रभृतीनि, "आवापिकानि च" प्रधानहवींषि *।—इत्येतदाशास्महे॥

"अग्निरिति शाकपूणिः"। योऽय मेषा मभिमतोपकारकारी, नराणां प्रशस्यः, नराशंसोऽग्निः, तस्य वयम् 'उपस्तोषामः' "उपस्तुमः" 'महिमानं' 'यजतस्य' यज्ञसम्पादयितुः 'यज्ञैः' कर्मभिः

---

* "यो वै यज्ञं नराशंसपङ्क्तिं वेद, नराशंसपङ्क्तिना यज्ञेन राध्नोति। द्विनाराशंसं प्रातःसवनं द्विनाराशंसं माध्यन्दिनं सवनं सकृन्नाराशंसं तृतीयसवनम् मेष वै यज्ञो नराशंसपङ्क्तिर्नराशंसपङ्क्तिना यज्ञेन राध्नोति य एवं वेद।"—इति ऐ० ब्रा० १,३,१। अत्रैव पुरोडाशधानादीनां हविष्यङ्क्तित्वं च वर्णितम्।

दानैर्वा संयुक्ताः, तस्मिन्नुपस्तुतमहिम्नि नराशंसेऽग्नौ हुतानि 'ये' 'सुकृतवः, देवाः, शुचयः, धियं धाः', ते एतानि 'उभयानि' हवींषि आस्वादयन्तु।—इत्येतदाशास्महे ॥

"ईलः" अग्निः * । स पुनरयम् "ईट्टेः स्तुतिकर्मणः"; स्तूयते ह्यसौ। "इन्धतेर्वा" दीपनार्थस्य; तत्क्रियायुक्तो ह्यसौ †। "तस्य" "एषा" प्राधान्यस्तुतिः "भवति"— ॥ ४ (७) ॥

आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः। त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान्॥ आहूयमान ईलितव्यो वन्दितव्यश्चायाह्यग्ने वसुभिः सहजोषणस्त्वं देवानामसि यह्व होता यह्व इति महतो नामधेयं यातश्च हूतश्च भवति। स एनान् यक्षीषितो यजीयान्। इषितः प्रेषित इति वाधीष्ट इति वा यजीयान्यष्टृतरो बर्हिः परिबर्हणात् तस्यैषा भवति ॥ ५ (८) ॥

"आजुह्वान ईड्यो वन्द्यश्च"—इति ‡। हे भगवन्! यः त्वम् 'ईड्यः' 'वन्द्यः च' सर्वलोकस्य। 'ईड्यः' दीपनार्हः हविर्भिराज्यादिभिः। 'वन्द्यः' स्तुत्यः। स त्वम् 'आजुह्वानः' "आहूयमानः" एत-

---

* १ भा० ४६१ पृ० ५ अ० १ ख० (५); ४६२ पृ० (५)।

† "ईड स्तुतौ"—अदा० आ० ९। "जि इन्धौ दीप्तौ"—ध० आ० ११।

‡ ऋ० सं० ८,६,८,१। य०वा० सं० आश्वमेधिके द्वादशाग्नीषु चतुर्थी (२९,२८)।

स्मिन् कर्मणि अस्माभिः, 'वसुभिः' ('सजोषाः') "सहजोषणः" समान-प्रीतिर्भूत्वा 'आयाहि'। कस्मात् पुनरेवं ब्रूमहे? इतः,— यस्मात् हे 'यक्ष' "महत्!" 'त्वम्' "असि" 'होता' "देवानाम्" आक्षाता। "सः" त्व मस्माभिः 'दूषितः' "प्रेषितः", "अधीष्टो वा" अध्येषितो होतृत्वे स्थित्वा अस्माकम्, "एनान्" देवान् 'यक्षि' यज इत्येवं ब्रूमहे। किमित्येवं ब्रूमहे? यस्मात् 'यजीयान्' असि "यष्टृतरः" मनुष्य-होतुरिति॥

इह 'इडः'—इति एकवचन मग्नेरव्यवधानेन तथैतस्मिन् मन्त्रे एकस्य श्रुतत्वात्, ऐष्टिके पुनर्होत्रे 'इलो अग्न आज्यस्य व्यन्तु'—इति बहुवचनयुक्तादाख्याताद् व्यन्तित्येतस्मात् 'इलः'—इत्येतस्यापि बहु-वचनत्व मेव 'इडो व्यन्तु'—इति। तच्च पुनरन्नाभिधानम्*, अन्नं च पुनरोषधय एव, ताश्च पृथिवीस्थानाः इत्यग्निं भजन्ते, तदा-त्मनाय मग्निरिज्यत इति। तच्च बहुवचनं प्रतिसमाधान मोषधा-त्मनाग्नेर्व्यवधारणात्। उक्तञ्च—"योऽयं स्तबीषे पृथिव्या मग्निरन्तरौ-षधिवनस्पतिष्वप्सु त मुन्निन्यथुः सर्वगणं सर्वनामानम्"—इति†। तस्मादुपपद्यत इति॥

"बर्हिः"—इति‡ निर्वक्तव्यम्। तत् पुनरेतत् प्रसिद्ध मेव कुशमयं यज्ञाङ्गम्। तत् कस्मात् बर्हिः? इति। उच्यते;—

---

* "इलो यजति। अन्नं वा इळोऽन्न मेव तत् प्रीणाति, अन्नं यजमाने दधा-ति"—इति ऐ० ब्रा० १, १, ४।

† पुरस्तात् २८० पृ० १५ पं० ६ अ० ८ ख०।

‡ १ भा० ४६१ पृ० ५ अ० २ ख० (६); ४६२ पृ० (६)।

"परिबर्हणात्" परिच्छेदनात्; लूनं हि तद् भवति, परिवृढं वा *। "तस्य एषा" बर्हिषः प्राधान्यस्तुतिः "भवति"—॥ ५(८) ॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम्। व्युं प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम्॥ प्राचीनं बर्हिः प्रदिशा पृथिव्या वसनायास्याः प्रवृज्यते अग्रे अह्नां† बर्हिः पूर्वाह्णे तद्विप्रथते (वितरं‡) विकीर्णतर मिति वा विस्तीर्णतर मिति वा वरीयो वरतर मुरुतरं वा देवेभ्यश्चादितये च स्योनं स्योन मिति सुखनाम स्यतेरवस्यन्त्येतत्सेवितव्यं भवतीति वा द्वारो जवतेर्वा द्रवतेर्वा वारयतेर्वा तासां मेषा भवति॥ ६ (९)॥

"प्राचीनं बर्हिः"—इति §। प्राच्यां दिशि यदञ्चितं गतं जातं प्रागग्रं वा यत् स्तीर्यते, तद् भवति 'प्राचीनम्'। किमुनस्तत्? 'बर्हिः' "प्रवृज्यते" प्रच्छिद्यते लूयते, अथ वा "प्रवृज्यते" प्रस्ती-

---

* "बर्हिर्यजति। पशवो वै बर्हिः, पशूनेव तत् प्रीणाति, पशून् यजमाने दधाति"—इति ऐ० ब्रा० १, १, ४।

† "प्रवृज्यतेऽग्रेऽह्नां" ङ, च।

‡ नास्त्यतत् पदम् क-ख-ग-पुस्तकेषु।

§ ऋ० सं० ८, ६, ४। य० वा० सं० आश्वमेधिके द्वादशाग्नीषु पञ्चमी (१९,१९)।

र्यते। किमनेन मेव स्व-मनीषिकया? नेत्युच्यते,—"प्रदिशा" विधिवाक्येन प्रागुदग्वा बर्हिश्छिनत्तीति सामर्थ्यात्, अथ वा "प्रदिशा" प्रस्तरणमन्त्रेण "देवस्य त्वा"—इत्यनेन *। स्तरणपक्षेऽपि "प्राचीनं बर्हिः स्तृणाति"—इति विधिवाक्यम्, "ऊर्णम्रदा पिप्रयस्व"—इति † मन्त्रः। किं मर्थं पुनस्तत् प्रवृज्यते? 'पृथिव्याः वस्नोः अस्याः'। पृथिवी वेदी, तस्याः 'वस्नोः' "वसनाय" आच्छादनाय। कदा च पुनस्तत् प्रवृज्यते? 'अग्ने अङ्गाम्' "पूर्वाह्णे"; तदा हि प्रशस्यते दर्भस्तरणं लवनं वा। तत्प्रवृत्तं वा यथाकालं विविधं 'प्रथते'। विस्तीर्यते वेद्यां क्रियमाणायाम्। प्रवृज्यमाणं वा प्रस्तीर्यमाणं वा विप्रथते। 'वितरम्' विस्तीर्णादपि "विस्तीर्णतरम्", 'वरीयः' "वरतरम्" अन्येभ्यो यज्ञाङ्गेभ्यः श्रेष्ठतरम्, तदाधारत्वाद्धविषाम्; "उरुतरं वा" बहुतरं वा। किं मर्थं पुनस्तत् प्रवृज्यते, विप्रथते वा? 'देवेभ्यः' "च", अदितये' "च" कथं नाम 'स्योनं' "सुखं" स्यादिति; बर्हिषा हि सगुणीकृतकर्मणो देवानां हविर्दातॄणां यजमानानाम् अभीप्सितेन फलेन योगो भवति, तत्सुखम्। 'अदितये' पृथिव्यै; बर्हिषा हि सगुणीकृतात् कर्मणश्चाऽऽहुतिद्वारेण वृष्टिर्भवति, तत ओषधिप्ररोहः। तत्सुखम्॥

नाच ब्रवीत्यग्निरिति। तेन यज्ञाङ्ग मेवाभिमत मेतदिद मध्यस्याचार्यस्य च तद्वारेणैव व्यवधानेनाग्निः स्तूयते, पृथिव्यायतनत्वात्

---

* य० वा० सं० १, १०; २१; २४। ९, ३०; ३८। ११, ९, २८। १८, ३७। १०, ३। २७, ९। ३८, १।

† ऋ० सं० ३, ८, २१ ४। अचीणा मेकादशर्चे आप्रीसूक्ते इयं चतुर्थी।

तस्य। अपरे पुनरग्निवदपि योजयन्ति मन्त्वार्थदृशः। तत्पक्षे बर्हिरित्यग्न्यभिधानम्*। प्रागच्यते प्रणीयत इति 'प्राचीनं बर्हिः' प्रवृद्धमाहवनीयाख्यं ज्योतिः। "प्रवृज्यते" प्रणीयते तत्पुनः 'प्रदिशा' वचनेन प्राच्या मुद्धरन्तीति। 'पृथिव्याः' वस्नोः' "वसनाय"; अग्निनैव हि वेदिरग्निका भवति। 'अग्रे अह्नाम्' "पूर्वाह्णे" तद् विविधं 'प्रथते' सामिधेनीप्रक्षेपात्। आज्यभागाधारादिषु च विस्तीर्णतरं विचित्रतरं प्रथते। 'वरीयः' "वरतरम्" अन्येभ्यो ज्योतिर्भ्यः; "उरुतरं" महत्तरं "वा" 'देवेभ्यः' यजमानेभ्य इतरेभ्यो वा, 'अदितये' "च" पृथिव्यै कथं नाम 'स्योनं' स्यादिति॥

"स्योनम्—इति सुखनाम"†। "स्यतेः" धातोः अवपूर्वात्, तदेव हि "अवस्यन्ति" व्यवस्यन्ति, निवसन्ति प्राणिनः। "सेवितव्यं भवतीति वा" तद्धि सर्वस्य सेवनार्हं भवति॥

"द्वारः"—इति‡। निर्वक्तव्यम्। "यज्ञे गृहद्वार इति कात्थक्यः"। ताः पुनरेताः "जवतेर्वा" जवन्ति हि ताभिः। "द्रवतेर्वा"। धात्वन्यत्व मर्थैकत्वम्। "वारयतेर्वा" वारणीया हि द्वारादेव निवार्यन्ते। "तासाम्" "एषा" प्राधान्यस्तुतिः "भवति"—॥ ६(८)॥

**व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः। देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत**

---

* य० व० सं० १८, १९. "देवस्बर्हिः"—इत्यादि मन्त्रव्याख्यानं द्रष्टव्यम्।
† नैघण्टुकस्मरणार्थ मिदम्। १ भा० २१४, २१७ पृ० २ च० ९ ख० (१५)।
‡ १ भा० ४९१, ४९२ पृ० ५ च० १ ख० (७)।

सुप्रायणाः॥ व्यच्यनवत्य उरुत्वेन विश्रयन्तां पतिभ्य इव जाया ऊरू मैथुने धर्मे शुशोभिषमाणाः* वरतम† मङ्ग मूरू देव्यो द्वारो बृहत्यो महत्यो विश्व मिन्वा विश्व माभिरेति यज्ञे गृहद्वार इति कात्यक्योऽग्निरिति शाकपूणिरुषासानक्तोषाश्च नक्ता चोषा व्याख्याता नक्तेति रात्रिनामानक्ति भुतान्यवश्यायेनापि वा नक्ताव्यक्तवर्णा तयोरेषा भवति ॥ ७ (१०) ॥

"व्यचस्वतीः"—इति ‡। 'याः' एताः विविधेनाञ्चनेन गमनेन युज्यन्ते 'व्यचस्वतीः', ताः। किं कुर्वन्तु ? 'उर्विया' उरुत्वेन महत्त्वेन 'विश्रयन्ताम्' विश्रियन्ताम्। कथम् ? 'पतिभ्यः न जनयः' "पतिभ्य इव जायाः" यथा पतिभ्यो जाया "ऊरू मैथुने धर्मे" विवृण्वन्ति ("शुशोभिषमाणाः") शोभयितु मिच्छमानाः प्रहर्षात्, एवं विश्रयन्ताम्। इदानीं मुत्तरोऽर्द्धर्चः प्रत्यक्षकृतः।—याः यूयं व्यञ्चनवत्यः एवं विश्रयध्वे, ततो ब्रवीति,—हे "देव्यः" दानक्रियाहेतुभूताः! 'द्वारः!' "बृहत्यः" "महत्यः" 'विश्वम् इन्वाः' "विश्वम्" सर्वम् "आभिः" "एति" यज्ञोपकरण मिति विश्व मिन्वाः, यूय मुच्यध्वे। 'देवेभ्यः' एतेभ्यो हविर्दाद्यभ्यः ऋत्विग्भ्यः यजमानेभ्य इतरेभ्यो वा। 'सुप्रायणाः' सुप्रगमनाः 'भवत'।—इत्येतदाशास्महे ॥

---

* "सुशोभिषमाणाः" ग।

† "वरतर" क ख ग।

‡ ऋ० सं० ८, ९, ८, ५। य० वा० सं० आश्वमेधिके द्वादशाग्नौ षष्ठी (१९,१०)।

"अग्निः इति शाकपूणिः"। तत्पक्षे योजना।— अग्नरर्चिषो द्वारः। अवनात् द्रवणाद्वा। हविर्वा, ताभिर्जवति द्रवति वा, वारयति वा रक्षःप्रभृतीनीति द्वारः। 'व्यचस्वतीः' याः एताः विविधेनाञ्चनेन तद्वत्यः अग्नरर्चिषः। ताः उरुत्वेन 'विश्रयन्ताम्'। कथम्? "पतिभ्य इव जायाः" ऊरू मैथुने धर्मे शोभयितु मिच्छमानाः। या यूयं विविधेनाञ्चनेन तद्वत्यः, यास्त्वेवं विश्रयध्वे, ततो ब्रवीमि*। हे "देव्यः" "बृहत्यः" 'विश्व मिन्वाः' सर्वं हविर्याभिर्जवति, ता यूय मस्य हविषः 'सुप्रायणाः' सुगमनाः 'भवत' इति †॥

"उषासानक्ता"—इति ‡ एकपदम्। अस्य विग्रहः—"उषाश्च नक्ता च"। अत्र "उषा व्याख्याता"—"उच्छतीति सत्या" इति§। "नक्तेति रात्रिनाम"॥। तत् कस्मात्? "अनक्ति', क्लेदयति "भूतानि" "अवश्यायेन"—इति। अवश्य मेतदायन्तीत्यवश्यायाः प्रुष्वा। अनक्तेरकारलोपे नक्ता। "अपि वा नक्ता अव्यक्तवर्णा। नकारः प्रतिषेधे; न अक्ता, न व्यक्ता, अनक्ता। यथा अहः सर्वं मभिव्यक्तरूपं भवति, न तथा रात्रिः। "तयोः" "एषा" प्राधान्यस्तुतिः "भवति"—॥७(१०)॥

**आ सुषयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ। दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं**

---

* "ता वो ब्रवीमि" ख।

† "दुरो यजति। दृष्टिर्वै दुरो दृष्टि मेव तत् प्रीणाति, दृष्टि मस्मायं यजमाने दधाति"—इति ऐ० १, १, ४।

‡ १ भा० ४६१, ४६२ पृ० ५ अ० २ ख० (८)।

§ १ भा० २२३ पृ० १ अ० ६ पा० १ ख०।

॥ एतच्च निघण्टौ रात्रिनामसु पठितम्। १ भा० ४१ पृ० १ अ० ७ ख० (१०)।

शुक्रपिशन्दधाने ॥ सेध्मीयमाणे इति वा सुष्वापन्त्या-विति वा सीदता मिति वा न्यासीदता मिति वा यज्ञिये उपक्रान्ते दिव्ये योषणे बृहत्यौ महत्यौ सुरुक्मे सुरोचने अधिदधाने शुक्रपेशसं श्रियं शुक्रं शोचतेर्ज्वलतिकर्म्मणः पेश इति रूपनाम पिंशतेर्विपिंशितं* भवति। दैव्या होतारा दैव्यौ होतारावयं चाग्निरसौ च मध्यमस्तयोरेषा भवति ॥ ८ (११) ॥

"आ सुष्वयन्ती"—इति†। 'आसुष्वयन्ती' "सेध्मीयमाणे" परस्परं स्वयमाने, अथ वा "सुष्वापयन्त्यौ" सुष्ठु जनान् स्वापयन्त्यौ। 'यजते' हेतुकर्तृत्वेन यजते "यज्ञिये" यज्ञसम्पादयित्र्यौ। 'उपाके' "उपक्रान्ते" उपगम्य इतरेतरं क्रान्ते। 'दिव्ये' दिविजे द्योतने। 'योषणे' सम्मिश्रे परस्परतः। 'बृहती' "बृहत्यौ महत्यौ"। 'सुरुक्मे' "सुरोचने" सुदीप्ते। ये एते एवमादिगुणयुक्ते उषासानक्ते 'अधिश्रियम्' श्रियम् "अधिदधाने" उपरि स्थापयन्त्यौ, ('शुक्रपिशम्') "शुक्रपेशसम्" शुक्ररूपां श्रियम्, ('आसदताम्') आसीदताम्" एतस्मिन् स्वे "योनौ"। आकार उत्कृष्यते उपसर्गस्य हि क्रियापदेन सामर्थ्यम्,— "न्यासीदताम् इति" नियमेनासीदता मिति; निरुत्तरपदस्थोऽप्युपकृष्य तेनैव क्रियापदेन‡। नि-शब्दस्योत्तरपदो वा पादपूरणः ॥

---

* "पिंशतेर्विपिंशितं" क, ख, ग।

† ऋ० सं० ८, ६, ८, ६। य० वा० सं० आश्वमेधिके द्वादशाग्नीषु सप्तमी (१९,११)।

‡ 'छन्दसि परेऽपि। व्यवहिताश्च"—इति पा० सू० १, ४, ८१-८२।

न ब्रवीत्यग्निरिति, येन द्वित्वानुपपत्तिरिति के चित्। अपरे पुनर्वर्णयन्ति—उषा अग्नेर्दीप्तिः, नक्ता आऽऊतिर्दीप्तिः; विवासयति तमः, आऽऊतिरनक्त्याज्येन। ते एते दीप्त्याऽऊती सुष्ठु स्मयमाने इव 'यजते'। 'यज्ञिये' यज्ञसम्पादयित्र्यौ। 'उषाके' "उषक्रान्ते" परस्परतः। 'दिव्ये' द्योतने परस्पराश्रयणात्। 'योषणे' मिश्रीभूते। ('बृहती') "बृहत्यौ, महत्यौ"। 'सुरुक्मे' "सुरोचने"। 'अधिदधाने' 'शुक्रपिशम्' "शुक्रपेशसम्"। एतस्मिन् यजमाने 'श्रियम्' ('आ सदताम्') "आसीदताम्"। एतस्मिन्नग्नौ "न्यसीदताम्" नियमेनाधिकं वा।— इत्येतदाशास्महे * ॥

"पेश इति रूपनाम †", "पिंशतेः" धातोः; तद्धि "विपिंशितं भवति" विकसितं भवति, यावदाश्रयभावित्वात्। विनिहित मिति के चिदन्याश्रितत्वात् ॥

"दैव्या होतारा"—इति ‡ वक्तव्यम्। "दैव्यौ होतारौ"—इति शब्दसमाधिः। "अयञ्चाग्निरसौ च मध्यमः"—इत्यभिधेयवचनम्। "तयोः" "एषा" प्राधान्यस्तुतिः "भवति"— ॥ ८ (११) ॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै। प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः

---

* "उषासानक्ता यजत्यहोरात्रे वा उषासानक्ताहोरात्रे एव तत्प्रीणात्यहोरात्रयो र्यजमानं दधाति"—इति ऐ० ब्रा० २, १, ४।

† स्मरणार्थ मेतत्। अस्येव रूपनामसु निघण्टौ। १ भा० ३१८ पृ० १ ख० ७ ऋ० (१०)।

‡ १ भा० ४९१, ४९२ पृ० ५ ख० २ ऋ० (९)।

प्रदिशा दिशन्ता ॥ दैव्यौ होतारौ प्रथमौ सुवाचौ निर्मिमानौ यज्ञं मनुष्यस्य (मनुष्यस्य*) यजनाय प्रचोदयमानौ यज्ञेषु कर्त्तारौ पूर्वस्यान्दिशि यष्टव्य मिति प्रदिशन्तौ तिस्रो देवीस्तिस्रो देव्यस्तासा मेषा भवति ॥ ९ (१२) ॥

"दैव्या होतारा"—इति†। यावेतौ "दैव्यौ होतारौ"। देवेषु भवौ दैव्यौ, देवावेव वा दैव्यौ; स्वार्थे एव तद्धितः। मनुष्यहोतारौ होत्र-मैत्रावरुणौ अपेक्ष्य‡। दैव्यौ होतारौ इति विशेषणम्। कौ पुनस्तौ? ('होतारा') "होतारौ" आह्वातारौ देवानाम्, वाग्यज्ञिकलक्षणौ §। ('प्रथमा') "प्रथमौ" मुख्यौ, मनुष्यहोतारावपेक्ष्य ('सुवाचा') "सुवाचौ" प्रशस्तवाचौ, सुस्तुती। 'मिमाना यज्ञम्' यज्ञनिर्मातारौ, नित्यं 'मनुषः' "मनुष्यस्य" 'यजध्यै' "यजनाय"।

---

* नास्त्येतत् पदं क-ख-ग-पुस्तकेषु।

† ऋ० सं० ८, ९, ९, १। य० वा० सं० आश्वमेधिके द्वादशाग्नीध्रवृष्टमौ (१९,३१)।

‡ होता नाम ऋग्वेदो प्रधानर्त्विक्, मैत्रावरुणस्तु तस्य प्रधानसाहाय्यकारी ऋत्विक्। सप्तसु विष्णोषु मैत्रावरुणस्यापि विष्णु मस्ति। "होता यजति * * * मैत्रावरुणो यजति"—इत्यादि सप्तहोत्रविवरणं द्रष्टव्यम्। ऐ० ब्रा० १, २, १। "दक्षिणा श्रोणिर्हौतुः * * * दक्षिणं सक्थि मैत्रावरुणस्य"—इत्यादि च पशुभागो द्रष्टव्यः। ऐ० ब्रा० ७, १, १। "मनो वै यज्ञस्य मैत्रावरुणो वाग् यज्ञस्य होता, मनसा वा दृषिता वाग् वदति; यां ह्यन्यमना वदत्यस्तूर्या वै सा वागदेवजुष्टा"—इति च होत्र-मैत्रावरुणयोः सम्बन्ध उक्तः पर्यग्निविधौ। ऐ० ब्रा० २, १, ५।

§ "तौ याज्ञिकानां प्रथितौ द्वावग्नी (१, १, २५, १)"—इति, "अथच मध्यमस्थानदेवत्यौ (२, १, ११, २)"—इति, "अग्नौ पार्थिवान्तरिक्ष्यौ (२, ५, २३, १)"—इति, "अग्नौ (२, ८, २९, २)"—इति, "अग्नादित्यौ (८, १, ९, १)"—इति च ऋ० सं० सा० भा०। "दैव्याहोतारा यजति प्राणापानौ वै दैव्या होतारा प्राणापानावेव तत् प्रीणाति प्राणापानौ यजमाने दधाति"—इति ऐ० ब्रा० २, १, ४।

'प्रचोदयन्ता' प्रचोदयमानौ 'विदथेषु' "यज्ञेषु" 'कारू' "कर्त्तारौ" ऋत्विजौ; नानग्निको यज्ञोऽस्तीत्यग्निर्निर्मिमीते, न चासावनुपध्मातो वायुना ज्वलतीति वायुर्निर्मिमीते। विज्ञायते हि—"तस्मादेष नानुपध्मातो ज्वलति"—इति। स एष मैत्रावरुणो वायुरग्नेर्हाह-वदधियज्ञे वर्त्तमानस्य नित्यं चोदयिता, तन्मूलत्वाच्च यज्ञकर्मणः। तावेव देवाना माह्वातारौ उच्येते। यावेतावेवं 'प्रचोदयन्तौ' 'विदथेषु' यज्ञेषु, 'कारू' कर्त्तारौ मनुष्यहोतुः अनुग्रहस्य, नित्यं स्वाधिकारकर्मानुग्रहसन्निधानात्। यदेतत् ('प्राचीनं') प्राच्यां दिशि 'ज्योतिः' आहवनीयाख्यं प्रणीयते। प्रदिशा मन्त्रेण प्राची मनु प्रदिशं प्रेहीति अनेन विधिवाक्यप्रदेशेन, अनेन वा "प्राञ्च सुद्धर-न्ति"—इति। एतत् प्रणीय नित्यं यष्टव्य मित्येव मर्थं 'प्रदिशन्तौ' आज्ञापयन्ताविव यौ नित्य मवियोगेन स्वभावतो यज्ञोपकारे वर्त्तमानौ ममाप्येवं वर्त्तेता मिति। एव माख्यात मध्याहृत्य समाप्यते, निराख्यातत्वान्मन्त्रस्य॥

"तिस्रो देवीः"—इति* पदम्। ताः पुनरेताः "तिस्रो देव्यः", प्रथमया ता निराह; तिस्र इति देवीशब्दस्य विशेषणम्। "ताषाम् एषा भवति" प्राधान्यस्तुतिः—॥ ९ (१२) ॥

**आ नो यज्ञं भारती तूयमेत्विळा† मनुष्वदिह चेत-यन्ती। तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः**

---

* १भा० ४९१, ४९२ पृ० ५५० २स० (१०)।
† "मेत्विला" क, ख, ग।

सदन्तु॥ ऐतु नो यज्ञं भारती क्षिप्रं भरत आदित्यस्तस्य भा इला च मनुष्यवदिह चेतयमाना तिस्रो देव्यो बर्हिरिदं सुखं सरस्वती च सुकर्माण आसीदन्तु त्वष्टा तूर्ण मश्नुत इति नैरुक्तास्त्विषेर्वा स्याद्दीप्तिकर्मणस्त्वक्षतेर्वा* स्यात्करोतिकर्मणस्तस्यैषा भवति ॥ १० (१३) ॥

"आ नो यज्ञं भारती"—इति†। आभिमुख्येन अस्माकं यज्ञ मागच्छतु। का पुनरसौ? इति। 'भारती' "भरत आदित्यः" सर्वभूतान्युदकेन बिभर्त्ति, "तस्य" स्वभूता "भाः" दीप्तिः। कथ मेतु? 'तूयम्' "क्षिप्रम्"‡। इला? "च" पृथिवीस्थाना। "इडैवेलया॥ वसुमत्या"—इत्यनुयाजेषु उन्नीतसामर्थ्यात् पार्थिवत्वात्। ('मनुष्वत्') "मनुष्यवत्" 'इह' कर्मणि 'चेतयन्ती' "चेतयमाना" यथा मनुष्येण मनुष्य आहूतो भोक्तु मविलम्बमान आगच्छेत्, क्षिप्र मेव मागच्छतु; सा ममेह कर्मणि हविर्भोक्तव्य मित्येव मर्थं जानाना। 'सरस्वती' "च" मध्यस्थानैव मेव 'चेतयन्ती' आगच्छतु। ता एताः¶ 'तिस्रः' अपि "देव्यः" 'स्वपसः' "सुकर्माणः" अस्मिन् कर्मणि 'इदं बर्हिः' 'स्योनं' "सुखं" प्राप्य एतस्मिन् ('आसदन्तु') "आसीदन्तु"।— इत्येतदाशास्महे** ॥

---

* "०क्षतेर्वा" क, ख, ग।

† ऋ० सं०८,९,९,२। य० वा० सं० आश्वमेधिके द्वादशाग्नौषु नवमी (१९.२२)।

‡ 'तूयं' शीघ्रम्—इति, क।

§ इडा—इति, ‖ "इडैवेडया—इति, ¶ एव मेताः—इति च ख-पाठाः।

** "तिस्रो देवीर्यजति प्राणो वा अपानो व्यानस्तिस्रो देव्यस्ता एव तत् प्रीणाति ता यजमाने दधाति"—इति ऐ० ब्रा० १, १, ४।

"त्वष्टा"—इति* वक्तव्यम्। अत्र त्वक्षतेः क्षिप्रवाचिनः पूर्वपदम्, अश्नोतेरुत्तरपदम्। क्षिप्रं व्याप्नोति, यदनेन व्याप्तव्यं भवति। "त्विषेर्वा" धातोः वृद्ध्यर्थस्य, वृद्ध एव नित्य मसौ देवतावात्। "त्वक्षतेर्वा स्यात्" क्रियासामान्यमाचष्टेः, उत्सृष्टतनूकरणस्यार्थस्य†। "तस्य" "एषा" प्राधान्यस्तुतिः "भवति"—॥ १० (१३) ॥

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा। तं मन्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान्॥ य इमे द्यावापृथिव्यौ जनयित्र्यौ रूपैरकरोद् भूतानि च सर्वाणि तं मन्य होतरिषितो यजीयान् देवन्त्वष्टार मिह यज विद्वान् माध्यमिकस्त्वष्टेत्याहुर्मध्यमे‡ च स्थाने समाम्नातोऽग्निरिति शाकपूणिस्तस्यैषापरा भवति॥ ११ (१४)॥

"य इमे द्यावापृथिवी"—इति§। 'यः' "त्वष्टा" 'इमे' "द्यावापृथिव्यौ" सर्वेषां भूतानां "जनयित्र्यौ" 'रूपैः' नानाविधैः अनेकप्रकारैः "अकरोत्" "भूतानि च सर्वाणि"। अथ वा रूपैरिति कर्त्तैवानया तृतीयया लक्ष्यते;— तत्तद्रूप माख्याय 'यः' त्वष्टा द्यावा-

---

* १भा० ४९१, ४९३ पृ० ५अ० २ख० (११)।

+ "तक्षू, त्वक्षू तनूकरणे"—इति धा० भ्वा० १५५, १५६।

‡ "माध्यमकस्त्वष्टेत्याऽऽहुर्मध्यमे" क, ख, ग।

§ ऋ० सं० ८, ९, ९, १। य० वा० सं० आग्नेयिके द्वादशाग्रीषु दशमी (१९, २५)।

पृथिव्यावकरोत् भूतानि च सर्वाणि * । किं तस्य त्वष्टुः? तं देवम् 'त्वष्टारम्' 'दृह' अद्यैतस्मिन्नहनि कर्मणि वा हे होतः! 'यक्षि' यज 'विद्वान्' जानानः मयेद मवश्यं कर्त्तव्य मिति ॥

माध्यमिकस्त्वष्टेति विचारः। तत्र तावत् "माध्यमिकः त्वष्टा—इति" "आहुः" आचार्याः, के चिन्नैरुक्ता एवं मन्यन्ते। 'माध्यमिकः' —इति सञ्ज्ञाप्रसिद्धिः। को हेतुः? "मध्यमे च स्थाने समाम्नातः" —इति †। किञ्च एतस्मिन्नेव मन्त्रे व्यपदेशात्। कथम्? य इमे द्यावापृथिव्यौ भूतानि च सर्वाण्यकरोत् तं देवं त्वष्टारं यजेति। त्वष्टुरन्यो यष्टा। स एव पुनः सम्बोध्यते हे होतरिति मनुष्यहोता; न चान्यः पार्थिवाद्यग्नेर्होतास्ति ‡, तस्माद् यो यष्टा स पार्थिवः, य इज्यते स मध्यमस्त्वष्टेति। सर्वशिल्पिमता माचार्या देवर्द्धकिर्दाक्षायणीपुत्रो द्वादशाना मादित्याना मन्यतम इत्यैतिहासिकाः §। कोऽत्र निश्चयः? अय मेव "अग्निरिति शाकपूणिः" ॥ ॥

कथं यत्तावन्मध्यमे च स्थाने समाम्नात इति? ¶ अकारणमेतत्—अय मप्यग्निर्मध्यमे स्थाने समाम्नात इति * *। यत्पुनरेतद्

---

* "त्वष्टारं यजति। वाग् वै त्वष्टा, वाग्घीदं सर्वं तष्टीव वाच मेव तत् प्रीणाति वाचं यजमाने दधाति"—इति ऐ० ब्रा० १, १, ४।

† १मा० ४७५ पृ० ५ऋ० ४ख० (२१)।

‡ "अग्निर्वै देवानां होता तस्येष खो लोको यदुत्तरवेदी नाभिः"—इत्यादि ऐ० ब्रा० १, ५, २।

§ "तचेतिहास माचक्षते"—इत्यादि च वक्ष्यत्याचार्यः १२ अ० १ पा० १० ख०।

‖ अतएव "दृह त्वष्टारम् (ऋ० सं० १, १, २५, ४)"—इत्यस्या ऋचायां "त्वष्टारं त्वष्टृनामक मग्निम्"—इत्याह सायणः।

¶ इहैव पृष्ठे ६५० ; ४७०पृ० १०प० मूलेऽपि।

* * १मा० ४७५ पृ० ५ऋ० ४ख० (२२)।

व्यपदेशात् इति?* तदपि समान मिन्द्रेणापि त्वष्टृव्यपदेश इति—त्वष्टा दधदिन्द्राय शुष्म मिति†; अपि च व्यपदेशादन्यत्व मित्यशक्य मध्यवसातुम्; अनन्यत्वेऽपि हि व्यपदेशो भवति। तद्यथा—"अग्नि मग्न आवह"—इति। हे अग्ने! भगवन्! अग्निम् आवह इति व्यपदेशे सत्यनन्यत्वम्; न हि पार्थिवादन्यः सूक्तभाग् हविर्भाग् वा अग्निरस्ति, योऽनेन प्रसिद्धहेतुत्वाभिधानेनाह्वयेत, दृश्येत च—"स्वं महिमान मावह"—इति। स्विष्टकृति विशेषलिङ्गात् स्वय मेवात्मनात्मानं विधिवशात् आङ्क्तानेन संस्कृत्य द्वैधं चैध मनेकधा वा यजति, अन्यद्वाभिनिवर्त्तयति। तद्वदिहापि कर्मात्मनः परो योऽस्य तत्तत्क्रियालक्षणगुणम्, योग्यात्मा यदधिष्ठितः; कर्मात्मा सर्वरूपाणि पाकेन विकरोति। केन विकरोति? त मधिकृत्य उच्यते—"त्वष्टा रूपाणि विकरोति" इति‡। तदय मुच्यते—मनुष्यहेत्वा यज त्व मिति। एवं तावद् व्यपदेशः शक्यप्रतिसमाधानः। यत्पुनरुक्तं देवशिल्पीति? § तत्तद्गुणसामान्यादेवासावपि कौशलातिशय मपेक्ष्योच्यत इत्यदोषः॥ ॥

---

* पुरस्तादिहैव ४८१ष्ठ० ७पं०।

† "त्वष्टा दधच्छुष्म मिन्द्राय"—इति यः वा० सं० २०, ४४।

‡ "त्वष्टा रूपाणि स हि प्रभुः (ऋ० सं २, ५, ९, ४)"—इत्यत्राह सायणः—"त्वष्टा यज्ञसाधनपात्राभिमानी देवः, रूपाणि यानी ह्रस्वानि रेतांसि रूपाणि कर्तुं प्रभुर्हि। हि शब्दः श्रुत्यन्तरप्रसिद्ध्यानार्थः। 'रेतस्य सिक्तस्य त्वष्टा रूपाणि विकरोति'—इति श्रुतेः"—इति।

§ पुरस्तादिहैव ४८१ष्ठ० ११पं०।

॥ तथा च "त्वष्टास्मै वज्रं सुर्यं ततक्ष (ऋ० सं० १, ३२, २)"—इत्यस्य व्याख्यायाम् "त्वष्टा विश्वकर्मा, वज्रं ततक्ष तनूकृतवान्"—इत्याह सायणः।

यथा चाग्निरेव नान्यः, तथा विशिष्टतरलिङ्गा "अपरा" ऋग "भवति"—॥ ११ (१४)॥

आविष्ट्यो वर्द्धते चारुरासु जिह्मानां मूर्द्धः स्वयशा उपस्थे। उभे त्वष्टुर्बिभ्यतुर्जायमानात् प्रतीची सिंहं प्रति जोषयेते ॥ आविरावेदनात्तत्त्यो वर्द्धते चारुरासु चारु चरतेर्जिह्मं जिहीतेरूर्द्ध उच्छ्रितो भवति * स्वयशा आत्मयशा उपस्थ उपस्थाने। उभे त्वष्टुर्बिभ्यतुर्जायमानात् (प्रतीची सिंहं प्रति जोषयेते †)। द्यावापृथिव्याविति वाहोराचे इति वारणी इति वा प्रत्यक्ते सिंहं सहनं प्रत्यासेवेते ॥ १२ (१५)॥

॥ इति अष्टमाध्यायस्य द्वितीयः पादः ॥ ८.२.

"आविष्ट्यो वर्द्धते"—इति ‡। 'आविः' प्रकाशः। स कस्मात्? "आवेदनात्" सर्वस्य प्रकाशनात्। तस्मात् "तत्त्यः" तस्य तनिता 'आविष्ट्यः'। किंलक्षणः? 'चारुः' चरणशीलः, अनवस्थितः। किं करोति? 'वर्द्धते'। क्व? 'आसु' क्रियासु, प्रज्ञासु वा प्रसवाय। कस्य? 'जिह्मानाम्' कुटिलचेतसा मपि मनुष्याणाम् अवैषम्येण

* "जिहीतेरूर्द्ध मुद्गतं भवति"—इति क, ख, ग।

† नास्त्येतत् क-ख-ग-पुस्तकेषु।

‡ ऋ० सं० १, ७, १, ५.=१, १५, १। "अस्य सूक्तस्यौषसगुणविशिष्टोऽग्निः प्रौढोऽग्निर्वा देवता"—इति सा० भा०।

ऊर्द्ध मेव ज्वलति; कुटिलाना मपीन्धनाना मकुटिल ऊर्द्ध मेवेति के चित्। एव मेव 'वर्द्धते'। 'स्वयशाः' "आत्मयशाः" पर मनाश्रित्य यशस्वी। 'उपस्थे' "उपस्थाने" यत्रासावुपनतस्तिष्ठति 'आविक्ष्यः'। योऽय मेवमादिगुणयुक्तः त्वष्टा, तस्य 'त्वष्टुः' अग्नेः 'जायमानाद्' एव 'उभे' द्वे अपि 'बिभ्यतुः'। के पुनस्ते? "द्यावापृथिव्यौ इति"। यथाय मतिमहान् वर्द्धते, अवश्य मय मावां धक्ष्यतीति। "अहोरात्रे इति वा"। सकृदुपज्वलिते महत्यग्नावनुपशाम्यति। अहोरात्रयोरर्थवत्त्वाभावः। तस्मात् ते अपि बिभ्यतुः। अपि नामाय मेव मतिप्रवृद्धः आवा मन्यतर मनुच्छिद्यादिति *। "अरणी इति वा"। अवश्य मय मावां जातो यतो यदा तदा धक्ष्यतीति अतः अरणी अपि बिभ्यतुः। एवं बिभ्यत्यौ किं कुरुतः? नान्या गतिरस्तीति 'प्रतीची' नाम तं प्रत्यञ्चिते अभिमुखे 'सिंहं' "सहनम्" अभिभवनम् 'प्रति जोषयेते' "प्रत्यासेवेते" उपकारकत्वेन; कथं नाम य मावां न भस्मसात् कुर्यादिति॥

एव मय मेवाग्निरिह त्वष्टेति॥ १२ (१५)॥

इति ऋज्वर्थायां निरुक्तवृत्तौ त्रयोदशस्य (अष्टमस्य) अध्यायस्य द्वितीयः पादः॥ ८.२.

---

* "मुच्छिन्द्यादिति" ख।

॥ तृतीयः पादः ॥

**वनस्पतिर्व्याख्यातस्तस्यैषा भवति ॥ १ (१६)॥**

"वनस्पतिः" * अवसरप्राप्तः । स पुनरय मभिधेयतोऽभिधानतश्च "व्याख्यातः"; "एष हि वनानां पाता वा पालयिता वा"—इति † । "तस्य" "एषा" प्राधान्यस्तुतिः "भवति"—॥ १ (१६)॥

**उपावसृज त्मन्या ‡ समञ्जन् देवानां पाथ ऋतुथा हवींषि । वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥ उपावसृजात्मनात्मानं समञ्जन् § देवाना मन्न मृताहुतौ हवींषि काले काले वनस्पतिः शमिता देवो अग्निरित्येते चयः स्वदयन्तु हव्यं मधुना च घृतेन च तत्को वनस्पतिर्यूप इति कात्थक्योऽग्निरिति शाकपूणिस्तस्यैषापरा भवति ॥ २ (१७)॥**

"उपावसृज"—इति ॥ । 'उप' आश्लिष्य 'अवसृज' एतत् पश्चाख्यं 'पाथः' । अनाश्रितविशेषः;—किं मय मग्निर्वा, यूपो वा इत्युच्यते ? उत (वा ¶) अन्य एव कश्चित् ? इति । उत्तरेऽर्द्धर्चे वनस्पतिशब्दः प्रथमा-

---

* १भा० ४९१, ४९४ इ० ५ अ० २ ख० (१२) ।

† परस्ताद्दर्शपूर्णमासाध्याये १पा० ४ख० ४५,४६ इ० ५पं० ।

‡ "उपाव सृजत् त्मन्या"—इति क, ख, ग ।

§ "उपावसृजात्मनात्मन्यासमञ्जन्"—इति क, ख, ग ।

॥ अ० सं० ८, ९, ९, १० । य० वा० सं० आश्वमेधिके द्वादशप्रोक्षेकादश (२९, २५) ।

¶ नास्त्येतत् पदं ख-पुस्तके ।

सम्बन्धात् परोक्षः; इह पुनरुपावसृजेति मध्यमपुरुषयोगात् प्रत्यक्षः कोऽप्यभिधीयत इति सुतरां मनाश्रितविशेषः इति विचारास्पदमिति। अतः परं विचारयिष्यति—"तत् को वनस्पतिः?" इति। 'त्मन्या समञ्जन्' "आत्मना आत्मानम्" अस्य पशोः 'समञ्जन्' समभिव्यञ्जयन् विशिष्टेन संस्कारेण स्वाधिकारसम्बन्धिना *। 'देवानाम्' एतत् 'पाथः' "अन्नम्" एतदमुनैव प्रकारेण 'ऋतुथा' च "ऋतावृतौ" "कालेकाले" षण्मासादौ 'हवींषि' चैतान्यन्यान्यपि आज्यप्रभृतीनि 'उपावसृज' देवेभ्यो देहीति। किञ्च; 'वनस्पतिः', 'शमिता देवः', 'अग्निः'—"इत्येते चयः"। त्रियहणाद् देवशब्दोऽग्निविशेषण मिति दर्शयति। वनस्पतिश्च शमिता चाप्रत्यक्षदेवते एव, अग्निश्च देवोऽग्निरित्येते चयः ('स्वदन्तु') "स्वदयन्तु" स्वाकृता मापादयन्तु। 'मधुना' चोदकेन प्रोक्षणाद्यभिप्रायं 'घृतेन' चैतदस्माभिः संस्कृतं पाथः। —इत्येतदाशास्महे॥

"तत् को वनस्पतिः?"—इत्यादि विचारः †। तत्र तावद् "यूपः इति कात्थक्यः"। कस्मात् यद्यपेतस्या माप्रिया मनाविष्कृतोऽग्नेर्विशेषः, तथापीयम् "अपरा" यूपाञ्जनीया ऋक्; या सन्निपत्य यूपाञ्जने यूप मभिधानेन संस्करोति। तद्यथा ——॥ २ (१७)॥

**अञ्जन्ति त्वा मध्वरे देवयन्तो वनस्पते मधुना दैव्ये-**

---

* "समञ्जन् अतिव्यञ्जयन् विशिष्टेन सम्बन्धिना"—इत्येव ख।

† "वनस्पतिं यजति। प्राणो वै वनस्पतिः, प्राण मेव तत् प्रीणाति प्राणं यजमाने दधाति"—इति ऐ० ब्रा० १, १, ४। "वनस्पतिं यजति। प्राणो वै वनस्पतिर्जीवं ह्यस्य ह्येवं देवानप्येति यश्चैवं विद्वान् वनस्पतिं यजति"—इति च ऐ० ब्रा० १, १, १०।

न। यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे। अञ्जन्ति त्वा मध्वरे देवान् कामयमाना वनस्पते मधुना दैव्येन घृतेन च यदूर्ध्व स्थास्यसि द्रविणानि च नो दास्यसि* यद्वा ते कृतः क्षयो मातुरस्या (उपस्थे†) उपस्थाने अग्निरिति‡ शाकपूणिस्तस्यैषापरा भवति॥ ३ (१८)॥

"अञ्जन्ति त्वा"—इति§। विश्वामित्रस्यार्षम्। पुरोरुक्। "देवेभ्यो वनस्पते"—इति च॥। हे यूप! 'अञ्जन्ति त्वाम्' अलयन्ति त्वाम् ऋत्विग्यजमानाः। क्व? एतस्मिन् 'अध्वरे' यज्ञे। किमिच्छन्तः? ('देवयन्तः') देवान् यष्टुं कामयमानाः। केन अञ्जन्ति? हे 'वनस्पते!' यूप! 'मधुना दैव्येन' संस्कृतेन "घृतेन" इत्यर्थः, देवानां यन्मधु; विज्ञायते हि—"देवानां मधु यद् घृतम्" इति¶। किमित्यञ्जन्ति? 'यद् ऊर्ध्वः तिष्ठाः' यस्मात् अक्तः त्वम् "ऊर्ध्वः स्थास्यसि" अञ्जनादनन्तर मुच्छ्रयिष्यन्ति त्वाम्। यस्माच्च ते 'क्षयः' 'मातुः अस्याः' पृथिव्याः 'उपस्थे' उपरि। क्षयो निवासः, स्थैर्यार्थ

---

* "धास्यसि" क, ख, ग।

† "नास्त्येतत् क-ख-पुस्तकयोः।

‡ "उपस्थानेऽग्निरिति"—इति क, ख, ग।

§ ऋ० सं० ३, १, ३, १।

॥ इदैवानुपदं दर्शयिष्यत्यथ मेवाचार्यः।

¶ "ऐड्ज्मो यूप मनुब्रूहीत्याहाध्वर्युरञ्जन्ति त्वा मध्वरे देवयन्त इत्यन्वाहाध्वरे ह्येनं देवयन्तोऽञ्जन्ति वनस्पते मधुना दैव्येनेत्येतद्वै मधु यदाज्यं यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद् यद्वा क्षयो मातुरस्या उपस्थ इति यदि च तिष्ठासि यदि च श्रयासै द्रविण मेवास्मासु धत्तादित्येव तदाह"—इति ऐ० ब्रा० २, १, २।

भवटः। तस्मादवश्यं मूर्द्धः स्थास्यसि। तथा स्थित्वा पशुधारण-समर्थः, प्रधानक्रियापूर्वाङ्गं * भावयित्वा तद्द्वारेण तत्फलानि "द्रविणानि च" अवश्यम् अस्मभ्यं "दास्यसि",—इत्यतः समञ्जन्ति॥

एव मस्मिन् समञ्जने यूपे वनस्पतिशब्दः प्रयुक्तः। तस्माद् यूपो वनस्पतिरिति †॥

"अग्निः इति शाकपूणिः"। कस्मादिहाप्युपावसृजेति। अस्थाना-विष्कृतवनस्पतिशब्दार्थत्वाद् भवतु परोक्षो यूपः, परम्परा अस्य हविर्वहनलिङ्गलिङ्गिता पुरोरुक् यजतौ सन्निपत्याग्नेर्वनस्पतिशब्देन अभिधायिका ऋग् भवति। तद्यथा——॥ ३ (१८)॥

देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम्।
प्रदक्षिणिद्रशनया नियूय कृतस्यवक्षि पथिभीरजिष्ठैः॥
देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण कृतपर्णापि वोप-मार्थे स्याद्धिरण्यवर्णपर्णेति प्रदिवस्ते अर्थं पुराणस्ते सोऽर्थो यं ते प्रब्रूमो यन्नस्य वह पथिभीरजिष्ठैर्ऋजुतमै-

---

* 'अग्निहोत्रहोमेन स्वर्गं कुर्यादिति प्रकरणकल्पितेन महावाक्येन स्वर्गाय साङ्गाग्निहोत्रप्रयोगो विधीयत इत्येतादृशः प्रयोगविधिः। * * *। अत्राग्निहोत्रहोमः प्रधानम्; प्रणयनादिकं सर्वं मङ्गम्"—इति, "विहितनिषिद्धकर्मणां तत्तद्वाक्यै-स्तत्तत्फलसाधनत्वेऽवगते आगुत्तरविनाशिनां कर्मणां कालान्तरभाविफलसाधन-स्योपपत्त्यर्थं मन्तरा पुण्यपापरूप मपूर्वं कल्पते"—इति च मी० प०। विस्तरतस्तु द्वादशलक्षणीं द्रष्टव्यम्।

† "यूपः सोऽष्टाश्रिः कर्तव्यः"—इति, "पालाशं यूपं कुर्वीत, तेजस्कामो ब्रह्म-वर्चसकामस्तेजो वै ब्रह्मवर्चसं वनस्पतीनां पलाशस्तेजस्वी ब्रह्मवर्चसी भवति"—इत्येवमादि च ऐ० ब्रा० ३, १, १।

रजस्वलतमैः * प्रपिष्टतमैरिति † वा तस्यैषापरा भवति॥ ४ (१९)॥

"देवेभ्यो वनस्पते"—इति। वसिष्ठस्यार्षम्। हे 'वनस्पते!' 'अग्ने!' 'हिरण्यपर्ण' हिरण्योपमपर्ण! (ज्वलित!‡) 'देवेभ्यः' 'हवींषि' 'वक्षि' "वह"। कथम्? इति। 'प्रदक्षिणित्' प्रदक्षिणं देवानां यो हविर्वहन-धर्मः, तेन; पितृधर्मविपरीतेन। कथं वहनम्? 'रशनया' 'नियुत्य' निबध्य, सुनिपुणं यथा न किञ्चिदपि अत्र हविरनवेक्षितं (धूमभृतेन?) प्रधक्षेत्, तथा। अपि च 'ऋतस्य' "यज्ञस्य" 'पथिभिः रजिष्ठैः' य एवं प्रसिद्धाः पन्थानो यज्ञस्य हविर्वहनाय देवान् प्रति ऋजुभ्योऽपि "ऋजुतमैः" यैः-कालो नातिहीयेत; "रजस्वलतमैर्वा" अत्यर्थं मृद्-कवद्भिः; ते हि पथिकानां सुखाः; "प्रपिष्टतमैः" इति सुरूपतमैः॥ प्रहततमस्कैर्यैः असम्मोहः स्याद्, गच्छतस्तैः; न च पुनरविदिते कर्मणि त्वां विनियुञ्महे। यतो ब्रूमः—'प्रदिवः ते अर्थम्' चिरन्तन मेव 'ते' 'अर्थं' हविर्वहनाधिकारलक्षणं विद्मः। "अयं यो होता"—इत्येवमादि-

---

* "०ऋजुतमैः रजस्वलतमै०" ङ, च।

† "रजस्वलतमैस्तपिष्टतमैरिति" ङ, च। "प्रपिष्टतमैरिति" क, ग।

‡,§ इमे परे ख-पुस्तके न स्तः।

॥ वक्ष्यत्यग्रिमे खण्डे—पिष्टतमयेत्यस्यार्थः सुरूपतमयेति (४९० पृ० ८ पं०), "पिष्टम्, पेशः"—इति रूपनामसु च (निघ० ३१८ पृ० ७ ख० ९, १०), परं मूलपुस्तकयोः वृत्तिपुस्तकयोश्च प्रपिष्टतमैरिति ठकारमध्यपाठ एव दृश्यते; पुरस्ताच्च षष्ठेऽध्याये ऋभवानिति पदस्य व्याख्यानावसरे "तपिष्ठैः तप्ततमैः ऋततमैः प्रपिष्ठतमैः" इत्येव (१८५ पृ० २ पं०)। तदत्र तत्त्वं धीमद्भिरनुसन्धेयम्।

मन्त्रेभ्यो "देवा दधिरे हव्यवाहम्"—इति*। अतो ब्रूमहे वहेति॥

एव मेतस्मिन् मन्त्रे हविर्वहनसंयोगाद् वनस्पतिशब्दस्याग्निरभिधेयः॥

अथ "एषा" वनस्पतेः अग्रेः "अपराः" ऋक् "भवति" (सा पुनः किमर्थम्? इति। प्रायोवृत्त्युपदर्शनार्थं बह्वृषु मन्त्रेष्वग्निर्वनस्पतिरिति)—॥ ४ (१९)॥

वनस्पते रशनया नियूय पिष्टतमया वयुनानि विद्वान्। वहा† देवचा दिधिषो हवींषि प्र च दातार मृतेषु वोचः॥ वनस्पते रशनया नियूय सुरूपतमया वयुनानि विद्वान् प्रज्ञानानि प्रजानन्वह देवान् (यज्ञे‡) दातुर्हवींषि प्रब्रूहि च दातार मृतेषु देवेषु स्वाहाकृतयः स्वाहेत्येतत्सु आहेति वा स्वा वागाहेति वा स्वं प्राहेति वा स्वाहुतं हविर्जुहोतीति वा तासा मेषा भवति॥ ५ (२०)॥

"वनस्पते रशनया"—इति। वनस्पतेरेव याज्या। हे 'वनस्पते!' 'रशनया नियूय पिष्टतमया' "सुरूपतमया" अत्यर्थं दृढया एवमादिगुणयुक्तया रशनया नियूय अप्रध्वंसनाय निबध्य 'वयुनानि' स्वाधि-

* "ऋयं यो होता०———०देवा देधिरे हव्यवाहम्॥"—इति ऋ० सं० ८, १, १२, २। अत्राह सायणः—"एव मग्निरात्मानं स्वय मेवोक्तवान्" इति। इस उक्तरसा मप्यृचि "देवा दधिरे हव्यवाहम्"—इति दृश्यते। एव मन्यत्रान्यत्रापि।

† "वह" ङ, च।

‡ नास्येतत् पदं क-ख-ग-पुस्तकेषु।

कारयुक्तानि "प्रज्ञानानि" अस्मदुपकाराय 'विद्वान्' "जानानः" 'वह' एतानि अस्मत्प्रत्तानि 'हवींषि'। अस्य 'दिधिषोः' "दातुः" यजमानस्य अभिमतफलप्राप्तये 'देवत्रा' देवान् प्रति प्रदातारम् 'अमृतेषु वोचः' कथयस्व एनं "दातारम्" 'अमृतेषु' "देवेषु"; अमुना यजमाने एतानि हवींषि प्रत्तानि॥

एव मग्निर्वनस्पतिः॥

यत्पुनरेतदुक्तं यूयाञ्जनीयायाम्—"यूपे वनस्पतिशब्दः" इति *, अत्र ब्रूमः—अग्निरेवासौ यूपान्तर्गतो यूपात्मना वर्त्तमानो यूपाञ्जनीयायां वनस्पतिशब्देनोच्यते। तदुक्तम्—"एष हि वनानां पाता पालयिता वा"—इति †। यस्मादन्तर्गतो वनानां वनानि न दहति, तस्मादेष वनस्पतिः। उक्तञ्च—"योऽयमग्निर्वीरुधि पृथिव्या मग्निरन्तरोषधिवनस्पतिषु अग्नु त मुन्निन्यथुः सर्वगणं सर्वनामानम्"—इति ‡। सोऽयमग्निरेवानेन वनस्पतिशब्देन यूपाभिधानेन वनस्पतिरभिधेय इत्यदोषः॥

अपरे पुनः "अञ्जन्ति त्वा"—इति§, अधियज्ञात् पृथक्त्वेनाधिदैवत मुत्पाद्य शाकपूणिमतेनाग्नि मेव वर्णयन्ति। यदाप्यधियज्ञे अस्य यज्ञाङ्गाभिवादः, तदापि नाधिदैवत मग्नि मभिधातु मस्याः परिहीयते सामर्थ्यं मन्त्रार्थे इति। तत् कथम्? "अञ्जन्ति त्वा मध्वरे देवयन्तः"। हे भगवन् अग्ने! 'अञ्जन्ति त्वाम्' आघाराद्याभि-

* इहैव पुरस्तात् ४८८ पृ० ४ पं०।
† पुरस्तादिहैवाध्याये १पा० ४ख० ४५४ पृ० ५पं०।
‡ पुरस्तात् २८०पृ० १५पं० ६अ० ८ख०।
§ पुरस्तादिहैव पादे २ख० ४८६ पृ० १८ पं०।

राऽऽतिभिः 'अध्वरे' यज्ञे 'देवयन्तः' देवान् कामयमानाः। यस्मात् त्वम् 'ऊर्ध्वः' स्थास्यसि ज्वलिष्यसि, यच्च ते 'क्षयः' 'मातुः' वेद्याः 'उपस्थे' "उपस्थाने" उपरि उत्तरवेद्याः 'क्षयः' निवासः कृतः, तत्रोपज्वलितो "द्रविणानि" धनानि यज्ञसिद्धौ यज्ञफलान्यस्माकं भवद्भ्यं "दास्यसि"—इति, अतस्त्वा माऽऽतिभिरिच्छन्ति॥

कात्यक्यपक्षेऽपि "देवेभ्यो वनस्पते"-"वनस्पतेरग्नयो नियूय"—इत्यनयोरर्थयोजना।— हे 'वनस्पते' वानस्पत्य! यूप! त्वं मुच्यसे। 'हिरण्यपर्ण' ऋतपर्ण! वह एतानि 'हवींषि' अनुस्थिते त्वयि न एतानि उह्यन्त इति त्वं मेवैषां वोढा इति प्रतीमहे। कथञ्च पुनर्वह? 'प्रदक्षिणित्' यथैतानि वोढव्यानि अविपर्यस्यन्नेतेन विधिना 'रश्मनया' एतया चित्रता 'नियूय' परिवीय त्वं मात्मानम् 'ऋतस्य' यज्ञस्य ये पन्थानः रजिष्ठाः प्रदिवः चिरम्, तत एवाद्य मर्थस्वया हवींषि वोढव्यानीति। विज्ञायते च "यूपेन वा आऽऽक्रमयः स्वर्गं लोकं यन्ति"—इति॥——॥ "वनस्पते रश्मनया नियूय"। हे 'वनस्पते' वानस्पत्य! यूप!* 'रश्मनया' पिष्टतमया सुरूपतमया चित्रता 'नियूय' परिवीय त्वं मात्मानं वह एतानि 'हवींषि', स्वाधिकारप्रयुक्तानि प्रज्ञानानि प्रजानन् प्रति दिधिषोः हविर्दातुः अर्थसिद्धये। "प्रब्रूहि च" एनं दातारम् 'अमृतेषु' देवेषु इति॥

"स्वाहाकृतयः" निर्वक्तव्याः। काः पुनस्ताः स्वाहाकृतयः? याः यागार्थं माहूय उत्तमे प्रयाजे स्वाहाकारेण संस्क्रियन्ते, ताः 'स्वाहा-

---

* सायणस्त्वेतन्मत मनुसृत्यैव व्याख्यानवान्—"वनस्पते! वनस्पतिविकार! यूप!"—इत्यादिना।

कृतयः। ननु "मद्यो जातः"—इत्याग्नेयो मन्त्रः (४८४पृ०)? सत्य माग्नेयो मन्त्रः शौनकस्य, तथापि स्वाहाकृतयः समाम्नाताः *। किं कारणम्? "मद्यो जातः"—इत्यनुद्रुत्य अग्नेः स्तुतिमन्त्रे "स्वाहाकृतं हविरदन्तु देवाः"—इति सम्प्रदानम्। तत्र देवतार्थं सम्प्रदान मिति स्वाहाकृतयः समाम्नाताः; नाग्निरिति †॥

अथ स्वाहाकृतयः कस्मात्? स्वाहास्वाहेत्यनुकीर्त्तनेनासा मुक्त-मस्य प्रयाजस्य प्रैषसंस्कारः क्रियत इति स्वाहाकृतयः॥

अथ "स्वाहा—इति एतत्" कस्मात्? "सु" सुष्ठु "आह"—"इति वा"। यदेव सम्प्रदानदेवतायै किञ्चिदाज्यस्येत्यनेन मन्त्रेणाह तुभ्य मिद मिति, तदेव "सु-आह" शोभन माह। एव मस्य 'सुः' पूर्वपदम्, 'आह'—इत्युत्तरपदम् ‡। अथ वा इद मन्यत् ब्राह्मणानु-गतं निर्वचनम्,—"स्वा वागाहेति वा" इति। विज्ञायते हि "तं स्वा वागभ्यवदज्जुजुधीति तत् स्वाहाकारस्य जन्म"—इति। अत्र च स्व-शब्दः पूर्वपदम्, उत्तरपदं तथैव। अथ "स्वं प्राह इति वा"। को विशेषः पूर्वस्मात्? पूर्वपदेऽस्य कारकान्यत्वम्;—स्वा वागाहेति कर्त्तरि, स्वं प्राहेति कर्मणि; प्रपूर्वं चोत्तरपदं प्रकर्षद्योतनाय।

---

* १भा० ४९१, ४९४पृ० ५अ० २ख० (१२)।

† "स्वाहाकृतीर्यजति। प्रतिष्ठा वै स्वाहाकृतयः, प्रतिष्ठाया मेव तद्यज्ञ मन्वतः प्रतिष्ठापयति"—इति ऐ० ब्रा० १, १, ४। "का देवताः स्वाहाकृतय इति? विश्वेदे-वा इति ब्रूयात्। तस्मात् स्वाहाकृतं हविरदन्तु देवा इति"—इति च ऐ० ब्रा० १, १, २।

‡ "स्वाहाशब्दो हविःप्रदानवाची सन् एतन्नामक मग्निविशेषं लक्षयति"—इति ऋ० सं० १, १, १५, ९. ऋग्व्याख्याने सायणः।

"स्वाकृतं हविः जुहोति इति वा" यदनेनैव हविर्जुहोतीति, तदेव सुष्ठ्वापाद्य यथाभिधान मग्नौ जुहोतीति हविःप्रधानोऽत्र निर्देशः*॥

"तासाम्" स्वाहाकृतीनाम् "एषा" "भवति"— ॥ ५ (२०)॥

**सद्यो जातो व्यमिमीत यज्ञ मग्निर्देवाना मभवत्पुरोगाः। अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः॥ सद्यो जायमानो निरमिमित यज्ञ मग्निर्देवाना मभवत्पुरोगाम्यस्य होतुः प्रदिश्यृतस्य वाच्यास्ये स्वाहाकृतं हविरदन्तु देवा इतीमा† आप्रीदेवता अनुक्रान्ता अथ किं देवताः प्रयाजानुयाजा आग्नेया इत्येके॥ ६ (२१)॥**

"सद्यो जातः"—इति‡। योऽय मग्निः 'सद्यः' 'जातः' "जायमानः" अनन्तर मेव 'व्यमिमीत यज्ञम्' निर्वर्त्तयति यज्ञम्। यश्च जातमात्र एव 'अग्निः देवानाम् अभवत्' पुरोगाः' "पुरोगामी" अग्रेतो गामी प्राधान्येन। तस्य 'अस्य' 'होतुः' देवाना माक्रातुः 'प्रदिशि' प्राच्यां दिशि 'ऋतस्य' गतस्य प्रणीतस्य उत्तरवेद्यादिकत्वेन, 'वाचि' "आस्ये" वाचीत्यास्य मेवापेक्ष्य§। 'स्वाहाकृतं' स्वाहाकार-

---

* "याभ्य एव तानि देवताभ्यो हवींषि गृहीतानि भवन्ति, ताभ्यः स्वाहेत्येवैनान्याहवनीये सर्वहुतिं जुहुयात्"—इति ऐ० ब्रा० ७, १, १।

† "देवा इति यजन्ति। इतीमा" ङ, च।

‡ ऋ० सं० ८, ६, ९, ५। य० वा० सं० आश्वमेधिके द्वादशाप्रीष्वन्त्या (१९, २१)।

§ "वाचीत्यास्य मुपस्थ मुपलभ्यत इति पाठान्तर मेवापेक्ष्य"—इति ख।

वलात् मन्त्रेण प्रक्षिप्तं 'हविः' एतदाज्यम् 'अदन्तु' पिबन्तु 'देवाः' स्वाहाकृतयः॥

"इति" इतिकरणोऽधिकारसमाप्त्यर्थः, प्रदर्शनार्थो वा। ("इमाः") एता एव एकादश "आप्रीदेवताः" "अनुक्रान्ताः" इध्माद्याः*। ननु द्वादशानां मनुकीर्त्तनम्? सत्यम्! अनुक्रान्तानां तु एकादश वनस्पत्यन्ताः, यासां मिह विचारः; न तु स्वाहाकृतिषु विचारोऽस्ति। तद्देवतासंस्कारपरत्वात् उत्तमस्य प्रयाजस्य यजतौ एकादशग्रहणात् एकादशप्रयाजविषय एवोत्तरो विचार इत्याचार्याभिप्रायो गम्यते†। ततः किम्? यद्यनुक्रान्तास्तान् प्रति विचारो वर्त्तिष्यते। ननु विचारित मेव "यज्ञेध्म इति कात्यक्यः, अग्निरिति शाकपूणिः"—इत्येवमादि?‡ सत्यम्, विचारित मेतत्। स तु प्रत्येक माप्रीदेवतापदेषु विचारः, अयन्तु सामान्यः प्रकरणगतस्यासा मेव विचारोऽनिश्चितानां निश्चयावधारणार्थः; निश्चितेन हि व्यवस्थितेन विधिना भवितव्यम्; अधियज्ञे यजतौ देवताध्यानाङ्गभावश्रवणात् तदेतद्विषय मनिश्चितम्॥

"अथ"—इति विचाराधिकारवाचिना अथशब्देन विचार मधि-

---

* १इध्मः (समित्), २ तनूनपात्, ३ नराशंसः, ४ इळः (ईडयः), ५ बर्हिः, ६ द्वारः, ७ उषासानक्ता, ८ दैव्याहोतारा, ९ तिस्रो देवीः, १० त्वष्टा, ११ वनस्पतिः, १२ स्वाहाकृतयः। "अथात आप्रियः (४५६० ९पं०)"—इत्याद्यनुक्रान्ताः। अत्र च ब्राह्मणम्—"आप्रीभिराप्रीणाति। तेजा वै ब्रह्मवर्चस माप्रियस्तेजसैवैनं तद् ब्रह्मवर्चसेन समर्द्धयति"—इति ऐ० ब्रा० २, १, ४।

† "एकादश प्रयाजाः, एकादशानुयाजाः, एकादशोपयाजाः, एतेऽसोमपाः पशुभाजनाः"—इति ऐ० ब्रा० २, २, ८।

‡ पुरस्ताद्दैवाध्याये २पा० २ख० ४५९ ६० ११पं०।

क्षत्योपोद्धन्ति—"अथ किन्देवताः प्रयाजाः"—इति*। का प्रयाजेषु देवताः? इति। प्रयाज इति आश्रुतादिर्यजमानोपस्थानान्तक्रियाकलाप उच्यते। प्रयाजेषु ह्रियमानेष्विति प्रसिद्धत्वात्। कुतः संशयः? नानादेवता एव प्रयाजप्रवादाः। आप्रीणां वषट्कारेण सम्बन्धात् सर्वस्य चान्यस्य समञ्जसो विशेषभावः। एवं सति विप्रतिपत्तिराचार्ययोः कात्यक्य-शाकपूण्योः। तस्माद् व्यवस्थाप्यत इति॥

कथं नानादेवताः प्रयाजप्रवादाः? इति। तत्र तावत् "आग्नेयाः इति एके"। कुतः? "आग्नेया वै प्रयाजा आग्नेया अनुयाजाः"—इति च ब्राह्मणम्†। तत्र ये एतस्मिन्नर्थे सौचीकेनाग्निना विश्वैश्च देवैः परस्परसंवादे दृष्टे ऋचौ। स हि किल सौचीकोऽग्निर्विश्वैर्देवैः सह संवदते। त ऊचुः—'एहि नो हवींषि वह' इति। स तानुवाच—'यज्ञे भागोऽस्तु' इति। ते तं प्रत्यूचुः—'वृणीष्व' इति‡। सोऽनयार्चा§ वव्रे—॥ ६ (२१)॥

---

* "प्रयाजवदनुयाजं कर्त्तव्यम्"—इत्यादि ऐ० ब्रा० १, १, ४। "प्रयाजानेवाच यजन्ति"—इत्यादि च ऐ० ब्रा० १, २, ६।

† "तस्मादाऊराग्नेयाः प्रयाजा आग्नेया अनुयाजा आग्नेय माज्य भाग्नेयः पुरोडाशः"—इति कौ० ब्रा०।

‡ यज्ञभूतेन वषट्कारेण देवानां हविर्वहनेन च हतेषु भाटेषु कनिष्ठः सौचीको नामाग्निर्वषट्कारहविर्वहनाभ्यां भीतो देवेभ्यो निर्गत्यापः प्राविशत्। स च मत्स्यैः प्रदर्शितः सन्नवेष्टु मागतैर्देवैः सह "मूहत्नादुखम्(ऋ० सं० १०, ४,९-१०-११)—इत्यादि सूक्तत्रयेण संवादं कृतवान्। विशेषतो तैत्तिरीयके द्रष्टव्यम्। तै० सं० २, ६, ६।

§ इत उत्तर मेव प्रदर्श्यमानयोरार्चयेति यावत्।

प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वन्तं हविषो दत्त-भागम्। घृतञ्चापां पुरुषञ्चौषधीना मग्नेश्च दीर्घमायु-रस्तु देवाः॥ तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः। तवाग्ने यज्ञोऽयमस्तु सर्वस्तुभ्यं नमन्तां प्रदिशश्चतस्रः॥ आग्नेया वै प्रयाजा आग्नेया अनुयाजा इति च ब्राह्मणं छन्दोदेवता इत्यपरं छन्दां-सि वै प्रयाजाश्छन्दांस्यनुयाजा इति च ब्राह्मण मृतु-देवता इत्यपर मृतवो वै प्रयाजाः पशवोऽनुयाजा इति* च ब्राह्मणं प्राणदेवता इत्यपरं प्राणा वै प्रयाजा अ-पाना अनुयाजा इति† च ब्राह्मण मात्मदेवता इत्यपर मात्मा वै प्रयाजाः प्रजा अनुयाजा इति‡ च ब्राह्मण माग्नेया इति तु स्थितिर्भक्तिमाच मितरत्किमर्थं पुनरिद मुच्यते यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्याये-द्वषट् करिष्यन्निति ह विज्ञायते तान्येतान्येकादशाप्री-सूक्तानि तेषां वासिष्ठ माचेयं वाध्यश्वं गार्त्समद मिति नाराशंसवन्ति मैधातिथं दैर्घतमसं प्रैषिक मित्युभयव-न्त्यतोऽन्यानि तनूनपात्वन्तितनूनपात्वन्ति॥ ७(२२)॥

॥ इत्यष्टमाध्यायस्य तृतीयः पादः॥ ८. ३.

* "ऋतवो वै प्रयाजा ऋतवोऽनुयाजा इति च ब्राह्मणं पशुदेवता इत्यपरं पशवो वै प्रयाजाः पशवोऽनुयाजा इति"—ङ, च।

† "प्राणा वै प्रयाजाः प्राणा वा अनुयाजा इति"—ङ, च।

‡ "आत्मा वै प्रयाजा आत्मा वा अनुयाजा इति"—इति ङ, च। "—प्रजा-नुयाजा"—इति ख।

"प्रयाजान् मे अनुयाजांश्च"—इति*। हे विश्वेदेवाः! 'प्रयाजान्' † ('मे') मम 'केवलान्' अनन्यदेवतासम्पृक्तान्, अथ वा निरवशेषान्। 'ऊर्जस्वन्तं' रसवन्तं सर्वस्य 'हविषः' अवधार्य 'दत्तभागं' 'यज्ञे' 'घृतञ्च' 'अपां' सारभूतम्, ताभ्य उत्पन्नम् पिबेय महं प्रथम माज्यभागे। 'पुरुषं च ओषधीनाम्' ओषधिमयानाञ्च हविषो मम पुरुष-पुरोडाशम् एवं नित्यं मम भागः स्यात्। मम 'अग्नेः' हे 'देवाः!' 'दीर्घ मायुः अस्तु'; यथा मत्पूर्वे भ्रातरः हविर्वहन्तः वषट्कारप्रवृक्णाः, नाहं तथा मृषीष्टेत्यभिप्रायः। चयः पूर्वेऽग्रयः प्राग्घव्यं वहन्ते देवेभ्यः, तान् वषट्कारः प्रावृञ्चतेति॥ ——॥ एव मुक्तास्ते अनयोत्तरर्चानुजज्ञिरे तस्य तं भागम्।—तव 'प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः' यथा त्वयोक्तम्। अपि च किं बहुना, 'तवाग्ने! यज्ञोऽय मस्तु सर्वः' त्वदधीन एवायं यज्ञः सर्वोऽस्तु, किञ्च 'तुभ्यं नमन्तां प्रदिशश्चतस्रः' प्रदिशोऽन्तर्भूता दिक्ष्वेव दिङ्निवासीनि भूतानि भोग्यत्वेन कल्पन्ता मित्यर्थः॥ एवं तावदाग्नेयाः॥

अथ नानादेवताः प्रवादा इति यदुक्तम्‡, तदनुप्रदर्श्यते—"छन्दोदेवता इति" एवमादि। तत् कोऽत्र निश्चयः? "आग्नेयाः

---

* ऋ० सं० ८, १, ११, २-४। सौचीक-देवसंवादसूक्तेषु प्रथम एव सूक्ते ऽष्टमी-नवम्याविमे ऋचौ। तत्र प्रथमा सौचीकस्य, उत्तरा विश्वेषां देवाना मिति।

† "प्रयाजान् प्रधानस्य प्रमुखे यष्टव्यानेतन्नामकान् हविर्भागान्, तथानुयाजान् अनु प्रधानाद् पश्चाद् यष्टव्यानेतन्नामकान्, केवलान् असाधारणान्"—इति अत्रैव सा० भा०। आ० श्रौ० २, १. च द्रष्टव्यम्।

‡ पूर्वखण्डव्याख्यानान्ते ४९९ पृ० ४ पं०।

इति तु स्थितिः" तु शब्दोऽन्यप्रवादनिवृत्त्यर्थः। केन विशेषहेतुना आग्नेयत्व मवधियते? ब्राह्मणं मन्त्रश्चोभय माग्नेयत्वे; ब्राह्मणान्येव केवलान्यन्यदेवतात्वे, एतस्माद् विशेषहेतोरवधारयामः—आग्नेयाः इति॥

अथ किं मन्यदन्यतमम्? इति "भक्तिमात्र मितरत्" छन्दोदेवता—इत्येवमादि। तदुक्तम्—"बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति"—इति*। "किं मर्थं पुनरिद मुच्यते" किं विचारणे प्रयोजनम्? इति। "यस्यै देवतायै हविर्गृहीतं स्यात्, तां मनसा ध्यायेद् वषट् करिष्यन्"†—"इति ह विज्ञायते"। मनसेति नामभिः संहितं हविर्देवतायै देवता मुपेयादेवमर्थश्च सर्वत्र विचारः। तथा हि दर्शितम्—"यस्तु सूक्तं भजते यस्मै हविर्निरुप्यते"—इति‡। मनसेति किमर्थम्? केन वान्येन ध्यायेत्? इति। शृणु—सर्वेन्द्रियविषयप्रत्याहृतेन मनसा यथाश्रुतगृहीतभावितानां देवानां नानात्वैकत्वचिन्तेष्वात्मनो हृदये विज्ञानमयी मालिख्य प्रतिकृतिं लक्ष्मीकृत्यान्यमनास्तत्काल मधीत्य याज्यां वषट् करिष्यंस्तदनुचिन्तनसंस्कारसन्तानैकरसेन मनसा हविष्यभिसन्धाय देवतां ध्यायेत् इत्यस्य विशेषस्य द्योतनायार्थप्राप्तस्यापि मनसो ग्रहणं मनसा ध्यायेदिति§।

---

* सप्तमेऽध्याये वैश्वानरीयविचारे द्रष्टव्यम्। ४१९ पृ० १ पं०।

† "साक्षादेव तदेवतां प्रीणाति, प्रत्यक्षाद् देवतां यजति"—इति च तच्छेषः। ऐ० ब्रा० २, १, ८।

‡ पुरस्तात् १९५ पृ० ८ पं०।

§ "मनसा वा दृषिता वाग् वदति, या ह्यन्यमना वाचं वदत्यसुर्या वै सा वाग्देवयुङ्हा। * * *। तन्मनसेरितया वाचा देवेभ्यो हव्यं सम्पादयति"—इति ऐ० ब्रा० २, १, ६।

ब्राह्मणं चैतदर्थ मेवोक्त माचार्येण; अत्र हि विशेषतः पुरुषार्थो ववल्म इति; अतोऽन्यथा हि देवताचिन्तनशून्यं कर्म एतस्मिन् प्रधानकाले विकल मित्यफल मेव स्यात्। एष एव च ध्यानकालो यजमानस्य, आकृतिप्रक्षेपकाले न तथाऽन्येषा मध्वर्युप्रभृतीना माकृतिप्रक्षेपव्यापृतानाम्; लक्षणं हि होतेति॥

"तान्येतानि एकादश आप्रीसूक्तानि" अनुक्रान्तानि। दशधा* दशतयीषु †, तेषा मेकादशं ‡ प्रैषिक मिति §। इतीमानीत्युपप्रदर्शनार्थ मितिकरणः, एष एव तेष्वपि निर्वचनविचारावधारणकल्पः॥

यस्तु तद्गतः कश्चिद् विशेषः, स उच्यते—"तेषां वासिष्ठम् आत्रेयम्"—इत्येवमादि। वसिष्ठेन दृष्टं "वासिष्ठम्", अत्रिणा दृष्टम् "आत्रेयम्", वध्र्यश्वेन "वाध्र्यश्वम्", गृत्समदेन दृष्टं "गार्त्समदम्" ‖। कः पुनरसौ विशेषः? "इति" एतानि "नाराशंसन्ति"। । अथ पुनः "मैधातिथं, दैर्घतमसम्, प्रैषिकम्"

---

* "दशान्यानि"—इति ख।

† दशमण्डलमध्याः ऋक्शाखाः दशतय्यः उच्यन्ते, तत्र दशसङ्ख्याकानि आप्रीसूक्तानि विद्यन्ते इत्यर्थः। तथाहि—मैधातिथम् १, ४, २। (२) दैर्घतमसम् १, ११, २। (३) आगस्त्य माङ्गिरसं वा १, २४, ६। (४) मार्त्समदम् २, १, १। (५) वैश्वामित्रम् ३, १, ४। (६) वासुश्रुत मात्रेयं वा ५, १, ५। (७) वासिष्ठम् ७, १, २। (८) काश्यपेयम् ९, १, ५। (९) वाध्र्यश्वम् १०, ९, २। (१०) जामदग्न्यम् १०, ९, ११।

‡ "इद मेकादशं"—इति ख।

§ ऋग्० सं० ५ का० ९ अनु० १सू० (१९ प्र० १२ सू०) १—११ म०।

‖ "दृष्टं साम"—इति पा० ४, २, ७। इह सामेत्यविवक्षितम्। अतएव वसिष्ठेन दृष्टं सूक्त मपि वासिष्ठ मित्येव। भाष्यं द्रष्टव्यम्।

—इति। मेधातिथिना दृष्टं "मैधातिथम्", "दीर्घतमसा दृष्टं "दैर्घतमसम्" प्रैष इति ग्रन्थः, तेषु यत् तत् "प्रैषिकम्"—"इति" तदिहोपवर्णितम्। एतानि "उभयवन्ति"। । "अतः अन्यानि यानि चत्वारि अवशिष्यन्ते*, तानि "तनूनपात्वन्ति" ॥

अत्र नाराशंसयाजिनो वसिष्ठादयः, तेभ्योऽन्ये तनूनपाद्याजिनः। तान्येतानि अमुना विभागेनावस्थितानि एकादश एकनिर्वचनावधारणानि ॥

अतोऽन्यानि दाशतय्यादाप्रीसूक्तवर्गात् सौत्रामण्यां चीणि †, अन्यश्वमेधयोरेकैकम् ‡। तत्र यानि सौत्रामण्यां तानि अनाग्नेयानीति न परिसङ्ख्यातानि, प्रैषिकेन तु क्रमणात् तेषाम्। आग्निकाश्वमेधिके तु कर्मान्तरेऽपि विनियुज्येते ; न केवल माप्रीषु ; दृष्टकोपधाने—आग्निक मुत्तमायां चितौ "समास्त्वाग्न ऋतवो वर्द्धयन्तु (य० वा० सं० २७, १.)"—इति, द्वादशाप्रीरप्येष्विति। हस्तग्रहणं माश्वमेधिकं यजमानस्य—"समिद्धो अञ्जन् कृदरं मतीनाम् (य० वा० सं० ३९, १)" —इत्याप्रीभिर्हस्तं गृह्णातीति। अत आप्रीकार्ये

---

* आगस्त्यं वैश्वामित्रं काश्यपेयं जामदग्न्यं चेति चत्वारि।

† तथाहि—य० वा० सं० १०, २९—४९. एकादशर्चः प्रथमस्य पशोः आप्रियः; १०, ५५—६१. द्वादशर्चौ द्वितीयस्य पशोराप्रियः; २१, १२—२१. एकादशर्चः वायोधसस्य उत्तमस्य वा पशोराप्रियः।

‡ तथाहि—य० वा० सं० १७, ११—२२. द्वादशर्चः आप्रियः आग्नेये इष्टकाचितौ ऐष्टिके इति वा। य० वा० सं० २९, १—११ ऋचः आश्वमेधिकाप्रिय इति विवेकः। अपरश्चैक आप्रीसूक्तं दृश्यतेऽश्वमेधे (य० वा० सं० २९, २५—३९), तच्च दशतय्या मपि श्रूयते (१०, ९, ११), परिगणितत्व जामदग्न्या मिति, अतो नात्र तस्य पुनरुल्लेखः कृत इति ध्येयम्।

प्रयोगव्यभिचारादाग्नीसूक्तवर्गमध्यपठिते अपि न परिसङ्ख्याते आचार्येण। सौत्रामण्यां तु प्रथमस्य पशोर्या द्वितीया आग्नी, तस्या मेकस्या मेव च नराशंस-तनूनपातौ—"नराशंसः प्रति शूरोऽमिमानस्तनूनपात् प्रति यज्ञस्य धाम (य० वा० स० २० ३७)"—इति। तच्च नराशंसयाजिनां वसिष्ठप्रभृतीनां यागे निपातवत् तनूनपात्पद मनर्थकम्, पादपूरणमात्रेणोपकारं मन्त्रे करोति; तथा तनूनपाद्याजिनां नराशंसपदम्। एष एव अन्यत्राप्येवंविधे देवतापदे प्रयोगादन्यथाभाविनि देवतापदानां निपातकल्पः। तद्यथा—अश्वहविषि अश्वप्रतिग्रहप्रायश्चित्ते "यदद्य सूर"—इति सौर्यमित्रावरुणानां याज्यानुवाक्ये, तयोः मित्रार्यम्णां यानि लिङ्गानि तानि निपातवद्भवन्ति*। तथा 'प्र चित्र मर्कं गृणते तुराय"—इति, अत्र सम्बोधनान्त मग्निपदं नैपातिकम् †, केवलं मारुते हविषि चातुर्मास्येषु वैश्वदेवप्रयोगे पुनः तदेवार्थवत् "आग्निमारुतीं पृश्नि मालभेत वृष्टिकामः" —इत्यत्र च प्रयोगे। एष एव देवतापदविचारः ‡॥

यस्मिन् पक्षे सर्वे आग्नेयाः प्रयाजाः—"प्रयाजान् मे अनुयाजांश्च केवलान् (ऋ० स० ८,१,११,३-४)"—इति मन्त्रदर्शनात्, तस्मिन्

---

* "यदद्य सूर उदिते नागा मित्रो अर्यमा। सुवाति सविता भगः॥"—इति य० वा० सं० ६२, १०। इह मित्र इति पद मर्यमा इति पदञ्चाप्रधान मिति भावः।

† "प्र चित्र मर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम्। ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः॥"—इति ऋ० सं० ५, १, ८, ४। इह 'अग्ने'—इति पद मप्रधान मिति भावः।

‡ "एषां दुरवबोधो देवतापदविचारः"—इति ख।

पक्षे 'तिस्रो देवीः'—इत्यत्र * 'भारती द्युस्थाना', 'मध्यस्थाना सरस्वती', 'पृथिवीस्थाना इला'—इति च तद्देवताचयं दुःप्रतिसमाधानम्। स्थानान्तरापत्तिस्तुत्या चाग्निरेव एता देवता इति प्रतिसमाधानम्। सौत्रामण्यां तूत्तमे पशौ "समिद्धो अग्निः समिधा सुसमिद्धो वरेण्यः"—इत्येता आप्रियः (य० वा० स० २१, १२—२२)। तासु तनूनपादेवैकः—"तनूनपाच्छुचिव्रतः"—इति (१३), नाराशंस एव नराशंसः। तत्र नराशंसयाजिनां सौत्रामणीप्रयोगे कथं प्रयोगः?—किं तनूनपाच्छुचिव्रत इत्येतदेव प्रयुज्यताम्,—उतान्यतः कुतश्चिदाप्रीसूक्तादाकृष्यतां नराशंस इति? न्यायविदो मेधाविनः समनुगंस्यन्ते विशेष मिति† ॥ ५ (२२) ॥

इति ऋग्वेदार्थायां निरुक्तवृत्तौ चयोदशस्य (अष्टमस्य) अध्यायस्य तृतीयः पादः ॥ ८ । ३ ॥

इति ऋग्वेदार्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिनः आचार्यभगवद्दुर्गस्य कृतौ चयोदशः (अष्टमः) अध्यायः समाप्तः ॥ ८ ॥

---

* पुरस्तादिदमेवाध्याये २ पादे ४७७ पृ० ४ पं० ; ४७८ पृ० १८पं० ।

† एष हि प्रश्नोऽग्नेयप्रतिसमाधान इति मत्वान आह दुर्गाचार्यः 'न्यायविदः'—इत्यादि ।

(१ २ ३ ४
द्रविणोदाःकस्माद्द्रविणोदाद्रविणोदसोमेद्यन्तुतेऽ-
५ ६ ७ ८
यातआप्रियःसमिद्वोअद्यतनुनपान्नराशंसस्याजुह्वानः-
९ १० ११ १२ १३
प्राचीनंबर्हिर्व्यचस्वतीरासुषयन्तीर्दैव्याहोतारानोयज्ञं-
१४ १५ १६ १७ १८ १९ २०
यदूमेआविष्योवनस्पतिरुपावसृजाञ्जन्तित्वादेवेभ्योव--
२१ २२
नस्पतेरशनयासद्योजातःप्रयाजान्मे द्वाविंशतिः ॥*)

॥ इति निरुक्ते (उत्तरषट्के) अष्टमोऽध्यायः ॥ ८ ॥

---

* ऋभा० १४५२० "***" द्रष्टव्यम्।

# अथ पञ्चमादि-चतुरध्यायानां सूची ।


| प्रकरणम् | ( विषयः ) | पृ० |
|---|---|---|
| अथ पञ्चमाध्यायः | ... (नैगमव्याख्या) | ... १ |
| प्रथमः पादः | ... (नैग० ४, २, १—३३) | ... ,, |
| द्वितीयः पादः | ... (नैग० ४, २, ३४—४६) | ... ४३ |
| तृतीयः पादः | ... (नैग० ४, २, ४७—६४) | ... ७३ |
| चतुर्थः पादः | ... (नैग० ४, २, ६५—८४) | ... ९९ |
| अथ षष्ठाध्यायः | ... (नैगमव्याख्या) | ... १२९ |
| प्रथमः पादः | ... (नैग० ४, ३, १—२२) | ... ,, |
| द्वितीयः पादः | ... (नैग० ४, ३, २३—४१) | ... १५४ |
| तृतीयः पादः | ... (नैग० ४, ३, ४२—७०) | ... १८१ |
| चतुर्थः पादः | ... (नैग० ४, ३, ७१—१००) | ... २०९ |
| पञ्चमः पादः | ... (नैग० ४, ३, १०१—११६) | ... २३९ |
| षष्ठः पादः | ... (नैग० ४, ३, ११७—१३२) | ... २६१ |
| अथ सप्तमाध्यायः | ... (दैवतव्याख्या) | ... २८५ |
| प्रथमः पादः | ... (दैवतपरिचयः) | ... ,, |
| द्वितीयः पादः | ... (दैवतसङ्ख्यादिनिर्णयः) | ... ३२० |
| तृतीयः पादः | ... (दैवतभक्त्यादिनिर्णयः) | ... ३४४ |
| चतुर्थः पादः | ... (दै० ५, १, १ अग्निः) | ... ३७८ |
| पञ्चमः पादः | ... (दै० ५, १, २ जातवेदाः) | ... ३९३ |
| षष्ठः पादः | ... (दै० ५, १, ३ वैश्वानरः) | ... ३९८ |
| सप्तमः पादः | ... (दै० ,, ) | ... ४१५ |
| अथ अष्टमाध्यायः | ... (अत्रैवाप्रीव्याख्या च) | ... ४३९ |
| प्रथमः पादः | ... (दै० ५, २, १ द्रविणोदाः) | ... ,, |
| द्वितीयः पादः | ... (दै० ५, २, २—११) | ... ४५६ |
| तृतीयः पादः | ... (दै० ५, २, १२—१३) | ... ४८५ |

# अथ खण्डसङ्ख्यानिर्णयः।

पञ्चमाध्यायस्य,—

| | मुद्रितसङ्ख्या * | मतान्तरीया † |
|---|---|---|
| प्रथमे पादे | ६ ( १—६ ) | = ५ ( १—५ ) |
| द्वितीये पादे | ८ ( ७—१४ ) | = ७ ( ६—१२ ) |
| तृतीये पादे | ७ ( १५—२१ ) | = ७ ( १३—१९ ) |
| चतुर्थे पादे | १० ( २२—३१ ) | = ९ ( २०—२८ ) |
| सङ्कलनया | ३१ एकत्रिंशत् | = २८ अष्टाविंशतिः। |

षष्ठाध्यायस्य,—

| | | |
|---|---|---|
| प्रथमे पादे | ५ ( १—५ ) | = ४ ( १—४ ) |
| द्वितीये पादे | ६ ( ६—११ ) | = ५ ( ५—९ ) |
| तृतीये पादे | ७ ( १२—१८ ) | = ७ ( १०—१६ ) |
| चतुर्थे पादे | ८ ( १९—२६ ) | = ६ ( १७—२२ ) |
| पञ्चमे पादे | ५ ( २७—३१ ) | = ६॥ ( २३—२८॥ ) |
| षष्ठे पदे | ८ ( ३२—३९ ) | = ७॥ ( २८॥—३६ ) |
| सङ्कलनया | ३९ ऊनचत्वारिंशत् | = ३६ षट्त्रिंशत्। |

सप्तमाध्यायस्य,—

| | | |
|---|---|---|
| प्रथमे पादे | ५ ( १—५ ) | = ४ ( १—४ ) |
| द्वितीये पादे | ३ ( ६—८ ) | = ३ ( ५—७ ) |
| तृतीये पादे | १० ( ९—१८ ) | = ६ ( ८—१३ ) |
| चतुर्थे पादे | ५ ( १९—२३ ) | ‡ = ७ ( १४—२० ) |
| पञ्चमे पादे | ३ ( २४—२६ ) | |
| षष्ठे पादे | ९ ( २७—३५ ) | = ३ ( २१—२३ ) |
| सप्तमे पादे | ९ ( ३६—४४ ) | = ८ ( २४—३१ ) |
| सङ्कलनया | ४४ चतुश्चत्वारिंशत् | = ३१ एकत्रिंशत्। |

* क-प्रभृतिपुस्तकसम्मता। † ङ-प्रभृतिपुस्तकसम्मता खण्डसङ्ग्रहवाक्यानुगता च।
‡ ङ-प्रभृतिपुस्तकेषु अनयोः पादयोरेकत्वं तदनुगतत्वास्माध्यायस्य षट्पादत्वम्।

अष्टमाध्यायस्य,—

| | | |
|---|---|---|
| प्रथमे पादे | ४ ( १—४ ) | = ३ ( १—३ ) |
| द्वितीये पादे | १२ ( ५—१६ ) | =१२ ( ४—१५) |
| तृतीये पादे | ७ (१७—२३) | = ७ (१६—२२) |
| सङ्कलनया | २३ त्रयोविंशतिः | = २२ द्वाविंशतिः। |

## अथ अकारादिवर्णक्रमेण खण्ड-प्रतीक-सूची।


| खण्डप्रतीकाः ... ... ... | अ० | पा० | ख० | पृ० |
|---|---|---|---|---|
| अग्निं नरो दीधितिभि० ... | ५ | २ | ५(१०) | ५५ |
| अग्निः पूर्वेभिर्ऋषिभिरीड्यो ... | ७ | ४ | ३(१६) | ३८४ |
| अग्नि मीळे पुरोहितं ... ... | ७ | ४ | २(१५) | ३८३ |
| अजोहवीदश्विना* ... ... | ५ | ४ | ३(-२१) | १०२ |
| अञ्जन्ति त्वा मध्वरे देवयन्तो ... | ८ | ३ | ३(१८) | ४८६ |
| अथ यान्येतान्यौत्तमिकानि* ... | ७ | ६ | ८(-२३-) | ४११ |
| अथाकारचिन्तनं देवतानां ... | ७ | २ | २(६) | ३३१ |
| अथात आप्रिय० ... ... | ८ | २ | १(४) | ४५६ |
| अथातो दैवतं ... ... ... | ७ | १ | १ | २८५ |
| अथातोऽनुक्रमिष्यामोऽग्निः ... | ७ | ४ | १(१४) | ३७८ |
| अथादित्यादुदीचिप्रथमसमावृत्त०* | ७ | ६ | ७(-२३-) | ४०८ |
| अथापि वैश्वानरीयो द्वादशकपालो* | ७ | ६ | ५(-२३-) | ४०५ |
| अथाप्यष्टौ द्वन्द्वानि* ... ... | ७ | १ | ५(-४) | ३१३ |
| अथैतानीन्द्रभक्तीन्यन्तरिक्षलोको | ७ | ३ | ३(१०) | ३५२ |
| अथैतान्यादित्यभक्तीन्यसौ लोक० | ७ | ३ | ४(११—) | ३६० |
| अध्वर्गुर्मन्त्रो भवति* ... ... | ५ | २ | ७(—११) | ६० |

| ऋषदप्रतीकाः ... ... ... | अ० | पा० | ख० | पृ० |
|---|---|---|---|---|
| अपा मुपस्थे महिषा अगृभ्णत ... | ७ | ७ | ४(२६) | ४२४ |
| अपुरूषविधाः स्थुरित्यपर मपि ... | ७ | २ | ३(७) | ३३८ |
| अभि प्रवन्त समनेव योषाः ... | ७ | ४ | ४(१७) | ३८६ |
| अमत्रोऽमात्रो महान् ... ... | ६ | ५ | १(२३) | २३८ |
| अय मेवाग्निर्वृविणोदा इति* ... | ८ | १ | ३(—२) | ४४६ |
| अय मेवाग्निर्वैश्वानर इति* ... | ७ | ६ | ६(-२३-) | ४०८ |
| अयं यो होता किरु ... ... | ६ | ६ | ७(३५) | २७८ |
| अरायि काणे विकटे ... ... | ६ | ६ | २(३०) | २६३ |
| अरुणो मासकृद् वृकः ... ... | ५ | ४ | २(२१—) | १०० |
| अलाटणो वल इन्द्र ... ... | ६ | १ | ३(२) | १३५ |
| अश्वं हि भूरिदावत्तरा ... | ६ | २ | ६(८) | १७८ |
| असश्चन्ती भूरिधारे ... ... | ५ | १ | २ | ८ |
| असुर्त्ते सुर्त्ते रजसि निषत्ते ... | ६ | ३ | ६(१५) | १८८ |
| अस्ति हि वः सजात्यं ... ... | ६ | ३ | ५(१४) | १८३ |
| अस्मा इदु प्र भरा ... ... | ६ | ४ | ५(२०) | २२५ |
| अस्मे ते बन्धुः ... ... ... | ६ | २ | ३(७) | १६२ |
| आजामः पूषणं रथे ... ... | ६ | १ | ५(४) | १४४ |
| आजुक्रान ईड्यो वन्द्यश्चा० ... | ८ | २ | ५(८) | ४६८ |
| आधव आधवनात्* ... ... | ६ | ६ | १(—२८) | २६१ |
| आ नो यज्ञं भारती तूय मे० ... | ८ | २ | १०(१३) | ४७८ |
| आपान्तमन्युस्तृपलप्रभर्मा ... | ५ | २ | ८(१२) | ६६ |
| आविष्यो वर्द्धते चारुरासु ... | ८ | २ | १२(१५) | ४८३ |
| आ सुष्वयन्ती यजते उपाके ... | ८ | २ | ८(११) | ४७४ |
| इतीमा देवता अनुक्रान्ताः* ... | ७ | ३ | १०(-१३) | ३७२ |
| इन्द्र आशाभ्यस्परि ... ... | ६ | १ | २(१) | १३२ |
| इन्द्रं मित्रं वरुण मग्नि माहु० ... | ७ | ४ | ५(१८) | ३८० |

| खण्डप्रतीकाः ... ... ... | अ० | पा० | ख० | ऋ० |
|---|---|---|---|---|
| इन्द्रासोमा समघंस मभ्यघं ... | ६ | ३ | २(११) | १८२ |
| इन्द्रो दिव इन्द्र ईशे ... ... | ७ | १ | २(२—) | २८८ |
| उतासि मैत्रावरुणो ... ... | ५ | ३ | २(१४) | ७७ |
| उद् वृह रक्षः सहमूल मिन्द्र ... | ६ | १ | ४(३) | १३७ |
| उपलप्रक्षिण्युपलेषु ... ... | ६ | २ | १(५) | १५४ |
| उपाव सृज त्मन्या समञ्जन् ... | ८ | ३ | २(१७) | ४८५ |
| उर्वश्यप्सरा ... ... ... | ५ | ३ | १(१३) | ७३ |
| उष्णिगुत्स्नाता भवति* ... ... | ७ | ३ | ७(-१२-) | ३६८ |
| एकया प्रतिधा पिबत् ... ... | ५ | २ | ६(११—) | ५६ |
| एतेष्वेव स्थानव्युहेष्वृतु०* ... | ७ | ३ | ५(—११) | ३६२ |
| एषांश्लोकानां रोहेण* ... ... | ७ | ६ | ४(-२३-) | ४०३ |
| कदा मर्त्त मराधसमदा ... | ५ | ३ | ५(१७) | ८२ |
| कारुरहं ततो भिष० ... ... | ६ | २ | २(६) | १५५ |
| किं ते कृण्वन्ति कीकटेषु ... | ६ | ६ | ४(३२) | २७२ |
| कि मित्ते विष्णो ... ... | ५ | २ | ३(८) | ५० |
| कृणुष्व पाजः प्रसितिं ... ... | ६ | ३ | ३(१२) | १८४ |
| कृष्णं नियानं हरयः ... ... | ७ | ७ | १(२४—) | ४१५ |
| गायन्ति त्वा गायत्रिणः... ... | ५ | १ | ६(५) | ३५ |
| जगती गततमं छन्दो० ... | ७ | ३ | ८(१३—) | ३७१ |
| जातवेदसे सुनवाम* ... | ७ | ५ | २(०) | ३८४ |
| जातवेदाः कस्माज्जातानि वेद ... | ७ | ५ | १(१८) | ३८३ |
| जीवान्नो अभि धेतना० ... | ६ | ५ | ४(२७) | २५१ |
| तद्येऽनादिष्टदेवता मन्त्रास्तेषु ... | ७ | १ | ४(४—) | २०६ |
| तनूनपात् पथ ऋतस्य यानान् ... | ८ | २ | ३(६) | ४६४ |
| तन्नस्तुरीप मद्भुतं ... ... | ६ | ४ | ६(२१) | २२८ |
| तां अध्वर उशतो ... ... | ६ | ३ | ४(१३) | १८८ |

| खण्डप्रतीकाः ... ... ... | अ० | पा० | ख० | पृ० |
|---|---|---|---|---|
| तिस्र एव देवता इति नैरुक्ता० ... | ७ | २ | १(५) | ३२० |
| तिस्र एव देवता इत्युक्तं ... | ७ | ३ | १(८) | ३४४ |
| तुञ्जेतुञ्जे य उत्तरे ... ... | ६ | ४ | ३(१८) | २२० |
| तुविग्रं ते सुकृतं ... ... | ६ | ६ | ५(३३) | २७६ |
| त्व मग्ने द्युभिस्त्व० ... ... | ६ | १ | १(१—) | १२८ |
| देवेभ्यो वनस्पते हवींषि ... | ८ | ३ | ४(१८) | ४८८ |
| दैव्या होतारा प्रथमा ... ... | ८ | २ | ८(१२) | ४७६ |
| द्रविणोदाः कस्माद् ... ... | ८ | १ | १ | ४३८ |
| द्रविणोदा द्रविणसो ... ... | ८ | १ | २(२—) | ४४० |
| धेनुं न दृषं पिन्वत† ... ... | ६ | ५ | -५(२८) | २५५ |
| न पापासो मनामहे† ... ... | ६ | ५ | -२(२५) | २४६ |
| न यस्य द्यावापृथिवी ... ... | ५ | १ | ३ | १८ |
| नराशंसस्य महिमान मेषा० ... | ८ | २ | ४(७) | ४६६ |
| निराविध्यद् गिरिभ्य आ ... | ६ | ६ | ६(३४) | २७७ |
| नि यद् वृणक्षि ... ... | ५ | ३ | ४(१६) | ८७ |
| पत्नीवन्तः सुता इम० ... ... | ५ | ३ | ६(१८) | ८४ |
| परोक्षकृताः प्रत्यक्षकृताश्च† ... | ७ | १ | -३(३) | २८६ |
| पविग्रं पुनातेः ... ... | ५ | २ | १(६) | ४३ |
| पुरु त्वा दाश्वान् ... ... | ५ | २ | २(७) | ४७ |
| पूषा त्वेतश्च्यावयतु ... ... | ७ | ३ | २(८) | ३५० |
| पृथक् प्रायन् प्रथमा ... ... | ५ | ४ | ७(२५) | ११५ |
| प्र तक्षे अद्य ... ... ... | ५ | २ | ४(८) | ५२ |
| प्र ननं जातवेदस मश्वं ... ... | ७ | ५ | ३(२०) | ३८४ |
| प्र नू महित्वं वृषभस्य वोचं ... | ७ | ६ | ३(२३—) | ४०१ |
| प्रयाजान्मे अनुयाजांश्च... ... | ८ | ३ | ७(२२) | ४८७ |
| प्र वाताजे सुप्रया ... ... | ५ | ४ | १०(२८) | १२३ |

| खण्डप्रतीकाः ... ... ... | अ० | पा० | ख० | प्र० |
|---|---|---|---|---|
| प्र वोऽच्छा जुजुषाणासो ... | ६ | ३ | ७(१६) | २०३ |
| प्राचीनं बर्हिः प्रदिशा पृथिव्या० | ८ | २ | ६(८) | ४७० |
| प्रीणीताश्वान् हितं जयाय ... | ५ | ४ | ८(२६) | ११८ |
| बतो बतासि यम ... ... | ६ | ५ | ५(२८,२९-) | २५४ |
| बृहती परिबर्हणात्* ... ... | ७ | ३ | ८(—१२) | ३७० |
| मन्त्रा मननाच्छन्दांसि छादनात् | ७ | ३ | ६(१२—) | ३६७ |
| मा त्वा सोमस्य गल्दया ... | ६ | ५ | २-(२४) | २४४ |
| मा नः समस्य दूढ्यः ... ... | ५ | ४ | ५(२३) | १०९ |
| मूर्द्धा भुवो भवति ... ... | ७ | ७ | ५(२७) | ४२७ |
| मेद्यन्तु ते वज्रयो ... ... | ८ | १ | ४(३) | ४५३ |
| य इन्द्राग्नी सुतेषु ... ... | ५ | ४ | ४(२२) | १०५ |
| य इमे द्यावापृथिवी जनित्री ... | ८ | २ | ११(१४) | ४८० |
| यच्चा वदे ते अवरः परस्य ... | ७ | ७ | ८(३०) | ४३२ |
| यथेतदिन्द्रो वैकुण्ठो* ... ... | ७ | १ | ३(-२,३) | २९५ |
| यदा ते मर्त्तो अनु* ... ... | ६ | २ | ५(—८) | १७४ |
| यदेदेन मदधुर्यज्ञियासो ... | ७ | ७ | ७(२९) | ४३० |
| यवं वृकेणाश्विना वपन्तेषं ... | ६ | ५ | ३(२६) | २४८ |
| यावन्नाच सुषसो न प्रतीकं ... | ७ | ७ | ९(३१) | ४३४ |
| यो अक्षौ घ्रंस उत वा ... ... | ६ | ४ | ४(१९) | २२१ |
| वनस्पतिर्व्याख्यात० ... ... | ८ | ३ | १(१६) | ४८५ |
| वनस्पते रशनया नियूय ... | ८ | ३ | ५(२०) | ४९० |
| वराहो मेघो भवति ... ... | ५ | १ | ४(४—) | २७ |
| वामंवामं त आदुरे ... ... | ६ | ६ | ३(३१) | २६७ |
| वृकश्चर्म्मा भवति ... ... | ५ | ४ | १(२०) | ९९ |
| वैश्वानरः कस्माद् ... ... | ७ | ६ | १(२१) | ३९८ |
| वैश्वानरस्य सुमतौ स्याम ... | ७ | ६ | २(२२) | ३९९ |

| खण्डप्रतीकाः ... ... ... | अ० | पा० | ख० | पृ० |
|---|---|---|---|---|
| वैश्वानरीयो द्वादशकपालो भवती०* | ७ | ७ | २(—२४) | ४१८ |
| व्यचस्वतीरुर्विया वि श्रयन्तां ... | ८ | २ | ७(१०) | ४७१ |
| श्रायन्त इव सूर्यं ... ... | ६ | २ | ४(८—) | १७१ |
| स इत्तमोऽवयुनं ततन्वत् ... | ५ | ३ | ३(१५) | ८८ |
| सद्यो जातो व्यमिमीत यज्ञ० ... | ८ | ३ | ६(२१) | ४८४ |
| समान मेतदुदक०* ... ... | ७ | ६ | ८(—२३) | ४१४ |
| समिद्धो अद्य मनुषो दुरोणे ... | ८ | २ | २(५) | ४५८ |
| सस्नि मविन्दच्चरणे नदीनाम् ... | ५ | १ | १ | १ |
| सुगुरसत् सुहिरण्यः ... ... | ५ | ३ | ७(१८) | ८६ |
| सुदेवो असि वरुण ... ... | ५ | ४ | ८(२७) | १२१ |
| सूप्रः सर्पणादिद मपीतरत् ... | ६ | ४ | १(१७—) | २०८ |
| सोमानं स्वरणं कृणुहि ... ... | ६ | ३ | १(१०) | १८१ |
| स्तिया आपो भवन्ति* ... ... | ६ | ४ | २(—१७) | २१५ |
| स्तोमेन हि दिवि देवासो ... | ७ | ७ | ६(२८) | ४२८ |
| स्थूरं राधः शताश्वं* ... ... | ६ | ४ | ८(—२२) | २३७ |
| स्वसराण्यहानि भवन्ति* ... | ५ | १ | ५(—४) | ३२ |
| हविषा जारो अपां ... ... | ५ | ४ | ६(२४) | ११२ |
| हविष्यान्त मजरं स्वर्विदि ... | ७ | ७ | ३(२५) | ४२३ |
| हिनोता नो अध्वरं ... ... | ६ | ४ | ७(२२—) | २३२ |
| हिमेनाग्निं घ्रंस मवारयेथां ... | ६ | ६ | ८(३६) | २८० |


दृढाध्यायाङ्काः सर्वपुस्तकसम्मताः, पादाङ्कास्तु ङ-प्रभृतिपुस्तकविरुद्धा अपि क-प्रभृतिपुस्तकसम्मताः, खण्डाङ्काश्च तथैवाच मुद्रितास्तथैव प्रदर्शिताः; वन्धनीचिह्नान्तर्गतास्तु ते ङ-प्रभृतिपुस्तकानुगतभेदबोधिका। * एतच्चिह्नितप्रतीकाः प्रत्यध्यायावसानश्रुतप्रतीकसङ्ग्रहवाक्यविरुद्धाः। † एतच्चिह्नेन च नस्य प्रतीकत्वे ङ-प्रभृतिपुस्तकाना मेव सम्मतिर्बोध्या। (-२२-) अङ्कोभयत एवैतच्चिह्नेन तत्सङ्ख्याकखण्डस्य तचानारब्धत्व मसमाप्तित्वञ्च बोध्यम्. (—२१) अङ्कादावेवैतच्चिह्नेन तस्य तचानारब्धत्व मेव, तथा (२१—) अङ्कान्तेनैतच्चिह्नेन तस्य तचासमाप्तित्व मिति।

# अथ द्रष्टव्यपदानां सूची।


| पदम् | पृ०।पं० |
|---|---|
| अंशुम् ... ... ... | ५७। ८ |
| अंसत्रकोशम् ... ... | ११९। ४ |
| अंसत्रम् ... ... ... | ११५। १० |
| अंहतिः ... ... ... | १०९। १७ |
| अंहस्वान् ... ... ... | २५१। ९ |
| अंहुरः ... ... ... | २५१। ९ |
| अंहुरणम् ... ... ... | २५१। ९ |
| अक्षणोत् ... ... १८। १७, १२५। ८ | |
| अक्षण्वत ... ... ... | ११५। १ |
| अक्ताः ... ... ... | १२३। १७ |
| अक्रः ... ... ... | २१०। ८ |
| अक्षण्वान् ... ... ... | २।३ |
| अक्षस्कन्ने ... ... ... | २९९। १३ |
| अक्षाः ... ... ... | १८। ११ |
| अक्षितयः ... ... ... | ५७। ९ |
| अक्षितिम् ... ... ... | ५७। ९ |
| अक्ष्णत ... ... ... | ४२४। १९ |
| अग्निः ... ... ... | ३७८। ३—८ |
| अग्निकर्म ... ... ... | २४४। ७ |
| अग्निकर्मणा ... ... | ४१२। २ |
| अग्निभक्तीनि ... ... | २४४। ३ |
| अग्नौ ... ... ... | ३८४। १५ |
| अग्रम् ... ... १३७। ८ | २०३। ५ |
| अग्रणीः ... ... ... | ३७८। ३ |
| अग्रिया ... ... ... | २०३। ३ |
| अघम् ... ... ... | १८३। १ |
| अघशंसम् ... ... ... | १८३। १९ |
| अघायतः ... ... ... | ११०। ४ |
| अङ्गुरः ... ... ... | १२४। ७ |
| अङ्ग ... ... ... | ९२। ११ |
| अचेतनानि ... ... | २३८। १४ |
| अच्छ ... ... ... | १२४। ५ |

| पदम् | पृ०।पं० |
|---|---|
| अजरम् ... ... ... | ४२३। १ |
| अजासः ... ... ... | १४४। ९ |
| अजीगः ... ... ... | १७४। १९ |
| अजीजनन् ... ... ... | ४२९। १ |
| अजोहवीत् ... ... ... | १०२। १ |
| अञ्जन्ति ... ... ... | ४८९। १८ |
| अणुः ... ... ... | २३७। १३ |
| अतसानि ... ... ... | ९७। ९ |
| अतिक्रामन्तः ... ... | १८५। ९ |
| अतिथिदेवत्यम् ... ... | ३०७। ३ |
| अत्याः ... ... ... | १८। १३ |
| अदन्तकः ... ... ... | २९७। १० |
| अदेवताः ... ... ... | ३०७। ४ |
| अधिराजः ... ... ... | ४४७। ३ |
| अध्ययनम् ... ... ... | २४७। २ |
| अध्येषणा ... ... ... | १५५। १४ |
| अध्रिगुः ... ९०। १५, १७. ९१। १. | |
| अध्वरे ... ... ... | १८९। १४ |
| अध्वर्युः ... ... ... | ३२०। १४ |
| अनर्वा ... ... २२९। १९. २४०। २ | |
| अनर्शरातिः ... ... | २३९। १५ |
| अनवभ्रवः ... ... ... | २९१। १३ |
| अनवायम् ... ... ... | १८३। ५ |
| अनादिष्टदेवता ... ... | ३०९। १८ |
| अनार्धनिवासः ... ... | २७३। १ |
| अनित्यदर्शनम् ... ... | १९। ५ |
| अनिर्वचनम् ... ... | ४१८। १५ |
| अनु ... ... ... | १५५। ९ |
| अनुकणति ... ... ... | २९३। ४ |
| अनुदात्तप्रकृति ... ... | ११०। १ |
| अनुयाजाः ... ४९७। २, ९, ७, ८, १०, ११. | |
| अनुलेपनम् ... ... | २७३। ९ |

| पदम् | पृ०।पं० |
|---|---|
| अनुष्टुप् ... ... ... | ३९८। १५ |
| अनूपे ... ... ... | १८। ११ |
| अन्तरिक्षस्थानः ... ... | ३२०। १९ |
| अन्धः ... ... .. | १। ३ |
| अन्धः (स्) ... ... ... | १। १४ |
| अन्धम् (:) ... ... ... | १। १ |
| अपः (स्) ... ... ... | ४२७। १४ |
| अपरम् ... ... | ४९७। ६,८,९,१० |
| अपानः ... ... ... | ४९७। ९ |
| अपारे ... ... ... | १३१। १९ |
| अपिंशत् ... ... ... | ४८०। ६ |
| अपुरुषविधाः ... ... | ३२८। १९ |
| अप्रतिष्कुतः ... ... | २०३। १७ |
| अघा ... ... ... | १८५। ८ |
| अबः ... ... ... | ७३। ११, १२. |
| अबराः ... ... ... | ७३। ११ |
| अभरत् ... ... ... | ४२४। २० |
| अभिधेतन ... ... ... | २५१। १ |
| अभिश्रीः ... ... ... | २९९। १० |
| अभूत ... ... ... | २०३। ३ |
| अभ्यर्हयध्वा ... ... | १५५। १८ |
| अभ्यापादम् ... ... | ४२५। ८ |
| अमे ... ... ... | ३९। १ |
| अमतिः ... ... ... | १८५। ९ |
| अमचः ... ... ... | ३३९। १९ |
| अमचम् ... ... ... | १। १५ |
| अमवान् ... ... ... | १८४। १५ |
| अमा ... ... ... | १। १९ |
| अमिनः ... ... ... | २०३। १४ |
| अमिनात् ... ... ... | ५३। ९ |
| अमीवा ... ... ... | १८५। ४ |
| अमुथा ... ... ... | ३५। १४ |
| अमूर ... ... ... | १७५। ३ |
| अम्यक् ... ... ... | १९८। १४ |
| अरणी ... ... ... | ५५। १७ |
| अराधसम् ... ... ... | ९१। ८ |

| पदम् | पृ०।पं० |
|---|---|
| अराधि ... ... ... | ३९३। १ |
| अरिः ... ... ... | ४७। १२, १३ |
| अरुणः ... ... ... | १०। ३ |
| अरेणुपींस्ये... ... ... | १९३। १ |
| अर्कः ... ३३। १९, १९. ३३। १ | |
| अर्कम् ... ... ... | ३३। १ |
| अर्कैः ... ... ... | २४०। ४ |
| अर्थः... ... ... ... | २५५। १० |
| अर्थम् ... ... ... | ४८८। १० |
| अर्दनवेधिनौ ... ... | २७९। ७ |
| अर्यः ... ... ५२ | १७. ५२। २ |
| अर्यमा ... ... ... | ३९७। १५ |
| अलक्ष्मीः ... ... ... | २९३। ११ |
| अलाढणः... ... ... | १२५। १९ |
| अवतः ... ... ... | ११९। २ |
| अवभृथ ... ... ... | ९४। ११ |
| अवभेत् ... ... ... | ४०१। ९ |
| अवयुनम् ... ... ... | ७९। १७ |
| अवीराम् ... ... ... | २९८। २ |
| अश्नोति ... ... ... | १८। ११ |
| अश्मचक्रम्... ... ... | ११९। ३ |
| अश्मनः ... ... ... | १२९। ९ |
| अश्मनोः ... ... ... | ४४०। ८ |
| अश्वम् ... ... ... | १७८। १७ |
| अश्त्रिमद् ... ... ... | २३९। १५ |
| अश्लीलम् ... ... ... | २३९। १५ |
| अश्विनोः (परिचयः) ... | २८१। १ |
| असक्राम् ... ... ... | २५५। १९ |
| असभ्यभाषणात् ... ... | १०। २ |
| असस्नौ ... ... ... | ९। १० |
| असामि ... ... ... | २४०। ४ |
| असिन्वतौ ... ... ... | १४४। १४ |
| असुसमाप्तः ... ... २५५। १०.१७९। ३ | |
| असुसमाप्तम् ... ... | २४०। ५ |
| असूर्ते ... ... ... | १९८। १३ |
| अस्कुधोयुः... ... ... | १३८। १ |

| पदम् | पृ०।पं० |
|---|---|
| अस्मयुः ... ... ... | ११८ । १३ |
| अस्मासु ... ... ... | ६६ । ६ |
| अस्मे ... ... ... | १६२ । १—७ |
| अहर्दृशः ... ... ... | १४८ । ११ |
| अहस्तम् ... ... ... | १३२ । १३ |
| अहिच्छचकम् ... ... | ८७ । १३ |
| अह्रयाणः ... ... ... | ८० ।७ |
| आ ... ... ... ... | ६५ । १८ |
| आँ ... ... ... ... | ६६ । १ |
| आकारचिन्तनम्... ... | ६३१ । ४ |
| आक्षे ... ... ... | ११५ । ६ |
| आख्यानम्... ... ... | १०२ । ६ |
| आख्यानसमयः ... ... | ६३६ । १ |
| आगधिता... ... ... | ८० । ६ |
| आगन् ... ... ... | १० । ५ |
| आग्निमारुते ... ... | ४०६ । १ |
| आग्नेयम् ... ... ... | ६८५ । ६ |
| आग्नेयाः ...४८४ । १० | ४८७ । ५,५,१२. |
| आघृणिः ... ... ... | ५० । ५ |
| आङ्गूषः ... ... ... | ६१ । १ |
| आचारः ... ... ... | ६०७ । ६ |
| आचार्यः ... ... ... | ६८८ । १४ |
| आचिख्यासा ... ... | २८६ । ८ |
| आजुह्वानः... ... ... | ४६८ । ७ |
| आणिः ... ... ... | १७३ । ८ |
| आण्डौ ... ... ... | १७३ । ७ |
| आत् ... ... ... | १७४ । १५ |
| आत्मजन्मानः ... ... | ६१३ । ११ |
| आत्मदेवताः ... ... | ४८७ । १० |
| आत्मा ...६१२। ८—१३ | ४८७ । ११ |
| आदेयम् ... ... ... | ४८७ । १५ |
| आदितेयम्... ... ... | ४३१ । १ |
| आदित्यकर्म ... ... | ६६० । ५ |
| आदित्यकर्मणा ... ... | ४११ । १६ |
| आदित्यभक्षीनि ... ... | ६६० । १ |

| पदम | पृ०।पं० |
|---|---|
| आदुरिः ... ... ... | ६६७ । १७ |
| आधवः ... ... ... | ६११ । १६ |
| आध्यात्मिकाः ... ... | ६८६ । १ |
| आध्यात्मिकयः ... ... | ६८६ । ६ |
| आध्वर्यवे ... ... ... | ६८६ । ५ |
| आनट् ... ... ... | १७४ ।१५ |
| आनुषक् ... ... ... | १८३ । १६ |
| आपान्तमन्युः ... ... | ६६ । १६ |
| आप्यम् ... ... ... | १८३ । ११ |
| आप्रीदेवताः ... ... | ४८४ । ८ |
| आप्रीसूक्तानि ... ... | ४८७ । १४ |
| आम्नायवचनात् ... ... | ४१६ । ७ |
| आरितः ... ... ... | ८० । ६ |
| आवहम् ... ... ... | ११५ । ६ |
| आर्यः (ईश्वरपुत्रः) ... | ६४८ । १० |
| आवच्च ... ... ... | ११६ । ६ |
| आवापिकानि ... ... | ४६६ । १४ |
| आविः ... ... ... | ४८३ । ६ |
| आविष्ट्यः ... ... ... | ४८३ । ६ |
| आशाः ... ... ... १३६ । ६, ७. | |
| आशिरम् ... ... १७१ । १५. ६७३ । ६. | |
| आशीः ... ... १७१ । १४. ६६६ । ६ | |
| आशीर्वादः ... ... | ६६६ । ६ |
| आशु ... ... ... | १६८ । ८ |
| आशुशुक्षणिः ... ... | १६८ । ७ |
| आश्वेकुः ... ... ... | ४३६ । १७ |
| आश्वमेधिकः ... ... | ६३३ । १ |
| आहावः ... ... ... | ११८ । ६ |
| इत् ५०।१४. ११८। १६. १७८। १५. | |
| ६०३ । ६. ३३५ । ६. ६५१ । ८. | |
| इतरेतरजन्मानः... ... | ६१३ । १० |
| इतरेतरप्रकृतयः ... ... | ६१३ । ११ |
| इत्था ... ... ६५ । १३. १३७।११ | |
| इत्वरम् ... ... ... | १८ । १७ |
| इदंयः ... ... ... | ६६८ । ४ |

| पदम् | पृ०।पं० |
|---|---|
| द्रुघ्नः ... ... ... | ४५६ । १०,११ |
| द्वन्द्वकर्म ... ... ... | ३५२ । ९ |
| द्वन्द्वपानम् ... ... | ४४० । १०. ४४७ । ४ |
| द्वन्द्वभक्षोनि ... ... | ३५२ । ५ |
| द्वन्द्वसखिभिः ... ... | ८० । ६ |
| द्वेमन ... ... ... | १८४ । १६ |
| द्वेलः ... ... ... | ४६६ । १४ |
| द्वेला ... ... ... | ४७८ । १८ |
| द्वेलीविश्रस्य ... ... | २२२ । ८ |
| द्वेषितः ... ... | ४६८ । १२. ४८० । ७ |
| ईट्टेः ... ... ... | ४६६ । १४ |
| ईड्यः ... ... | २८४ । १२. ४६८ । ७ |
| ईम् ... ... ... | १२४ । ५ |
| ईमे ... ... ... | ११५ । ८ |
| ईलते ... ... ... | ४४० । ४ |
| ईळे ... ... ... | ३८३ । २ |
| उत ... ... ... | १७८ । १७ |
| उक्थपात्राणि ... ... | ५७ । १ |
| उच्चावचैः ... ... ... | २९६ । १४ |
| उत्तरे ... ... ... | ४३४ । १४ |
| उदकेश्वनः ... ... ... | ४०८ । ५ |
| उदात्तम् ... ... ... | २५५ । ९ |
| उदारत् ... ... ... | ३८७ । ३ |
| उदीचिप्रथमसमाहृते ... | ४०९ । १६ |
| उद्गाता ... ... ... | ३२० । १४ |
| उद्वृह ... ... ... | १३७ । ५ |
| उपधृक् ... ... ... | २१५ । १२ |
| उपमानस्य ... ... ... | ४३४ । ६ |
| उपलप्रक्षिणी ... १५४ । १४. १५५ । ११. | |
| उपसि ... ... ... | १५५ । १५ |
| उपस्तोषाम ... ... | ४६६ । ९ |
| उपस्थे ४२४ । १९. ४८३ । ७. ४८७ । | |
| उपाके ... ... ... | ४७४ । १६ |
| उपेक्षितव्यम् ... ... | ३२० । १८ |

| पदम् | पृ०।पं० |
|---|---|
| उभयवन्ति ... ... ... | ४९७ । १६ |
| उभयविधाः ... ... | ३३८ । २१ |
| उभयस्य ... ... ... | २३२ । १३ |
| उभयानि ... ... ... | ४६६ । १३ |
| उभे ... ... ... ... | ४८३ । ७ |
| उरणः ... ... ... | १०२ । ४ |
| उराणः ... ... ... | २१० । ९ |
| उरामथिः ... ... ... | १०२ । ४ |
| उरुष्या ... ... ... | ११० । ४ |
| उरुष्यतिः ... ... ... | ११० । ४ |
| उर्वशी ... ... ... | ७३ । १० |
| उर्विया ... ... ... | ४७२ । १७ |
| उल्बम् ... ... ... | २७८ । ८ |
| उशतः ... ... ... | १८९ । १४ |
| उशन्तः ... ... ... | ९४ । ८ |
| उशिक् ... ... ... | १८१ । १२ |
| उषासानक्ता ...४७३ । ५ | ४७४ । १६ |
| उष्णिक ... ... ... | ३६८ । १३ |
| उष्णीषम् ... ... ... | ३६८ । १४ |
| ऊतिः ... ... ... | १९ । १ |
| ऊधः ... ... ... | २२२ । ३, ४. |
| ऊरू ... ... ... | ४७३ । ३ |
| ऊर्जस्वन्तः ... ... ... | ४९७ । ३ |
| ऊर्जस्वन्तम् ... ... ... | ४९७ । १ |
| ऊर्णा ... ... ... | १० । ५ |
| ऊर्द्वः ... ... ... | ४८३ । ३ |
| ऊर्मिः ... ... ... | १०९ । १५ |
| ऊर्वः ... ... ... | १६३ । ५ |
| ऋकसंस्तविकी ... ... | ३४४ । ९ |
| ऋग्भाजः ... ... ... | ३७२ । १४ |
| ऋग्मियम् ... ... ... | ४२५ । २ |
| ऋचीषमः ... ... ... | २३९ । १३ |
| ऋजीषम् ... ... ... | ६६ । १७ |
| ऋजीषी ... ... ६६ । १६. ६७ । १ | |

| पदम् | मं०।सू० |
|---|---|
| ऋजुः ... ... ... | १।२२८।१६ |
| ऋजुनीती... ... ... | १।२२८।१६ |
| ऋञ्जतिः ... ... ... | १।२२८।१५ |
| ऋणे ... ... ... ... | १।११५।७ |
| ऋतवः ... ... ... | १।४९७।७ |
| ऋतस्य २२२।७. ४६४।१२. ४८८।११ | |
| ऋतावृधौ ... ... ... | १।४८५।९ |
| ऋतुथा ... ... ... | १।४८५।७ |
| ऋतुदेवताः ... ... | १।४९७।७ |
| ऋतुयाजेषु... ... ... | १।४४०।९ |
| ऋतेषु ... ... ... | १।४९०।५ |
| ऋदूदरः ... ... ... | १।१४४।१० |
| ऋदूपे ... ... १४४। १२२ | २७६।५ |
| ऋदूदृधा ... ... ... | १।२७६।२ |
| ऋन्धन् ... ... ... | १।४६४।११ |
| ऋबीसम् ... ... ... | १।२७८।९ |
| ऋबीसे ... ... ... | १।२८०।१५ |
| ऋषिपुत्रा ... ... ... | १।१०।६ |
| ऋष्वा ... ... ... | १।२२१।७ |
| | |
| एकम् ... ... ... | १।९९०।१० |
| एकया ... ... ... | १।५६।१४ |
| एके ... ... ... ... | १।४९४।१० |
| एधमानद्विट् ... ... | १।२२२।११ |
| एनम् ... ... ... | १।१२४।६ |
| एना ... ... ... | १।१२४।६ |
| एयात् ... ... ... | १।१२४।९ |
| | |
| ऐश्वर्यम् ... ... ... | १।४४६।१६ |
| | |
| ओजः ... १७१।१३. २४०।५ | |
| ओजसा ... ... ... | १।१७१।१३ |
| ओदनम् ... ... २७७।९. २७२।६ | |
| ओमना ... ... ... | १।१४५।६ |
| ओमासः ... ... ... | १।७९।९ |

| पदम् | मं०।सू० |
|---|---|
| औत्तमिकानि ... ... | १।४११।१६ |
| औपमन्यवः ४७।१८. २६२।३. ५. | |
| और्णवाभः ... ... ... | १।८९।१५ |
| औशिजः ... ... ... | १।८१।११ |
| औषधम् ... ... ... | १।१४।९ |
| | |
| कंसम् ... ... ... | १।४०९।१६ |
| ककुप् ... ... ... | १।१८८।१४ |
| कक्षीवान् ... ... ... | १।८१।११ |
| कक्ष्यावान् ... ... ... | १।८१।११ |
| कट्किन्ना ... ... ... | १।२२।२ |
| कणः ... ... ... | १।१२।५ |
| कणतिः ... ... ... | १।१२।४ |
| कण्वाय ... ... ... | १।५६।२. |
| कत् ... ... ... | १।५१।१ |
| कत्पयम् ... ... ... | १।२७।११ |
| कपनाः ... ... ... | १।४४।१५ |
| कपूयम् ... ... ... | १।११।१४ |
| कम् ... ... ... ... | १।४२।१ |
| करञ्जौ ... ... ... | १।१०९।१८ |
| करुल्लती ... ... १६४।१. २६७।१७ | |
| कर्मजन्मानः ... ... | १।२१३।११ |
| कर्मस्थयज्ञात् ... ... | १।२१०।१४ |
| कर्मात्मानः ... ... ... | १।२२९।१ |
| कलाः ... ... ... | १।५५।१६ |
| कवचम् ... ... ... | १।१५।११ |
| कवयः ... ... ... | १।५१।९ |
| कवासखः ... ... ... | १।१२।६ |
| कवितमस्य ... ... ... | १।९०।२ |
| काकुदम् ... ... ... | १।११९।७ |
| काणः ... ... ... | १।१९३।३ |
| काणुका ... ... ... | १।५६।१६ |
| कात्यक्यः ... ... ... | १।५५९।११. |
| ५५४।१५. ४७३।४. ४८५।१३ | |
| कामदेवता ... ... ... | १।२०७।२ |
| कारुः ... ... ... | १।१५५।८ |

| पदम् | पृ०।पं० |
|---|---|
| काकू... ... ... ... | ४७६ । १७ |
| कालकर्णोपेतः ... ... | १६२ । ११ |
| काशिः ... ... ... | १३१ । ८ |
| काष्ठाः ... ... ... | ४०१ । २४ |
| किः ... ... ... ... | २७८ । ३ |
| किंतवः ... ... ... | १०६ । १ |
| किमीदिने ... ... ... | १८३ । ६ |
| कियेधाः ... ... ... | २२५ । ६ |
| कीकटाः ... ... ... | २७३।१ |
| कीयतः ... ... ... | १३७ । ६ |
| कुटतेः ... ... ... | २६३ । ६ |
| कुटस्य ... ... ... | ११२ । १० |
| कुणारुम् ... ... ... | २३१ । १३ |
| कुत्सितार्थीयम् ... ... | ४७ । १८ |
| कुब्जः ... ... ... | २६८ । १५ |
| कुरुः ... ... ... ... | २३७ । १४ |
| कुरुराजः (राजा) ... ... | २३७ । १४ |
| कुलम् ... ... ... | २३७ । १६ |
| कुलिशः ... ... ... | २१५ । ११ |
| कुशिकाः ... ... ... | २८६ । ८ |
| कूरम् ... ... ... | २३७ । १५ |
| कूलम् ... ... ... | १३१ । १२ |
| क्षणुहि ... ... ... | १८१ । ६ |
| क्षणुध्वम् ... ... ... | ११८ । १६ |
| क्षत्तिः ... ... ...१०५ । ११, १३ | |
| क्षत्तिवासाः... ... ... | १०५ । १३ |
| क्षधु... ... ... ... | १३८ । २ |
| क्षपा ... ... ... | १७५ । ६ |
| क्षमिः ... ... ... | १८५ । ५ |
| क्षषिप्रशंसा.... ... ... | २६६ । १३ |
| क्षेपयः ... ... ११२।१४. ११५।३ | |
| क्षोकुवा ... ... ... | ११६ । ८ |
| क्षोकूयतेः ... ... ... | ११६ । ६ |
| क्षोभः ... ... ... | ११६ । ५, ६. |
| क्षोपयति ... ... ... | २७८ ।५ |
| क्षौरयाणः ... ... ... | ८० । ४ |

| पदम् | पृ०।पं० |
|---|---|
| क्षत्वा ... ... ... | २४८ । १३ |
| क्षव्यम् ... ... ... | १८३ । ४ |
| क्षव्यादे ... ... ... | १८३ । १७ |
| क्षिविर्दती ... ... ... | २६३ । १७ |
| क्षौतापतिम् ... ... | १७६ । ३ |
| क्षूरम् ... ... ... | २३७ । १५ |
| क्षौष्टकिः ... ... ... | ४४० । ६ |
| क्षणिः ... ... ... | ११६ । ८ |
| क्षयः ... ... ... | ४८७ । ४ |
| क्षयन्तम् ... ... ... | ५३ । १८ |
| क्षरतिनिगमः ... ... | १८ । १३ |
| क्षियतिनिगमः ... ... | १८ । १३ |
| क्षोणस्य ... ... ... | १५६ । १ |
| क्षुभ्नम् ... ... ... | ८७ । १३ |
| | |
| गणः... ... ... ... | २८० । १७ |
| गधतिः ... ... ... | ८० । २ |
| गधम् ... ... ... | ८० । १ |
| गमनवेधिनौ ... ... | २७६ । ७ |
| गरुत्मान् ... ... ... | ३६० । १३ |
| गरूथम् ... ... ... | २१५ । ६ |
| गवद्या ... ... ... | २४४ । ११ |
| गवद्रा ... ... ... | २४४ । १५ |
| गायत्री ... ... ... | ३६७ । ४ |
| गार्त्समदम् ... ... ... | ४६७ । १५ |
| गिरा ... ... ... | २४४ । १४ |
| गिर्वणाः ... ... ... | १६४ । २ |
| गीत्या ... ... ... | २४४ । १४ |
| गुणः ... ... ... | २८० । १७ |
| गुर्वात्मा ... ... ... | ३६० । १४ |
| गोः ... ... ... ... | १३५ । ७ |
| गोपयत्यम् ... ... ... | १ । १२ |
| गोपाः ... ... ... | ३५० । ४ |
| गोमान् ... ... ... | १८ । ११ |
| ग्रसिष्ठः ... ... ... | १७४ । १५ |
| ग्रावस्तुतिः ... ... ...३३८ । १७, २१ | |

| पदम् | पृ०।पं० |
|---|---|
| धर्मम् ... ... ... | १७२ । २ |
| घृतम् ... ... ... | ४१६ । २ |
| घृतस्य ... ... ... | २८६ । १२ |
| घृतेन ... ... ... | ४१६ । २ |
| घोरचक्षसे ... ... ... | १८३ । ४ |
| ध्रंसः ... ... ... | २२२ । १ |
| ध्रंसम् ... १४५ । ६. २८० । १४ | |
| चनः ... ... ... | २०३ । ८ |
| चरणे ... ... ... | २ । १७ |
| चरथे ... ... ... | २२५ । ५ |
| चरिष्णू ... ... ... | ४३० । १६ |
| चरः ... ... ... | १८२ । २ |
| चर्षणिः ... ... ... | ११९ । १० |
| चस्कन्द ... ... ... | ७२ । १५ |
| चाकन् ... ... ... | २५५ । ७ |
| चातमामसि ... ... | २६३ । २ |
| चान्द्रमस्यः ... ... ... | ५७ । ४ |
| चारुः ... ... ... | ४८३ । २ |
| चिकित्वान् ... ... | ४५९ । १० |
| चित् ... ... ... | २५ । १५ |
| चेतनावत् ... २२१ । ६. २२८ । १४ | |
| चेतयन्ती ... ... ... | ४७८ । १८ |
| चोदयन्ना ... ... ... | ४७६ । १७ |
| चोष्कूयमाणः ... ... | २२२ । १० |
| छन्दांसि ... २६७ । २. ४९७ । ६, ७ | |
| छान्दोमिकम् ... ४०६ । ८. ४१९ । ६ | |
| जगती ... ... ... | २७१ । ११ |
| जउक्षतीः ... ... ... | २०३ । १६ |
| जनमाने ... ... ... | १७१ । ९ |
| जनयः ... ... ... | ४७२ । १७ |
| जनस्रियम् ... ... ... | १४४ । ८ |
| जनिची ... ... ... | ४८० । ६ |

| पदम् | पृ०।पं० |
|---|---|
| जबाह ... ... ... | २१५ । ७ |
| जमदग्नयः ... ... ... | ४१९ । ७ |
| जयाथ ... ... ... | ११८ । १६ |
| जरूथम् ... ... ... | २१५ । ९ |
| जलदुर्गम् ... ... ... | २९४ । १२ |
| जव्हवः ... ... ... | २४६ । १८ |
| जवति ... ... ... | १ । ८ |
| जा ... ... ... ... | १७९ । ४ |
| जानः ... ... ... | ४९४ । ४ |
| जातवेदसम् ... ... | २९५ । २ |
| जातवेदसानाम् ... ... | २९५ । ३ |
| जातवेदसी ... ... ... | २९५ । ५ |
| जातवेदसे ... ... ... | २९५ । ५ |
| जातवेदाः ... ... ... २९२ । २—६ | |
| जामाता ... ... ... | १७९ । ४ |
| जारः ... ... ... | ११२ । ९ |
| जारयाथि ... ... ... | २९९ । २ |
| जालम् ... ... ... | २५१ । ५ |
| जिगर्त्तिः ... ... ... | १७२ । १७ |
| जिघर्त्ति ... ... ... | ४१६ । २ |
| जिन्वतिः ... ... ... | २२७ । १७ |
| जिह्मम् ... ... ... | ४८३ । २ |
| जिह्वा ... ... ... | ११९ । ८ |
| जीवात् ... ... ... | २५१ । १ |
| जुजुषाणासः ... ... | २०३ । २ |
| जूर्णिः ... ... ... | १४५ । ५ |
| ज्योतिषी ... ... ... | २८४ । १५. २९० । १५. २९५ । ५, ९. ४२४ । १४. |
| जोषवाकम् ... ... १०२ । ८. १०५ । ७ | |
| ततः ... ... ... ... | १५५ । १० |
| ततक्षुः ... ... ... | २५१ । ८ |
| ततनष्टिम् ... ... ... | २२१ । १७ |
| ततन्वत् ... ... ... | ७९ । १८ |
| ततुरिम् ... ... ... | १२७ । १९ |
| तनूः ... ... ... ... | ४५९ । १२ |

| पदम् | पृ०।पं० |
|---|---|
| तनूनपात् ... ... ... | ४५६ । ११ |
| तनूनपात्त्वम् ... ... | ४६७ । १७ |
| तनूग्रधम्... ... ... | २२१ । ६ |
| तन्वः ... ... ... ... | ४५६ । १५ |
| तपः ... ... ... ... | २४७ । २ |
| तपिष्ठैः ... ... ... | १८५ । २ |
| तपुः ... ... ... ... | १८३ । २ |
| तपुषिम् ... ... ... | १२७ । ६ |
| तमः ... ... ... ... | ७६ । १८ |
| तरुष्यतिः ... ... ... | ६ । १७ |
| तलम् ... ... ... | ११६ । १२ |
| तल्पारोहणम् ... ... | २५१ । १० |
| तवसः ... ... ... | ५३ । ३ |
| तष्टा ... ... ... | १०० । २ |
| तस्थिम ... ... ... | १५५ । १३ |
| तान्त्राणि ... ... ... | ४६६ । १४ |
| तालु ... ... ... | ११६ । १० |
| तितनिषुम् ... ... ... | २२२ । ५ |
| तिष्ठाः ... ... ... | ४८७ । १ |
| तिस्र ... ... २२० । ११ | ३४४ । २ |
| तिस्रोदेवीः ... ... ४७७ । ४. | ४७८ । १६ |
| तुङ्गः ... ... ... | २१५ । १५ |
| तुङ्गेतुङ्गे ... ... ... | २२० । ३ |
| तुर्वणिः ... ... ... | १६४ । १ |
| तुविद्युम् ... ... ... | २७६ । ३ |
| तूतुम् ... ... ... | ११५ । ६ |
| तूतुजानः ... ... ... | २२५ । ३ |
| तूयम् ... ... १० । १. | ४७८ । १८ |
| तुरीयम् ... ... ... | २२८ । ११ |
| तूर्णाशम् ... ... ... | ८७ । ११ |
| तूर्णिः ... ... ... | ४२७ । १० |
| त्वपलप्रभर्मा ... ... | ६६ । १२ |
| त्वष्टा ... ... ... | १८५ । १ |
| नैटिकिः ... ... ... | १२२ । ५ |
| नौदः ... ... ... | ४४ । २ |
| नौरयाणः ... ... ... | ८० । ५ |

| पदम् | पृ०।पं० |
|---|---|
| त्मन्या ... ... ... | ४८५ । ५ |
| त्रिष्टुप् ... ... ... | ३७० । ६ |
| त्रेधाभावाय ... ... | ४२६ । ५ |
| त्वक्षतेः ... ... ... | ४७६ । ४ |
| त्वष्टा ... ... ४७६ । ३. | ४८० । ११ |
| त्वष्टारम् ... ... ... | ४८० । ७ |
| त्विषेः ... ... ... | ४७६ । ४ |
| दधिषे ... ... ... | ११५ । १० |
| दनः... ... ... ... | २६८ । १ |
| दभ्नुवन्ति ... ... ... | ६७ । ७ |
| दशतयीषु ... ... ३४४ । ८. | ३६५ । ३. |
| दस्रतेः ... ... ... | ४०१ । १२ |
| दस्युः ... ... ... | ४०१ । १२ |
| दक्षा... ... ... ... | २४८ । ५ |
| दाक्षिणाजाः ... ... | १७६ । ३ |
| दानकर्म ... ... ... | २४७ । २ |
| दार्ष्टिविषयिकम्... ... | ३४४ । ६ |
| दिधिषोः ... ... ... | ४६० । २ |
| दिविष्ठिषु ... ... ... | २३३ । १ |
| दिव्यः ... ... ... | ३६० । १३ |
| दिशन्ता ... ... ... | ४७७ । १ |
| दिशा ... ... ... | ४७७ । १ |
| दौधिम ... ... ... | १७१ । ६ |
| दीर्घप्रयज्युम् ... ... | ६ । १३ |
| दुरितानि ... ... ... | १८५ । ७ |
| दुरोणे ... ... ... | ४५६ । ६ |
| दुर्नामा ... ... ... | १८५ । ७ |
| दुर्भिक्षे (नव दृत्तयः) ... | १५४ । १५ |
| दुष्कृतस्य कर्मणः पुनःपुनः सेवाम् (६)... | २५१ । ११ |
| दुष्टरा ... ... ... | ११५ । १ |
| दूढ्यः ... ... ६ । १४. | १०६ । १० |
| दूतः ... ... ...१ । ८. | २३७ । १६ |
| दूरेदृशम् ... ... ... | ११ । १६ |
| दृत्तहा ... ... ... | २२२ । ८ |

| पदम् | पृ०।पं० |
|---|---|
| दृष्टव्यम् ... ... ... | ११०। २ |
| देवः ... ... ... ... | ३८३। ४—५ |
| देवता ... ... ... | ३८३। ५ |
| देवतावत् ... ... ... | ३०७। ४ |
| देवतोपपरीक्षा ... | २८५। ८. ३०६। १८ |
| देवत्रा ... ... ... | ४९०। २ |
| देवदेवत्यम्... ... ... | ३०७। ३ |
| देवयज्या ... ... ... | २३२। ४ |
| देवयन्तः ... ... ... | ४८६। १८ |
| देवकृतयः ... ... ... | ११५। ४ |
| देवाच्या ... ... ... | १७५। ५ |
| दैर्घतमसम्... ... ... | ४९७। १६ |
| दैवतम् ... ... ... | २८५। ६ |
| दैव्याहोतारा | ४३२। १८. ४७५। ६. ४७६। १६ |
| दैव्येन मधुना ... ... | ४८७। ३ |
| द्यभिः ... ... ... | १२९। ७ |
| द्यमान् ... ... ... | २२१। १७ |
| द्युम्नम् ... ... ... | ३६। २ |
| द्युस्थानः ... ... ... | ३२०। १२ |
| द्यूतनिन्दा ... ... ... | २९६। १३ |
| द्रप्सः ... ... ... | ७७। ४ |
| द्रवति ... ... ... | १। ८ |
| द्रविणसः ... ... ४४०। २. ४४७। १ |
| द्रविणम् ... ... ... | ४३९। ५ |
| द्रविणोदाः... ... ४३९। ५. ४४०। ५. ४४६। १० |
| द्राविणोदसम् ... ४४०। ८. ४४७। १ |
| द्राविणोदसाः ४४०। ९. ४४६। ११ |
| द्रोणम् ... ... ... | ११८। १ |
| द्रोणाद्रावम् ... ... | ११९। १ |
| द्वयोः ... ... ... | २१०। ५ |
| द्वादशकपालः ...४०५। ४. ४१८। १५ |
| द्वारः ... ...४७०। ११. ४७२। ३ |
| द्विता ... ... ... | १९। ६ |
| द्विबर्हाः ... ... ... | २१०। ५ |

| पदम् | पृ०।पं० |
|---|---|
| धत्तात् ... ... ... | ४८७। १ |
| धन्व (न्) ... ... १८। १०. ३५। १० |
| धन्वन्ति ... ... ... | ३५। ११ |
| धमनयः ... ... ... | २४४। १५ |
| धमन्तीः ... ... ... | १३५। १० |
| धर्मणे ... ... ... | ४२३। २ |
| धानाः ... ... ... | ६७। २ |
| धामच्छद् ... ... ... | ४१६। ४ |
| धामभिः ... ... ... | ९। १९ |
| धियध्याः ... ... ... | ४६६। १० |
| धिषणा ... ... ... | ४५४। ३ |
| धिष्ण्याः ... ... ... | ४५४। ३ |
| धुनिः ... ... ... | ६६। १५ |
| धूमकेतुः ... ... ... | १४५। २ |
| धेतन ... ... ... | २५१। १ |
| धेना ... ... ... | २१०। ३ |
| ध्यायेत् ... ... ... | ४९७। १३ |
| न ... ... ... ... | ४३४। ३ |
| नक्ता ... ... ... | ४७३। ५, ६ |
| नक्षत्रगणम् ... ... | १००। ५ |
| नक्षत्रामम्... ... ... | १३७। १५ |
| नदः ... ... ... | १०। ३ |
| नदस्य ... ... ... | १०। ४ |
| नदीस्तुतिः... ... ... | ३३८। १९ |
| ननाः ... ... ... | १५५। १२ |
| नपात् ... ... ... | ४५९। १२ |
| नरराष्ट्रम् ... ... ... | ३३१। ३ |
| नराः ... ... ... | १। ७ |
| नराशंसः ... ... ... | ४६४। १४ |
| नव्यम् ... ... ... | १७९। ८ |
| नसतिः ... ... ... | ३८७। १ |
| नसन्त ... ... ... | ३८६। १० |
| नानाधियः... ... ... | १५५। ८ |
| नाभा ... ... ... | २२८। १२ |

| पदम् | पृ०।पं० |
|---|---|
| नाराशंसवन्ति ... ... | ४९७ । १९ |
| नाराशंसाः... ... ... | २०७ । १ |
| नासत्यौ ... ... ... | १८९ । १५ |
| नासिका ... ... ... | २१० । २ |
| निगदव्याख्याता ... ... | ४१४ । ९ |
| निचुम्पणः ... ९२ । १२. ९४ । १०, ११ | |
| निन्दा ( निन्दाप्रशंसे ) ... | २९९ । ११ |
| निपातभाजः ... ... | २७२ । १४ |
| निपातम् ... २९० । १५. २८५ । ९. ४२४ । १४ | |
| निधानम् ... ... ... | ४१५ । १९ |
| नियुतः ... ... ... | १२४ । ४ |
| नियुत्वान् ... ... ... | १२४ । ४ |
| निरजे ... ... ... | १२५ । ९ |
| निर्णिजः ... ... ... | ९९ । १४ |
| निविस् ... ... ४०५ । ९. ४१९ । २ | |
| निशृत्वाः ... ... १२८ । २. १४४ । ९ | |
| निषपी ... ... ... | ८७ । ८ |
| नूतनैः ... ... ... | २८४ । १२ |
| स्तोत्रम् ... ... ... | २५१ । ११ |
| स्पाणम् ... ... ... | ११९ । ७ |
| नेदीयः ... ... ... | १२४ । ८ |
| नेष्ट्रात् ... ... ... | ४५२ । १९ |
| नैघण्टकम्... ... ... | ९७ । ८ |
| नैचाशाखम् ... ... | २७२ । ८ |
| नैदानाः ... ... १७९ । ९. २९७ । ४ | |
| नैरुक्ताः ... ... ... | ४७९ । ४ |
| नौः... ... ... ... | ११० । १ |

| | |
|---|---|
| पक्वम् ... ...१९।४. १२४।८. २७७।७ | |
| पङ्क्तिः ... ... २७० । ९. १९ । २ | |
| पचत ... ... ... | २०२ । ७ |
| पञ्चहोतृणा ... ... | १०५ । ८ |
| पडभिः ... ... ... | १९ । २ |
| पणीन् ... ... ... | २४८ । १९ |
| पण्डकः ... ... ... | २७२ । ९ |

| पदम् | पृ०।पं० |
|---|---|
| पतति ... ... ... | ९ । १७ |
| पतत्रि ... ... ... | १८ । १७ |
| पत्नीवन्तः ... ... ... | ९४ । ८ |
| पदा ... ... ... | ९२ । ८ |
| पदिः ... ... ... | ९४ । १४ |
| पपुरिः ... ... ... | ११२ । १० |
| पयस्वती ... ... ... | ९ । १० |
| पराके ... ... ... | ५३ । ४ |
| परावतः ... ... ... | ४२४ । २१ |
| पराशरः ... ... २९३ । १३, १५ | |
| परि ... ... ... | १२४ । ५ |
| परिगधिता ... ... | ८० । ३ |
| परिचक्ष्यम् ... ... | ५० । १४ |
| परिदेवना ... ... | २९९ । १० |
| परिदृब्धः ... ... ... | २१० । ९ |
| परिष्वजाते ... ... | २५४ । १४ |
| परोक्षकृताः ... २८५ । ११. २९९ । १ | |
| पर्व ... ... ... ... | २२५ । ४ |
| पविः ... ... ... | २५ । ८ |
| पवित्रम् ... ... ... ४३ । १४—१८ | |
| पशवः ... ... ... | ४९७ । ८ |
| पसः ... ... ... ... ८७ । १८—२० | |
| पाकस्थामा... ... ... | ८० । ४ |
| पाजः ... ... ... | १८४ । १७ |
| पात्रम् ... ... ... | २ । १ |
| पाथः ... १९२ । ७, ८, १०. ४८५ । ९ | |
| पादुः ... ... ... | ९९ । १३ |
| पानीयम् ... ... ... | २७३ । ७ |
| पान्तम् ... ... ... | ४२३ । १ |
| पापः ... ... ... | ९ । १९ |
| पापत्यतेः ... ... ... | ९ । १७ |
| पापासः ... ... ... | २४९ । १८ |
| पिंशतेः ... ... ... | ४७५ । ५ |
| पिता ... ... ... | १९९ । १ |
| पितुमतीम् ... ... | २८० । १२ |
| पिष्टदेवत्यम् ... ... | २०७ । ४ |

| पदम् | पृ०।पं० |
|---|---|
| पिपर्त्ति ... ... ... | ११२ । १० |
| पिपासते ... ... ... | ३७३ । ७ |
| पिपौलिकमध्या ... ... | ३७१ । १४ |
| पिपौलिका... ... ... | ३७१ । १५ |
| पिशुनः ... ... ... | १८३ । ८ |
| पिष्टतमथा... ... ... | ४९० । १ |
| पुरन्धिः ... ... ... | १८९ । १७ |
| पुरु ... ... ... ... | ४७ । ११ |
| पुरुषम् ... ... ... | ४९७ । २ |
| पुरुषविधाः ... ... | ३३१ । ५ |
| पुरुहूतम् ... ... ... | १३५ । १० |
| पुरोगाः ... ... ... | ४९४ । ४ |
| पुरोहितः ... ... ... | ३८३ । ३ |
| पुलुकामः ... ... ... | १४४ । १३ |
| पुष्करम् ... ... ... | ७७ । ७ |
| पुष्यम् ... ... ... | ७७ । ८ |
| पूर्वहूतौ ... ... ... | १२३ । १७ |
| पूरवः ... ... ... | ४०१ । ११ |
| पूर्वे (याज्ञिकाः)... ... | ४०१ । १५ |
| पूर्वैभिः ... ... ... | ३८४ । १२ |
| पूषा... ... ... ... | २९७ । १५ |
| पृथक् ... ... ... | ११५ । ३ |
| पृथिवीस्थानः ... ३२० । ११. ३७८ । २ | |
| पृथिव्याम् (मनुष्याः पशवो देवाः) ३२० । १८ | |
| पृष्ठ्यायाः ... ... ... | ५३ । ९ |
| पृष्ठ्यामयौ ... ... ... | १०० । २ |
| पेलनेः ... ... ... | ३७१ । १५ |
| पेशः (सु) ... ... ... | ४७५ । ५ |
| पौरुषविधिकैः ... ...३३१ । ७—१२. ३३८ । १५—२० | |
| पौष्णानि ... ... ... | ४११ । १४ |
| प्रकलविद् ... ... ... | १५५ । १५ |
| प्रकलाः ... ... ... | १५५ । १९ |
| प्रकृतिभूमभिः ... ... | ३१३ । ९ |
| प्रकृतिसार्वेनाच्छात् ... | ३१३ । १० |
| प्रचेताः ... ... ... | ४५९ । १० |

| पदम् | पृ०।पं० |
|---|---|
| प्रचोदयन्ना ... ... | ४७४ । १७ |
| प्रतदृक्षू ... ... ... | २२८ । १८ |
| प्रतिजोषयेते ... ... | ४८३ । ५ |
| प्रतिधा ... ... ... | ५९ । १४ |
| प्रतिमानानि ... ... | ९७ । ९ |
| प्रतिमिमते... ... ... | ९७ । ७ |
| प्रतिस्वरे ... ... ... | ४०९ । १७ |
| प्रतीकम् ... ... ... | ४३४ । ३ |
| प्रतीची ... ... ... | ४८३ । ४ |
| प्रत्यक्तक्तताः ... ... २८९।४.२९९।१ | |
| प्रत्यक्तदृश्यम् ... ... | ३१३ । ७ |
| प्रत्यङ्गानि ... ... ... | ३१३ । ९ |
| प्रत्यवरोहः... ... ... ४०३।२.४१९।७ | |
| प्रदक्षिणित् ... ... | ४८८ । ११ |
| प्रदिवः ... ... ... | ४८८ । १३ |
| प्रदिशा ... ... ... | ४७० । ४ |
| प्रभरा ... ... ... | २२५ । ३ |
| प्रमगन्दः ... ... ... | २७३ । ५ |
| प्रमदकः ... ... ... | २७३ । ५ |
| प्रयतौ ... ... ... | १७८ । १८ |
| प्रयाजाः ... ... ... ४९९ । ५—११ | |
| प्रयाजानुयाजाः... ... | ४९४ । ९ |
| प्रवल्ल ... ... ... | ३८९ । ९ |
| प्रवस्तिहतम् ... ... | ३९० । ४ |
| प्रवादाः ... ... ...४१२।२.४४०।१० | |
| प्रशंसा (निन्दाप्रशंसे) ... | २९९ । ११ |
| प्रसितिः ... ... ... | १८४ । १८ |
| प्राचीनम् ... ... ... | ४७९ । १७ |
| प्राजापत्याः ... ... | ३०७ । १ |
| प्राणदेवताः ... ... | ४९७ । ९ |
| प्राणाः ... ... ... | ४९७ । ९ |
| प्रातरित्वः ... ... ... | ९९ । ११ |
| प्राम् ... ... ... | ४२९ । २ |
| प्रायोदेवता... ... ... | ३०७ । २ |
| प्रैषाः ... ... ... | १९ । ८ |
| प्रैषिकम् ... ... ... | ४९७ । १९ |

| पदम | पृ०।पं० |
|---|---|
| बकुरः ... ... ... | २४७ । २ |
| बकुरेण ... ... ... | २४८ । १० |
| बत ... ... ... | २५१ । १२ |
| बतः ... ... ... | २५५ । १ |
| बन्ध्यः ... ... ... | ४६८ । ७ |
| बभ्राम् ... ... ... | ६७ । ३ |
| बभस्ति ... ... ... | ६७ । ५ |
| बभूथ ... ... ... | ५० । १६ |
| बभ्रिः ... ... ... | २१० । ८ |
| बर्हणा ... ... ... | २२० । ६ |
| बर्हिः (स्) ... | ४६८ । १५. ४७८ । १६ |
| बलक्षतिः ... ... | २५२ । ८. ४४० । ६ |
| बकुभक्षिवादीनि ... ... | ४१६ । १ |
| बिठम् ... ... ... | २६३ । ८ |
| बीरिटम् ... १२२ । ५. १२३ । | १६. १२४ । २ |
| बुन्दः ... ... ... | २७३ । १० |
| बुसम् ... ... ... | ६६ । १४ |
| बृबदुकथाः ... ... ... | १४४ । ८ |
| बृहत् ... ... ... | ६६ । ८ |
| बृहती ... ... ... | ३७० । ३ |
| बृत्यः ... ... | ४७३ । ३. ४७५ । ६ |
| बैकनाटाः ... ... ... | २५८ । ११ |
| ब्रह्मचर्यम् ... ... ... | २४७ । २ |
| ब्रह्मचारिणः ... ... | १० । ६ |
| ब्रह्मणा ... ... ... | ७७ । ४ |
| ब्रह्मद्विषे ... ... ... | १८३ । ३ |
| ब्रह्मन् ... ... ... | ७७ । ३ |
| ब्रह्महत्याम् (३) ... ... | २५१ । १० |
| ब्रह्मा ... ... ... ... | २२० । १४ |
| ब्राह्मणः ... ... ... | ४३४ । ६ |
| भक्तिमाचम् ... ... | ४६७ । १२ |
| भक्तिसाहस्रम् ... ... | २५४ । २ |
| भगः ... ... ... | २६७ । १६ |
| भन्दतेः ... ... ... | ६ । १६ |
| भन्दना ... ... ... | ६ । १६ |
| भरा ... ... ... ... | २२५ । ३ |
| भर्मणे ... ... ... | ४२३ । २ |
| भसथः ... ... ... | १०५ । ८ |
| भाक्तजीकः ... ... ... | १४५ । १ |
| भागानि ... ... ... | ४११ । १३ |
| भारती ... ... ... | ४७८ । १८ |
| भारद्वाजः ... ... ... | २६३ । ११ |
| भावस्य ... ... ... | २६६ । ८ |
| भावात् ... ... ... | २६६ । १० |
| भिन्दः ... ... ... | २७३ । १० |
| भिषक् ... ... ... | २५५ । ८ |
| भुवः ... ... ... ... | ४२७ । ६ |
| भुवनानि ... ... ... | ४८० । ६ |
| भुवनाय ... ... ... | ४२३ । २ |
| भुवे ... ... ... ... | ४२६ । २ |
| भूतन ... ... ... | २३२ । ६ |
| भूरि ... ... ... | २३२ । ११ |
| भूरिदावत्तरी ... ... | १७८ । १७ |
| भूरिधारे ... ... ... | ६ । १० |
| भर्णिम् ... ... ... | २४४ । १२ |
| भ्रमिः ... ... ... | २२५ । ८ |
| भ्रूणहत्याम् (५) ... ... | २५१ । १० |
| मगन्दः ... ... ... | २७३ । २ |
| मघा ... ... ... ... | ८७ । ६ |
| मणिम् ... ... ... | ४०६ । १७ |
| मत्स्याः ... ... ... | २५१ । ४ |
| मत्स्यानाम् ... ... ... | २५१ । ३ |
| मदाचनः ... ... ... | १० । १ |
| मद्यम् ... ... ... | १ । १५ |
| मधना ... ... ... | ४८७ । ३ |
| मध्यमः ... | २८४ । १६. २६६ । १४ |
| मध्यमधर्मे ... ... ... | ४०८ । ४ |
| मना ... ... ... ... | ३५ । १७ |
| मनामहे ... ... ... | २४६ । १८ |

| पदम् | पृ०।पं० |
|---|---|
| मनुषः ... ... ... | ४५९।९.४७९।१९ |
| मनुषाय ... ... ... | २५८ । ५ |
| मनुष्वत् ... ... ... | ४७८ । १८ |
| मन्तद्दष्यः ... ... ... | २९९ । १४ |
| मन्त्राः ... ... ... | २९७ । २ |
| मन्द्रजिह्वम् ... ... | २४० । २ |
| मन्म ... ... ... ... | २२२ । १९ |
| मन्मानि ... ... ... | ४९४ । ११ |
| मर्य्यादाः (सप्त) ... ... | २५१ । ७ |
| महित्वम् ... ... | १७५ । २. ४०१ । १० |
| महिषाः ... ... ... | ४२४ । १७ |
| माङ्गदः ... ... ... | २७२ । ४ |
| मातरिश्वा ... ... ... | ४२५ । ९ |
| मातुः ... ... ... | ४८७ । १ |
| माध्यन्दिने ... ... ... | ५७ । १ |
| माध्यमिकः ... ... ... | ४८० । १० |
| मायाम् ... ... | १९० । २. ४२७ । १० |
| मासलत् ... ... ... | १०० । ३ |
| मासिमासि ... ... ... | २७८ । ४ |
| माहाभाग्यात् ... ... | ३२० । १२ |
| मिश्रमश्वः ... ... ... | ४५९ । ९ |
| मिश्रावरुणयोः ... ... | ७३ । १५ |
| मिथुनौ ... ... ... | ४३१ । ४ |
| मिमीतिः ... ... ... | ४३१ । ४ |
| मिमाना .. ... ... | ४७९ । १९ |
| मुञ्जीजा ... ... ... | ९९ । १२ |
| मुष्टिः ... ... ... | १३३ । ८ |
| मरुः ... ... ... | १७५ । २ |
| मूर्द्धा ... ... ... | ४२७ । ११ |
| मूलम् ... ... ... | १३७ । ७ |
| मृगम् ... ... ... | १९ । ८ |
| मृगयन्ते ... ... ... | १९ । ८ |
| मृधः ... ... ... ... | २८९ । ९ |
| मृध्रवाचः ... ... ... | २९८ । १ |
| मेदसः (स्) ... ... | ३०३ । ९ |
| मैत्रावरुणः ... ... ... | ७७ । ३ |

| पदम् | पृ०।पं० |
|---|---|
| मैधातिथम् ... ... | ४९७ । १९ |
| यजतस्य ... ... ... | ४९९ । ९ |
| यजते ... ... ... | ४७४ । १९ |
| यजध्वै ... ... ... | ४७९ । १७ |
| यजमानस्य ... ... | ३३९ । १ |
| यजीयान् ... ... ४९८ । १३. ४८० । ७ | |
| यजुः ... ... ... ... | २९७ । ३ |
| यज्ञः ... ... ... | ३३९ । १ |
| यज्ञन्योः ... ... ... | ४३२ । १९ |
| यज्ञात् ... ... ... | ३०७ । १ |
| यज्ञियानाम् ... ... | ४२७ । १४ |
| यम ... ... ... ... | २५५ । १ |
| यक्षः ... ... ... | ४९८ । ११ |
| याचिषम् ... ... ... | २४४ । १४ |
| याज्ञदेवतः ... ... ... | ३०७ । ४ |
| याज्ञिकाः ... ... ... | ३०७ । १ |
| याज्ञे ... ... ... | २३३ । ७ |
| याज्ञेषु ... ... ... | २९९ । ९ |
| यातूनाम् ... ... ... | २९३ । १९ |
| याहि ... ... ... | १० । १ |
| यूपः ... ... ... ... | ४८५ । ११ |
| रंहु ... ... ... ... | २१० । ४ |
| रक्षः ... ... ... ... | १३७ । ५ |
| रजिष्टैः ... ... ... | ४८८ । १४ |
| रणो ... ... ... ... | २७९ । ५ |
| रत्नधातमम् ... ... | ३८३ । ९ |
| रथयुः ... ... ... | २९८ । ९ |
| रथर्यति ... ... ... | २५५ । १० |
| रध्यतिः ... ... ... | २७३ । १० |
| रभ्या ... ... ... | २७३ । ९ |
| रसधारणम् ... ... ... | ३९० । ४ |
| रसादानम् ... ... ... | ३९० । ३ |
| रसानुप्रदानम् ... ... | ३५२ । ५ |
| राः ... ... ... ... | ७३ । १४ |

| पदम् | पृ०।पं० |
|---|---|
| वायामः ... ... ... | २४६ । १८ |
| वाम्यौ ... ... ... | २२८ । १४ |
| विशादमः ... ... ... | १९२ । ११ |
| वृजतेः ... ... ... | १३२ । १२ |
| वृजानाः ... ... ... | १४५ । ३ |
| वृधतः ... ... ... | १० । ४ |
| वृषत् ... ... ... | १९० । ३५ |
| वृषेः ... ... ... | ४८० । ६ |
| वेतः ... ... ... ... | ७३ । ११ |
| वैदग्निप्राम् ... ... | ४२९ । २ |
| वैदग्नी ... ... ... | १००।३. १३२।९ |
| वोधः ... ... ... | १३२ । १ |
| वोधमी ... ... ... | १३२ । ९ |
| वोरुवत् ... ... ... | ८७ । ४ |
| वोढः ... ... ... | ४०३ । १ |
| | |
| व्रततेः ... ... ... | ११९ । १२ |
| व्रता ... ... ... | ११९ । ११ |
| व्रवसूक्तान् ... ... ... | २९५ । १९ |
| व्रम्बकर्मणः ... ... ... | ११९ । ११ |
| व्राङ्व्रम् ... ... ... | २४८ । ८ |
| व्राङ्व्रम् ... ... ... | २४८ । ८ |
| व्राजाः ... ... ... | १७९ । ९ |
| व्रिवृजा ... ... ... | २५५ । ३ |
| व्रुप्तनामकरणः ... ... | २३७ । १४ |
| व्रोष्टः ... ... ... | १३२ । १२ |
| | |
| वंशः ... ... ... | ३५ । ७ |
| वक्षः (स्) ... ... ... | ३५ । १० |
| वचि ... ... ... | ४८८ । ११ |
| वनस्पतिः ... ... ४८५ । २, ९, ११ | |
| वना ... ... ... ... | ८७ । ६ |
| वनुष्यति ... ... ... | ९ । ११ |
| वन्द्यः ... ... ... | ४९८ । ७ |
| वपन्ना ... ... ... | २४८ । ५ |
| वषकः ... ... ... | १९ । २ |

| पदम् | पृ०।पं० |
|---|---|
| वशाः (स्) ... ... ... | १३७ । १३ |
| वसुनम् ... ... ... | ७७ । ८ |
| वसुनवत् ... ... ... | ७९ । १८ |
| वसुनानि ... ... ... | ४९० । ४ |
| वरः ... ... ... ... | १७९ । ३ |
| वराहः ... ... २७ । ११—१५ | |
| वराहवः ... ... ... | २७।१७ |
| वरिष्ठम् ... ... ... | १ । १२ |
| वरीयः ... ... ... | ४७० । ८ |
| वर्षः ... ... ... ... | ५१ । ४ |
| वर्षकर्मणा ... ... २९९ । १४ | ४१२ । ३ |
| वलः ... ... ... | १२५ । ६ |
| ववक्षे ... ... ... | ५० । १४ |
| वषट् ... ... ... | ४९७ । १४ |
| वष्टि ... ... ... | १ । १० |
| वसिष्ठः ... ... ... | ७७ । ३ |
| वसुना ... ... ... | ९९ । ९ |
| वसूनि ... ... ... | १७१ । ८ |
| वसूयवः ... ... ... | १५५ । १३ |
| वसूयुः ... ... ... | २९८ । ५ |
| वसोः ... ... ... | ४७० । ४ |
| वक्षयः ... ... ... | ४५३ । १५ |
| वाः (र्) ... ... ... | ९७ । १० |
| वागाभ्रणीयम् ... ... | २९५ । १९ |
| वाचि ... ... ... | ४९४ । ५ |
| वाजगन्ध्यम् ... ... | ७९ । १९ |
| वाजपस्त्यम् ... ... | ७९ । १८ |
| वाजिनम् ... ... ... | २९४ । १५ |
| वाणीः ... ... ... | १३५ । १० |
| वातायम् ... ... ... | २५५ । ५ |
| वाधूयम् ... ... ... | ४९७ । १५ |
| वामम् ... २३२ । ११. २९७ । १९ | |
| वायः ... ... ... | २५५ । ८ |
| वायव्यानि ... ... ... | ४४७ । ५ |
| वारणः ... ... ... | १०२ । ४ |
| वार्यम् ... ... ... | १ । ११ |

| पदम् | पृ०।पं० |
|---|---|
| वाक्पतिः ... ... ... | १ । १० |
| वाजे ... ... ... | १२३ । १६ |
| वाजेषु ... ... ... | १ । १० |
| वासिष्ठम् ... ... ... | ४९७ । १५ |
| वाहिष्ठः ... ... ... | १ । ६ |
| विकटः ... ... ... | २६३ । ६ |
| विजङ्घपः ... ... ... | १०५ । १० |
| विजामातुः... ... ... | १७९ । २ |
| वितरम् ... ... ... | ४७० । ७ |
| वित्ते ... ... ... | १७५ । २ |
| विदथानि ... ... ... | १५५ । १४ |
| विदथेषु ... ... ... | ४७६ । १७ |
| विद्वान् ... ... ... | ४९० । ४ |
| विन्धे ... ... ... | ९२० । ४ |
| विभक्तिसूक्तम् ... ... | ३४४ । १० |
| विरप्शी ... ... ... | २३९ । १३ |
| विराट् ... ... ... | ३७१ । १२ |
| विवस्वतः ... ... ... | ४२५ । ४ |
| विवस्वान् ... ... ... | ४२५ । ५ |
| विशः ... ... २३२ । १२. २९८ । १ | |
| विशपती ... ... ... | १२३ । १६ |
| विशाम् ... ... ... | १२३ । १७ |
| विश्वमिन्वाः ... ... | ४७३ । २ |
| विश्वा ... ... ... | ४८० । ७ |
| विश्वान् ... ... ... | २४८ । १३ |
| विश्वानरः ... ... ... | २९८ । १३ |
| विश्वेदेवाः ... ... ... | ७७ । ५ |
| विष्णुः ... ... ... | ४७ । १७ |
| विष्पितः ... ... ... | २२५ । ९ |
| विष्फुरः ... ... ... | १३७ । १२ |
| वीतये ... ... ... | ९४ । ८ |
| वीरुधः ... ... ... | १३७ । १४ |
| वीळयध्वं ... ... ... | ४५३ । १५ |
| वीलयतिः ... ... ... | ८७ । ७ |
| वीलिता ... ... ... | ८७ । ६ |
| वृन्दः... ... ... ... | २७२ । १० |

| पदम् | पृ०।पं० |
|---|---|
| वृकः... ... ... ९९ । ९. १०० । ७. १०२ । ३, ९. २४८ । ७ | |
| वृजनम् ... ... ... | २३९ । १३ |
| वृत्रवधः ... ... ... | ३५३ । ८ |
| वृषवाजिनी ... ... | १०२ । ६ |
| वृषदक्षिणम् ... ... ... | ४०१ । ११ |
| वृन्दम् ... ... ... | २७७ । ९ |
| वृन्दारकः ... ... ... | २७७ । १० |
| वृषभस्य ... ... ... | ४०१ । १० |
| वेदः स) ... ... ... | २७२ । १६ |
| वैकुण्ठः ... ... ... | २९५ । १६ |
| वैद्युतः ... ... ... | ४०८ । ३ |
| वैश्वदेवानि... ... ... | ४११ । १५ |
| वैश्वानरः ... ... ... २९८।१३—१५. २९९ । १४. ४०८ । २. ४१९ । २ | |
| वैश्वानरीयाः ... ... | ४११ । १६ |
| वैश्वानरीयेण ... ... | ४०३ । ३ |
| वैश्वानि ... ... ... | ४११ । १५ |
| वोचः ... ... ... | ४९० । ९ |
| वोचत् ... ... ... | ४३२ । १८ |
| वोचम् ... ... ...४०१।८,८।२० | |
| वोचे... ... ... ... | ४७ । ११ |
| व्यचस्वती ... ... ... | ४७२ । १७ |
| व्यञ्जनमाज्यम् ... ... | ३७३ । ५ |
| व्यसिसीत ... ... ... | ४९४ । ४ |
| व्रजः ... ... ... | १३५ । ७ |
| व्रततिः ... ... ... | २५५ । ४ |
| व्रन्दति ... ... ... | ८० । १० |
| व्रन्दौ ... ... ... | ८० । १० |
| व्राः ... ... ... ... | १९ । ८ |
| व्रात्याः ... ... ... | १९ । ८ |
| व्रीलयतिः (व्रीडयतिः) ८७ । ७. २७३ । ८ | |
| शकटम् ... ... ... | २३२ । ८ |
| शक्तिभिः ... ... ... | ४२९ । ४ |
| शक्राति ... ... ... | ६६ । १६ |

| पदम् | पृ०।पं० |
|---|---|
| अतपविचाः ... ... ... | ४३ । १७ |
| अपथाभिश्रापौ ... ... | २९६ । ६ |
| अब्दवेधिनौ ... ... | २७६ । ७ |
| अमयति ... ... ... | ६६ । १६ |
| अमिता ... ... ... | ४८५ । ७ |
| अम्बः ... ... ... | ११२ । १२ |
| अम्बरम् ... ... ... | ४०१ । १४ |
| अम्भुः ... ... ... | १९ । ७ |
| अरः ... ... ... ... | ३२ । १३ |
| अरणम् ... १०५ । १२. ४०८ । ३ | |
| अराहः ... ... ... | २६८ । ३ |
| अरीरोपशमनः ... ... | ४०८ । ५ |
| अरुषान् ... ... ... | ६६ । १२ |
| अर्याः ... ... ... | ३२ । १३ |
| अश्रमानः ... ... ... | २७५ । ४ |
| अस्ते ... ... ... ... | ४०३ । ३ |
| आकपणिः ... ... ... १८।१५.७३।१३ १२४ । ५.३७८।६.४०८।१.४२९।६. ४४६ ।११. ४५९ । ११,१५. ४६५ । १. ४७३।४.४८०।११.४८५।१२ ४८७।५. | |
| आकल्यः ... ... ... | २५५ । ९ |
| आखाः ... ... ... | २७३ । ९ |
| आशदानः ... ... ... | २०४ । १ |
| आशिषः ... ... ... | ५१ । ३ |
| आशिपिविष्टः ... ... ... | ४७ । १७ |
| आश्रे ... ... ... | २१० । १ |
| आशो ... ... ... | ६६ । १५ |
| आशिरिञ्चिठः ... ... | २६३ । ८ |
| आशीतिः ... ... ... | ११० । ३ |
| आ ... ... १८।१६.६७।९.१२९ । ८ | |
| आक् ... ... ... | १२९ । ९ |
| आक्तपिशस्य ... ... ... | ४७५ । ४ |
| आक्तम् ... ... ... | ४७५ । ४ |
| आचन्तम् ... ... ... | १९ । ४ |
| आचिः ... ... ... १२९ । १२,१३ | |
| आज्यमानाः ... ... ... | ४७२ । १७ |

| पदम् | पृ०।पं० |
|---|---|
| आतक्षधः ... ... ... | २०३ । १२ |
| आतश्वत् ... ... ... | ९२ । ९ |
| आतक्कगोमयम् ... ... | ४०९ । १७ |
| आतृण्णस्य ... ... ... | ८७ । ५ |
| आतूर्पम् ... ... ... | १७९ । ७ |
| आतृणाति ... ... ... | ३२ । १४ |
| आतेकुः ... ... ... ११५।२.४३२।१७ | |
| आतेपः ... ... ... | ५० । १७ |
| आतोन्ति ... ... ... | ६० । १८ |
| आत्मशा ... ... ... | ६७ । ९ |
| आवस्यानि ... ... ... | ११५ । १ |
| आयन्नः ... ... ... | १७१ । ८ |
| आवृष्टी ... ... १८५ । ११. १८९ । १३ | |
| आवृष्टीवरीः ... ... ... | २३२ । ९ |
| आवृत्री ... ... ... | १०५ । १५ |
| आवसनस्य ... ... ... | ८७ । ४ |
| आवाम् ... ... ... | १८ । १५ |
| संयतते ... ... ... | ४१० । १ |
| संविज्ञानभूतम् ... ... | ३७३ । २ |
| संसङ्गम् ... ... ... | ४१० । २ |
| संस्थानैकत्वम् ... ... | ३२० । १७ |
| सखायः ... ... ... | ४३१ । १७ |
| सचन्ते ... ... ... | ४०१ । १९ |
| सचा ... ... ... | ३५ । १४ |
| सचाभुवा ... ... ... | ३५ । १४ |
| सचावहै ... ... ... | ५३ । ५ |
| सजात्यम् ... ... ... | १९३ । ११ |
| सजोषाः ... ... ... | ४९८ । ७ |
| सञ्चयः ... ... ... | ११९ । ९ |
| सत्ता ... ... ... ... | १९ । ९ |
| सत्वभिः ... ... ... | २९३ । ८ |
| सत्वैः ... ... ... २९३ । १०,१९ | |
| सदताम् ... ... ... | ४७४ । १९ |
| सदनात् ... ... ... | ४१५ । १७ |
| सदन्तु ... ... ... | ४७९ । १ |

| पदम् | ष्ट०।पं० |
|---|---|
| सदान्वे ... ... ... | २९२ । १ |
| सधमादम् ... ... ... | ४३२ । १७ |
| सनये ... ... ... | २३२ । ४ |
| सनुतः ... ... ... | १९२ । ४ |
| सपः ... ... ... | ८७ । ९ |
| सपतेः ... ... ... | ८७ । ९ |
| सप्रथाः ... ... ... | १९२ । १३ |
| समनम् ... ... ... | ३८९ । १२ |
| समम् ... ... ... | १०९ । २ |
| समस्य ... ... ... | १०९ । १५ |
| समित् (ध्) ... ... ... | ४५९ । ११ |
| समिथे ... ... ... | ५१ । ५ |
| समिधः ... ... ... | ३८९ । १० |
| समिधा ... ... ... | १४५ । २ |
| समुद्रात् ... ... ... | ३८७ । ४ |
| सम्मिणक् ... ... ... | १३२ । १३ |
| सम्प्रति ... ... ... | २३७ । १४ |
| सयोगैकत्वम् ... ... | ३२० । १७ |
| सरस्वती ... ... ... | ४७८ । १९ |
| सरांसि ... ... ... | ५७ । ३ |
| सर्वगणम् ... ... ... | २८० । १७ |
| सर्वाः ... ... ... | ३८७ । ५ |
| सल्लूकम् ... ... ... | १३७ । ८ |
| सवना ... ... ... | ११५ । ९ |
| सवने ... ... ... | ५७ । २ |
| सवितारम् ... ... ... | ४३४ । ११ |
| सवीमनि ... ... ... | १९२ । १२ |
| ससम् ... ... ... | १९ । ४ |
| सक्थिम् ... ... ... | १ । ५ |
| सक्थ्नूलम् ... ... ... | १३७ । ७ |
| सहसः ... ... ... | ११५ । १० |
| सहस्यूचम् ... ... | ४४९ । १९ |
| सहसःसूनुम् ... ... | ४४९ । १९ |
| सहसोयचम् ... ... | ४४९ । १९ |
| सांशयिकः ... ... ... | ३५० । ५ |
| साकम् ... ... ... | ५९ । १४ |

| पदम् | ष्ट०।पं० |
|---|---|
| साक्षम् ... ... ... | २०३ । १० |
| साधुः ... ... ... | २७९ । १० |
| साम (न्) ... ... ... | ३९७ । ३ |
| सामि ... ... ... | २४० । ४ |
| सारथति ... ... ... | ३२ । १२ |
| सावित्राणि ... ... ... | ४११ । १४ |
| सिंहम् ... ... ... | ४८३ । १० |
| सिनम् ... ... ... | ३५ । १२ |
| सिनाति ... ... ... | ३५ । १२ |
| सिन्धवः (सप्त) ... ... | १२२ । ३ |
| सिन्धुः ... ... ... | १२२ । ३ |
| सिन्धुम् ... ... ... | ३९४ । १२ |
| सीम् ... ... ... | १२४ । ५ |
| सुक्रतवः ... ... ... | ४९९ । १० |
| सुगान् ... ... ... | १३५ । ८ |
| सुगुः ... ... ... | ९९ । ८ |
| सुजिक्ष ... ... ... | ४९४ । १० |
| सुतेषु ... ... ... | १०५ । ७ |
| सुदत्रः ... ... ... | १९३ । १३ |
| सुदानवः ... ... ... | २४० । ५ |
| सुदेवः ... ... १२१ । १९-१२२ । २ | |
| सुपर्णः ... ... ... | ४२४ । ७ |
| सुप्रया ... ... ... | १२३ । १९ |
| सुप्रायण ... ... ... | ४७३ । १ |
| सुमत् ... ... ... | २३२ । १५ |
| सुरापानम् (५) ... ... | २५१ । ११ |
| सुरुक्के ... ... ... | ४७५ । ३ |
| सुविदत्रः ... ... ... | १९३ । १४ |
| सुविदत्रम् ... ... ... | ३५० । ८ |
| सुविदत्रियेभ्यः ... ... | ३५० । २ |
| सुशिप्रम् ... ... ... | २०९ । १८ |
| सुष्टुतिम् ... ... ... | ३२० । ४ |
| सुष्वयन्ती ... ... ... | ४७४ । १९ |
| सूक्तभाजः ... ... ... | २७२ । १३ |
| सूनो ... ... ... | ११५ । १० |
| सूमथम् ... ... ... | २७९ । ३ |

| पदम् | पृ०।पं० |
|---|---|
| स्तृर्ने ... ... ... | १९८ । १३ |
| स्तृर्भिम् ... ... ... | १२२ । ४ |
| स्तृर्णम् ... ... ... | १७१ । १० |
| स्तृणिः ... ... ... | १२४ । ७ |
| स्तृप्रः ... ... ... | २०९।१९, १७ |
| सोमपानेन ... ... ... | ४४० । ११ |
| सामानम् ... ... ... | १८१ । १० |
| सौर्यः ... ... ... | ४१८ । १९ |
| सौर्यवैश्वानरम् ... | ४०५।८, १०.४१९।९ |
| सौर्यवैश्वानरो ... ... | ४०५।९.४१९।३ |
| सौर्याणि ... ... ... | ४११ । १४ |
| स्कन्धः ... ... ... | २१५ । १३, १४ |
| स्कन्धांसि ... ... ... | २१५ । १२ |
| स्तवत् ... ... ... | १०५ । ७ |
| स्तवे ... ... ... ... | २३९ । १३ |
| स्तिपाः ... ... ... | २१५ । ५ |
| स्तियाः ... ... ... | २१५ । ४ |
| स्तेयम् (१)... ... ... | २५१ । १० |
| स्तोचियम् ... ... ... | ४०३ । ३, ९ |
| स्तोभति ... ... ... | ३७० । ८ |
| स्थाः ... ... ... | १८ । १९ |
| स्थूरः ... ... ... | २३७ । १२ |
| स्थौलाष्ठीविः ... ... | ३७८ । ४ |
| स्नाताय ... ... ... | ३७३ । ९ |
| स्नग्नः ... ... ... | ८७ । १९ |
| स्नग्नतेः ... ... ... | ८७ । १८, १९ |
| स्फुरत् ... ... ... | ९२ । ८ |
| स्वम् ... ... ... | १७९ । ९ |
| स्वाक्षः ... ... ... | १७९ । ५ |
| स्वोनम् ... ... | ४७० । ९. ४७८ । १९ |
| स्वः (र्) ... ... ... | २२।११.९९।१४ |
| स्वद्याः ... ... ... | ४७ । १९ |
| स्वदन्ति ... ... ... | ४९९ । १० |
| स्वदन्तु ... ... ... | ४८५ । ७ |
| स्वधया ... ... ... | ४२३ । २ |
| स्वपनम् ... ... ... | १९ । ५ |

| पदम् | पृ०।पं० |
|---|---|
| स्वपसः ... ... ... | ४७८ । १९ |
| स्वम् ... ... ... | १०५ । १५ |
| स्वयशस्त्व ... ... ... | ४८३ । ७ |
| स्वरणम् ... ... ... | १८१ । ९ |
| स्वर्विदि ... ... ... | ४२९ । १ |
| स्वसराणि ... ... ... | ३२ । ११ |
| स्वस्तये ... ... ... | १२३ । १७ |
| स्वस्तिवाहम् ... ... | ११८ । ९९ |
| स्वाहा ... ... ... | ४९० । ५ |
| स्वाहाकृतम् ... ... | ४९४ । ५ |
| स्वाहाकृतयः ... ... | ४९० । ५ |
| हथात् ... ... ... | २५१ । १ |
| हन् ... ... ... ... | २१० । २ |
| हन्नोः ... ... ... | १३५ । ८ |
| हरयः ... ... ... | ४१५ । १८ |
| हरयाणः ... ... ... | ८० । ८ |
| हर्य्यतिः ... ... ... | १८७ । २ |
| हवनश्रुतः ... ... ... | २५१ । २ |
| हवानाम् ... ... ... | १ । ९ |
| हविर्भाजः ... ... ... | ३७२ । १३ |
| हविष्मान्तम् ... ... | ४२३ । ३ |
| हविष्मान्तीयम् ... ४०५ । १०. ४१९ । ९ | |
| हव्या ... ... ... | ४९९ । ११ |
| हस्तचुती ... ... ... | ५५ । १५ |
| हासमाने ... ... ... | १९ । २ |
| हिनोता ... ... ... | २३२ । ४ |
| हिमेन ... ... ... | २८० । १४ |
| हिरण्यपर्णे ... ... ... | ४८८ । १० |
| हेतिः ... ... ... | १३७ । ११ |
| होतः ... ... ... | ४८० । ७ |
| होता ... ... ... | ३२० । १४ |
| होतारम् ... ... ... | २८२ । ५ |
| होतुः ... ... ... | ४२४ । ४ |
| होत्रजपः ... ... ... | ४२४ । ९ |

## ॥ मूल-पाठशुद्धिः ॥

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अ० | पा० | ख० | ... | पं० | ... | अशुद्धम् | ... | शुद्धम् |
| ५ | २ | ४ | ... | ६ | ... | पराक्रान्त | ... | पराक्रान्ते |
| ,, | ३ | ३ | ... | ८ | ... | कौरयाणः | ... | कौरयाणः |
| ,, | ,, | ४ | ... | ३ | ... | शेषयितुः | ... | शोषयितुः |
| ,, | ४ | ४ | ... | ९ | ... | पुनरा॑श्रित् | ... | पुनरा॑श्रितं |
| ,, | ,, | ८ | ... | १० | ... | सङ्त्राम | ... | सङ्ग्राम |
| ,, | ,, | १० | ... | ४ | ... | वीरिट | ... | वोरिट |
| ६ | १ | १ | ... | २ | ... | मोषधीभ्यस्त्वं | ... | मोषधीभ्यस्त्वं |
| ,, | ,, | ,, | ... | ८ | ... | शाचते० | ... | शोचते० |
| ,, | ,, | ४ | ... | १ | ... | मध्य | ... | मध्यं |
| ,, | ३ | २ | ... | ४ | ... | हन्तेनि० | ... | हन्तेर्नि० |
| ,, | ,, | ३ | ... | १६ | ... | शुष्टीति | ... | अुष्टीति |
| ,, | ,, | ७ | ... | १५ | ... | ऽप्रतिस्कृतो | ... | ऽप्रतिष्कृतो |
| ,, | ४ | १ | ... | ५ | ... | ०न्नासिका | ... | ०र्नासिका |
| ,, | ,, | ८ | ... | ४ | ... | कूर | ... | क्रूर |
| ,, | ५ | १ | ... | २ | ... | वज्यृचीषमः | ... | वज्रृचीषमः |
| ,, | ,, | ,, | ... | ३ | ... | वज्यृचा | ... | वज्रृचा |
| ७ | १ | ३ | ... | २ | ... | अल्यश | ... | अल्पश |
| ,, | ,, | ,, | ... | १३ | ... | केवलादो | ... | केवलादौ |

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अ० | पा० | ख० | ... | पं | ... | अशुद्धम् | ... | शुद्धम् |
| ,, | ,, | ,, | ... | १५ | ... | मन्त्रदृष्टयो | ... | मन्त्रदृष्टयो |
| ,, | २ | १ | ... | २ | ... | °दैकैकस्या | ... | देकैकस्या |
| ,, | ,, | २ | ... | ४ | ... | बाह्व | ... | बाह्व |
| ,, | ६ | ८ | ... | १ | ... | मुच्चैत्यव | ... | मुच्चैत्यव |
| ,, | ७ | ५ | ... | २ | ... | यत्तूर्णिश्वरति | ... | यत्तूर्णिश्वरति |
| ,, | ,, | ७ | ... | ७ | ... | वनिवा | ... | वनिर्वा |
| ८ | २ | ६ | ... | ६ | ... | किं देवता: | ... | किन्देवता: |

---

## ॥ मूल-पाठभेदपूर्त्तिः ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| अ० | पा० | ख० | ... | पं० | | (मुद्रितातिरिक्ताः पाठाः) |
| ५ | ४ | ५ | ... | २ | ... | "द्वेषसोऽहति०"—इति ङ-प्रभृतिषु। |
| ६ | ५ | ५ | ... | २ | ... | "बलादतीतो"—इति ङ-प्रभृतिषु। |
| ७ | २ | १ | ... | ८ | ... | "आग्नावैष्णवं हविर्न"—इति ङ-प्रभृतिषु। |

---

00044435

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018